Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

11·205

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पुरीसंस्कृतविद्यासमितिसचिवैः

श्री. ति. वे. विश्वनाथार्यैः

(14, पूर्वमाडवीथी, मद्रास्-4)

प्रकाशिता

१९७१

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sa i475.8 Kridanta Rupamala

RaSa Ramasubha Sastri

II.205

But thought nor word can seize eternal truth

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृदन्तरूपमाला

मद्रपुरी-संस्कृतविद्यासमितेः कलाशालायां प्रधानाध्यापकैः
शास्त्ररत्नाकरादिबिरुदालङ्कृतैः पण्डितवर्यैः कीर्तिशेषैः
श्रीमद्भिः श. रामसुब्रह्मण्यशास्त्रिभिः
उपक्रान्ता

तदादिष्टेन मार्गेण तच्छिष्याभ्यां
श्री श्रीवत्साङ्काचार्य-श्रीप्रणतार्तिहरशर्मभ्यां
परिपूरिता

Sri 495.8
R 852
II. 205

श्रीमतां चे. प. रामस्वाम्यार्याणां, ना. रघुनाथार्याणां
डा० वे. राघवार्याणां च
आमुखैः सहिता

SRI AUROBINDO LIBRARY PONDICHERRY (India)

पञ्चमभागात्मिका

मद्रपुरीसंस्कृतविद्यासमितिसचिवैः
श्री. ति. वे. विश्वनाथार्यैः
(14, पूर्वमाडवीथी, मद्रास्-4)
प्रकाशिता
१९७१

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रथमावृत्तिः १९७१

Sai 72-020.

© Samskrit Education Society, Madras-4

Published with the aid of
Govt. of India, Ministry of Education.

Indian : Rs. 10/- each volume ; Rs. 50/- for full set.
Foreign : Full set $ 15 ; £ 6.

भारतदेशे मूल्यम् : प्रतिभागम् १० रू. ; सर्वभागानां मूल्यम् ५० रू.
देशान्तरेषु : सर्वभागानां मूल्यम् : १५ षिलिंग् ; ६ पौन्.

श्री भारती विजयम् प्रेस्, मद्रास्–५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

GENERAL PREFACE

The Samskrit Education Society is one of the latest efforts made by lovers of Sanskrit in Madras to eheck the erosion or elimination of Sanskrit which is imminent in the different sectors of its studies in this part of the country, notwithstanding that South India has been a stronghold of this language in the past amongst all those who prize intellectual stimulation and spiritual inspiration. The Society was started with the blessings of H. H. Sri Chandrasekharendra Sarasvati, Sankaracharya of Kanchi Kamakoti Peetha, on the occasion of the Golden Jubilee of his accession to the Peetha. I have had the pleasure of and privilege of being connected with its management from the inception.

In spite of the difficulties of the present situation and the many causes demanding the help and patronage of the philanthropists, we may assert that during the short period of our existence, we have made fairly steady progress, although it is not spectacular. In Pettai, near Madras, we have a large area of land where our buildings are coming up and a Sanskrit advance study centre is functioning. We have been concentrating in training young Pandits already qualified in one Sastra to become equipped in another Sastra. We have started a few research projects and publication schemes : a *Concordance of Verbal Derivatives*, a *New Model Sanskrit Grammar* and a *Dictionary of Indeclinables*. Another undertaking of our is the book on *The Teaching of Sanskrit*. This and the *Concordance af Verbal Derivatives*-Part I I had the pleasure of releasing to the public last year.

The maintenance and promotion of Sanskrit study in the schools face two difficulties today, one stemming from the language formulae of the Government which is explicitly unfavourable to Sanskrit and secondly, the lack of improved methods of making its learning easy and popular. The Society may well congratulate itself in having addressed itself to the latter problem and brought out these books written by able and experienced scholars like Pt. S. Ramasubba Sastrigal and Prof. K. Rama Varma Raja. On behalf of the Society, I must also express my appreciation of the services rendered to the Society by Dr. V. Raghavan who has been in general charge of these and other research projects and publications of the Society. What he and others have been

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

doing in this part of the country, in the midst of all sorts of difficulties, must evoke the admiration of Sanskritists all over the country.

These and other research projects and the teaching work of the Society have been receiving assistance from the Central Sanskrit Board which deserves all praise for its efforts to rehabilitate in the country Sanskrit, the bedrock of Indian culture.

I wish all success to Sri T. V. Viswanatha Aiyar, Secretary of the Society, who has been building up the resources of the Society and managing its affairs so well. I am quite sure that the Sanskrit Education Society will ere long emerge as an active advanced Centre of a University type for Sanskrit in the South.

C. P. RAMASWAMI AIYAR
Founder-President,
The Sanskrit Education Society, Madras.

July, 1965.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

FOREWORD

The Sanskrit Education Society has great pleasure in placing before the public the fifth and concluding volume of its monumental compilation, *Kṛdanta-rūpa-mālā*, work on which was begun eleven years ago with the blessings of H. H. Sri Chandrasekharendra Saraswati Śrīpādāh, Jagadguru Śankaracharya of the Kānchi Kāmakoti Peetham. The plan of the work has been explained in full in the prefaces, both in English and in Sanskrit, contributed by the editors to the earlier volumes. Verbs play a crucial part in every language. The Sanskrit verb is exceptionally versatile. From the roots, which are roughly two thousand in number, and their modified forms, are derived by the addition of what are called kṛt. suffixes, the bulk of the declinable nouns, adjectives, participles, infinitives and gerunds in the language, as well as indeclinables. How large a class these verbal derivatives, which are known as primary nominal bases, are, may be simply illustrated by reference to two verses of the Ramayana which almost everybody knows. In the first verse of the first canto of the *Bālakanda*, almost every word except the verb that forms the predicate is a *kṛdanta*; while in the equally well-known *mānishāda* verse a substantial number of words are similarly derived.

The number of forms to be mastered by the student is formidably large. And as the forms are derived from verbal roots belonging to all the ten conjugations, they display a bewildering variety of peculiarities. So much so this department of Sanskrit grammar may be fairly regarded as being only less difficult than the conjugation of verbs. But it must be remembered that this mode of evolving nouns (mostly action-nouns and agent-nouns) from verbs has contributed greatly to the enrichment of the vocabulary. This resourcefulness in word-formation, combined with the advantage of syntactic precision which goes with an inflected language, has endowed the Sanskrit language with the copiousness of diction, compactness and brevity of expression, and clarity of style, which give it its unique place among the great languages of the world.

While the plea, which is often heard, for simplifying the language overlooks this important fact, the need to facilitate its mastery by the provision of all legitimate aids has been kept constantly in mind by the Sanskrit Education Society. It is a matter of great gratification to it that this concordance of verbal derivatives, which has been completed within a reasonable time, considering the stupendousness of the project, has been widely welcomed both by scholars and by practising writers as a valuable work of ready reference. The work is no mechanical compilation. As it was considered unnecessary to repeat in full the forms derived from all the verbal roots which evolve their derivatives in the same way, only seven hundred roots have been dealt with in all fullness. In regard to the rest the analogous root is clearly indicated in every case; while such variations from the norm as there might be in particular forms are fully noted, with citation of

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

authority and illustrative references to the usage of poets or to such works as the *Bhatti Kāvya* and the *Dhatu Kāvya*, which were designed to illustrate rules of grammar. In regard to disputed points, the different views are set out briefly, and the editors' preference indicated with supporting arguments.

By bringing to this task profound knowledge, keen judgement and high editorial integrity, the late Śāstraratnakara Panditaraja S. Ramasubba Sastri, the first Head of the Department of Teaching and Higher Studies in the Society's Institution, who was also the first compiler and editor of this work, set up a standard which has been an inspiration as well as a challenge to his successors. He passed away shortly after the publication of the first volume. But he had compiled the greater part of the work. And the two pupils who had received from him, under the auspices of the Society's higher education centre at Pettai, a thorough grounding in *Vyākaraṇa* after having fully qualified themselves in Nyāya, and had been his assistants in the preparation of the first volume, were able to continue the work along the lines laid down by him. Under the general supervision of Dr. V. Raghavan, to whom goes the credit for proposing the undertaking of this work in the first instance, and with the advice and help of outstanding experts in the field, they have now completed the work. These two scholars, Pandit V. Srivatsankacharya and Pandit T. K. Pranatharthiharan have fully justified the high expectations their *guru* had formed of them. Pandit Srivatsankan, to whom has fallen the major share of the basic work of preparation of the material is, besides being a proficient in Nyāya and Vyākarana, well instructed in Mīmāmsa and the Viśishtādvaita Siddhanta, and has a good knowledge of Tamil and Telugu and a working knowledge of Hindi and English. On Sri Pranatharthiharan, who too is a proficient in the two Sastras, devolved the main responsibility for seeing the work through the press.

The Society is shortly bringing out a comprehensive *Avyaya Kośa*. Plans have been made for publication of other volumes which may serve as easy introductions to other Sāstras, for republication of important works that are out of print and for bringing out in print valuable material that still remains in manuscript. In the tasks of higher teaching, research and publication, which the Society has set before itself, it hopes it will continue to receive the fullest co-operation of scholars and of enlightened and public-spirited Sanskrit lovers and philanthropists.

N. RAGHUNATHAN,

May, 1971. (*President of the Society*).

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PREFACE

The authorities of the Samskrit Education Society have great pleasure in placing in the hands of Sanskrit scholars and students the fifth and last volume of their first large and long-term undertaking, the Concordance of Verbal Derivatives called the *Kṛdanta-rūpa-mālā*. Work on this last volume was interrupted as the Society and the same printers were preoccupied for a time with the bringing out of a fresh edition of the Alaṁkāra work, the *Pratāparudrīya* of Vidyānātha, a prescribed text for Sanskrit courses, which was urgently required by students and teachers.

As in the case of previous volumes, I have supervised the work and read the proofs with the compilers and have ensured that the plan of the earlier Volumes has been kept in the fifth also, except for such economisation as was possible and justifiable in the citing of forms. Special formations pertaining to certain Roots have been given, but in the case of the common formations which could be easily made out on the analogy of Roots which behave in the same manner and have already been dealt with elaborately, references to these earlier Roots are given, without setting forth the actual forms. Essential data on the class, nature and meanings of the Roots and characteristic formations, as set forth in special Sūtras of Pāṇini, and citations of authorities for the rules and illustrative usages in literature have been continued in this Volume also.

Some additional aids to the study of the Roots recently published have also been used e.g. the *Pāṇinīya-dhātupāṭha-samīkṣā* by Dr. Bhagirath Prasad Tripathi, Varanaseya Sanskrit University and the Sanskrit version of Canna Vīra's Kannada work on Kāśakṛtsna's Dhātupāṭha (*Kāśakṛtsna-Dhātuvyākhyānam*, Ajmer) by Sri Yudhishthira Mimamsaka.

The bibliography of works, ancient and modern, utilised for this project has been given in the first volume. Several other publications have also been consulted during the course of the work in the subsequent volumes, and these are cited without any abbreviation symbols. Among all these, three texts should be specially

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

mentioned as having been the main stay of our compilation, the *Kṣīrataraṅgiṇī*, the *Daiva* and *Puruṣakāra* and above all, the *Mādhavīya Dhātuvṛtti*.

In the Preface to the first volume, I had mentioned two earlier compilations in this field. During the further stages of the work, I came across a third work compiled in Bengali, 'Dhātusāra-kṛdanta-samgraha' by Abalakantasena, brought out in Calcutta in 1886, but this could not be procured.

In these five volumes, 2039 Roots have been dealt with. All the Roots read under the ten Vikaraṇas, as also the few that occur in the Sūtras and are hence referred to as *Sautra-dhātus* have been completely included. But the additional Roots enumerated under Kaṇḍvādis, Nāmadhātus, Yaṅluks and Nijantas in some of their varieties have been omitted.

It is a matter of great satisfaction to the compilers, Pandits V. Srivatsankacharya and T. K. Pranatartiharan who have continuing in the footsteps of their teacher, the late Pt. S. Ramasubba Sastrigal, that they have successfully completed this work of over 1500 pages.

The satisfaction is no less for me that one of the several projects which I had been evolving in my mind had reached fruition. The Samskrit Education Society, I thought, was the proper body, which in justification of its name, as well as in its efforts to meet the need and requirements of the Sanskrit situation today, could chalk out its own line of service to the learning of Sanskrit by producing such tools of ready use for mastering this language. Shortly our Dictionary of Indeclinables (*Avyaya-kośa*) will also be ready. In addition to some more similar works which would help serve Sanskrit grammar on the plate, so to say, the Society should turn its attention to the task of compiling similar digests for facilitating the reading and understanding of the Śāstras and following their recondite methodology and technique of exposition.

Madras
17—4—1971

V. RAGHAVAN

Sai 72-020

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शास्त्ररत्नाकर कुलपति वैयाकरणसार्वभौम

ब्रह्मश्री पण्डित श. रामसुब्रह्मण्यशास्त्रिवर्याः

श्रीरामसुब्रशास्त्रिप्रसृष्टमाला कृदन्तरूपाणाम् ।
तच्छिष्यैरस्माभिः प्रग्रथिता सुमनसां प्रीत्यै ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1446) " लक्ष दर्शनाङ्कनयोः"

(X-चुरादिः-1538. सक. सेट्. उभ.) [अ]

' अङ्कनम् = चिह्नम् ' इति क्षीरस्वामी ।

' आलोचनार्थाण्णिचि लक्षयेत, स्याल्लक्षयेल्लक्षयतेऽङ्कनार्थात् ॥ '

(श्लो. 182) इति देवः ।

लक्षकः-क्षिका, लिलक्षयिषकः-षिका ; लक्षयिता-त्री लिलक्षयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकपक्षयतिवत् (956) ज्ञेयानि । ल्युटि-लक्षणम्[1]. यति-लक्ष्यम्, लाक्षणिकः, [2]लक्ष्मीः, [3]लक्ष्मणः इमानि रूपाणि अस्य धातोः इति विशेषः । ल्यपि-उपलक्ष्य ।

(1447) " लक्ष आलोचने " (X-चुरादिः-1697. सक. सेट्. आत्म.)

आकुस्मीयः ।

' आलोचनार्थाण्णिचि लक्षयेत, स्याल्लक्षयेत् लक्षयतेऽङ्कनार्थात् ॥ '

(श्लो. 182) इति देवः ।

लक्षकः-क्षिका, लिलक्षयिषकः-षिका, लक्षयिता-त्री, लिलक्षयिषिता-त्री ; इत्यादीनि सर्वाणि रूपाणि चौरादिकपक्षयतिवत् (956) ज्ञेयानि । तुमुनि-लक्षयितुम्[A] ।

(1448) " लख गत्यर्थः " (I-भ्वादिः-138. सक. सेट्. पर.)

लाखकः-खिका, लाखकः-खिका, लिलखिषकः-षिका, लालखकः-खिका ; लखिता-त्री, लाखयिता-त्री, लिलखिषिता-त्री, लालखिता-त्री ; इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिकअङ्कतिवत् (141) ज्ञेयानि ।

[अ] मैत्रेयरक्षितमतेनास्य धातोः स्वरितेत्त्वं न इति पुरुषकारोपात्त (दैवे-श्लो.182) वचनाज्ज्ञायते । पदमञ्जर्यामपि ' एष विधिर्न चुरादिण्यन्तात् स्यादिति कश्चन निश्चिनुते स्म । आप्तवचोऽत्र न किञ्चन दृष्टं लक्षयतेः स्वरितेत्त्वमनार्षम् ॥' (1-3-74) इति पारायणग्रन्थस्थश्लोकोदाहरणप्रदर्शनपुरस्सरं साधितम् ।

1. लक्ष्यतेऽनेनेति लक्षणम् । रेखा, तिलकाद्यङ्कनम्, व्याकरणादिशास्त्रं च ।

2. ' लक्षेर्मुट् च ' (द. उ. 1-84) इति ईप्रत्ययो मुडागमश्च ।

3. ' लक्ष्म्या अच्च ' (ग. सू. 5-2-100) इति मत्वर्थीये नकारप्रत्यये णत्वे ईकारस्य चाकारे लक्ष्मणः इति रूपम् । लक्ष्मणः=रामस्यानुजः ।

A. ' ....नो खल्वशाम्यमिह लक्षयितुं क्षमाः स्मः ॥ ' धा. का. 3. 35.

144

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1449) "**लखि गत्यर्थः**" (I-भ्वादिः-139. सक. सेट्. पर.)

लङ्खकः-ङ्खिका, लङ्खकः-खिका, लिलङ्खिषकः-षिका, लालङ्खकः-खिका ; लङ्खिता-त्री, लङ्खयिता-त्री, लिलङ्खिषिता-त्री, लालङ्खिता-त्री ; इत्यादीनि समस्तान्यपि रूपाणि भौवादिककङ्कतिवत् (140) ज्ञेयानि ।

(1450) "**लग आस्वादने**" (X-चुरादिः-1738. सक. सेट्. उभ.)

'—आसादने' इति **दुर्गः** । '**लक**—' इति **चन्द्रः** । '**लघ**—' इति **केचित्** । लागकः-गिका, लिलागयिषकः-षिका ; लागयिता-त्री, लिलागयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**क्षाणय**तिवत् (159) ज्ञेयानि ।

(1451) "**लगि गत्यर्थः**" (I-भ्वादिः-145. सक. सेट्. पर.)

लङ्गकः-ङ्गिका, लङ्गकः-ङ्गिका, लिलङ्गिषकः-षिका, ललङ्गकः-ङ्गिका ; लङ्गिता-त्री, लङ्गयिता-त्री, लिलङ्गिषिता-त्री, लालङ्गिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कङ्क**तिवत् (140) ज्ञेयानि । [1]विलगितः-विलङ्गितः ।

(1452) "**लगे सङ्गे**" (I-भ्वादिः-785. सक. सेट्. पर.) **घटादिः** ।

'—संवरणे' इति **पदमञ्जरी** (7-2-18) ।

लागकः-गिका, लगकः-गिका, लिलगिषकः-षिका, लालगकः-गिका ; लगिता-त्री, लगयिता-त्री, लिलगिषिता-त्री, लालगिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**क्खति**वत् (142) ज्ञेयानि । [2]सक्तार्थे लग्नः-लग्नम् । अन्यत्र लगितम्-लगितः इत्येव । [3]लिगुः ।

---

1. '**लङ्घिकम्प्योरुपतापशरीरविकारयोः**—' (वा. 6-4-24) इति उपतापार्थे निष्ठायां नलोपः । उपतापो नाम कृच्छ्रप्राप्तिः=मानसं दुःखम् । 'पीडाव्याध्योः **प्रती**पोक्ता लङ्घिकम्प्योर्नलोपिता । नि.स्वो **विलगितो** नित्यं ; वातात् विकपिता तनुः ॥' इति **प्रक्रियासर्वस्वम्** । एवं क्त्वाप्रत्ययादिषु किन्ङित्प्रत्ययेष्वपि **लगित्वा** इति उपतापार्थे साधुरिति मन्तव्यम् ।
2. निष्ठायाम् 'क्षुब्धस्वान्तध्वान्त**लग्न**—' (7-2-18) इति निपातनादिडभावः । निष्ठातकारस्य नत्वं च 'सक्तम्' इत्यर्थे । अनेनैवार्थेन मेषादिलग्नस्यापि सङ्गतिर्द्रष्टव्या । 'ओ लस्जी व्रीडायाम्' इति धातोर्निष्ठायाम् ईदित्त्वेनेण्निषेधात् 'स्कोः—' (8-2-29) इति सकारलोपे 'ओदितश्च' (8-2-45) इति निष्ठानत्वेऽपि यद्यपि **लग्नम्-लग्नः** इति सिद्ध्येत् ; तथापि तस्य धातोर्व्रीडार्थकत्वात् सक्तार्थकत्वलाभार्थं सूत्रेऽत्र निपातनमिति बोध्यम् ।
3. लगतीति **लिगुर्मूर्खः** । 'खरुशङ्कुपीयुनीलङ्गु**लिगु**—' [द. उ. 1-120] इति कुप्रत्ययः, उपधाया इत्वं च निपात्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1453) "**लघि गत्यर्थः**" (I-भ्वादिः-108. सक. सेट्. आत्म.)

'**लघि** भोजननिवृत्तौ च' इति **क्षीरस्वामी**। '**लघि** शोषणे इत्यग्रे' इति **माधवधातुवृत्ति**वचनादयं भ्वादावेवोत्तरत्र शोषणार्थकोऽपीति ज्ञायते।

लङ्घकः-ङ्घिका, लङ्घकः-ङ्घिका, लिलङ्घिषकः-षिका, लालङ्घकः-ङ्घिका;

लङ्घिता-त्री, लङ्घयिता-त्री, लिलङ्घिषिता-त्री, लालङ्घिता-त्री;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कङ्कति**वत् (140) ज्ञेयानि। [1]लघुः।

(1454) "**लघि भाषार्थः**" (X-चुरादिः-1761. अक. सेट्. उभ.)

आस्वदीयः।

'**भाषणे लङ्घयेत्**, शोषे लङ्घेत्, गत्यां तु लङ्घते' (श्लो. 45) इति **देवः**।

अयं धातुर्भासार्थकः सकर्मक इति **पारायणम्** इति **क्षीरस्वामी**।

लङ्घकः-ङ्घिका, लिलङ्घयिषकः-षिका, लङ्घकः-ङ्घिका, लिलङ्घिषकः-षिका, लालङ्घकः-ङ्घिका;

लङ्घयिता-त्री, लिलङ्घयिषिता-त्री; लङ्घिता-त्री, लिलङ्घिषिता-त्री, लालङ्घिता-त्री;

इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कुंशयति**वत् (232) ज्ञेयानि।

(1455) "**लछ लक्षणे**" (I-भ्वादिः-206. अक. सेट्. पर.)

लच्छकः-च्छिका, लच्छकः-च्छिका, लिलच्छिषकः-षिका, लालच्छकः-च्छिका;

लच्छिता-त्री, लच्छयिता -त्री, लिलच्छिषिता-त्री, लालच्छिता-त्री;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**चलति**वत् (510) ज्ञेयानि।

(1456) "**लज भर्त्सने**" (I-भ्वादिः-238. सक. सेट्. पर.)

'**–भर्जने**' इति **मा. धा. वृत्तिः**। **पुरुषकारो**ऽप्यत्र अनुकूलः। '**भर्जने** चेति **लीलाशुकः**' इति **धा. का.** 1-32.

'लञ्जेत् लाञ्जेत् लजेत् लाजेत् इत्येते **भर्त्सने** शपि।' (श्लो. 69) इति **देवः**।

लाजकः-जिका, लाजकः-जिका, लिलजिषकः-षिका, लालजकः-जिका;

लजिता-त्री, लाजयिता-त्री, लिलजिषिता-त्री, लालजिता-त्री;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**खदति**वत् (338) बोध्यानि। 'लजु—'

---

1. लङ्घ्यतेऽसौ बालैरिति **लघुः**। 'लङ्घिबंह्योर्नलोपश्च' (द. उ. 1-114) इति कुप्रत्ययो नकारलोपश्च निपात्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यपि **शाकटायनः**। तन्मते क्त्वायां इड्विकल्पात् **लजित्वा-लक्त्वा** इति रूपद्वयमिति विशेषः। यदा तु भर्जनार्थकत्वम्, तदानीं संज्ञायां घञि **लाजाः** इति भवति। '**लाजाः** पुंभूम्नि चाक्षताः' (अमरः 2·9·47) इत्यनुशासनात् नित्यं बहुवचनान्तत्वं च इति ज्ञेयम्।

(1457) "**लज अपवारणे**" (X-चुरादिः-1543. सक. सेट्. उभ.) [अ]

'प्रकाशे लजयेद् व्रीडे लज्जते लजते पदे॥' (श्लो. 68) इति **देवः**।

लाजकः-जिका, लिलाजयिषकः-षिका, लाजयिता-त्री, लिलाजयिषिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**चाटयति**वत् (488) ज्ञेयानि।

(1458) "**लज प्रकाशने**" (X-चुरादिः-1920. अक. सेट्. उभ.)

अदन्तः। [आ]

'**प्रकाशे लजयेद्**, व्रीडे लज्जते लजते पदे॥' (श्लो. 68) इति **देवः**।

लजकः-जिका, लिलजयिषकः-षिका; लजयिता-त्री, लिलजयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कलयति**वत् (176) ऊह्यानि। लजयन्[A] इति शतरि रूपम्। ल्यपि—संलजय्य, संलिलजयिष्य इति विशेषः।

(1459) "**लजि भर्त्सने**" (I-भ्वादिः-239. सक. सेट्. पर.)

'—**भर्जने**' इति **मा. धा. वृत्तिः**।

'लज्जेत् लाञ्जेत्, लजेल्लाजेदित्येते भर्त्सने शपि।' (श्लो. 69) इति **देवः**।

लञ्जकः-ञ्जिका, लञ्जकः-ञ्जिका, लिलञ्जिषकः-षिका, लालञ्जकः-ञ्जिका;

[अ] 'जल—' इति **नन्दिसम्मताकारयोः** पाठ इति **क्षीरतरङ्गिणी-माधवधातुवृत्तितो** ज्ञायते। **चान्द्रा** अपि 'जल—' इत्येव पठन्तीति च **क्षीरस्वामी**।

[आ] अत्र '**लजि—**' इति **मैत्रेयक्षीरस्वा**मिप्रभृतयः पठन्ति। 'अदन्तेषु पाठबलादद(न?) न्तत्वे वृद्धिः **इत्यपरे**' इति **मा. धा. वृत्तिः**। **शाकटायनस्तु** कथादीनां सर्वेषां ण्यन्ते पुकमाह। तन्मते लज्जापयति इति रूपं भवति। ण्वुलि लज्जापकः-पिका, तृचि-लज्जापयिता-त्री इत्येवमादीनि रूपाणि ज्ञेयानि।

A. '**धाम्नोचैर्लजयन्** विमिश्रितजने रङ्गे........॥' धा. का. 3. 61.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लज्जिता-त्री, लज्जयिता-त्री, लिलज्जिषिता -त्री, लालज्जिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कूञ्च**तिवत् (145) बोध्यानि ।

(1460) " लजि हिंसाबलादाननिकेतनेषु "

(X-चुरादिः-1566. सक. सेट्. उभ.)

' लज्जेत् लाञ्जेत् लजेत् लाजेदित्येते भर्त्सने शपि ।' (श्लो. 69) इति **देवः** । "'पिजि' इति पठित्वा तत्र लजि इत्येके" इति **सि. कौमुद्यां** दृश्यते । अन्यत्र एतत्पाठो न दृश्यते । लञ्जकः-ञ्जिका, लिलञ्जयिषकः-षिका, इत्यादीनि समस्तान्यपि रूपाणि चौरादिक**कुंशय**तिवत् (232) बोध्यानि । **मा. धा. वृत्तौ** पक्षान्तरत्वेनोपात्तः ।

(1461) " लजि भाषार्थः " (X-चुरादिः-1785. सक. सेट्. उभ.)

आस्वदीयः ।

अमुं **क्षीरस्वामिकाश्यपादय** एव पठन्ति । '**—भासार्थः**' इति **क्षीरस्वामी** ।

लञ्जकः-ञ्जिका, लिलञ्जयिषकः-षिका, लञ्जकः-ञ्जिका, लिलञ्जिषकः-षिका, लालञ्जकः-ञ्जिका ;
लञ्जयिता-त्री, लिलञ्जयिषिता-त्री, लञ्जिता-त्री, लिलञ्जिषिता-त्री, लालञ्जिता-त्री ;
इत्यादिकानि समस्तान्यपि रूपाणि चौरादिक**कुंशय**तिवत् (232) ज्ञेयानि ।

(1462) " ओ लजी व्रीडायाम् "

(VI-तुदादिः-1290. अक. सेट्. आत्म.)

' प्रकाशे लजयेद् व्रीळे[डे]लज्जते लजते पदे ॥' (श्लो. 68) इति **देवः** ।
" अयं तवर्गपञ्चमादिः इति **चान्द्राः** " इति **मा. धा. वृत्तिः** ।

लाजकः-जिका, लाजकः-जिका, लिलजिषकः-षिका, लालजकः-जिका ;
लजिता-त्री, लाजयिता-त्री, लिलजिषिता-त्री, लालजिता-त्री ;
— लाजयन्-न्ती, लाजयिष्यन्-न्ती-ती ;. — —
लजमानः, लाजयमानः, लिलजिषमाणः, लालज्यमानः ;
लजिष्यमाणः, लाजयिष्यमाणः, लिलजिषिष्यमाणः, लालजिष्यमाणः ;
लक्-लजौ-लजः ; — — —

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]लग्नम्-लग्नः-लग्नवान्,	लाजितः,	लिलजिषितः,	लालजितः-तवान्;
लजः,	लाजः,	लिलजिषुः,	लालजः;
लजितव्यम्,	लाजयितव्यम्,	लिलजिषितव्यम्,	लालजितव्यम्;
लजनीयम्,	लाजनीयम्,	लिलजिषणीयम्,	लालजनीयम्;
लाज्यम्,	लाज्यम्,	लिलजिष्यम्,	लालज्यम्;
ईषल्लजः-दुर्लजः-सुलजः;		—	—
लज्यमानः,	लाज्यमानः,	लिलजिष्यमाणः,	लालज्यमानः;
लाजः,	लाजः,	लिलजिषः,	लालजः;
लजितुम्,	लाजयितुम्,	लिलजिषितुम्,	लालजितुम्;
लक्तिः,	लाजना,	लिलजिषा,	लालजा;
लजनम्,	लाजनम्,	लिलजिषणम्,	लालजनम्;
प्रलज्य,	प्रलाज्य,	प्रलिलजिष्य,	प्रलालज्य;
लाजम् २, लजित्वा २,	लाजम् २, लाजयित्वा २,	लिलजिषम् २, लिलजिषित्वा २,	लालजम् २; लालजित्वा २.

(1463) "**लट बाल्ये**" (I-भ्वादिः-298. अक. सेट्. पर.)

बाल्यम्=बालक्रिया ।

लाटकः-टिका, लाटकः-टिका, लिलटिषकः-षिका, लालटकः-टिका;
लटिता-त्री, लाटयिता-त्री, लिलटिषिता-त्री, लालटिता-त्री;
इत्यादीनि रूपाणि सर्वाणि भौवादिक**ऋठति**वत् (148) ज्ञेयानि । लटकः, [2]लट्वा, इमौ रूपौ विशेषेण भवतः ।

(1463-A) "**लड विलासे**" (I-भ्वादिः-359. अक. सेट्. पर.)

'लाडयत्युपसेवायां **विलासे तु लडेच्छपि** ।' (श्लो. 87) इति **देवः** ।
'—विकासे इति मैत्रेयः' इति **मा. धा. वृत्तौ**. टिप्पण्याम् ।

---

1. इदित्त्वान्निष्ठायामिण्निषेधे, ओदित्त्वात् निष्ठानत्वे कुत्वे च रूपमेवम् ।
2. 'अशूप्रुषिप्लुषिलटि—' [द. उ. 8-125] इति कन्प्रत्यये साधुः । 'नेड् वशि कृति' (7-2-8) इति इण्निषेधः । 'सैषा महतो वंशस्तम्भात् **लट्वाऽनुकृष्यते**' ('ऋलृक्' इत्यत्र भाष्यम्) इति **भाष्ये** '**लट्वा**=पक्षिविशेषः, फलविशेषो वा ।' इति **नागेशः** । ग्रामचटकस्य नाम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'लल ईप्सायाम्' इति **केचित्** भ्वादावेव पठन्ति। तत्तु **क्षीरस्वामि-पुरुषकारादयः** नानुमन्यन्ते।

लाडकः-डिका, लाडकः-डिका, लिलडिषकः-षिका, लालडकः-डिका ;
लडिता-त्री, लाडयिता-त्री, लिलडिषिता-त्री, लालडिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि भौवादिक**कणति**वत् (157) ज्ञेयानि।

(1464) "लड जिह्वोन्मथने"

(I-भ्वादिः-814. सक. सेट्. पर.) **घटादिः।**

जिह्वया उन्मथनम् (=क्लेशकरणं) जिह्वोन्मथनम् इति **केचित्।** जिह्वायाः उन्मथनम् (=क्षोभणम्) इति **मैत्रेयः।** जिह्वा च, उन्मथनं च द्वावर्थौ, जिह्वा=जिह्वाव्यापारः इति च **केचित्।** निरुक्तेषु त्रयेष्वर्थेषु भ्वादिरयं मित्संज्ञक इति समुदितार्थः। लडयोरेकत्वस्मरणात् ण्यन्तात् युचि-**ललना** इति रूपम्। अत्र पदे यथासम्भवमर्थो बोध्यः।

लडकः-डिका, लडकः-डिका, लिलडिषकः-षिका, लालडकः-डिका ;
लडिता-त्री, लडयिता-त्री, लिलडिषिता-त्री, लालडिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कणति**वत् (157, 158) ज्ञेयानि।

(1465) "लड उपसेवायाम्" (X-चुरादिः-1540. सक. सेट्. उभ.)

'लाडयत्युपसेवायां विलासे तु लडेच्छपि।' (श्लो. 87) इति **देवः।**

लाडकः-डिका, लिलाडयिषकः-षिका ; लाडयिता-त्री, लिलाडयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**गालयति**वत् (388) बोध्यानि।

(1466) "लडि भाषार्थः"

(X-चुरादिः-1801. अक. सेट्. उभ.) **आस्वदीयः।**

इदित्करणात् णिचो वैकल्पिकत्वम्। ण्यन्ते, ण्यन्तप्रकृतिकसन्नन्ते च इमानि रूपाणि।

लण्डकः-ण्डिका, लिलण्डयिषकः-षिका ; लण्डयिता-त्री, लिलण्डयिषिता-त्री ;
इत्यादीनि रूपाणि चौरादिक**कटयति**वत् (150), भौवादिक**कण्ठति** (149)-वच्च बोध्यानि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1467) " **ओ लडि उत्क्षेपणे** " (X-चुरादिः-1542. सक. सेट्. उभ.)
अत्र ओकारः इत्संज्ञक इति **चान्द्रा** आहुः। धात्ववयव एव ओकार इति **क्षीरस्वामिप्रभृतयः**। '**उलडि**' इति पठित्वा 'उलण्डयति' इति **केचिदु**-दाहरन्ति। एवं बहुधा विप्रतिपत्तिरत्र। ओकारो धात्ववयव इत्यभ्युपगत्यास्माभिः पूर्वं (138) **ओलण्डक** इत्यादीनि रूपाणि ण्यन्तात्, ण्यन्तप्रकृतिकसन्नन्ताच्च प्रदर्शितानि। ओकार इत्संज्ञक इति पक्षे-लण्डकः-ण्डिका इत्यादीनि रूपाणि यथासम्भवं स्वयमेवोह्यानि। 'अनित्यण्यन्ताः चुरादयः' इत्याश्रित्य ओकारेत्त्वपक्षे 'ओदितश्च' (8-2-45) इति निष्ठानत्वे लण्ड्नः इत्यपि निष्ठायां प्रदर्शयन्ति। "**दौर्गास्तु** क्ते **लण्डिन** इत्युदाजहुः; तच्च पापात् पापीयः। अव्यवहितस्य (निष्ठातकारस्यैव) नत्वात्" इति **क्षीरस्वामी**। युक्तं चैतत्; अन्यथा विन्नादिवत् विदित इत्यत्रापि निष्ठातकारस्य नकारः स्यात्; इत्यलमत्राधुना। '**ओलण्डित**मिवापश्यत् उग्रं समरताण्डवम्' (यादवाभ्युदयः-16-64) '**ओलण्डि**ताद्रिरपि जालितदिव्यधामा—' (धातुकाव्यम्-3-14) इत्यादिषु ओकारो धात्ववयव इत्येव प्रयोगा उपलभ्यन्ते इत्यपीहावधेयम्।

(1468) " **लप व्यक्तायां वाचि** " (I-भ्वादिः-402. अक. सेट्. पर.)
लापकः-पिका, लापकः-पिका, लिलपिषकः-षिका, लालपकः-पिका; लपिता-त्री, लापयिता-त्री, लिलपिषिता-त्री, लालपिता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिक**चपति**वत् (497) बोध्यानि। ण्यति [1]अपलाप्यम्, [2]प्रलापी,[A] [3]आलप्यालम्,[B] [C]कललापी, इमानि रूपाणि अस्य धातोः अधिकानीति विशेषः।

---

1. आङ्पूर्वात् **लपेः** 'आसुयुवपिरपि**लपि**—' (3-1-126) इति ण्यत्प्रत्यये रूपमेवम्। यतोऽपवादः।
2. प्र इति उपपदे 'प्रे **लपसृ**—' (3-2-145) इत्यादिना घिनुण्प्रत्यये रूपमेवम्।
3. 'अलंखल्वोः प्रतिषेधयोः—' (3-4-18) इति अलमुपपदे क्त्वाप्रत्यये समासे ल्यबादेशः।

A. '**प्रलापिनो** भविष्यन्ति कदा न्वेतेऽपलाषिणः।' भ. का. 7-12.
B. '**आलप्या**लमिदं बभ्रोर्यत्स दारानपाहरत्।' शि. व. 2-40.
C. 'चेपुः सपन्तोऽसचितां प्रियां प्रियाः संध्येति रेपुः **कललापिनः** शुकाः।' धा. का. 1-52

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1469) "**लबि अवस्रंसने च**" (I-भ्वादिः-377. अक. सेट्. आत्म.)

चकारात् शब्देऽपि भवति ।

लम्बकः-म्बिका, लम्बकः-म्बिका, लिलम्बिषकः-षिका, लालम्बकः-म्बिका ; लम्बिता-त्री, लम्बयिता-त्री, लिलम्बिषिता-त्री, लालम्बिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कम्पति**वत् (166) बोध्यानि । "लम्बिका-त्रिकटा । विलम्बिका-शकृद्विलम्बः" इति **क्षीरस्वामी** । णिनिप्रत्यये-आलम्बी, [1]अलाबूः, [2]अलम्बुसा ; इमानि रूपाण्यधिकानि अस्य धातोः इति विशेषः ।

(1470) "**लबि शब्दे**" (I-भ्वादिः-379. अक. सेट्. आत्म.)

लम्बकः-म्बिका, लम्बकः-म्बिका, लिलम्बिषकः-षिका, लालम्बकः-म्बिका ; लम्बिता-त्री, लम्बयिता-त्री, लिलम्बिषिता-त्री, लालम्बिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकचलनार्थक**कम्पति**वत् (166) ज्ञेयानि ।

(1471) "**डु लभष् प्राप्तौ**" (I-भ्वादिः-975. सक. अनि. आत्म.)

'प्रेरणे लाभयेत् लाभेः, प्राप्त्यर्थे **लभते** शपि ।' (श्लो. 146) इति **देवः** ।

[3]लम्भकः-म्भिका, लम्भकः-म्भिका, [4]लिप्सकः-प्सिका, लालभकः-भिका ; लब्धा-ब्ध्री, लम्भयिता-त्री, लिप्सिता-त्री, लालभिता-त्री ; इत्यादीनि रूपाणि सर्वाणि प्रातिस्विकरूपाणि विना भौवादिक**रभति**वत् (1378) बोध्यानि । [5]लब्भ्रिमम्[A] । [6]आलम्भ्या गौः । [7]उपलम्भ्या विद्या । उपलभ्य-

---

1. 'नञि लम्बेर्नलोपश्च' [द. उ. 1-170] इत्यूप्रत्ययः, णिद्वद्भावः, नलोपश्च । न लम्बत इत्य**लाबूः**=तुम्बी ।
2. **अलम्बुसा** इति शाकविशेषः । तदपि पदं प्रकृतधातोर्भवति । 'अलम्बुसानां याता' इति पातञ्जलप्रयोगः (महा. 1-1-1)
3. '**लभेश्च**' (7-1-64) इति अजादौ प्रत्यये (शपं लिटं च वर्जयित्वा) नुमागमः सर्वत्र बोध्यः ।
4. 'सनि मीमाघुरभ**लभ**—' (7-4-54) इत्यादिना अच इस् । '**स्कोः**—'(8-2-29) इति सलोपः । 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः ।
5. लाभेन निर्वृत्तं **लब्भ्रिमम्** । 'ड्वितः क्त्रिः' (3-3-88) इति क्त्रिप्रत्यये, तस्य 'क्त्रेर्मप्—' (4-4-20) इति नित्यं मप्प्रत्ययः ।
6. 'आङो यि' (7-1-65) इति आङ्पूर्वाल्लभेः यकारादौ प्रत्यये नुम् । अत्र सूत्रे 'यि' इत्यस्य विषयसप्तम्याश्रयणात् प्रत्ययोत्पत्तेः प्रागेव नुमागमः ; तेन अदुपधत्वा-भावात् यत्प्रत्ययो न ; किन्तु ण्यदेव इति बोध्यम् ।
7. 'उपात् प्रशंसायाम्' (7-1-66) इति यकारादौ प्रत्यये विवक्षिते नुम् । प्रशंसायाः अविवक्षायां तु '**उपलभ्य**मस्मान्नीचात्' इत्यत्र यत्प्रत्यय एव ।

A. 'निघानिघतरुच्छन्ने तस्मिंस्ते **लब्भ्रिमैः** फलैः ।' भ. का. 7-65.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मस्मान्नीचात् । [1]ईषत्प्रलम्भः-दुष्प्रलम्भः-सुप्रलम्भः । ईषल्लभः । [2]सुलभम्-दुर्लभम् । सुलाभो दुर्लभः । सुप्रलम्भः । [3]लाभम्-लाभम्-लम्भम्-लम्भम् । प्रलम्भम्-प्रलम्भम् । [4]लभा दुरालभा । उपलब्धिः ।

(1472) "**लर्ब गतौ**" (I-भ्वादिः-417. सक. सेट्. पर.)

क्षीरस्वामिमैत्रेयौ धातुमसुं न पठतः ।

लर्बकः-र्बिका, लर्बकः-र्बिका, लिलर्बिषकः-षिका, लालर्बकः-र्बिका ;
लर्बिता-त्री, लर्बयिता-त्री, लिलर्बिषिता-त्री, लालर्बिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कर्बति**वत् (173) बोध्यानि ।

(1473) "**लल ईप्सायाम्**"

(X-चुरादिः-1688. सक. सेट्. आत्म.) **आकुस्मीयः ।**

लालकः-लिका, लिलालयिषकः-षिका, लालयिता-त्री, लिलालयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कालयति**वत् (175) ज्ञेयानि ।

---

1. 'उपसर्गात् खल्घञोः' (7-1-67) इति नुम् । '**लभेश्च**' (7-1-64) इत्येव खल्प्रत्यये घञि च नुमः सिद्धत्वात् यतः पुनरारम्भः ततो ज्ञायते—नियमार्थमिति । नियमस्वरूपं तु अजाद्योः खल्घञोः प्रत्यययोर्नुम् भवति चेत्—उपसर्गात् परयोरेव—इति । तेन **ईषल्लभः, लाभः** इत्यादिषु निरुपसृष्टेषु न नुम् भवति ।
2. 'उपसर्गात् खल्घञोः' (7-1-67) इत्यस्यापवादभूतेन 'न सुदुर्भ्यां केवलाभ्याम्' (7-1-68) इत्यनेन नुम्निषेधः । अत्र वदन्ति—सूत्रे केवलशब्दः शब्दोपात्ताभ्यां सुदुर्भ्यामन्यस्य सजातीयस्योपसर्गस्याभावमाह । तेन सुदुर्भ्यामन्योपसर्गरहितस्य **लभेः** खल्घञोर्नुम् न भवतीति सूत्रार्थः सम्पन्नः । उपसर्गान्तरयोगे तु **अतिसुलम्भः** इति नुम् भवत्येव—इति । यदा तु 'सुः पूजायाम्' (1-4-94) 'अतिरतिक्रमणे च' (1-4-95) इत्याभ्यां सुश्चातिश्च कर्मप्रवचनीयसंज्ञके भवतः—तदानीं **अतिसुलभम् अतिदुर्लभम्** इत्यादयोऽपि प्रयोगाः साधव एवेति ज्ञेयम् । विस्तरस्तु **बृहच्छब्देन्दुशेखरा**दिषु द्रष्टव्यः ।
3. 'विभाषा चिण्णमुलोः' (7-1-69) इति चिणि णमुलि च नुम्विकल्पः । 'विभाषा चिण्णमुलोरुपसर्गान्न' इति **भाष्ये** (7-1-69) व्याख्यातत्वात् प्राप्तविभाषेत्याश्रित्य व्याख्यातृभिर्व्यवस्थितविभाषेयमित्याश्रितम् । तेनायं फलितोऽर्थः—सोपसर्गस्य नित्यं नुम् ; निरुपसृष्टात् तु विभाषेति । तेनैवं रूपाणि बोध्यानि ।
4. धातोः षित्त्वात् 'षिद्भिदादिभ्यः—' (3-3-104) इत्यङ् । यदा तु 'क्तिन् आबादिभ्यः' (वा. 3-3-94) इत्याश्रीयते, तदानीम् क्तिन् अपि साधुः—'अभिधानलक्षणाः कृत्तद्धितसमासान्ताः' इत्यादिप्रामाण्यात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]कुलाल:-कौलालकम्, युचि-[2]लालना,[A] इमानि रूपाणि अस्य धातोः विशेषेण भवन्ति।

(1474) "लष कान्तौ" (I-भ्वादिः-888. अक. सेट्. उभ.)

'कान्तौ लष्यति लष्येत श्यनि वा लषते लषेत्॥' (श्लो. 177) इति देवः।

कान्तिः=इच्छा।

लाषकः-षिका, लाषकः-षिका, लिलषिषकः-षिका, लालषकः-षिका;
लषिता-त्री, लाषयिता-त्री, लिलषिषिता-त्री, लालषिता-त्री;
[3]लष्यन्[B]-लषन्-न्ती, लाषयन्-न्ती, लिलषिषन्-न्ती; —
लषिष्यन्-न्ती, लाषयिष्यन्-न्ती-ती, लिलषिषिष्यन्-न्ती-ती; —
लषमाणः, लष्यमाणः, लाषयमाणः, लिलषिषमाणः, लालष्यमाणः;
लषिष्यमाणः, लाषयिष्यमाणः, लिलषिषिष्यमाणः, लालषिष्यमाणः;
इत्यादीनि रूपाणि सर्वाणि भौवादिककाशतिवत् (186) बोध्यानि। [C]अभिलाषुकः,[4] [5]लषणः, विलाषी[6] [D]अपलाषिणः, [7]लशुनम्, लिष्वः[8]; इमानि रूपाण्यधिकान्यत्रेति विशेषः।

---

1. कुं लालयते इति कुलालः। 'कर्मण्यण्' (3-2-1) इति अण्प्रत्यये रूपमेवम्। कुलालेन कृतं कौलालकम्, 'कुलालादिभ्यो वुञ्' (4-3-118) इति तेन कृतमित्येतस्मिन्नर्थे संज्ञायां गम्यमानायां वुञि रूपमेवम्।
2. 'ण्यासश्रन्थो युच्' (3-3-107) इति स्त्रियां युच्प्रत्यये रूपमेवम्।
3. शतरि 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (3-1-70) इति श्यन् विकल्पेन भवति। तेन रूपद्वयम्।
4. 'लषपतपद—' (3-2-154) इत्यादिना तच्छीलादिषु कर्तृषु उकञ्प्रत्यये एवं रूपम्।
5. 'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलष—' (3-2-150) इति तच्छीलादिषु कर्तृषु युच्प्रत्यये रूपमेवम्।
6. 'वि, अप' इत्युपसर्गयोः उपपदयोः 'अपे च लषः' (3-2-144) इति घिनुण् प्रत्यये रूपमेवम्।
7. 'लषेः श च' (द. उ. 5-54) इति उनन्प्रत्ययो भवति। शश्चान्तादेशः। लशुनम्=पलाण्डुजातिः।
8. औणादिके (द. उ. 8-127) वन्प्रत्यये, उपधाया इत्वं निपात्यतेऽगुणत्वं च। तेन लिष्वः इति रूपम्। कान्तिरित्यर्थः।

A. '..........वालोऽमुना नृपतिलालनयाऽद्य कष्टम्॥' धा. का. 3-34.
B. 'मानुषानभिलष्यन्ती रोचिष्णुर्दिव्यधर्मिणी।' भ. का. 4-22.
C. 'रभसादुदस्थुरथ युद्धमनुचितभियोऽभिलाषुकाः।' शि. व. 15-59.
D. 'प्रलापिनो भविष्यन्ति कदा न्वेतेऽपलाषिणः।' भ. का. 7-12.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1475) **"लस श्लेषणक्रीडनयोः"** (I-भ्वादिः-714. अक. सेट्. पर.)

"अयं शोभायां प्रसिद्धः" इति **धा. का. व्याख्यायाम्** (1-89)।

'लासयेत् शिल्पयोगेऽर्थे, **श्लेषणे क्रीडने लसेत्** ॥' (श्लो. 190) इति **देवः**।

लासकः-सिका, लासकः-सिका, लिलसिषकः-षिका, लालसकः-सिका; लसिता-ती, लासयिता-ती, लिलसिषिता-ती, लालसिता-ती; इत्यादिकानि रूपाणि सर्वाणि [प्रातिस्विकरूपाणि विना] भौवादिक**कसति**वत् (180) बोध्यानि। [1]अलसः-आलस्यम्, [2]विलासी, [3]हल्लासः, [A]उल्लसन्-न्ती, लसिका, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1476) **"लस शिल्पयोगे"** (X-चुरादिः-1729. अक. सेट्. उभ.)

शिल्पयोगे=कौशले इत्यर्थः इति **बालमनोरमा**। "-**शिल्पोपयोगे** श्रमादिना तक्ष्णोतीत्यर्थः" इति **क्षीरस्वामी**। 'तालव्यान्त [**लश**] इति **कौशिकः**' इति **तरङ्गिण्याम्**। "**केचित्** मूर्धन्यान्तं पठन्ति" इति **स्वामी** इत्याह" इति **मा. धा. वृत्तौ**। **पुरुषकारधातुवृत्तिकारप्रौढमनोरमाकारादयः** स्वामिमते 'लस' इति दन्त्यं पठित्वा 'लष' इति मूर्धन्यान्तमिति केचित् इति पठन्ति। प्रकृतक्षीरतरङ्गिण्यां तु '**लष शिल्पोपयोगे**' इत्येव दृष्टः पाठः।

'**लासयेत् शिल्पयोगे**ऽर्थे श्लेषणे क्रीडने लसेत् ॥' (श्लो. 190) इति **देवः**।

लासकः-सिका, लिलासयिषकः-षिका, लासयिता-त्री, लिलासयिषिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**कालयति**वत् (175) ज्ञेयानि।

(1477) **"ओ लस्जी व्रीडायाम्"**

(VI-तुदादिः-1291. अक. सेट्. आत्म.)

"अयं तवर्गपञ्चमादिः [नस्जी] इति चान्द्राः" इति **मा. धा. वृत्तौ**।

"**आत्रेयमैत्रेयस्वामिसंमताकारशाकटायनादयः** सर्वे यणादिमेवाहुः।

---

1. न लसः—**अलसः**। तस्य भावः इत्यर्थे आलस्यम् इति रूपं भवति।
2. विशब्द उपपदे '**वौ कषलस—**' (3-2-143) इति घिनुण्प्रत्यये **विलासी** इति रूपम्।
3. हृदयस्य लासः इति व्युत्पत्तौ '**हृदयस्य हृल्लेखयदण्लासेषु**' (6-3-50) इति हृदादेशे रूपमेवम्। **हृल्लासः**=हिक्कारोगः।

A. 'ज्वालाकणारुणरुचा निकरेण रेणोः शेषेण तेजस इवो**ल्लसना** रराज ॥' शि.व. 5-55.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'नग्नशब्दस्तु पृषोदरादित्वाद्वयत्ययेन' इति मैत्रेयः'' इति धातुवृत्तौ दर्शनाज्ज्ञायते। क्षीरस्वामी नग्ननग्निकाशब्दव्याख्याने 'ओ णजी' इति पठति। द्रष्टव्या अमरटीका (3-1-39, 2-6-9)।

[1]लज्जकः-ज्जिका, लज्जकः-ज्जिका, लिलज्जिषकः-षिका, लालज्जकः-ज्जिका; लज्जिता-त्री, लज्जयिता-त्री, लिलज्जिषिता-त्री, लालज्जिता-त्री; इत्यादीनि रूपाणि सर्वाणि सन्नन्तरूपाणि विना प्रायः तौदादिकमज्जतिवत् (1235) ऊह्यानि। [2]लज्जितम्, शुद्धात् शानचि—[A]लज्जमानः, लज्जिष्यमाणः, शत्रन्तात् सनि लिलज्जिषन्, लिलज्जिषिष्यन्, इमानि रूपाणि भवन्तीति विशेषः।

(1478) "ला आदाने" (II-अदादिः-1058 सक. अनि. पर.)

'दाने' इति चन्द्रः।

[3]लायकः-यिका, [4]लापकः-पिका, [5]लालकः [घृतस्य], लिलासकः-सिका, लालायकः-यिका;

लाता-त्री, लापयिता-त्री, विलालयिता-[घृतम्], लिलासिता-त्री, लालायिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि आदादिकरातिवत् (1391) ऊह्यानि। लालः,

---

1. अत्र धातुसकारस्य 'झलां जश् झशि' (8-4-53) इति जश्त्वेन दकारः। तस्य च श्चुत्वेन जकारः इति केचित्। श्चुत्वे कर्तव्ये सति जश्त्वनिष्पन्नस्य दकारस्यासिद्धत्वात् नैतत् सारम्। वस्तुतः जश्त्वस्यासिद्धत्वात् सकारस्य श्चुत्वेन शकारः।

   तस्य च 'झलां जश् झशि' (8-4-53) इति जश्त्वेन जकार इत्येव न्याय्यम्।

2. लज्जितम् इत्यस्योपपत्तिस्तु लज्जाशब्दात् 'तदस्य संजातं तारकादिभ्य इतच्' (5-2-36) इति इतच्प्रत्यये।

3. 'आतो युक्चिण्कृतोः' (7-3-33) इति आकारान्तस्याङ्गस्य युगागमे रूपमेवम्। एवं घञ्णमुल्प्रभृतिष्वपि ज्ञेयम्।

4. 'अर्तिह्री—' (7-3-36) इति पुगागमे रूपमेवम्। ण्यन्ते सर्वत्र एवमेव ऊह्यम्।

5. 'लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने' (7-3-39) इति णौ परतः स्नेहविपातनेऽर्थे पक्षे लुगागमे रूपमेवम्। स्नेहविपातनादन्यत्र पुगेव। स्नेहविपातनं नाम घनीभूतस्य स्नेहपदार्थस्य विलापनम्।

A. '...............अलग्नमनसः खलानवशलज्जमानाज्ञनम्॥' धा. का. 2·72·

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लाय:, लाप:, [1]कृपालु:, स्पर्धालु:,[A] व्याल:,[2] छायाल:,[B] [3]बहुलम्, इमानि रूपाणि अस्य धातो: विशेषेण भवन्तीति ज्ञेयम् ।

(1479) "**लाखृ शोषणालमर्थयो:**" (1-भ्वादि:-123. सक. सेट्. पर.)
लाखक:-खिका, लाखक:-खिका, लिलाखिषक:-षिका, लालाखक:-खिका ;
लाखिता-त्री, लाखयिता-त्री, लिलाखिषिता-त्री, लालाखिता-त्री ;
लाखन्-न्ती, लाखयन्-न्ती, लिलाखिषन्-न्ती ; —
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**द्राखति**वत् (879) बोध्यानि ।

(1480) "**लाघृ सामर्थ्ये**" (I-भ्वादि:-113. अक. सेट्. आत्म.)
लाघक:-घिका, लाघक:-घिका, लिलाघिषक:-षिका, लालाघक:-घिका ;
लाघिता-त्री, लाघयिता-त्री, लिलाघिषिता-त्री, लालाघिता-त्री ;
इत्यादिकानि रूपाणि समस्तान्यपि भौवादिक**द्राखति**वत् (879) ऊह्यानि ।
अस्य धातो: आत्मनेपदित्वात् शानचि-लाघमान:, लाघिष्यमाण:, लिलाघिषमाण:, लिलाघिषिष्यमाण:, क्तप्रत्यये [4]उल्लाघ:,[C] इमानि रूपाण्यधिकानीति विशेष: ।

(1481) "**लाछि लक्षणे**" (1-भ्वादि:-207. सक. सेट्. पर.)
लाञ्छक:-ञ्छिका, लाञ्छक:-ञ्छिका, लिलाञ्छिषक:-षिका, लालाञ्छक:-ञ्छिका;
लाञ्छिता-त्री, लाञ्छयिता-त्री, लिलाञ्छिषिता-त्री, लालाञ्छिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**क्षञ्जति**वत् (295) ऊह्यानि । क्विपि-लान्-लांशौ-लांश:, इति विशेष: ।

---

1. कृपां लातीति वृत्तौ मितद्वादित्वात् (वा. 3-2-180) डप्रत्यये रूपमेवम् । **कृपालु:** इति तु कृपधातोरालुचि निष्पन्नं शब्दान्तरम् ।
2. 'आतश्चोपसर्गे' (3-1-136) इति वि आङ् इति उपसर्गयो: उपपदयो: कप्रत्यय: ।
3. बहूनर्थान् लातीति बहुलम् । 'आतोऽनुपसर्गे क:' (3-2-3) इति कर्मणि उपपदे कप्रत्यय: । अणोऽपवाद: ।
4. निष्ठायाम्, 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघा:' (8-2-55) इति उत्पूर्वात् लाघे: तलोप इडागमाभावश्च निपात्यते । तेन रूपमेवम् । अनुपसृष्टादन्योपसृष्टाच्च **लाघित: प्रलाघित:** इति भवति । **उल्लाघ:**=रोगमुक्त: ।

A. 'स गान्दिनीभूरथ गोकुलैधितं **स्पर्धालु**धीगाधितकार्यबाधिनम् ।' धा. का. 1. 2.
B. 'अत्र स्थितं श्रान्तिजुषां मुनीनां **छायाल**कृष्णाजिनपल्लवेन ।' या. अ. 18. 57.
C. 'निकाममुल्लाघतनो: समत्यगात् प्रद्राखिता श्लाघ्यगुणस्य वर्तनी ॥' धा. का. 1. 16.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1482) " **लाज भर्त्सने च** " (I-भ्वादि:-240. सक. सेट्. पर.)

'लज्जेत् लाञ्जेत् लजेल्लाजेदित्येते भर्त्सने शपि ।' (श्लो. 69) इति **देवः** । **चकारो** भिन्नक्रमः । तेन पूर्वधात्वर्थं भर्जनमपि संगृह्णाति इति **मैत्रेयरक्षितः** । 'भ[र्ज] ? र्त्सनग्रहणं भर्जनस्यापि काममुपलक्षणम्' इति **पुरुषकारः** । '**भर्जने** च' इति क्षीरस्वामी । **शाकटायनो**ऽप्यत्रैवानुकूलः ।

लाजकः-जिका, लाजकः-जिका, लिलाजिषकः-षिका, लालाजकः-जिका ;
लाजिता-ती, लाजयिता-ती, लिलाजिषिता-ती, लालाजिता-ती ;
इत्यादिकानि समस्तान्यपि रूपाणि भौवादिक**कासति**वत् (188) बोध्यानि । [1]लाजः इति विशेषः ।

(1483) " **लाजि** [A]**भर्त्सने च** " (I-भ्वादि:-241-सक. सेट्. पर.)

'लज्जेल्लाञ्जेल्लजेल्लाजेदित्येते भर्त्सने शपि ।' (श्लो. 69) इति **देवः** ।

लाञ्जकः-ञ्जिका, लाञ्जकः-ञ्जिका, लिलाञ्जिषकः-षिका, लालाञ्जकः-ञ्जिका ;
लाञ्जिता-ती, लाञ्जयिता-ती, लिलाञ्जिषिता-ती, लालाञ्जिता-ती ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**काश्वति**वत् (148) ऊह्यानि ।

(1484) " **लाभ प्रेरणे** "

(X-चुरादि:-1936. सक. सेट्. उभ.) **कथादिः**, **अदन्तश्च** ।

'प्रेरणे **लाभये**ल्लाभे, प्राप्त्यर्थे लभते शपि ।' (श्लो. 146) इति **देवः** ।

" **लभेति सभ्याः** " इति **क्षीरस्वामी** ।

लाभकः-भिका, लिलाभयिषकः-षिका, लाभयिता-त्री, लिलाभयिषिता-त्री ;
लाभयन्-न्ती, लिलाभयिषन्-न्ती ;
इत्यादिकानि समस्तान्यपि रूपाणि चौरादिक**कालयति**वत् (185) ऊह्यानि ।

---

1. अजादौ प्रत्यये 'अजिव्रज्योश्च' (7-3-60) इत्यत्र **चकारात्** कुत्वाभावः इति **क्षीरस्वामी** । **लाजाः** इति नित्यबहुवचनान्तत्वमभिप्रयन्ति । वस्तुतः धातोरस्य निष्ठायां सेट्त्वात्, निष्ठायामनिट एव धातोः कुत्वविधानात् कुत्वस्यैवाप्रसक्तेश्चिन्त्यमिदम् ।

A. '—भर्जने च' इति **क्षीरस्वामी** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1485) "लिख अक्षरविन्यासे" (VI-तुदादिः-1365. सक. सेट्. पर.[अ]

लेखकः-खिका, लेखकः-खिका, लिलेखिषकः-[1]लिलिखिषकः-षिका, लेलिखकः-खिका ;

लेखिता-त्री, लेखयिता-त्री, लिलेखिषिता-लिलिखिषिता-त्री, लेलिखिता-त्री ;

इत्यादीनि रूपाणि सर्वाण्यपि तौदादिकिलतिवत् (193) ज्ञेयानि।

लेखः, विलेखनः [2]लेखनी, [3]हृल्लेखः, विलेखी-[4]व्यावलेखी, [5]लेखा-रेखा,

---

1. सन्नन्ते 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पनात् रूपद्वयमिति ज्ञेयम्।

2. ल्युडन्तात् स्त्रियां टित्त्वेन ङीपि रूपमेवम्।

3. हृदयं लिखतीति हृल्लेखः। 'कर्मण्यण्' (3-2-1) इत्यणि 'हृदयस्य हृल्लेख—' (6-3-50) इति हृदयशब्दस्य 'हृत्' इत्यादेशः।

4. कर्मव्यतीहारे णचि, 'णचस्स्त्रियाम्—' (5-4-14) इत्यञि ङीपि रूपमेवम्।

5. भिदादि (3-3-104) पाठादङि रूपमेवम्। तत्रैव गणे पाठात् लकारस्य पाक्षिको रेफादेशश्च। तेन रेखा इत्यपि साधुः।

[अ] तुदादिष्वयं धातुः कुटादेः पूर्वं पठितः। ञ्णित्णिद्भिन्नानां प्रत्ययानां ङिद्वद्भावः कुटादीनां विधीयते—कुटितुम्—कुटिता इत्यादिरूपसिद्धये। एवं 'लिखितुं विश्वसृजोऽपि शक्तिहानिः', 'स्वयमेव लिखिष्यते' इत्यादिषु गुणाभावोपपत्त्यर्थं 'गाङ्कुटादिभ्यः—' (1-2-1) इत्यत्र 'कुटस्य आदिः कुटादिः, कुटादिश्च कुटादयश्च इति बहुव्रीहितत्पुरुषयोः सह विवक्षां कृत्वा—कुटादेः पूर्वं पठितस्य अस्यापि धातोः ङित्त्वमभ्युपगच्छन्ति। पक्षोऽयं पदमञ्जर्यां दूषितः ; 'अपाच्चतुष्पाच्छकुनिष्वालेखने' (6-1-142) इति निर्देशात् 'रलो व्युपधात्—' (1-2-26) इत्यत्र काशिकादिषु लिखित्वा—लेखित्वा लिलिखिषति-लिलेखिषति इत्युदाहरणात्, 'ईश्वरे तोसुन्—' (3-4-13) इत्यत्र 'विलिखितुमित्यर्थः' इति वृत्तौ विवरणात् च न समञ्जसोऽयं पक्ष इति। वर्धमानप्रभृतयोऽपि एवमेवाहुरिति धातुवृत्त्यादिषु स्पष्टम्। लिखितुम्, लिखिष्यते इत्यादि तु 'संज्ञापूर्वको विधिरनित्यः' (परि. 95) इति कथञ्चित् समर्थनीयम्। एतेन 'लिखनसंक्षेपनिर्बन्धवतो दीधितिकारस्य—' इति गदाधरोक्तिरपि व्याख्याता। बोपदेवव्याकरणे मुग्धबोधे तु कुटादित्वमेवास्यापि धातोरङ्गीकृतम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]दन्तलेखकः इत्यादीनि रूपाण्यस्य धातोः विशेषेण भवन्तीति ज्ञेयम्। [2]लिखापयति।

(1486) "**लिगि गत्यर्थः** (I-भ्वादिः-155-सक. सेट् पर.)

'लिङ्गगतौ **लिङ्गति,** लिङ्गयेद् इत्यस्यैव चित्रीकरणार्थवृत्तेः ॥'

(श्लो. 45) इति **देवः**।

लिङ्गकः-ङ्गिका, लिङ्गकः-ङ्गिका, लिलिङ्गिषकः-षिका, लेलिङ्गकः-ङ्गिका; लिङ्गिता-त्री, लिङ्गयिता-त्री, लिलिङ्गिषिता-त्री, लेलिङ्गिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कङ्कति**वत् (140) ऊह्यानि।

(1487) "**लिगि चित्रीकरणे**" (X-चुरादिः-1740. सक सेट्. उभ.)

'............**लिङ्गयेद्** इत्यस्यैव चित्रीकरणार्थवृत्तेः ॥' (श्लो. 45) इति **देवः**। लिङ्गकः-ङ्गिका, लिलिङ्गयिषकः-षिका, लिङ्गकः-ङ्गिका, लिलिङ्गिषकः-षिका, लेलिङ्गकः-ङ्गिका; लिङ्गयिता-त्री, लिलिङ्गयिषिता-त्री, लिङ्गिता-त्री, लिलिङ्गिषिता-त्री, लेलिङ्गिता-त्री; लिङ्गयन्-न्ती, लिलिङ्गयिषन्-न्ती, लिङ्गयिष्यन्-न्ती-ती; लिलिङ्गयिषिष्यन्-न्ती-ती; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**चिन्तयति**वत् (523) ज्ञेयानि। इदित्करणात् णिचो वैकल्पिकत्वम् इति ज्ञेयम्। आलिङ्गना[A]।

(1488) "**लिप उपदेहे**" (VI-तुदादिः-1433. सक. अनि. उभ.)

मुचादिः।

'**उपदेहो**=वृद्धिः' इति **क्षीरस्वामी**। "अस्य [धातोः] **दहनार्थ**त्वमप्याह **शङ्कराचार्यः**" इति **धा. का. व्याख्यायाम्** (2-58)।

---

1. दन्तस्य लेखकः **दन्तलेखकः**। 'नित्यं क्रीडाजीविकयोः' (2 2-17) इति षष्ठयन्तस्य दन्तशब्दस्य अकारान्तेन **लेखकशब्देन** तत्पुरुषसमासः। यस्य गजवराहादिदन्तेषु चित्रं विलिख्य तन्मूलिका जीविका तत्रैवायं—जीविकार्थे समास इति बोध्यम्।

2. लिखम् आचष्टे लिखापयतीति निष्पाद्य, 'अर्थवेदयोरप्यापुग्वक्तव्यः' (वा. 3-1-25) इत्यत्र 'अपुक्' इति ह्रस्वोच्चारणेनैव सिद्धौ दीर्घोच्चारणात् उपात्तभिन्नेष्वपि आपुग् भवतीति मत्वा अत्रापि आपुग् भवतीति **आत्रेयमतं धातुवृत्तौ** प्रतिपादितमिहानुसन्धेयम्।

A. 'सलील**मालिङ्गनयो**पपीडम् अनामयं पृच्छति वासवः त्वाम्।' नैषधे 6-78.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'—**उपदाहे**' इति **मैत्रेयः**। **न्यासे**ऽपि (3-1-138 सूत्रे)।

लेपकः-पिका, लेपकः-पिका, लिलिप्सकः-प्सिका, लेलिपकः-पिका ;
लेप्ता-त्री, लेपयिता-त्री, लिलिप्सिता-त्री, लेलिपिता-त्री ;
[1]लिम्पन्-न्ती-ती, लेपयन्-न्ती, लिलिप्सन्-न्ती ; —
इत्यादीनि रूपाणि सर्वाण्यपि तौदादिक**दिशति**वत् (841) बोध्यानि।
लिम्पः[2], निलिम्पाः[3] [देवाः], [4]प्रलिपः, लिपिः[5]-लिबिः
इमानि रूपाण्यधिकानीति विशेषः।

(1489) "**लिश अल्पीभावे**" (IV-दिवादिः-1179. अक.अनि. आत्म.)

'**लिश्यते** लिशतीत्येव**मल्पीभावे** गतौ क्रमात्॥' (श्लो. 165) इति **देवः**।

लेशकः-शिका, लेशकः-शिका, लिलिक्षकः-क्षिका, लेलिशकः-शिका ;
लेष्टा-ष्ट्री, लेशयिता-त्री, लिलिक्षिता-त्री, लेलिशिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि तौदादिक**दिशति**वत् (841) बोध्यानि। क्विपि-लिट्-लिड्-लिशौ-लिशः ; शानचि-लिश्यमानः[A] इति च विशेषः। लिक्षा, अलिक्षम्= क्षुद्रजन्तुविशेषः।

---

1. विकरणप्रत्यये शप्रत्यये परतः, 'शे **मुचादीनाम्**' (7-1-59) इति नुमागमे रूपमेवम्।
2. अनुपसर्गे **लिपेः**, 'अनुपसर्गात्—' (3-1-138) इति शप्रत्यये 'शे मुचादीनाम्' (7-1-59) इति नुमि रूपमेवम्। लिम्पतीति-**लिम्पः**।
3. नौ उपपदे धातोः 'नौ **लिम्पे**रिति वक्तव्यम्' (वा. 3-1-138) इति शप्रत्यये रूपमेवं भवति। **निलिम्पा** नाम देवाः।
4. उपसर्गे उपपदे इगुपधलक्षणकप्रत्यय एव।
5. 'इगुपधात् किच्च' [द. उ. 1-48] इति इन्प्रत्ययः। 'दिवाविभा—' (3-2-21) इत्यत्र '**लिपिः लिबि**—' इति निर्देशात् अस्यैव पाक्षिको बकारः पकारस्य, तेन **लिबिः**, इत्यपि साधुरिति **धातुवृत्तिः**।

A. '..............,शेषं व्यसृज्यत पटौघ**मलिश्यमानम्**॥' धा. का. 2-62.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1490) "लिश गतौ" (VI-तुदादिः-1421. सक. अनि. पर.)

'लिश्यते **लिशती**त्येवमल्पीभावे **गतौ** क्रमात् ॥' (श्लो. 165) इति **देवः** । [अ]
लेशकः-शिका, लेशकः-शिका, लिलिक्षकः-क्षिका, लेलिशकः-शिका ;
लेष्टा-लेष्ट्री, लेशयिता-त्री, लिलिक्षिता-त्री, लेलिशिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि तौदादिक**दिशति**वत् (841) ऊह्यानि ।

(1491) "लिह आस्वादने" (II-अदादिः-1016. सक. अनि. उभ.)

लेहकः-हिका, लेहकः-हिका, [1]लिलिक्षकः-क्षिका, लेलिहकः-हिका ;
[2]लेढा-ढ्री, लेहयिता-त्री, लिलिक्षिता-त्री, लेलिहिता-त्री ;
लिहन्-ती, लेहयन्-न्ती, लिलिक्षन्-न्ती ; —
लेक्ष्यन्-न्ती-ती, लेहयिष्यन्-न्ती-ती, लिलिक्षिष्यन्-न्ती-ती ; —
लिहानः, लेहयमानः, लिलिक्षमाणः, लेलिह्यमानः ;
लेक्ष्यमाणः, लेहयिष्यमाणः, लिलिक्षिष्यमाणः, लेलिहिष्यमाणः ;
लिट्-लिड्-लिहौ-लिहः ; — — —
[3]लीढम्-ढः-ढवान्, लेहितः-तम्, लिलिक्षितः, लेलिहितः-तवान् ;
[4]लेहः, [5]लेहनः, [6]मधुलेही,

---

1. सन्नन्ते 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वात् न गुणः । धातुहकारस्य 'हो ढः' (8-2-31) इति ढत्वे, 'षढोः कः सि' (8-2-41) इति तस्य ककारे 'इण्कोः' (8-3 57) 'आदेशप्रत्यययोः' (8-3-59) इति प्रत्ययसकारस्य षकारे च रूपम् । एवमुपर्यपि यथासम्भवं ज्ञेयम् ।
2. धातुहकारस्य ढत्वे, 'झषस्तथोः—' (8-2-40) इति धत्वे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेन धकारस्य ढकारे, 'ढो ढे लोपः' (8-3-11) इति धातुस्थढकारस्य लोपे रूपमेवम् । एवमेव तुमुनादिषु प्रक्रिया ज्ञेया ।
3. अत्रापि ढत्वधत्वष्टुत्वढलोपाः । प्रत्ययस्य कित्त्वान्न प्रकृतेर्गुणः ।
4. इगुपधलक्षणकप्रत्ययस्यापवादे 'श्याद्व्यध—' (3-1-141) इति णप्रत्यये गुणे च रूपमेवम् ।
5. बाहुलकान्नन्द्यादित्वेन कर्तरि ल्युप्रत्ययेऽनादेशे च रूपमेवम् ।
6. मधु लेढीति **मधुलेही** । 'सुप्यजातौ—' (3-2-78) इति णिनिः ।

[अ] "तुदादिश्चायं ['—अल्पीभावे] **क्षीरस्वामिधनपालयोः** । 'लिश गतौ' । तुदादिः तयोरनुमतोऽयं पाठः । द्विष्पाठस्त्वेवमर्थभेदान्नूनम् । एवं तु 'लिश गत्यल्पीभावयोः' इत्यनुक्तिर्वैचित्र्यार्था" इति **पुरुषकारोक्त**मिहानुसन्धेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वहंलिहः-अभ्रंलिहः, [2]लेलिहानः, लेहः, लिलिक्षुः, लेलिहः ;
लेढव्यम्, लेहयितव्यम्, लिलिक्षितव्यम्, लेलिहितव्यम् ;
लेहनीयम्, लेहनीयम्, लिलिक्षणीयम्, लेलिहनीयम् ;
लेह्यम्, लेह्यम्, लिलिक्षिष्यम्, लेलिह्यम् ;
ईषल्लेहः-दुर्लेहः-सुलेहः ; — — —
लिह्यमानः, लेह्यमानः, लिलिक्षिष्यमाणः, लेलिह्यमानः ;
लेहः, मधुलेहः, लेहः, लिलिक्षः, लेलिहः ;
लेढुम्, लेहयितुम्, लिलिक्षितुम्, लेलिहितुम् ;
लीढिः, लेहना, लिलिक्षा, लेलिहा ;
लेहनम्, लेहनम्, लिलिक्षणम्, लेलिहनम् ;
लीढ्वा, लेहयित्वा, लिलिक्षित्वा, लेलिहित्वा ;
संलिह्य, संलेह्य, संलिलिक्ष्य, संलेलिह्य ;
लेहम् २, लीढ्वा २, } लेहम् २, लेहयित्वा २, } लिलिक्षम् २, लिलिक्षित्वा २, } लेलिहम् २ ; लेलिहित्वा २. }

(1492) "**ली श्लेषणे**" (IX-क्र्यादिः-1501. अक. अनि. पर.)

प्वादिः, ल्वादिश्च ।

'यौ द्रवीकरणेऽनात्वे लीनयेत् लाययेत् लयेत् ॥
लापयेल्लालयेदात्वे **श्लेषणे** लीयतेऽलिनात् ।' (श्लो. 17-18) इति देवः ।

---

1. वहं=स्कन्धं लेढीति **वहंलिहः**=वत्सः । अभ्रं लेढीति **अभ्रंलिहः**=वायुः सौधो वा । '**वहाभ्रे लिहः**' (3-2-32) इति खश् । '**कर्तरि शप्**' (3-1-68) इति शप् । तस्य 'अदिप्रभृतिभ्यः—' (2-4-72) इति लुक् । खित्वात् 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति पूर्वपदस्य मुमागमः । प्रत्ययस्य शित्त्वेन सार्वधातुकत्वम् ; तेन 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावान्न गुणः ।
2. यङन्तात् चानश्प्रत्यये रूपमेवम् । अन्यथा **लेलिह्यमान** इत्येव शानचि भवेत् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]लायकः-यिका, [2]लालकः-लिका, [3]लीनकः-निका, निलापकः-पिका, [4]लिलीषकः-षिका, [5]लेलीयकः-यिका ;

[6]लेता-लेत्री, लाता-त्री, लापयिता-लालयिता-त्री, लीनयिता-त्री, लिलीषिता-त्री, लेलीयिता-त्री ;

[7]लिनन्-ती, लापयन्, लालयन्, लीनयन्-न्ती, लिलीषन्-न्ती ; —

लास्यन्-लेस्यन्-न्ती-ती, लापयिष्यन्-लालयन्-लीनयन्-न्ती-ती, लिलीषिष्यन्-न्ती-न्ती ; —

— लापयमानः-लालयमानः-लीनयमानः, — लेलीयमानः ;

— [8]जटाभिर्लापयमानः, वर्तिकामुल्लापयमानः, बालमुल्लापयमानः ;

— लापयिष्यमाणः-लालयिष्यमाणः-लीनयिष्यमाणः, — लेलीयिष्यमाणः ;

लीः-लियौ-लियः ; — — —

[9]लीनम्-नः-नवान्, लापितः-लालितः-लीनितः, लिलीषितः, लेलीतः-तवान् ;

---

1. ण्वुलि, 'विभाषा **लीयतेः**' (6-1-51) इत्याकारविकल्पः—एज्विषये। आत्वपक्षे 'आतो युक्—' (7-3-33) इति युगागमे रूपमेवम्। आत्वाभावपक्षे वृद्धौ आयादेशे च **लायकः** इत्येव रूपमिति ज्ञेयम्। एवमुत्तरत्रापि।
2. '**लीलो**र्लुग्नुकावन्यतरस्यां स्नेहविपातने' (7-3-39) इति ण्यन्ते लुगागमविकल्पः—स्नेहविपातने। स्नेहविपातनं नाम कठिनद्रव्यस्याग्नौ निष्टपनेन द्रवीकरणम्। एतद्भिन्नार्थे तु 'विभाषा **लीयतेः**' (6-1-51) इत्यात्वे 'अर्तिह्री—' (7-3-36) इति पुगागमे **लापकः** इत्यादीनि रूपाणि।
3. अनेनैव सूत्रेण (7-3-39) पाक्षिके नुगागमे **लीनकः** इत्यादीनि रूपाणि।
4. सन्नन्ते 'इको झल्' (1-2-9) इति सनः कित्त्वं सर्वत्र ज्ञेयम्।
5. यङन्ते 'गुणो यङ्लुकोः' (7-4-82) इति गुणोऽभ्यासस्य।
6. धातोरनिट्त्वात् इडागमो न। गुणः। एवं तव्यदादिष्वपि ज्ञेयम्।
7. शतरि '**क्र्यादिभ्यः**—' (3-1-81) इति श्ना विकरणप्रत्ययः। '**प्वादीनां** ह्रस्वः' (7-3-80) इति धातोरीकारस्य ह्रस्वः। 'श्नाऽऽभ्यस्तयोः—' (6-4-112) इत्याकारलोपः।
8. '**लियः** सम्माननशालीनीकरणयोश्च' (1-3-70) इति ण्यन्तात् अकर्त्रभिप्रायेऽपि आत्मनेपदमेव। सम्माननम्=पूजा। शालीनीकरणम्=न्यग्भावनम्। जटाभिः **आलापयमानः**=जटया हेतुना पूजां समधिगच्छन् इत्यर्थः। **वर्तिकामुल्लापयमानः**=पक्षिविशेषं न्यक्कृत्येत्यर्थः। एतयोरुभयोरेवार्थयोस्तङ्। **बालकमुल्लापयमानः**, वञ्चयन्नित्यर्थः प्रलम्भनार्थेऽपीति वार्तिकात् (३४८३)।
9. '**ल्वादिभ्यः**—' (8-2-44) इति निष्ठातकारस्य नकारः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]लय:, लाप:-लाल:-लीन:, लिलीषु:, लिलापयिषु:, लेल्य:-लेलिय: ;
लेतव्यम्-लातव्यम्, लापयितव्यम्-लालयितव्यम्-लीनयितव्यम्, लिलीषितव्यम्, लेलीयितव्यम् ;
लयनीयम्-लानीयम्, लापनीयम्-लालनीयम्-लीननीयम्, लिलीषणीयम्, लेलीयनीयम् ;
[2]ईषल्लय:-दुर्लय:-सुलय: ; — — —
लीयमान:, लाप्यमान:-लाल्यमान:-लीन्यमान:, लिलीष्यमाण:, लेलीय्यमान: ;
लय:, लाप:-लाल:-लीन:, लिलीष:, लेलीय: ;
लातुम्-लेतुम्, लापयितुम्-लालयितुम्-लीनयितुम्, लेलीयितुम् ;
[3]लीनि:, लापना-लालना-लीनना, लिलीषा, लेलीया ;
लयनम्, लानम्, लापनम्-लालनम्-लीननम्, लिलीषणम्, लेलीयनम् ;
लीत्वा, लालयित्वा-लापयित्वा-लीनयित्वा, लिलीषित्वा, लेलीयित्वा ;
[4]विलाय-विलीय, विलाप्य-विलाल्य-विलीन्य, विलिलीष्य, विलेलीय ;
लायम् २ लीत्वा २, लापम् २-लालम् २-लीनम् २, [5]जतुविलायं विलिल्ये, लापयित्वा २-लालयित्वा २-लीनयित्वा २, लिलीषम् २, लिलीषित्वा २, लेलीयम् २ ; लेलीयित्वा २.

(1493) "ली द्रवीकरणे" (X-चुरादि:-1812. सक. अनि. उभ.)

आधृषीय:। तेन णिज्विकल्प:।

'यौ द्रवीकरणेऽनात्वे लीनयेल्लाययेल्लयेत् ॥

---

1. पचाद्यचि रूपमेवम्। 'निमिमीलियां खल्चोरात्वं न' (वा. 6-1-51) इत्यत्र 'अच्' इत्यनेन पचाद्यचोऽपि ग्रहणमिति **पदमञ्जरी**।
2. अत्रापि खल्प्रत्यये आत्वं न।
3. 'ऋल्वादिभ्य:—' (वा. 3-3-94) इति क्तिनस्तकारस्य नकार:।
4. 'विभाषा लीयते:' (6-1-51) इति ल्यपि आत्वविकल्प:। आत्वपक्षे **विलाय** इति, आत्वाभावपक्षे **विलीय** इति च रूपद्वयम्।
5. 'उपमाने कर्मणि च' (3-4-45) इति णमुल्। 'कषादिषु—' (3-4-46) इति यथाविध्यनुप्रयोग:।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लापयेत् लालयेदात्वे श्लेषणे लीयतेऽलिनात् ।' (श्लो 17-18) इति **देवः** ।

लायकः-यिका, लिलाययिषकः-षिका, लायकः-यिका, लिलीषकः-षिका, लेलीयकः-यिका ;

लाययिता-त्री, लिलाययिषिता-त्री, लेता-त्री, लिलीषिता-त्री, लेलीयिता-त्री ;

इत्यादीनि रूपाणि सर्वाणि ण्यन्तरूपाणि, ण्यन्तप्रकृतिकसन्नन्तरूपाणि च विना क्रैयादिक**प्लिनाति**वत् (1081) ऊह्यानि । ण्यन्ते-तत्प्रकृतिकसन्नन्ते च इमानि रूपाणि—लाययन्-न्ती, लिलाययिषन्-न्ती ; लाययिष्यन्-न्ती-ती-लिलाययिषिष्यन्-न्ती-ती ; लायमानः, लिलाययिषमाणः, लाययिष्यमाणः, लिलाययिषिष्यमाणः ;

लाः- लायौ-लायः ; — — —

लायितम्-तः, लिलाययिषितम्-तः-तवान् ; लायः, लिलाययिषुः ; लाययितव्यम्, लिलाययिषितव्यम् ; लायनीयम्, लिलाययिषणीयम् ; लाय्यम्, लिलाययिष्यम् ; ईषल्लायः-दुर्लायः-सुलायः; लाय्यमानः, लिलाययिष्यमाणः ; लायः, लिलाययिषः; लाययितुम्, लिलाययिषितुम् ; लायना, लिलाययिषा ; लायनम्, लिलाययिषणम् ; लाययित्वा, लिलाययिषित्वा ; प्रलाय्य, प्रलिलाययिष्य ; लायम्२-लाययित्वा २; लिलाययिषम् २-लिलाययिषित्वा २. इति विशेषः ।

(1494) " **लीङ् श्लेषणे** " (IV-दिवादिः-1139. अक. अनि. आत्म.)

'लापयेल्लालयेदात्वे **श्लेषणे लीयते**ऽलिनात् ।' (श्लो. 18) इति **देवः** ।

लायकः-यिका, लालकः-लीनकः-निका, लापकः-पिका, लिलीषकः-षिका, लेलीयकः-यिका ;

लेता-त्री, लालयिता-लीनयिता-लापयिता-त्री, लिलीषिता-त्री, लेलीयिता-त्री ;

इत्यादीनि रूपाणि सर्वाणि क्रैयादिक**लिनाति**वत् (1492) ज्ञेयानि । खल्प्रत्यये-ईषद्विलयः-दुर्विलयः-सुविलयः इति ।

(1495) " लुजि हिंसाबलादाननिकेतनेषु "

(X-चुरादिः-1567. सक. सेट्. उभ.)

क्षीरस्वामिनैव 'लुजि' इति पठ्यते । **अन्ये सर्वे**ऽपि मतान्तरत्वेनैव पठन्ति अयं पाठः **मा. धा. वृत्तौ** नाऽऽदृतः । **मैत्रेयादिभि**रपि न पठ्यते ।

लुञ्जकः-ञ्जिका, लुलुञ्जयिषकः-षिका, लुञ्जकः-ञ्जिका, लुलुञ्जिषकः षिका,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोलुञ्जकः-ञ्जिका; लुञ्जयिता-त्री, लुलुञ्जयिषिता-त्री, लुञ्जिता-त्री, लुलुञ्जिषिता-त्री, लोलुञ्जिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**चिन्तयति**वत् (523) ज्ञेयानि ।

(1496) " **लुजि भाषार्थः** " (X-चुरादिः-1579. अक. सेट्. उभ.)

आस्वदीयः ।

अर्थभेदार्थं पुनः पाठः । अन्यत् प्रयोजनं नेति ज्ञायते ।

धातुकाव्ये अयं न दृश्यते ।

लुञ्जकः-ञ्जिका, लुलुञ्जयिषकः-षिका, लुञ्जकः-ञ्जिका, लुलुञ्जिषकः-षिका, लोलुञ्जकः-ञ्जिका;
लुञ्जयिता-त्री, लुलुञ्जयिषिता-त्री, लुञ्जिता-त्री, लुलुञ्जिषिता-त्री, लोलुञ्जिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**चिन्तयति**वत् (523) ऊह्यानि ।

(1497) " **लुट विलोटने** " (I-भ्वादिः. 314. सक. सेट्. पर.)

'णौ लोटयति भाषार्थे लुट-चेल्लोटति **लोटने** ॥'
लोटते प्रतिघातेऽर्थे स्तेये लुण्टति लुण्टयेत् ।' (श्लो. 73-74) इति **देवः** ।
लोटकः-टिका, लोटकः-टिका, लुलुटिषकः-लुलोटिषकः-षिका, लोलुटकः-टिका;
लुटिता-त्री, लोटयिता-त्री, लुलुटिषिता-लुलोटिषिता-त्री, लोलुटिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कुकति**वत् (197) ऊह्यानि । "**लुड—** इति टवर्गतृतीयान्तः इति **कौशिककाश्यपनन्दिद्रमिडाः**" इति **मा. धा. वृत्तौ** । '**—विलोडने**' इति **दुर्गः** । '**लुट—**' इत्यत्र '**लुल—** इति अन्ये' इति **धा. का. व्याख्याने** (2-1) । " भूवादिसूत्रे (1-3-1) **सुधाकरः**- '**लुल—**' इति लान्तोऽपि दृश्यते, 'आश्लिष्टभूमिं रसितारमुच्चैर्**लोलद्**-भुजाकारबृहत्तरङ्गम्' शि. व. (3-72) इति । डलयोरेकत्वस्मरणमिति वा प्रतिविधेयम्" इति **मा. धा. वृत्तौ**. इत्युक्तमत्र स्मरणीयम् । [1]लोलमानः[A] ।

---

1. 'ताच्छील्यवयोवचनशक्तिषु **चानश्**' (3-2-29) इति ताच्छील्ये चानश्प्रत्यये रूपमेवम् ।

A. 'आमृद्नद्भिरमितो वलिवीचीर्**लोलमान**विततस्फुलिहस्तैः ।' शि. व. 10-59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1498) " **लुट प्रतीघाते** " (I-भ्वादि:-749. सक. सेट्. आत्म.)

'**लोटते प्रतिघाते**ऽर्थे स्तेये लुण्टति लुण्टयेत् ।' (श्लो. 74) इति **देवः** ।
अयं पाठो **देवमैत्रेयादीनाम्** । **क्षीरस्वामी** तु द्वितीयान्तं पठित्वा '**लुट**' इत्येके, इति वदति ।

लोटकः-टिका, लोटकः-टिका, लुलुटिषकः-लुलोटिषकः-षिका, लोलुटकः-टिका ; लुटिता-त्री, लोटयिता-त्री, लुलुटिषिता-लुलोटिषिता-त्री, लोलुटिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुकति**वत् (197) ऊह्यानि ।

(1499) " **लुट विलोडने** " (IV-दिवादि:-1222. सक. सेट्. पर.)

'—**विलोटने**' इति **क्षीरस्वामी** । '**लुठ**—' इति द्वितीयान्तः पठितः **सि. कौमुद्याम्** । **धातुकाव्ये**ऽपि (2-66) एवमेव । शतरि-लुठ्यन् इति अस्य प्रयोगोऽपि दृश्यते ।

'णौ लोटयति भाषार्थे, **लुट्**येल्लोटति लोटने ॥' (श्लो. 73) इति **देवः** ।
लोटकः-टिका, लोटकः-टिका, लुलुटिषकः-लुलोटिषकः-षिका, लोलुटकः-टिका ; लोटिता-त्री, लोटयिता-त्री, लुलुटिषिता-लुलोटिषिता-त्री, लोलुटिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि दैवादिक**गुध्यति**वत् (405) ऊह्यानि ।

(1500) " **लुट संश्लेषणे** " (VI-तुदादि:-1381. सक. सेट्. पर.) [**कुटादिः** ।

'**लुठ**—' इति **धा. का. व्याख्याने** (2-81), '**लुड इत्येके**' इति च तत्रोपात्तम् । **क्षीरतरङ्गिण्यां** धातुरयं न पठितः । अपि तु '**पुट संश्लेषणे**' इत्यत्र '**लुट** विलोडने इति **दुर्गः**' इत्युपात्तम् । तत्र टिप्पण्यां "**कातन्त्र-धातुपाठे** '**लुट संश्लेषणे**' इति पाठः, **काशकृत्स्ने लुठ**—" इत्येवं दृश्यते ।

'णौ लोटयति भाषार्थे लुट्येत् लोटति लोटने ॥' (श्लो. 73) इति **देवः** ।
लोटकः-टिका, लोटकः-टिका, लुलुटिषकः-षिका, लोलुटकः-टिका ; लुटिता-त्री, लोटयिता-त्री, लुलुटिषिता-त्री, लोलुटिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि तौदादिक**कुटति**वत् (204) बोध्यानि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1501) "**लुट भाषार्थः**" (X-चुरादि:-1755. सक. सेट्. उभ.)

[आस्वदीयः ।

'**णौ लोटयति भाषार्थे** लुट्येल्लोटति लोटने ॥' (श्लो. 73) इति **देवः** ।

लोटकः-टिका, लुलोटयिषकः-षिका ; लोटयिता-त्री, लुलोटयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिकक्रो**टयति**वत् (205) बोध्यानि ।

(1502) "**लुटि स्तेये**" (I-भ्वादि:-328. सक. सेट्. पर.)

'लोटते प्रतिघातेऽर्थे **स्तेये लुण्टति** लुण्टयेत् ।' (श्लो. 74) इति **देवः** ।
'**लुठि**—' इत्येके इति **तरङ्गिण्याम्** । किन्तु **पुरुषकारे**, 'लुण्ठेति **क्षीरस्वामी**' इति उद्धृतम् । **शाकटायनस्तु** तृतीयान्तं (लुडि) पपाठ । इति **मा. धा.** वृत्तिः । **धातुकाव्ये**ऽपि (2-66) एवमेव ।

लुण्टकः-ण्टिका, लुण्टकः-ण्टिका, लुलुण्टिषकः-षिका, लोलुण्टकः-ण्टिका ;
लुण्टिता-त्री, लुण्टयिता-त्री, लुलुण्टिषिता-त्री, लोलुण्टिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककु**ण्टति**वत् (209) ज्ञेयानि ।
[1]लुण्टाकः[A]-लुण्टाकी ।

(1503) "**लुठ उपघाते**" (I-भ्वादि:-337. सक. सेट्. पर.)

'श्लेषालस्योप**घातेषु** प्रतिघाते क्रमाल्लुठेत् ।
लुण्ठेत्, **लोठति** लोठेत किन्तु गत्यां च लुण्ठति ॥' (श्लो. 78) इति **देवः** ।
"अत्र **मैत्रेयः** '**उठेत्यप्येके**' इति । [लुंड इत्येके इति च ।] **धनपाल-शाकटायनौ** रुठ लुठेत्येव पेठतुः । **क्षीरस्वामी** तु **उठिं** पठित्वा 'रुठ लुठ इत्यपि **दौर्गाः**' इत्याह" इति **मा. धा. वृत्तिः** ।

लोठकः-ठिका, लोठकः-ठिका, लुलुठिषकः-लुलोठिषकः-षिका, लोलुठकः-ठिका ;
लोठिता-त्री, लोठयिता-त्री, लुलुठिषिता-लुलोठिषिता-त्री, लोलुठिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककु**कति**वत् (197) ऊह्यानि ।

---

1. तच्छीलादिषु कर्तृषु '**जल्पभिक्षकुट्टलुण्ट**—' (3-2-155) इति षाकन्प्रत्यये रूपमेवम् । षित्वात् स्त्रियां ङीष्प्रत्यये लुण्टाकी इति ।

A. **क्षीरतरङ्गिण्याम्** (भ्वादौ) उद्धृतत्वात् अत्र उपात्तम् । '**जल्पभिक्षकुट्टलुण्ट**—' (3-2-155) इत्यत्र **न्यासपदमञ्जर्योः** '**लुण्ट** स्तेये चौरादिकः' इत्युक्तत्वात् अत्र पाठः न समीचीनः इति ज्ञायते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1504) " **लुठ प्रतीघाते** " (I-भ्वादिः-749. सक. सेट्. आत्म.)

क्षीरस्वामी त्वेवं पठित्वा '**लुट इत्येके**' इत्याह ।

'श्लेषालस्योपघातेषु **प्रतिघाते** क्रमाल्लुठेत् ।

लुण्ठेत्, लोठति लोठेत किन्तु गत्यां च लुण्ठति ॥' (श्लो. 78) इति **देवः** ।

लोठकः-ठिका, लोठकः-ठिका, लुलुठिषकः-लुलोठिषकः-षिका, लोलुठकः-ठिका ;

लोठिता-त्री, लोठयिता-त्री, लुलुठिषिता-लुलोठिषिता-त्री, लोलुठिता-त्री ;

इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुकृति**वत् (197) बोध्यानि । कर्तरि क्तप्रत्यये [1]लुठितम्-लोठितम्[A] इति ।

(1505) " **लुठि आलस्ये प्रतिघाते च** "

(I-भ्वादिः-343. सक. सेट्. पर.)

'श्लेषालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् ।

लुण्ठेत्, लोठति लोठेत किन्तु गत्यां च लुण्ठति ॥' (श्लो. 78) इति **देवः** ।

अत्र **क्षीरतरङ्गिण्यां** '**रुठि** आलस्ये **गति**प्रतिघाते च' इत्येव दृश्यते ।

अन्यत्र सर्वेषु कोशेषु '**लुठि**—' इत्येव दृश्यते ।

लुण्ठकः-ण्ठिका, लुण्ठकः-ण्ठिका, लुलुण्ठिषकः-षिका, लोलुण्ठकः-ण्ठिका ;

लुण्ठिता-त्री, लुण्ठयिता-त्री, लुलुण्ठिषिता-त्री, लोलुण्ठिता-त्री ;

इत्यादीनि रूपाणि सर्वाणि भौवादिक**कुण्ठति**वत् (209) ऊह्यानि ।

(1506) " **लुठि गतौ** " (I-भ्वादिः-346. सक. सेट्. पर.)

'…………**गत्यां च लुण्ठति** ॥' (श्लो. 78) इति **देवः** ।

लुण्ठकः-ण्ठिका, लुण्ठकः-ण्ठिका, लुलुण्ठिषकः-षिका, लोलुण्ठकः-ण्ठिका ;

लुण्ठिता-त्री, लुण्ठयिता-त्री, लुलुण्ठिषिता-त्री, लोलुण्ठिता-त्री ;

इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि ।

---

1. 'उदुपधात्—' (1-2-21) इति निष्ठायाः कित्त्वविकल्पेन रूपद्वयं भवति ।

A. 'श्रिया समग्रं द्युति तं मदेनेव **प्रलोठितम्** ॥' भ. का. 7-104.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1507) " **लुण्ठ स्तेये** " (X-चुरादिः-1563. सक. सेट्. उभ.)

'............**स्तेये** लुण्टति **लुण्टयेत्** ।' (श्लो. 74) इति **देवः** ।
धातुकाव्ये (3-16) '**—अनादरे च द्रुमे**' इत्युपात्तम् ।
'**लुण्ठ लुण्ट**' इति टवर्गप्रथमान्तः, द्वितीयान्त इति चात्र मतद्वयम् ।
'**लुण्ड**' इत्यपि **शाकटायनः** । **पुरुषकारे टान्त**पाठ एव साधुः, ठान्तोऽप्रामाणिक इति साग्रहं **क्षीरस्वामि**मतनिरासपूर्वकं प्रतिपादितम् । **माधव**-प्रभृतयः ठान्तपाठमेव **न्यासा**दिग्रन्थसंवादपुरस्सरं स्थापयामासुः । 'जल्पभिक्ष-**कुट्टलुण्ट**—' (3-2-155) इत्यत्र **सूत्रकारैः** टान्तोऽथ वा ठान्तः पठितोऽयं धातुरित्यत्र नियामकं किमपि न दृश्यते । **उभये**ऽपि स्वस्वमतानुसारेण टान्तं ठान्तं च सूत्रेऽपि पठन्ति । ईदृशस्थलेषु 'प्रयोग एव भगवान् तान् व्यवस्थापयेत् पथि' इत्युक्तदिशा शिष्टप्रयोगस्योभयधाऽप्युपलम्भाद् वयं तूष्णीकाः ।
लुण्ठकः-ण्ठिका, लुलुण्ठयिषकः-षिका, लोलुण्ठकः-ण्ठिका ; लुण्ठयिता-त्री, लुलुण्ठयिषिता-त्री, लोलुण्ठिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक-**कुस्मयति**वत् (236) बोध्यानि । [1]लुण्ठाकः-ठाकी, लुण्टाकः-[A]टाकी ।

(1508) " **लुथि हिंसासंक्लेश[न]योः** "

(I-भ्वादिः-45. सक. सेट्. पर.)

लुन्थकः-न्थिका, लुन्थकः-न्थिका, लुलुन्थिषकः-षिका, लोलुन्थकः-न्थिका ; लुन्थिता-त्री, लुन्थयिता-त्री, लुलुन्थिषिता-त्री, लोलुन्थिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुन्थति**वत् (220) बोध्यानि ।

(1509) " **लु[ञ्च]न्च अपनयने** "

(I-भ्वादिः-187. सक. सेट्. पर.) [अ]

---

1. तच्छीलादिषु कर्तृषु 'जल्पभिक्षकुट्टलुण्ठ[ट]—' (3-2-155) इति षाकन्प्रत्यये रूपमेवम् । षित्वात् स्त्रियां ङीषि **लुण्ठाकी** इति रूपम् ।

A. 'त्रिभुवनतमोलुण्टाकीनामहो मिहिरत्विषा........ ।' अनर्घराघवे 2-77.

[अ] "**केचिदमुमुदितं** पठन्ति, तदनार्षम् ; राजदन्तादिषु (2-2-31) '**मृष्टलुचितम्**' इति पाठात्" इति **मा. धा. वृत्तिः** । अयं भावः—उदित्त्वेन क्त्वायामिड्विकल्पनात् 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधः स्यात् इति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लुञ्चकः-ञ्चिका, लुञ्चकः-ञ्चिका, लुलुञ्चिषकः-षिका, लोलुचकः-चिका ; लुञ्चिता-त्री, लुञ्चयिता-त्री, लुलुञ्चिषिता-त्री, लोलुचिता-त्री ; [A]लुञ्चन्-न्ती, लुञ्चयन्-न्ती, लुलुञ्चिषन्-न्ती ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक-**कुञ्चति**वत् (222) ज्ञेयानि । लुञ्चितम्, [1]लुञ्चित्वा-लुचित्वा, इमानि रूपाण्यधिकानीति विशेषः । क्विपि-लुक्-लुञ्चौ-लुञ्चः ; ण्यन्तात् तु लुन्-लुञ्चौ-लुञ्चः; इति विशेषः ।

(1510) " लुप विमोहने "

(IV-दिवादिः-1237. सक. सेट्. पर.)

लोपकः-पिका, लोपकः-पिका, लुलुपिषकः-लुलोपिषकः-षिका, लोलुपकः-पिका; लुपिता-त्री, लोपयिता-त्री, लुलुपिषिता-लुलोपिषिता-त्री, लोलुपिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि दैवादिक**कुप्यति**वत् (224) ज्ञेयानि ।

(1511) " लुप्लृ छेदने "

(VI-तुदादिः-1431. सक. अनि. उभ.) मुचादिः ।

लोपकः-पिका, लोपकः-पिका, लुलुप्सकः-प्सिका, लोलुपकः-पिका ; लोप्ता-त्री, लोपयिता-त्री, लुलुप्सिता-त्री, लोलुपिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि तौदादिक**मुञ्चति**वत् (1275) ज्ञेयानि । शतरि-[2]लुम्पन्-न्ती, यङन्तात् शानचि-लोलुप्यमानः,[3] णिनिप्रत्यये [B]भयलोपी इति च अस्य धातोः विशेषः ।

---

1. क्त्वायाम् 'वञ्चिलुञ्च्यृतश्च' (1-2-24) इति कित्त्वविकल्पनात् पक्षे नलोपे च रूपद्वयम् इति ज्ञेयम् ।
2. 'तुदादिभ्यः शः' (3-1-77) इति विकरणप्रत्यये शे 'शे मुचादीनाम्' (7-1-59) इति नुमि च **लुम्पन्** इति रूपम् । एवं शानजन्तेऽपि प्रक्रिया ज्ञेया ।
3. 'लुपसदचर—' (3-1-24) इति भावगर्हायां यङि रूपमेवम् । भावगर्हा धात्वर्थगर्हा । न तु क्रियासमभिहारे यङ् इति ज्ञेयम् ।

A. 'चुकोच यत्रोत्कुचिताङ्गमुन्मुदः क्रौञ्चोऽपि **लुञ्चन्** हृदि सम्यगार्तताम् ॥'
धा. का. 1-25.

B. '........ गोपानां **भयलोपि**वाग्भिरबलाविन्नानुलेपं वहन् ।' धा. का. 2-85.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1512) " **लुबि अर्दने** " (I-भ्वादि:-427. सक. सेट्. पर.)

'लुम्बयेत् तुम्बयेदर्दे **शपि लुम्बति** तुम्बति ॥' (श्लो. 139) इति **देवः** । **क्षीरतरङ्गिण्या**मयं धातुः न दृश्यते ।

लुम्बकः-म्बिका, लुम्बकः-लुम्बिका, लुलुम्बिषकः-षिका, लोलुम्बकः-म्बिका ; लुम्बिता-त्री, लुम्बयिता-त्री, लुलुम्बिषिता-त्री, लोलुम्बिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुण्ठति**वत् (209) ऊह्यानि । कर्मणि क्तप्रत्यये [A]परिलुम्बितः इति ।

(1513) " **लुबि अदर्शने** " (X-चुरादि:-1657. अक. सेट्. उभ.)

'**लुम्बयेद्** तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥' (श्लो. 139) इति **देवः** । **क्षीरतरङ्गिण्यां** '—अर्दने' इत्युक्तम् । **देवमैत्रेयौ** 'अर्दने' इत्येव पठतः । चुरादिपाठादेव इदित्करणात् लुम्बयति-लुम्बति इति सिद्धेः **अर्दने**ऽर्थे भ्वादौ पाठोऽस्य व्यर्थः स्यात् । इह [चुरादौ] **अदर्शने**ऽर्थे तु अर्थभेदात् सोऽपि [भ्वादौ पाठः] सार्थकः स्यात् । अत एव '**अदर्शने**' इत्येव समञ्जसमिति भाति ।

लुम्बकः-म्बिका, लुलुम्बयिषकः-षिका, लुम्बकः-म्बिका, लुलुम्बिषकः-षिका, लोलुम्बकः-म्बिका ; लुम्बयिता-त्री, लुलुम्बयिषिता-त्री, लुम्बिता-त्री, लुलुम्बिषिता-त्री, लोलुम्बिता-त्री ; इत्यादीनि रूपाणि भाषार्थकचौरादिक**कुंशयति**वत् (232) ऊह्यानि । कर्मणि क्तप्रत्यये [B]लुम्बितम्-तः इति ।

(1514) " **लुभ गार्ध्ये** " (IV-दिवादि:-1238. सक. सेट्. पर.)

'भूवादेरवृत्कृतत्वात् **लोभते** इति भवति इति **आत्रेयः**' इति **मा. धा. वृत्ति**-रिहानुसन्धेया । '**गार्ध्यम्**=आकाङ्क्षा' इति च तत्र **वृत्तिः** ।
'**गार्ध्ये लुभ्यति** मोहार्थे तुदादेर्लुभतीति शे ।' (श्लो. 141) इति **देवः** ।

A. '......... दिक्कुम्बितेऽर्के **परिलुम्बिता**म्बुजे ॥' धा. का. 1-55.

B. 'किं कुम्भ्यते सदसि **लुम्बित**वैभवोऽहम्......... ।' धा. का. 3-29.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोभकः-भिका, लोभकः-भिका, [1]लुलुभिषकः-लुलोभिषकः-षिका, लोलुभकः-भिका ;
[2]लोभिता-लोब्धा-ब्ध्री, लोभयिता-त्री, लुलुभिषिता-लुलोभिषिता-त्री, लोलुभिता-त्री ;
लुभ्यन्-न्ती, लोभयन्-न्ती, लुलुभिषन्-लुलोभिषन्-न्ती ;
इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिककुप्यतिवत् (224) ज्ञेयानि। निष्ठायाम्-[3]लुब्धम्-लुब्धः-लुब्धवान् ; क्त्वायां-[4]लुभित्वा-लोभित्वा-लुब्ध्वा, इति च अस्य धातोः विशेषः ।

(1515) "**लुभ विमोहने**" (VI-तुदादिः-1305. सक. सेट्. पर.)
'**विमोहनम्**=व्याकुलीकरणम्' इति **क्षीरस्वामी** ।
'गार्ध्ये लुभ्यति **मोहार्थे तुदादेर्लुभतीति** शे ।' (श्लो. 141) इति **देवः** ।
लोभकः-भिका, लोभकः-भिका, लुलुभिषकः-लुलोभिषकः-षिका, लोलुभकः-भिका; लोभिता-त्री, लोब्धा-ध्री, लोभयिता-त्री, लुलुभिषिता-लुलोभिषिता-त्री, लोलुभिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि दैवादिककुप्यतिवत् (224) ऊह्यानि । निष्ठायाम्-[A]विलुभितः [[5]विलुभिताः केशाः], शतरि-लुभन्, क्त्वायां [B]लुभित्वा-लोभित्वा, इमानि रूपाणि अस्य धातोः विशेषः ।[C] लोभनीयम् ।

---

1. 'रलो व्युपधात्—' (1-2-26) इति सेटः क्त्वासनोः कित्वविकल्पः । तेन सन्नन्ते सर्वत्र क्त्वाप्रत्ययेऽपि रूपद्वयं बोध्यम् ।
2. तृचि '**तीषसहलुभ—**' (7-2-48) इति तादेरार्धधातुकस्य इड्विकल्पनात् रूपद्वयमिति ज्ञेयम् ।
3. 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधः । तेन एकमेव रूपम् ।
4. क्त्वायाम् 'रलो व्युपधात्—' (1-2-26) इति कित्वविकल्पः । '**तीषसहलुभ—**' (7-2-48) इत्यादिना इड्विकल्पः । तेन रूपत्रयमिति ज्ञेयम् ।
5. '**लुभो** विमोहने' (7-2-54) इति निष्ठायामिडागमो भवति । **विलुभिताः**= केशाः । **विलुभितः**=सीमन्तः । अन्यत्र **लुब्धो** वृषलः, शीतेन पीडित इत्यर्थः ।

A. 'दधत् **विलुभितं** वातैः केसरं वह्निपिङ्गलम् ॥' भ. का. 9-40.
B. '**लुभो** विमोहने' त्विट् स्यात् वा कित्वं रल इत्यपि ।
लोभित्वा वा **लुभित्वा** वा केशान्हलति (?) बालिका ॥' इति **प्र. सर्वस्वम्** ।
C. 'दिव्यापिनीर्लोचन**लोभनीयाः** मृजान्वयाः स्नेहमिव स्रवन्तीः ।'
भ. का. 2-13.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1516) "लूञ् छेदने" (IX-क्र्यादिः-1483. सक. सेट्. उभ.)

प्वादिः, ल्वादिश्च।

लावकः-विका, लावकः-विका, लुलूषकः-षिका, लोलूयकः-यिका ;
लविता-त्री, लावयिता-त्री, लुलूषिता-त्री, लोलूयिता-त्री ;
लुनन्-ती, लावयन्-न्ती, लुलूषन्-न्ती ; —
लविष्यन्-न्ती-ती, लावयिष्यन्-न्ती-ती, लुलूषिष्यन्-न्ती-ती ; —
लुनानः, लावयमानः, लुलूषमाणः, लोलूयमानः ;
लविष्यमाणः, लावयिष्यमाणः, लुलूषिष्यमाणः, लोलूयिष्यमाणः ;
कंसलूः-ल्वौ-ल्वः ; — — —

[A]विपक्षलावः,[1] [2]सक्तलूः, [3]लुलुवुषः पश्य, लुलविवान्, [4]शत्रुलावो व्रजति, [B]लोलूया[5], [6]लवकः,[C] [7]लूत्वा, [8]लूनः, [9]लूनिः, [10]अभिलावः,[D] [11]खङ्गलावं

---

1. 'कर्मण्यण्' (3-2-1) इत्यण्प्रत्ययः।
2. 'क्विप् च' (3-2-76) इति सोपपदात् कर्तरि क्विप्।
3. कर्तरि क्वसुप्रत्ययः। काशिकायां (6-4-22) प्रत्युदाहृतत्वात् भाषायामपि धातोरस्मात् क्वसुरिति ज्ञेयम्। अत्र 'न शसदद–' (6-4-126) इत्यादिना एत्वाभ्यासलोपौ न।
4. क्रियार्थक्रियायामुपपदे 'अण् कर्मणि च' (3-3-12) इति भविष्यत्यर्थेऽण्प्रत्ययः।
5. यङन्तात् 'अ प्रत्ययात्' (3-3-102) इत्यकारप्रत्ययः। स्त्रियां टाप् भवति।
6. 'प्रुसृल्वः समभिहारे वुन्' (3-1-149) इति कर्तरि वुन्प्रत्ययः। समभिहारो नाम (लक्षणया) साधुकारित्वम्; अतश्च यः सकृदपि सुष्ठु करोति स उच्यते लवक इति।
7. 'श्र्युकः क्किति' (7-2-11) इतीण्निषेधः। एवमेव क्तक्तिन्प्रभृतिष्वपि इण्निषेधो बोध्यः।
8. 'ल्वादिभ्यः' (8-2-44) इति निष्ठातकारस्य नकारः।
9. 'ॠल्वादिभ्यः क्तिन् निष्ठावद् वक्तव्यः' (वा. 3-3-108) इति तकारस्य नकारः।
10. 'निरभ्योः पूल्वोः' (3-3-28) इति अभिपूर्वकात् भावे घञ्। अप्प्रत्ययापवादः।
11. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति तृतीयान्त उपपदे णमुल्।

A. 'विपक्षलावस्य निजस्य शत्रोः अह्नाय भूत्वा लवको बहूनि।' वा. वि. 2-39.
B. 'तस्याः सासयमानाया लोलूयावान् रघूत्तमः।' भ. का. 4-31.
C. 'लवकौ शत्रुशष्पीनामृष्यमूकमगच्छताम्॥' भ. का. 6-86.
D. 'वनाभिलावान् कुर्वन्तः स्वेच्छया चारुविक्रमाः॥' भ. का. 3-77.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(रिपुं मारयति) खड्गेन लावं वा, [1]लवित्रम्[A] [2]लवः, [3]लवणः,[B] लिलावयिषुः, लिलावयिषा, [4]लवाणकम्, [5]लुवा, [6]लोम, [7]लोत्रम्, इत्यादीनि सर्वाण्यपि रूपाणि क्रैयादिकपुनातिवत् (1035) ज्ञेयानि ।

(1517) " **लूष भूषायाम्** " (I-भ्वादिः-677. सक. सेट्. पर.)

अयं धातुः **सि. कौमुद्यां** स्वतन्त्रेण पठितः । **मा. धा. वृत्तौ** 'मूष स्तेये' इत्यत्र 'लूष—' इति **सुधाकर** इत्युक्तम् । **क्षीरतरङ्गिण्यां** तु 'लूषोऽपीति **दुर्गः**' इति दृश्यते ।

लूषकः-षिका, लूषकः-षिका, लुलूषिषकः-षिका, लोलूषकः-षिका ;
लूषिता-त्री, लूषयिता-त्री, लुलूषिषिता-त्री, लोलूषिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकचूषतिवत् (552) बोध्यानि । [8]लूषा ।

(1518) " **लूष हिंसायाम्** " (X-चुरादिः-1610. सक. सेट्. उभ.)

लूषकः-षिका, लुलूषयिषकः-षिका ; लूषयिता-त्री, लुलूषयिषिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि, एवंरीत्या चौरादिककूटयतिवत् (240) ऊह्यानि । णिनिप्रत्यये विमतलूषी[C] इति ।

---

1. 'अर्तिलूधू—' (3-2-184) इति करणे इत्रप्रत्ययः । **केचित्तु लुवित्रमिति** रूपमाहुः । तन्मते गुणाभावश्चिन्त्यः । **कल्पसूत्र**प्रयोगास्तु छान्दसत्वेन साधवः ।
2. 'ऋदोरप्' (3-3-57) इति अप्प्रत्ययः । घञोऽपवादः ।
3. नन्द्यादित्वात् शुद्धादपि धातोः कर्तरि ल्युप्रत्यये, तत्रैव (3-1-134) गणे पाठात् णत्वमिति ज्ञेयम् । **लवणः**—एतन्नामकोऽसुरः । **लवणम्** इति तु अविवक्षित-प्रकृतिप्रत्ययार्थः शब्दः रसविशेषे रूढो लुडन्तः ।
4. 'आणको लूधूञ्—' (द. उ. 3-27) इति आणकप्रत्ययः । **लवाणकम्**=दात्रम् ।
5. औणादिके (द. उ. 6-51) कनिन्प्रत्यये रूपमेवम् ।
6. औणादिके (द. उ. 6-79) मनिन्प्रत्यये लकारस्य रत्वं विकल्पेन निपात्यते ; **लो(रो)म**=केशाः ।
   'रुहे रुचेश्च रौतेश्च रुदिरुध्यो रुषेरपि ।
   षण्णामेव च धातूनां **रोम**शब्दं निपातयेत् ॥'
   इति (क्वाचित्कः) **श्वेतवनवासि**ग्रन्थः ।
7. औणादिके [द. उ. 8-90] त्रप्रत्यये रूपमेवम् ; छन्दसि विषये । **लुनाति लूयते वा लोत्रम्**=शरीरम् ।
8. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये रूपमेवम् ।

A. 'वयं शत्रुलवित्रेषोर्दूता रामस्य भूपतेः ॥' भ. का. 7-87.
B. 'दुर्जयो **लवणः** शूली विशूलः प्रार्थ्यतामिति ॥' रघुवंशे 15-5.
C. 'संपालयेद् **विमतलूष्य**पशुल्बभूमा.................. ॥' धा. का. 3-22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1519) " **लेपृ गतौ** " (I-भ्वादि:-373. सक. सेट्. आत्म.)

" **मैत्रेयस्तु** ' लेपृ सेवने, प्लेवृ गतौ ' इत्याह " इति **मा. धा. वृत्तौ** उक्तम् ।

लेपकः-पिका, लेपकः-पिका, लिलेपिषकः-षिका, लेलेपकः-पिका ;

लेपिता-त्री, लेपयिता-त्री, लिलेपिषिता-त्री, लेलेपिता-त्री ;

इत्यादीनि रूपाणि सर्वाणि विशेषरूपाणि विना भौवादिक**केपति**वत् (261) उह्यानि । अस्य धातोः आत्मनेपदित्वात् शानचि लेपमानः इति ।

(1520) " **लोकृ दर्शने** " (I-भ्वादि:-76. सक. सेट्. आत्म.)

' **दर्शने लोकते लोके**र्भाषार्थे णौ तु लोकयेत् ॥' (श्लो. 40) इति **देवः** ।

लोककः-किका, लोककः-किका, लुलोकिषकः-षिका, लोलोककः-किका ;

लोकिता-त्री, लोकयिता-त्री, लुलोकिषिता-त्री, लोलोकिता-त्री ;

लोकन्-न्ती, लोकयन्-न्ती, लुलोकिषन्-न्ती ; —

लोकिष्यन्-न्ती-ती, लोकयिष्यन्-न्ती-ती, लुलोकिषिष्यन्-न्ती-ती ; —

लोकमानः, लोकयमानः, लुलोकिषमाणः, लोलोक्यमानः ;

लोकिष्यमाणः, लोकयिष्यमाणः, लुलोकिषिष्यमाणः, लोलोकिष्यमाणः ;

लोक्-लोग्-लोकौ-लोकः ; — — —

लोकितम्-तः, लोकितः, लुलोकिषितः, लोलोकितः-तवान् ;

लोकः, आलोकः, अवलोकः, [1]उलूकः, लोकनः, विलोकः, प्रलोकी, भयलोकी, लोकः, लुलोकिषुः, लोलुकः ;

लोकितव्यम्, लोकयितव्यम्, लुलोकिषितव्यम्, लोलोकितव्यम् ;

लोकनीयम्, लोकनीयम्, लुलोकिषणीयम्, लोलोकनीयम् ;

लोक्यम्, लोक्यम्, लुलोकिष्यम्, लोलोक्यम् ;

ईषल्लोकः-दुर्लोकः-सुलोकः ; — — —

लोक्यमानः, लोक्यमानः, लुलोकिष्यमाणः, लोलोक्यमानः ;

लोकः, लोकः, लुलोकिषः, लोलोकः ;

1. 'उलति नेत्राभ्यां ददाति **उलूकः** । ऊर्ध्वालोकनादिति **निरुक्तम्** ' इति **अमरटीकायां क्षीरस्वामिना** उक्तम् । **द. उ. वृत्तौ** तु (3-46) ' उत्क्रम्य दृष्टिविषयमालोकयतीति **उलूकः** कौशिकः ' इत्येवं दृश्यते । अत्रा**होज्ज्वलदत्तः**– '**सर्वस्वे** तु ऊर्ध्वौ कर्णावस्येति पृषोदरादित्वात् **उलूक** इत्यपि साधितम् ' इति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोकितुम्, लोकयितुम्, लुलोकिषितुम्, लोलोकितुम् ;
लोका, लोकना, लुलोकिषा, लोलोका ;
लोकनम्, आलोकनम्-[A]अवलोकनम्, लोकनम्, लुलोकिषणम्, लोलोकनम् ;
लोकित्वा, लोकयित्वा, लुलोकिषित्वा, लोलोकित्वा ;
[B]आलोक्य, आलोक्य, आलुलोकिष्य, आलोलोक्य ;
लोकम् २, लोकित्वा २, } लोकम् २, लोकयित्वा २, } लुलोकिषम् २, लुलोकिषित्वा २, } लोलोकम् २ ; लोलोकित्वा २. }

(1521) "लोकृ भाषार्थः"

(X-चुरादिः-1777. अक. सेट्. उभ.) आस्वदीयः ।

'दर्शने लोकते लोके भाषार्थे णौ तु लोकयेत् ॥' (श्लो. 40) इति **देवः** ।
'—भासार्थः' इति क्षीरस्वामी ।

आस्वदीयत्वात् णिज्विकल्पः । शुद्ध-ण्यन्त-सन्नन्त-यङन्तरूपाणि सर्वाणि पूर्वोक्तभौवादिक**लोकृ**तिवत् (1520) ऊह्यानि ।

लोककः-किका, लुलोकयिषकः-षिका ; लोकयिता-त्री, लुलोकयिषिता-त्री;
[1]लोकन्-न्ती, लुलोकयिषन्-न्ती ; लोकयिष्यन्-न्ती-ती, लुलोकयिषिष्यन्-न्ती-ती;
लोकयमानः, लुलोकयिषमाणः, लोकयिष्यमाणः, लुलोकयिषिष्यमाणः ; लोक्-लोकौ-लोकः ; लोकितः, लुलोकयिषितः-तम्-तवान् ;
लोकः, लुलोकयिषुः ; लोकयितव्यम्, लुलोकयिषितव्यम् ; लोकनीयम्, लुलोकयिषणीयम् ; लोक्यम्, लुलोकयिष्यम् ; लोक्यमानः, लुलोकयिष्यमाणः ;
ईषल्लुलोकयिषः-दुर्लुलोकयिषः-सुलुलोकयिषः ; — —
लोकः, लुलोकयिषः ; लोकितुम्, लुलोकयिषितुम् ; लोकना, लुलोकयिषा ;
लोकनम्, लुलोकयिषणम् ; लोकयित्वा, लुलोकयिषित्वा ; विलोक्य, विलुलोकयिष्य ;
लोकम् २-लोकयित्वा २ ; लुलोकयिषम् २-लुलोकयिषित्वा २ ; } इति ण्यन्ते तत्प्रकृतिकसन्नन्ते च रूपाणीति विशेषः ।

---

1. **आस्वदीयत्वात्** णिजभावपक्षे शतरि परस्मैपदमेव ।
A. 'अकिञ्चनीयान् क्षुधितात्मनो जनान् प्रशीकते यः करुणा**वलोकनैः**।' धा.का. 1-11.
B. '**आलोक्य** प्रियतममंशुके विनीवौ यत्तस्थे नमितमुखेन्दु मानवत्या ।' शि. व. 9-84.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1522) " **लोचृ दर्शने** " (I-भ्वादिः-164. सक. सेट्. आत्म.)

'णौ लोचयति भाषार्थे **दर्शने शपि लोचते** ॥' (श्लो. 46) इति **देवः** ।
लोचकः-चिका, लोचकः-चिका, लुलोचिषकः-षिका, लोलोचकः-चिका ;
लोचिता-त्री, लोचयिता-त्री, लुलोचिषिता-त्री, लोलोचिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**लोकति**वत् (1520) बोध्यानि ।
'लोचकः—स्त्रीशिरोवस्त्रम् शिरस्त्रञ्च' इति **क्षीरतरङ्गिण्याम्** । आलोचितः, लोचनम्, आलोचनम्; ल्युटि-[A]लोचनम् ।

(1523) " **लोचृ भाषार्थः** " (X-चुरादिः-1778. सक. सेट्. उभ.)

आस्वदीयः । तेन णिज्विकल्पः ।

'**णौ लोचयति भाषार्थे** दर्शने शपि लोचते ॥' (श्लो. 46) इति **देवः** ।
लोचकः-चिका, लुलोचयिषकः-षिकः, लोचकः-चिका, लुलोचिषकः-षिका, लोलोचकः-चिका ; इत्यादीनि रूपाणि सर्वाणि [ण्यन्तप्रकृतिकसन्नन्तं विना] भौवादिकदर्शनार्थक**लोकति**वत् (1520) ऊह्यानि । ण्यन्तप्रकृतिकसन्नन्ते तु भाषार्थक**लोकयति**वत् (1521) ऊह्यानि ।

(1524) " **लोडृ उन्मादे** " (I-भ्वादिः-357. अक. सेट्. पर.)

'**लौडृ**—' इति **क्षीरस्वामी** ।

लोडकः-डिका, लोडकः-डिका, लुलोडिषकः-षिका, लोलोडकः-डिका, लोडिता-त्री, लोडयिता-त्री, लुलोडिषिता-त्री, लोलोडिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**खोरति**वत् (363) ज्ञेयानि । निष्ठायाम्-[B]आलोडितम्-तः-तवान् इति ।

(1525) " **लोल चलने** " (I-भ्वादिः-....अक. सेट्. पर.)

लोलकः-लिका, लोलकः-लिका, लुलोलिषकः-षिका, लोलोलकः-लिका ;
लोलिता-त्री, लोलयिता-त्री, लुलोलिषिता-त्री, लोलोलिता-त्री ;
लोलन्[C]-न्ती, लोल्यन्-न्ती, लुलोलिषन्-न्ती ; —

A. '**सुलोचना** यत्र शचीसमप्रभा..............॥' धा. का. 1. 24.
B. 'श्यामारुणैर्वारणदानतोयैरा**लोडिताः** काञ्चनभूपरागाः ।' शि. व. 3-27.
C. 'आश्लिष्टभूमिं रसितारमुच्चै**र्लोलद्**भुजाकारबृहत्तरङ्गम् ।' शि. व. 3. 72.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोलिष्यन्-न्ती-ती, लोलयिष्यन्-न्ती-ती, लुलोलिषिष्यन्-न्ती-ती ; —
[1]लोल्मानः,[A] लोलयमानः, लुलोलिषमाणः ; —
इत्यादीनि रूपाणि सर्वाणि भौवादिक**खोरति**वत् (363) ज्ञेयानि ।

(1526) " **लोष्ट संघाते** " (I-भ्वादिः-258. सक. सेट्. आत्म.)

लोष्टकः-ष्टिका, लोष्टकः-ष्टिका, लुलोष्टिषकः-षिका, लोलोष्टकः-ष्टिका ;
लोष्टिता-त्री, लोष्टयिता-त्री, लुलोष्टिषिता-त्री, लोलोष्टिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**गोष्टति**वत् (434) ज्ञेयानि । **लोष्टः**= मृत्पिण्डः ।

(1527) " **वकि कौटिल्ये** " (I-भ्वादिः-88. अक. सेट्. आत्म.)

वङ्ककः-ङ्किका, वङ्ककः-ङ्किका, विवङ्किषकः-षिका, वावङ्ककः-ङ्किका ;
वङ्किता-त्री, वङ्कयिता-त्री, विवङ्किषिता-त्री, वावङ्किता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**ऋङ्कति**वत् (140) बोध्यानि । [B]वङ्कितम्-तः, ल्युटि-[2]प्रवङ्कनम् । औणादिके [1-35] क्निन्प्रत्यये वङ्क्रिः इति रूपम् । वङ्क्रिः-शरीराङ्गम्, शल्यम् च ।

(1528) " **वकि गत्यर्थः** " (I-भ्वादिः-95. सक. सेट्. आत्म.)

क्षीरस्वामी अमुं धातुं पठति । अर्थभेदः पुनःपाठे प्रयोजनम् इति ज्ञायते ।
वङ्ककः-ङ्किका, वङ्ककः-ङ्किका, विवङ्किषकः-षिका, वावङ्ककः-ङ्किका ;

---

1. " 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति चानश्प्रत्ययः । न तु शानच् ; **लोलतेः** परस्मैपदित्वात् । अत एव '**लोलमानादय**श्चानशि' इति **वामनः** " (5-2-8) इति **माघव्याख्याने** (10-59) उपात्तत्वात्, शतरि प्रयोगे दृष्टत्वाच्च '**लोल** --' इति कश्चन धातुः पूर्वं दृष्ट इति **केचित्** । '**लोलद्**-भुजाकारबृहत्तरङ्गम्' (माघः 3-72) 'श्रीराजीवाक्षवक्षस्स्थलनिलयरमाहस्तवास्तव्य-लोलल्लीलाब्जात् निस्सरन्ती मधुरमधुझरी —'(विश्वगुणादर्शचम्पूः श्लो 1) इत्यादयः प्रयोगाः शत्रन्ता इहानुसन्धेयाः ।
2. अत्र 'कृत्यचः' (8-4-29) इति णत्वम् 'इजादेः सनुमः' (8-4-32) इति नियमान्न भवति ।

A. 'आमृशद्भिरभितो वलिवीचीर्लोलमानविततान्गुलिहस्तैः ।' शि. व. 10-59.
B. 'फलाङ्कितान् **वङ्कित**वल्लिमङ्कितान् वनप्रदेशानुरुकाककोकिलान् ।' धा. का. 1-13.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वङ्किता-त्री, वङ्कयिता-त्री, विवङ्किषिता-त्री, वावङ्किता-त्री ;
इत्यादीनि रूपाणि सर्वाणि भौवादिकगत्यर्थककङ्कतिवत् (140) ऊह्यानि ।

(1529) "वक्ष रोषे" (I-भ्वादिः-663. अक. सेट्. पर.)

'—संघाते' इति क्षीरस्वामी । '—रोषसंहत्योः' इति **बोपदेवः** ।
'—पालने' इति पठित्वा **वक्षते** इति आत्मनेपदिनः इति **काशकृत्स्नः** ।
इतः पूर्वं भ्वादौ '—रोषे' (परस्मैपदिनः) इति च तत्र पठ्यते ।
वक्षकः-क्षिका, वक्षकः-क्षिका, विवक्षिषकः-षिका, वावक्षकः-क्षिका ;
वक्षिता-त्री, वक्षयिता-त्री, विवक्षिषिता-त्री, वावक्षिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि भौवादिक**तक्षति**वत् (691) बोध्यानि । असुन्-प्रत्यये—वक्षः इति ।

(1530) "वख गत्यर्थः" (I-भ्वादिः-130. सक. सेट्. पर.)

वाखकः-खिका, वाखकः-खिका, विवखिषकः-षिका, वावखकः-खिका ;
वखिता-त्री, वखयिता त्री, विवखिषिता-त्री, वावखिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कखति**वत् (141) ऊह्यानि ।

(1531) "वखि गत्यर्थः" (I-भ्वादिः-131. सक. सेट्. पर.)

वङ्खकः-ङ्खिका, वङ्खकः-ङ्खिका, विवङ्खिषकः-षिका, वावङ्खकः-ङ्खिका ;
वङ्खिता-त्री, वङ्खयिता-त्री, विवङ्खिषिता-त्री, वावङ्खिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि भौवादिक**कखति**वत् (141) ज्ञेयानि ।
[1]प्रवङ्खनम्-ल्युटि एवं रूपमिति विशेषः ।

(1532) "वगि गत्यर्थः" (I-भ्वादिः-147. सक. सेट्. पर.)

"वङ्गिः गतिवैकल्ये रूढः ; वङ्गति, वङ्गः" इति **क्षीरतरङ्गिण्याम्** ।
वङ्गकः-ङ्गिका, वङ्गकः-ङ्गिका, विवङ्गिषकः-षिका, वावङ्गकः-ङ्गिका ;
वङ्गिता-त्री, वङ्गयिता-त्री, विवङ्गिषिता-त्री, वावङ्गिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कङ्कति**वत् (140) ऊह्यानि ।
अस्य धातोः परस्मैपदित्वात् शुद्धे शानच्प्रत्ययो न भवति ।

1. 'इजादेः सनुमः' (8-4-32) इति नियमान्न णत्वम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ण्यन्ते—वङ्ग्यमानः इति । [1]वङ्गः । वङ्गुरिः-भूषणभेदः । वङ्गितः ।

(1533) " **वघि गत्याक्षेपे** " (I-भ्वादिः-110. सक. सेट्. आत्म.)

" **आक्षेपो**-निन्दा, **गतौ** गमनारम्भे चेति **स्वामी** " इति **मा. धा. वृत्तिः** ।

' गत्याक्षेपो वेगगतिः गमनारम्भो वा ' इति **क्षीरस्वामी** ।

वङ्घकः-ङ्घिका, वङ्घकः-ङ्घिका, विवङ्घिषकः-षिका, वावङ्घकः-ङ्घिका ;
वङ्घिता-त्री, वङ्घयिता-त्री, विवङ्घिषिता-त्री, वावङ्घिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कङ्क**तिवत् (140) बोध्यानि ।
शानचि-[A]वङ्घमानः इति ज्ञेयम् ।

(1534) " **वच परिभाषणे** " (II-अदादिः-1063. सक. अनिट्. पर.)

' **वक्तीति भाषणे** वा णौ वाचयेत् वचतीति वा । ' (श्लो. 51) इति **देवः** ।

'**—भाषणे**' इति **क्षीरस्वामि-मैत्रेय-चन्द्र-शाकटायन-हेमचन्द्रादयः** ।

' **पारायणिकै**र्नाधीतोऽयम् ' इति **तरङ्गिण्या**मुक्तम् ।

वाचकः-चिका, वाचकः-चिका, विवक्षकः-क्षिका, वावचकः-चिका ;
वक्ता-वक्त्री, वाचयिता-त्री, विवक्षिता-त्री, वावचिता-त्री ;
वचन्-न्ती, वाचयन्-न्ती, विवक्षन्-न्ती ; —
वक्ष्यन्-न्ती-ती, वाचयिष्यन्-न्ती-ती, विवक्षिष्यन्-न्ती-ती ; —
— वाचयमानः, वाचयिष्यमाणः, विवक्षमाणः, विवक्षिष्यमाणः ; —
इत्यादीनि सर्वाण्यपि रूपाणि आदादिक**ब्रूञ्**धातुवत् (1132) ज्ञेयानि ।

(1535) " **वच परिभाषणे** "

(X-चुरादिः-1843. सक. सेट्. उभ.) [अ]

'**—सन्देशने च**' इति **कातन्त्र-हेरम्बादयः** । [आधृषीयः ।

---

1. वञ्चतीति **वङ्गः**=जनपदः । '**हलश्च**' (3-3-121) इति संज्ञायामधिकरणे घञ्प्रत्यये रूपमेवम् ।

A. '**प्रवङ्घमानस्य च तस्य सत्वरं विमङ्घनस्याधिकराघितात्मनः** । ' **धा. का. 1-16**

[अ] णिजभावपक्षे शतरि **वचन्** इत्यस्य प्रयोगो दृश्यते (धा. का. 3-52)। '**—भाषणे**' इति **क्षीरस्वामिमैत्रेयादयः** । "**पचि वचिम्**" (7-2-10. व्याघ्रभूतिकारिका) इति पाठादनिट्त्वम् । '**पारायणिकैः धातुरयं नाधीयते**' इति **मा. धा. वृत्तिः** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'वक्तीति भाषणे वा णौ वाचयेत् वचतीति वा ।' (श्लो. 51) इति देवः ।
वाचकः-चिका, विवाचयिषकः-षिका, वाचकः-चिका, विवक्षकः-क्षिका, वावचकः-चिका ;
वाचयिता-त्री, विवाचयिषिता-त्री, वक्ता-वक्त्री, विवक्षिता-त्री, वावचिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि ण्यन्तप्रकृतिकसन्नन्तं विना पूर्वोक्तवचतिवत् (1534) ऊह्यानि । आधृषीयत्वाद् णिज्विकल्पः । णिच्पक्षे इमानि रूपाणि —
वाचयन्-न्ती, विवाचयिषन्-न्ती ; वाचयिष्यन्-न्ती-ती, विवाचयिषिष्यन्-न्ती-ती ; वाचयमानः, विवाचयिषमाणः ; वाचयिष्यमाणः ; विवाचयिषिष्यमाणः ; विवाचयिट्-ड्-यिषौ-यिषः ; वाचितम्-तः, विवाचयिषितम्-तः-तवान् ; वाचः, विवाचयिषुः ; वाचयितव्यम् ; विवाचयिषितव्यम् ; वाचनीयम्, विवाचयिषणीयम् ; वाच्यम्, विवाचयिष्यम्, ईषद्विवाचयिषः - दुर्विवाचयिषः - सुविवाचयिषः ; वाच्यमानः, विवाचयिष्यमाणः ; वाचः, विवाचयिषः ; वाचयितुम्, विवाचयिषितुम् ; वाचना, विवाचयिषा ; वाचनम्, विवाचयिषणम् ; वाचयित्वा, विवाचयिषित्वा ; प्रवाच्य, प्रविवाचयिष्य, वाचम् २, वाचयित्वा २ ; विवाचयिषम् २, विवाचयिषित्वा २. इति विशेषः ।

(1536) "वज गतौ" (I-भ्वादिः-252. सक. सेट्. पर.)

'—गतौ वजति वाजयेत् ।' (श्लो. 58) इति देवः ।
वाजकः-जिका, वाजकः-जिका, विवजिषकः-षिका, वावजकः-जिका ;
वजिता-त्री, वाजयिता-त्री, विवजिषिता-त्री, वावजिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकबन्धनार्थककचतिवत् (144) बोध्यानि ।
[1]वाज्यम्, शतरि-वजन् इति च विशेषः ।

(1537) "वज मार्गसंस्कारगत्योः"

(X-चुरादिः-1617. सक. सेट्. उभ.)

'……..गतौ वजति वाचयेत् ।' (श्लो. 58) इति देवः ।

1. ण्यति प्रत्यये 'अजिव्रज्योश्च' (7-3-60) इत्यत्र चकारात् अत्रापि कुत्वं नेति माधवः । वस्तुतस्तु 'चजोः—' (7-3-52) इत्यत्र 'निष्ठायामनिट इति वक्तव्यम्' (वा. 7-3-52) इति वार्तिकेन विषयविभागस्य कृतत्वेन यथोत्तरं मुनीनां प्रामाण्यात् अत्र प्रकृतस्थले कुत्वप्रसक्तिरेव नेति भाष्यादिसम्मतः पन्थाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'व्रज—' इति **मा. धा. वृत्तिः**, **चन्द्रो**ऽपि । **क्षीरस्वामी** तु वर्जि पठित्वा मार्गेति द्वितीयं धातुमाह । 'मार्गगतौ संस्कारगतौ च' इत्येके । 'वज' 'मार्ग' द्वौ धातू इति **सि. कौमुद्याम्** । एवमेव **पुरुषकारे**ऽपि (दैवश्लोके 58) । 'वज मार्गणसंस्कारे' इति **दुर्गः** । '—गतौ संस्कृतौ च' इति **वोपदेवः** ।

वाजकः-जिका, विवाजयिषकः-षिका ; वाजयिता-त्री, विवाजयिषिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**काणयति**वत् (159) ऊह्यानि । ण्यति-[A]अवाज्यम् इति ।

(1538) "**वट वेष्टने**" (I-भ्वादिः-300. सक. सेट्. पर.)

"णावदन्ताद्वटेर्ग्रन्थे वटयेद् वेष्टने वटेत् ॥' (श्लो. 77) इति **देवः** । 'वटेत्यपि बहुषु कोशेषु दृश्यते' इति **पुरुषकारः** (श्लो. 77) ।

वाटकः-टिका, वाटकः-टिका, विवटिषकः-षिका, वावटकः-टिका ; वटिता-त्री, वाटयिता-त्री, विवटिषिता-त्री, वावटिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कटति**वत् (148) ज्ञेयानि । वटः, [1]वटिः, वटकः-वटका, वटकिनी, वटिभः, वाटः-वाटी, [2]वटुः, इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम् ।

(1539) "**वट परिभाषणे**" (I-भ्वादिः-779. सक. सेट्. पर.) **घटादिः** ।

'—अवयवे' इति **काशकृत्स्नः** ।

वाटकः-टिका, वटकः-टिका, विवटिषकः-षिका, वावटकः-टिका ; वटिता-त्री, वटयिता-त्री, विवटिषिता-त्री, वावटिता-त्री ; वटन्-न्ती, वटयन्-न्ती, विवटिषन्-न्ती ; —

इत्यादिकानि रूपाणि ण्यन्तं विना सर्वाण्यपि भौवादिक**कखति**वत् (142) ऊह्यानि । अस्य धातोः घटादिपाठात् ण्यन्ते परं '**घटादयो** मितः' (गणसूत्रं भ्वादौ) इति मित्त्वे 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वे वटयन्-वटयिष्यन्-न्ती-ती,

1. औणादिके (द. उ. 1-46) इन्प्रत्यये रूपमेवम् । **वटिः**=तन्तुः ।
2. औणादिके उप्रत्यये रूपमेवम् । **वटुः**=ब्रह्मचारी, समर्थश्च ।

A. 'इत्या दिवादिषु जनेषु विमोटितारिः पापप्रपण्डिपदपांसुरवाज्यधामा ।' धा.का. 3-23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वटयमानः, वटयिष्यमाणः, इत्यादिकानि ह्रस्वघटितानि रूपाणि भौवादिक-**कखति**वत् (141) बोध्यानि। णमुलि-[1]वटम् २-वाटम् २, वटयित्वा २, इति विशेषः।

(1540) "**वट ग्रन्थे**" (X-चुरादिः-1858. सक. सेट्. उभ.) **अदन्तः।**

'णावदन्ताद्वटेर्ग्रन्थे **वटयेद्** वेष्टने वटेत् ॥' (श्लो. 77) इति **देवः।** '—**वेष्टे भागे** च' इति **वोपदेवः।** '—**वेष्टने** इत्येके' इति **धा. का. व्याख्याने** (3-54)। '—**वेष्टने**' इति **क्षीरस्वामी** इति **मा. धा. वृत्तौ** उक्तम्। **क्षीरतरङ्गिण्यां** तु "वट **ग्रन्थे**। ग्रन्थो=**वेष्टनम्**" इत्येव दृश्यते। [2]वटकः-टिका, विवटयिषकः-षिका; वटयिता-त्री, विवटयिषिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**कलयति**वत् (176) ऊह्यानि। ल्युटि वटनम्।

(1541) "**वट विभाजने**" (X-चुरादिः-1919. सक. सेट्. उभ.)

मा. धातुवृत्ति, सि. कौमुद्याद्यनुसारेण अयं पाठो लिखितः। [**अदन्तः।** '**णावदन्ताद्वटेर्ग्रन्थे वटयेद्** वेष्टने वटेत् ॥' (श्लो. 77) इति **देवः।** अत्र **क्षीरस्वामिना** '**वटि** विभाजने' इत्येव उक्तम्। किंच तत्र "(भ्वादौ) **नन्दिमते** वण्टति" इति दृश्यते। **मैत्रेयो**ऽपि एवमेव इति **मा. धा. वृत्ति**-दर्शनाज्ज्ञायते। **सि. कौमुद्यां** तु 'वट—' इति पठित्वा **वटि**—' इत्येके' इति। वटेः पुनःपाठोऽर्थभेदात् इति ज्ञेयम्। अयं धातुः कथाद्यन्तर्गणः इति **शाकटायन**मतम्।

वटकः-टिका, विवटयिषकःषिका; वटयिता-त्री, विवटयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाणि चौरादिक**कलयति**वत् (176) ज्ञेयानि। शतरि—वटयन्। **इदित्पाठ**पक्षे-वण्टकः-ण्टिका, विवण्टयिषकः-षिका; वण्टयिता-त्री, विवण्टयि-षिता-त्री; इत्यादीनि रूपाणि ऊह्यानि। [3]वण्टापयकः-यिका, इति अस्य धातोः विशेषः। इदित्त्वाण्णिज्विकल्पः इत्यपि ज्ञेयम्।

---

1. '**चिण्णमुलोः**—' (6-4-93) इति णौ परतः विकल्पेन दीर्घः। तेन रूपद्वयम्।
2. अदन्तपाठसामर्थ्यात् अत्र सर्वत्र अल्लोपस्य स्थानिवत्त्वात् उपधावृद्धिः न भवति।
3. '**कथादिपातिस्फायो पुगल्लुग्वलम्**' इति **शाकटायन**सूत्रात् कथादीनां धातूनां णौ परतः पुगागमे, वृद्धौ च एवं रूपम्। इति **माधवः** (चुरादौ लजधातुप्रकरणे)।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1542) " **वटि विभाजने** " (X-चुरादिः-1586. सक. सेट्. उभ.)

इदित्त्वात् णिज्विकल्पः। **क्षीरस्वामी** ' **वडि**—' इति पठित्वा ' **टान्त इत्येके** ' इत्युक्तवान्। [1]भ्वादौ ' वटि विभाजने ' इत्यत्र ' चुरादौ (10-43) **वण्टयति** ' इति **क्षीरस्वामिना** उक्तत्वात् ' **वटि** ' इति प्रथमान्तमेवेति तस्याभिप्रायो ज्ञायते। ' वडीति **शाकटायनः** ' इति. **मा. धा. वृत्तौ**।

' **वण्टयेद् वण्टती**त्येते णिशपोः स्तां विभाजने।' (श्लो. 77) इति **देवः**।

' वण्टापयेत् इति तु **शाकटायनः** ' इति **पुरुषकारः**।

वण्टकः-ण्टिका, विवण्टयिषकः-षिका, वण्टकः-ण्टिका, विवण्टिषकः-षिका, वावण्टकः-ण्टिका; वण्टयिता-त्री, विवण्टयिषिता-त्री, वण्टिता-त्री, विवण्टिषिता-त्री, वावण्टिता-त्री; वण्टयन्-न्ती, विवण्टयिषन्-न्ती, वण्टन्-न्ती, विवण्टिषन्-न्ती; इत्यादिकानि रूपाणि सर्वाणि ण्यन्तात् सन्नन्तं विना भौवादिक**कण्ठति**वत् (149) ज्ञेयानि। ण्यन्तात् सनि तु सर्वाणि रूपाणि चौरादिकशोकार्थक**कण्ठयति**वत् (150) बोध्यानि। तृतीयान्तमिति (**वडि**) पक्षे वण्डकः, विवण्डयिषकः; वण्डयिता-त्री, विवण्डयिषिता-त्री; इत्येवमूह्यम्।

(1543) " **वठ स्थौल्ये** " (I-भ्वादिः-331. अक. सेट्. पर.)

' वण्ठते त्वेकचर्यायां **स्थौल्ये शपि वठे**दिति।' (श्लो. 83) इति **देवः**।

वाठकः-ठिका, वाठकः-ठिका, विवठिषकः-षिका, वावठकः-ठिका; वठिता-त्री, वाठयिता-त्री, विवठिषिता-त्री, वावठिता-त्री; वठन्-न्ती; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कठति**वत् (148) ज्ञेयानि।

(1544) " **वठि एकचर्यायाम्** " (I-भ्वादिः-262. सक. सेट्. आत्म.)

' **वण्ठते त्वेकचर्यायां** स्थौल्ये शपि वठेदिति।' (श्लो. 83) इति **देवः**।

' एकस्य चर्या=**एकचर्या**=सहायत्वेनागमनम् ' इति **क्षीरतरङ्गिण्याम्**।

' —असहायगमनम् ' इति **धा. का. व्याख्यायाम्** (1-35)। **बालमनोरमाया**मपि एवमेव।

---

1. **क्षीरतरङ्गिण्यां** भ्वादौ ' **वटि** विभाजने ' इति दृश्यते। अन्यत्र कोशेषु भ्वादौ न दृश्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वण्ठकः-ण्ठिका, वण्ठकः-ण्ठिका, विवण्ठिषकः-षिका, वावण्ठकः-ण्ठिका ;
वण्ठिता-त्री, वण्ठयिता-त्री, विवण्ठिषिता-त्री, वावण्ठिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कण्ठति**वत् (149) ऊह्यानि । घञि वण्ठः='**वण्ठ**रण्डाकल्पः' इति **महाभाष्यं** (3-3-20) '—मृतभार्य' इति **नागोजिभट्टो** व्याचख्यौ । '—दत्तद्रव्यो योद्धा' इति **क्षीरस्वामी** । क्विपि-प्रवन्-प्रवण्ठौ-प्रवण्ठः इति ।

(1545) "**वडि विभाजने**" (I-भ्वादिः-271. सक. सेट्. आत्म.)

'**विभाजनम्**=भागीकरणम्, चर्माभावश्च । 'चुरादौ [1]वण्डयति' इति **क्षीरस्वामी** । चर्माभावो नाम शिपिविष्टता (छिन्नग्रता)—**वागीशः** ।
'—**वेष्टने**' इति **मैत्रेयः** । "**नन्दी** तु **वटि** विभाजने, वडि वेष्टने इति भङ्ग्या पठति" इति **क्षीरस्वामि**वचनमिहानुसन्धेयम् । "**काशकृत्स्न**-धातुपाठकन्नडटीकायां '**वडि वेष्टने**' इति पाठः । वाहीक (पञ्जाब) देशीय-भाषायां विभाजनार्थिका 'वण्डना' क्रिया प्रयुज्यते । तेन '**विभाजने**' इत्यप्यर्थः प्रामाणिक एव" इति तत्र **टिप्पण्या**मुक्तं **युधिष्ठिरमीमांसकेन** ।
वण्डकः-ण्डिका, वण्डकः-ण्डिका, विवण्डिषकः-षिका, वावण्डकः-ण्डिका ;
वण्डिता-त्री, वण्डयिता-त्री, विवण्डिषिता-त्री, वावण्डिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कम्पति**वत् (166) ज्ञेयानि । **धा. का.** व्याख्यायाम् (1-36) '**वेष्टनेऽपीत्येके**' इत्युक्तम् ।

(1546) "**वण शब्दार्थः**" (I-भ्वादिः-446. अक. सेट्. पर.)

'व्रण—' इति **धा. का. व्याख्यायाम्** (1-58.) ।
वाणकः-णिका, वाणकः-णिका, विवणिषकः-षिका, वंवणकः-णिका ;
वणिता-त्री, वाणयिता-त्री, विवणिषिता-त्री, वंवणिता-त्री ;

---

1. '**वडि विभाजने**' इति (चुरादौ) पठित्वा, 'टान्त इत्येके' इति **क्षीरतरङ्गिण्यां** दृश्यते । **शाकटायनस्तु** [वडि] इत्येवमेव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकक्कणतिवत् (157) ज्ञेयानि। उद्वणः, उल्बणः, [1]वाणः, [2]वाणः, वाणी[3], [4]वाणिः, अन्तर्वाणिः वाणिनी[5], इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

(1547) "वद व्यक्तायां वाचि" (I-भ्वादिः-1009. सक. सेट्. पर.)

यजादिः।

'**व्यक्तवाचि वदेद्वा** णौ वादयेद् वदते वदेत्।' (श्लो. 109) इति **देवः**।

वादकः-दिका, वादकः-परिवादकः-दिका, विवदिषकः-षिका, वावदकः-दिका;
वदिता-त्री, वादयिता-त्री, विवदिषिता-त्री, वावदिता-त्री;
वदन्-न्ती,[A] [B]वादयन्-न्ती, विवदिषन्-न्ती; —
वदिष्यन्-न्ती-ती, वादयिष्यन्-न्ती-ती, विवदिषिष्यन्-न्ती-ती; —

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञ्प्रत्यये रूपमेवम्।

2. 'वणत्यस्मिन् ज्या इति-**वाणः**' इति **क्षीरतरङ्गिण्याम्**उपात्तत्वात् **केचित्** अस्य '**वण**' इत्यस्य '**वण**' इति अभिप्रयन्ति इति ज्ञायते।

3. 'इञ् वपादिभ्यः' (वा. 3-3-108) इति इञन्तात् 'सर्वतोऽक्तिन्नर्थादित्येके' (ग. सू. 4-1-45) इति ङीन्, भवति इति **मा. धा. वृत्तिः**। वस्तुतस्तु 'कृदिकारादक्तिनः' (गणसूत्रम् 4-1-45) इति ङीष्प्रत्ययेऽपि रूपमेवम्। '—गीर्वाक् **वाणी** सरस्वती' **इत्यमरः**।

4. 'इण् अजादिभ्यः' (वा. 3-3-108) इति भावे इण्प्रत्यये **वाणिः** इति। **वाणिः**= वाक् **इत्यमरः**। 'वाणिः स्याद् दूतिभारत्योर्वाणिः मूल्ये बलाहके' इति **विश्वः**। 'वलीवर्दपङ्क्तिरिव समाधुर्या **वाणी** मनोहरति' इति **दमयन्ती**-श्लेषाद्दीर्घान्तोऽपि **वाणी**शब्दः।

5. अवश्यं वणतीति व्युत्पत्त्यां 'आवश्यकाधमर्ण्ययोर्णिनिः' (3-3-170) इति आवश्यकार्थे णिनिप्रत्यये तदन्तात् ङीपि रूपमेवम्। **वाणिनी**=विदग्धस्त्री।

A. 'मृषोयं **प्रवदन्तीं** तां सत्यवद्यो रघूत्तमः।' भ. का. 5 60.

B. '........शैलस्य दर्दुरपुटानिव **वादयन्तः**।' शि. व. 5. 9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शास्त्रे [1]वदमानः,[A] कर्मकरान् उपवदमानः, [2]न्यायम् अपवदमानः, क्षेत्रे विवदमानः, [3]विप्रवदन्तः-विप्रवदमाना वा मौहूर्तिकाः वैद्याः वा, कुलभार्यामुपवदमानः, [4]अनुवदमानः कठः कालापस्य, [5]सम्प्रवदमानः, गेहे विवदमानः, वादयमानः, [6]अभिवादयमानो गुरुं देवदत्तं देवदत्तेन वा, [7]वादयमानो वीणाम् , विप्रविवदिषमाणः, वावद्यमानः;

शास्त्रे वदिष्यमाणः, वादयिष्यमाणः, विवदिषिष्यमाणः, वावदिष्यमाणः;
[8]उदितम्-[B]तः-तवान् , वादितः, विवदिषितः, वावदितः-तवान् ;
मधुरोद्-मधुरोदौ-मधुरोदः ; — — —

---

1. अत्र 'भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः' (1-3-47) इति वदतेस्तङ्। औत्सर्गिकस्य परस्मैपदस्यापवादः। अत्र भासनम्=दीप्तिः। शास्त्रे **वदमानः**, दीप्यमानः सन् पदार्थान् व्यक्तीकरोतीत्यर्थः। उपसम्भाषणम्=उपसान्त्वनम्। कर्मकरान् **उपवदमानः** उपसान्त्वयन् इत्यर्थः। ज्ञानम्=सम्यक् अवबोधः। **वदमान**श्चार्वी लोकायते इत्युदाहरणम्। सम्यग्वक्तुं जानातीत्यर्थः। यत्नः= उत्साहः। क्षेत्रे **वदमानः**। क्षेत्रविषयकमुत्साहमाविष्करोतीत्यर्थः। विमतिः= नानामतिः। गेहे **विवदमानः**। विमतिपतिताः विचित्रं भाषन्ते इत्यर्थः। उपमन्त्रणम्=रहसि उपच्छन्दनम्। कुलभार्या**मुपवदमानः**। उपच्छन्दयतीत्यर्थः।
2. '**अपाद् वदः**' (1-3-73) इति तङ्। न्यायापवादेन धनाद्यार्जनं करोति इत्यर्थः।
3. 'विभाषा विप्रलापे' (1-3-50) इति व्यक्तवाचां समुच्चारणेऽपि **वदते**स्तङ्विकल्पः।
4. 'अनोरकर्मकात्' (1-3-49) इति तङ्। एतदपि व्यक्तवाग्विषयकमेव।
5. 'व्यक्तवाचां समुच्चारणे' (1-3-48) इति तङ्। व्यक्तवाचो मनुष्याः। तेन 'वरतनु **संप्रवदन्ति** कुक्कुटाः' इत्यत्र न तङ्।
6. '**अभिवादि**दृशोः—' (वा. 1-4-53) इति वचनात् आत्मनेपदे प्रयोज्यस्य पाक्षिकं कर्मत्वम्।
7. 'न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवद–' (1-3-89) इति परस्मैपदनिषेधः। 'अणावकर्मकात्–' (1-3-88) इत्यस्यापवादोऽयम्।
8. निष्ठायाम्, 'वचिस्वपियजादीनाम्-' (6-1-15) इति सम्प्रसारणम्। तेन पूर्वरूपम्।

A. 'मासे सुतं वैजननेऽथ सूतम् आदाय शौरिः **वदमान**मयौत्।' धा. वि. 2-14.

B. 'सकलैः सकलैः परितः करुणै**रुदितैः** रुदितैरिव खं निचितम्॥' भ. का. 10. 4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वदः,[1] अवादी, [2]वदावदः, [3]वावदूकः, प्रवावदूकः, [4]कद्वदः[A], [5]साधुवादी, [6]परिवादिनी, [7]प्रियंवदः-प्रियंवदा[B], वशंवदः[C], [8]प्रवादी, [9]ब्रह्मवादी, [10]परिवादकः, वादः, विवदिषुः, वावदः ;

वदितव्यम्, वादयितव्यम्, विवदिषितव्यम्, वावदितव्यम् ;

वदनीयम्, वादनीयम्, विवदिषणीयम्, वावदनीयम् ;

[11]अवद्यम्, [12]ब्रह्मोद्यम्-ब्रह्मवद्यम्, [13]मृषोद्यम्, सत्यवद्यः[D], अनृतोद्यम्,

---

1. 'याचिव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम्' (ग. सू. 3-1-134) इति नञि उपपदे ग्रह्यादित्वात् कर्तरि णिनिः ।
2. 'चरिचलिपतिवदीनां द्वित्वम् अचि आक् च अभ्यासस्य' (वा. 6-1-12) इति वचनेन पचाद्यचि द्वित्वम्, अभ्यासस्य आक् च भवतः ।
3. 'कुर्वादिभ्यो ण्यः' (4-1-151) इत्यत्र **वावदूक**शब्दपाठात् **वदते**रपि यङन्तात् ऊकप्रत्ययः इति **माधवाचार्याः** । एवं **प्रवावदूकादयो**ऽपि शब्दा बोध्याः ।
4. पचाद्यचि '**रथवदयोश्च**' (6-3-102) इति **वद**शब्दे परे कोः कत् आदेशः ।
5. अताच्छील्येऽपि 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिः ।
6. 'सुप्यजातौ णिनिः—' (3-2-78) इति णिनिः । तद्धर्मेऽयं प्रत्ययः । 'सप्तभिः **परिवादिनी**' इति वीणाविशेषः ।
7. 'प्रियवशे **वदः** खच्' (3-2-38) इति खच् । खित्त्वात् मुम् ।
8. तच्छीलादिषु कर्तृषु 'प्रे लपसृद्रुमथ**वद**वसः' (3-2-145) इति घिनुण्प्रत्ययः ।
9. 'ब्रह्मणि **वदः**' (वा. 3-2-78) इति णिनिप्रत्ययः । अताच्छीलिकोऽयम् ।
10. तच्छीलादिषु कर्तृषु 'निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरट**परिवादि**—' (3-2-146) इत्यादिना वुञ्प्रत्ययः ।
11. गर्ह्यमित्यर्थे '**अवद्य**पण्यवर्याः—' (3-1-101) इत्यनेन **वदते**र्नञ्युपपदे यत् निपात्यते । अन्यत्र **अनुद्यम्** इत्येव । अत्र नञ्युपपदे **वदतेः** क्यप् । कित्त्वात् सम्प्रसारणम् ।
12. '**वदः** सुपि क्यप् च' (3-1-106) इति अनुपसर्गे सुपि उपपदे क्यब्विकल्पः । पक्षे यत् । क्यपि **ब्रह्मोद्यम्** । यति **ब्रह्मवद्यम्** ।
13. अत्र 'राजसूयसूर्य**मृषोद्य**—' (3-1-114) इति निपातनात् नित्यं क्यप् ।

A. 'येन जातं प्रियापाये **कद्वदं** हंसकोकिलम् ।' भ. का. 6-76.
B. 'अनुका प्रार्थयांचक्रे प्रियाकर्तुं **प्रियंवदा** ।' भ. का. 4-19.
C. 'सौमित्रे मामुपायंस्थाः कम्रामिच्छु**र्वशंवदाम्** ।' भ. का. 4.20.
D. '**अनृतोद्यं** न तत्रास्ति **सत्यवद्यं** ब्रवीम्यहम् ।' भ. का. 6-55.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वाद्यम्-प्रवाद्यम्, वाद्यम्, विवदिष्यम्, वावद्यम्;
उद्यमानः, वाद्यमानः, विवदिष्यमाणः, वावद्यमानः;
ईषद्वदः-दुर्वदः-सुवदः; — — —
वादः, वादः, विवदिषः, वावदः;
वदितुम्, वादयितुम्, विवदिषितुम्, वावदितुम्;
[2]उदितिः, उत्तिः, वादना, विवदिषा, वावदा;
वदनम्, वादनम्, विवदिषणम्, वावदनम्;
[3]उदित्वा[A], वादयित्वा, विवदिषित्वा, वावदित्वा;
प्रोद्य, [4]अच्छोद्य, अनुवाद्य, प्रविवदिष्य, प्रवावद्य;
वादम् २, उदित्वा २, } वादम् २, वादयित्वा २, } विवदिषम् २, विवदिषित्वा २, } वावदम् २; वावदित्वा २; }
[5]वादिः, [6]वदान्यः,[B] [7]वादित्रम्, [8]वत्सः

---

1. 'वदः सुपि—' (3-1-106) इत्यत्र 'सुपि' इत्युक्तत्वात् सोपसर्गात्, निरुपसृष्टाच्च ण्यदेव। तेन **वाद्यम्, प्रवाद्यम्** इति सिद्ध्यतः।
2. स्त्रियां क्तिनि 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इति वचनादिटि **उदिति**। **क्षीरस्वामी** तु **उत्तिः** इतीडागमाभावपक्षे मुख्यं रूपं साधयित्वा 'इडपीष्यते **उदितिः**' इत्याह।
3. 'मृडमृदगुधकुषक्लिशवदवसः क्त्वा' (1-2-7) इति सेटः क्त्वायाः कित्त्वात् सम्प्रसारणम्।
4. 'अच्छ गत्यर्थवदेषु' (1-4-69) इति अच्छशब्दस्य गतिसंज्ञा। तेन 'कुगतिप्रादयः' (2-2-18) इति समासे ल्यप्। कित्त्वात् प्रसारणम्।
5. 'वसिवपिवदि—' [द. उ. 1-53] इतीञ्प्रत्ययः। वदति तस्यामिति **वादिः** वीणा।
6. '**वदेरान्यः**' [द. उ. 8-9] इत्यान्यप्रत्ययः। **वदान्यो** दाता।
7. 'भूवादि—' [द. उ. 8-91] इति णिजन्तात् णित्रन्प्रत्ययः। वाद्यते इति **वादित्रम्** मृदङ्गपणवादिकम्।
8. 'वृतॄवदि—' [द. उ. 9-21] इति सप्रत्ययः। 'तितुत्रस—' (7-2-9) इतीण्निषेधः। **वत्सः**=कुमारः, गोबालश्च।

A. 'उदित्वाऽलं चिरं यत्नात् सैका धात्रा विनिर्मिता॥' भ. का. 7.86.
B. '**वदान्यो** नान्योऽस्ति त्रिजगति समो रुद्रनृपतेः....।' प्रतापरुद्रीयं, ना. प्र. 16 श्लो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1548) "**वद सन्देशवचने**" (X-चुरादिः-1842. सक. सेट्. उभ.)

आधृषीयः । तेन णिज्विकल्पः ।

'—**भाषणे**' इति **हेमचन्द्र-जैन-कातन्त्रादयः** । '—**वाक्सन्देशयोः**' इति **वोपदेवः** । '—वचने च' इति **द्रुमे** इति **धा. का.** (3-51) ।

'व्यक्तवाचि वदेद्वा णौ वादयेद् वदते वदेत् ।' (श्लो. 109) इति **देवः** ।

अयं धातुः **आत्मनेपदी** इति **शाकटायनः** इति **मा. धा. वृत्तिः** ।

वादकः-दिका, विवादयिषकः-षिका ; वादकः-दिका, विवदिषकः-षिका, वावदकः-दिका ; वादयिता-त्री, विवादयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि ण्यन्तात् सन्नन्तं विना पूर्वलिखितभौवादिक**वदति**वत् (1547) ऊह्यानि ।

ण्यन्तात् सन्नन्ते इमानि रूपाणीति ज्ञेयम्—

विवादयिषिता-त्री, विवादयिषन्-न्ती, विवादयिषिष्यन्-न्ती-ती, विवादयिषमाणः, विवादयिषिष्यमाणः, विवादयिट्-यिषौ-यिषः ; विवादयिषितम्-तः-तवान् ; विवादयिषुः, विवादयिषितव्यम्, विवादयिषणीयम्, विवादयिष्यम्, ईषद्विवादयिषः-दुर्विवादयिषः-सुविवादयिषः ; विवादयिष्यमाणः, विवादयिषः, विवादयिषितुम्, विवादयिषा, विवादयिषणम्, विवादयिषित्वा, प्रविवादयिष्य, विवादयिषम् २, विवादयिषित्वा २ इति ।

(1549) "**वदि अभिवादनस्तुत्योः**" (I-भ्वादिः 11. सक. सेट्. आत्म.)

'प्रणतिपूर्वमाशिषो वाचनम्=**अभिवादनम्**' इति **मा. धा. वृत्तिः** ।

'—**नतिमात्रं** वाऽभिवादनम्' इति **धा. का. व्याख्यायाम्** (1-3) ।

'—**नुत्य**भिवादयोः' इति **वोपदेवः** ।

वन्दकः-न्दिका, वन्दकः-न्दिका, विवन्दिषकः-षिका, वावन्दकः-न्दिका ;
वन्दिता-त्री, वन्दयिता-त्री, विवन्दिषिता-त्री, वावन्दिता-त्री ;
— वन्दयन्-न्ती, वन्दयिष्यन्-न्ती-ती ; —
वन्दमानः, वन्दयमानः, विवन्दिषमाणः, वावन्द्यमानः ;
इत्यादिकानि रूपाणि सर्वाण्यपि प्रातिस्विकरूपाणि विना भौवादिक**कन्दति**वत्

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(163) ऊह्यानि । [1]वन्दारुः,[A] [2]वन्दी, वन्दनः, [3]वन्दना, [4]वन्दा, [5]वन्दथः, [6]वन्द्रः, [7]वन्दाकः, इमानि रूपाण्यधिकान्यत्रेति विशेषः । सन्नन्तात् उप्रत्यये-विवन्दिषुः[B] इति ।

(1550) " **वन शब्दे** " (I-भ्वादिः-462. अक. सेट्. पर.)

'—संभक्तिशब्दयोः' इति **वोपदेवः** ।

'याचने वनुते, शब्दे संभक्तौ च वनेदिति ॥' (श्लो. 124) इति **देवः** ।

वानकः-निका, वानकः-निका, विवनिषकः-षिका, वंवनकः-निका ;

वनिता-त्री, वानयिता-त्री, विवनिषिता-त्री, वंवनिता-त्री ;

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कणति**वत् (157) ज्ञेयानि ।

अचि-वनम्, वन्या, [8]वनिः-वनी, वन्यम्, ल्यपि-[9]प्रवत्य, [10]वन्तिः,-[11]वतिः,

---

1. तच्छीलादिषु कर्तृषु 'शॄवन्द्योरारुः' (3.2.173) इति आरुप्रत्यये रूपम् ।
2. णिनिप्रत्यये एवं रूपम् । अचि तु वन्दी इति **तरङ्गिण्याम्** । 'वन्यते याच्यते **वन्दी**=हठाहृता स्त्री' इत्य**मरटीकायां क्षीरस्वामी** ।
3. '**घट्टिवन्दि**विदिभ्यः उपसंख्यानम्' (वा.3.3.107) इति स्त्रियां युच्प्रत्यये रूपमेवम् ।
4. बाहुलकात् स्त्रियां संज्ञायामकारप्रत्यये रूपमेवम् । **वन्दा**=वृक्षरुहा ।
5. 'शीङ्शपिरुगमि**वन्दि**—' (द. उ. 6-38). इत्यथप्रत्यये रूपम् । वन्दते वन्यते वा **वन्दथः**=स्तोता, स्तुत्यश्च ।
6. औणादिके (द. उ. 8-31) रक्प्रत्यये **वन्द्रः**=हेतुः, कामो वा ।
7. औणादिके (द. उ. 3-31) आकप्रत्यये रूपमेवम् । **वन्दाकः**=कामवृक्षः इति **स्वामी** । 'वन्दाकश्चीवरभिक्षुः' इति **हेमचन्द्रः** ।
8. '**कृदिकारादक्तिनः**' (ग. सू. 4-1-45) इति स्त्रियां वा ङीष् भवति । तेन रूपद्वयमिति बोध्यम् ।
9. '**वा ल्यपि**' (6-4-38) इत्यनेन अनुदात्तोपदेशादीनां विधीयमानोऽनुनासिक-लोपविकल्पः, व्यवस्थितविभाषाविज्ञानात् नान्तेषु नित्यः । तेन **प्रवत्य** इत्येकमेव रूपम्, नित्यत्वात् ।
10. क्तिचि, '**न क्तिचि दीर्घश्च**' (6-4-39) इति दीर्घानुनासिकलोपयोर्निषेधः ।
11. क्तिनि—'तितुत्र—' (7-2-9) इत्यादिना इण्निषेधात् 'अनुदात्तोपदेश-वनति—' (6-4-37) इत्यनुनासिकलोपे रूपमेवम् ।

A. 'वन्दारुवृन्दारकवन्दिवृन्दमन्दारमालामकरन्दबिन्दून् ।' (अनर्घ. 6-83) ।

B, 'औहिष्ट तान् वीतविरुद्धबुद्धीन् **विवन्दिषून्** दाशरथिः स्ववर्ग्यान् ॥'

भ, का, 3-48,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]ब्रह्मवनं त्वा क्षत्रवनिम्, [2]वनिष्ठुः इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1551) " वन संभक्तौ " (I-भ्वादिः-463 सक. सेट्. पर.)

' ....संभक्तौ च वनेदिति ॥' (श्लो. 124) इति देवः।

' —भक्तौ। भक्तिः भजनम्' इति क्षीरस्वामी।

' वनेरर्थभेदात् पुनः पाठः' इति मैत्रेयरक्षितः।

वानकः-निका, वानकः-निका, विवनिषकः-षिका, वंवनकः-निका; वनिता-त्री, वानयिता-त्री, विवनिषिता-त्री, वंवनिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकक्षणतिवत् (157) बोध्यानि। [3]वानरः।

(1551-A) " वन श्रद्धोपहिंसनयोः " (X-चुरादिः-सक. सेट्. उभ.)

'चान्द्रपारायणमतेनायं पाठ इति क्षीरस्वामी, हेमचन्द्रश्च इति' पा. धा. समीक्षायाम्। 'तनु' इत्यत्र चुरादौ तरङ्गिण्यामेतत्पाठो दृश्यते। अस्य धातोः सर्वाण्यपि रूपाणि चौरादिकक्षणयतिवत् (159) ऊह्यानि।

(1552) " वनु च नोच्यते " (I-भ्वादिः-803. सक. सेट्. पर.) घटादिः।

'च' कारात् हिंसायामपि। 'वनु स्मरणे' इति काशकृत्स्नः। '—व्यापृतौ' इति वोपदेवः। अस्यायमर्थः इति विशिष्य नोच्यते; क्रियासामान्यार्थवाचित्वात्। 'अनेकार्थत्वादित्यन्ये' इति सि. कौमुदी। "यदि तानादिकस्यैवाऽत्रानुवादः स्यात्, तर्हि तनादिगणे 'वनु' इति कृतेन उदित्करणेनैव 'उदितो वा' (7-2-56) इत्याद्युदित्कार्यस्य सिद्धेरिह गणे पुनः

---

1. 'छन्दसि वनसनरक्षिमथाम्' (3-2-27) इति कर्मण्युपपदे छन्दसि विषये ब्रह्म वनति, क्षत्रं वनतीत्यर्थविवक्षायाम्, इन्प्रत्यये रूपमेवम्।

2. 'ऋतन्यञ्जिवनि—' (द. उ. 10-12) इत्यादिना इष्णुच्प्रत्यये रूपमेवम्। 'वनिष्ठुः= अपानं मांसविशेषश्च' इति मा. धा. वृत्तिः। दशपाद्युणादिवृत्तौ तु (10-12) 'ऋतन्यञ्जि' इत्यत्र इष्णुच्प्रत्यये वनिष्णुः इत्युक्तम्। अपानोपरि-स्थानमित्यर्थः।

3. वनशब्दात् वने भव इत्यर्थे 'तत्र भवः' (4-3-53) इति अण्प्रत्यये वान इति सिद्धम्। तत औणादिके (द. उ. 10-12) रक्प्रत्यये वानर इति रूपम्। वा=किंचित् नरो वा वानरः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उदित्करणमनर्थकं स्यात्। अतस्तानादिकस्य नात्रानुवादः; किं तु अपूर्व एवायं **वनु**धातुः" इति **बालमनोरमाया**मुक्तम्। "उदित्करणसामर्थ्यादयमन्यो धातुः, न तानादिकस्यायमनुवादः। क्रियासामान्ये मित्त्वमात्रार्थे ह्यनुवादे तानादिक एवानुवाद्यः, न पुनः शब्दार्थः सम्भक्त्यर्थो वा" इति **मा. धा. वृत्तिः** इहानुसन्धेया। '**धनपाल**स्तु वनोतिमेव प्रस्तुत्याह—"**वनुं घटादिषु** पठन्ति **द्रमिडाः**। तेषां (नित्यं) मित्संज्ञा। वनयति। **आर्या**स्तु विभाषा मित्त्वमिच्छन्ति। तेषां वानयति" इति **पुरुषकारः** (श्लो. 125)।

'याचने वनुते शब्दे संभक्तौ च वनेदिति ॥' (श्लो. 124) इति **देवः**।

वानकः-निका, वनकः-[1]वानकः-निका, विवनिषकः-षिका, वंवनकः-निका; वनिता-त्री, वनयिता-वानयिता-त्री, विवनिषिता-त्री, वंवनिता-त्री; निष्ठायाम्-वान्तम्, क्त्वायाम्-वत्वा-[2]वनित्वा; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**चनति**वत् (494) ज्ञेयानि। अनुपसृष्टे वनयन्-वानयन् इति मित्त्वविकल्पेन रूपद्वयं भवति। उपसृष्टे तु प्रवनयन् इत्येव।

(1553) **"वनु याचने"** (VIII-तनादिः-1470. सक. सेट्. आत्म.)

'याचने वनुते, शब्दे संभक्तौ च वनेदिति ॥' (श्लो. 124) इति **देवः**।

चान्द्रास्तु इमं परस्मैपदिनमाहुः। 'उभयपदी' इति **कातन्त्र-शाकटायन-हेमचन्द्रादयः**।

वानकः-निका, वानकः-[3][वनकः] निका, विवनिषकः-षिका, वंवनकः-निका; वनिता-त्री, वानयिता-त्री, विवनिषिता-त्री, वंवनिता-त्री;

---

1. 'ग्लास्नावनुवमां च' (गणसूत्रं भ्वादिः) इत्यनेनानुपसृष्टस्य धातोः मित्त्वं विकल्पेन भवति। मित्त्वपक्षे 'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वः। तेन सर्वत्र णिजन्ते रूपद्वयमिति ज्ञेयम्।

2. अस्य धातोः उदित्त्वात् 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पनात् रूपद्वयमिति बोध्यम्। इडभावपक्षे 'अनुदात्तोपदेश**वनति**—' (6-4-37) इत्यनुनासिकलोपः।

3. 'ग्लास्नावनुवमां च' (ग. सू. भ्वादिः) इति अनुपसृष्टानां मित्त्वविकल्पे "'**वनु** च नोच्यते' इति घाटादिक**स्यास्य** च ग्रहः-**इत्येके**" इति **मा. धा. वृत्ता**वुक्तत्वात् पक्षे रूपमेवमिति ज्ञेयम्। **अन्ये** 'अनन्तरस्य विधिः—' (परि-62) इति न्यायेन घाटादिकस्यैव इति वदन्ति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकमन्यतिवत् (1217) ज्ञेयानि। [1]वतम्-तः-तवान्, [2]वनीयकः-वनीपकः, [3]वतिः, [4]वन्तिः, [5]प्रवत्य, [6]वनित्वा-वत्वा, [7]वण्डः, [8]वठरः, [9]वनिष्णुः, इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्तीति बोध्यम्।

(1554) "**वन्चु गत्यर्थः**" (1-भ्वादिः-189. सक. सेट्. पर.)

'**वञ्चतीति गतावर्थे** वञ्चयेत प्रलम्भने ॥' (श्लो. 48) इति **देवः**।

वञ्चकः-ञ्चिका, वञ्चकः-ञ्चिका, विवञ्चिषकः-षिका, [10]वनीवचकः-चिका;
वञ्चिता-त्री, वञ्चयिता-त्री, विवञ्चिषिता-त्री, वनीवचिता-त्री;
वञ्चन्-न्ती, वञ्चयन्-न्ती, विवञ्चिषन्-न्ती; —
वञ्चिष्यन्-न्ती-ती, वञ्चयिष्यन्-न्ती-ती, विवञ्चिषिष्यन्-न्ती-ती; —
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकध्वंसतिवत् (942) उह्यानि।

---

1. निष्ठायाम् 'अनुदात्तोपदेश**वनति**तनोत्यादीनाम्—' (6-4-37) इत्यनुनासिकलोपे रूपमेवम्।

2. वनी=याच्ञा, तामिच्छतीति क्यजन्तात् ण्वुलि-**वनीयकः** इति रूपम्। '**वनीयको** याचनको मार्गणो याचकार्थिनौ' इत्य**मरः**। **वनीयकः**=अर्थिपर्यायः। **अन्ये वनीपकः** इति **पकारा**न्तं पठन्ति। तेषां वनीं पातीति **वनीपः**, ततः संज्ञायां कन्प्रत्यये रूपमेवम्।

3. क्तिनि अनुनासिकलोपे रूपमेवम्।

4. क्तिचि—'न क्तिचि दीर्घश्च' (6-4-39) इति दीर्घानुनासिकलोपनिषेधे रूपमेवम्।

5. ल्यपि 'वा ल्यपि' (6-4-38) इति अनुदात्तोपदेशादीनां विधीयमानोऽनुनासिकलोपविकल्पो, व्यवस्थितविभाषाश्रयणात् नान्तेषु नित्यः, तेन रूपमेवम्।

6. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पो भवति। इट्पक्षे **वनित्वा**, इडभावपक्षे अनुनासिकलोपे **वत्वा** इति रूपद्वयं बोध्यम्।

7. औणादिके (द. उ. 5-7) डप्रत्यये **वण्डः** इति रूपम्। अल्पशेष इत्यर्थः।

8. '**वनि**मनिभ्यां—' (द. उ. 8-99) इत्यरप्रत्यये ठकारे चान्तादेशे रूपमेवम्। वनति वनुते वा **वठरः**=बृहद्द्रोही, मूर्खश्च।

9. 'ऋतन्यञ्जिवनु—' (द. उ. 10-12) इत्यादिना इष्णुच्प्रत्यये रूपमेवम्। **वनिष्णुः**=अपानोपरिस्थानम् इत्यर्थः।

10. यङन्ते सर्वत्र 'नीग्वञ्चुस्रंसु—' (7-4-84) इत्यादिना अभ्यासस्य नीगागमे उपधानकारस्य लोपे च रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[माणवकं] [1]वञ्चयमानः, [2]वक्तः-वक्तवान्, [3]वञ्च्यं वञ्चन्ति वणिजः, [4]वचित्वा-[A]वञ्चित्वा-वक्त्वा, [5]वङ्क्रिः, [6]आवक्रम्[B], इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम् ।

(1555) " **वन्चु प्रलम्भने** " (X-चुरादिः-1704. सक. सेट्. आत्म.)

प्रलम्भनम्=मिथ्याफलाख्यानम् । **आकुस्मीयः** ।

'...........**वञ्चयेत प्रलम्भने** ॥' (श्लो. 48) इति **देवः** ।

उदित्करणात् णिज्विकल्पः । '—**वञ्चने**' इति **वोपदेवः** ।

वञ्चकः-ञ्चिका, विवञ्चयिषकः-षिका, वञ्चकः-ञ्चिका, विवञ्चिषकः-षिका, वनीवचकः-चिका ;

वञ्चयिता-त्री, विवञ्चयिषिता-त्री, वञ्चिता-त्री, विवञ्चिषिता-त्री, वनीवचिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि ण्यन्तं तत्प्रकृतिकसन्नन्तं च विना भौवादिक-**ध्वंसति**वत् (942) ऊह्यानि ।

---

1. ण्यन्ते 'गृधिवञ्च्योः प्रलम्भने' (1-3-69) इति अकर्त्रभिप्रायेऽपि प्रलम्भनार्थे तङेव । **प्रलम्भनम्**=मिथ्याफलाख्यानम् । अन्यत्र उभयमपि भवति ।

2. उदित्त्वेन क्त्वायामिड्विकल्पात् 'यस्य विभाषा' (7-2-15) इति निष्ठाया-मिण्निषेधे, उपधानकारलोपे च रूपमेवम् ।

3. 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यति 'चजोः कु घिण्ण्यतोः' (7-3-52) इति इति प्राप्तं कुत्वं '**वञ्चेर्गतौ**' (7-3-63) इति गत्यर्थे निषिध्यते । अत्र गच्छन्तीत्यर्थः । अन्यत्र **वङ्क्यं** काष्ठम् । अत्र कुत्वं भवति । कुटिलमित्यर्थः ।

4. '**वञ्चिलुञ्च्यृतश्च**' (1-2-24) इति सेटः क्त्वाप्रत्ययस्य कित्त्वविकल्पनात् पक्षे नलोपे **वञ्चित्वा-वचित्वा** इति । उदित्त्वेन 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पात् इडभावपक्षे **वक्त्वा** इति । आहत्य क्त्वाप्रत्यये रूपत्रयं बोध्यम् ।

5 औणादिके (द. उ. 1-35) क्रिन्प्रत्यये, निपातनात् नलोपाभावः कुत्वं च भवतः । तेन रूपमेवम् । **वङ्क्रिः**=शल्यं, शरीराङ्गं च ।

6. 'स्फायितञ्चिवञ्चि—' (द. उ. 8-31) इत्यादिना रक्प्रत्यये रूपम् । **वक्रम्**=कुटिलमित्यर्थः ।

A. '**वञ्चित्वा**ऽप्यम्बरं दूरं स्वस्मिन् तिष्ठन्तमात्मनि ।' भ. का. 7-106.

B. '**आवक्र**चम्पूपुटतश्वदारवत्वश्चत्खगम्रुक्तशिखैर्लताद्रुमैः ।' धा. का. 1-26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऊह्यानि। णिजन्तात्, तत्प्रकृतिकसन्नन्ताच्च रूपाणि सर्वाणि चौरादिक-**गन्धयति**वत् (375) ज्ञेयानि। णिजभावपक्षे सन्नन्तात् उप्रत्यये—विवप्सुः[A] इति।

(1556) "[डु] वप् बीजसन्ताने"

(I-भ्वादिः-1003. सक. अनि. उभ.) **यजादिः।**

"**बीजसन्तानः**=क्षेत्रे बीजविकिरणम्। अयं **गर्भाधाने**ऽपि दृश्यते। यथा—'मा वः क्षेत्रे परबीजा [नि] न्यवाप्सुः' (**आप-धर्मसूत्रे**-2-6-13-6) इति। **छेदने**ऽपि दृश्यते, 'केशान्वपति' इति" इति **मा. धा. वृत्तिः।** '—बीजतन्तुसन्ताने' इति **कातन्त्रः।** **द. उ. वृत्ता**वपि (9. 39) एवमेव। '—**छेदने**' इति **केचित्।** '—**मुण्डबीजोप्त्योः**' इति **वोपदेवः।** 'निपूर्वात् पितृक्रियार्थता' इति **धा. का. व्याख्यायाम्** (2. 42)। 'बीजतन्तुसन्ताने, वपने, घर्षणे, तन्तुनिर्माणे च' इति **काशकृत्स्नः।**

प्रणिवापकः-पिका, वापकः-पिका, [1]विवप्सकः-प्सिका, वावपकः-पिका;
प्रणिवप्ता-वप्त्री, प्रणिवापयिता-त्री, विवप्सिता-त्री, वावपिता-त्री;
[2]प्रणिवपन्-आवपन्[B]-न्ती, वापयन्-न्ती, विवप्सन्-न्ती; —
वप्स्यन्-न्ती-ती, वापयिष्यन्-न्ती-ती, विवप्सिष्यन्-न्ती-ती; —
वपमानः, वापयमानः, विवप्समानः, वावप्यमानः;
वप्स्यमानः, वापयिष्यमाणः, विवप्सिष्यमाणः, वावपिष्यमाणः;
[3]यवोप्-यवोब्-यवोपौ-यवोपः; — —
[4]उप्तम्-[C]उप्तः-उप्तवान्, वापितः, विवप्सितः, वावपितः-तवान्;

---

1. 'एकाच उपदेशे—' (7-2-10) इति धातोरनिट्त्वम्। सन्नन्ते अभ्यासस्येकारः।
2. '**नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपति**—' (8-4-17) इत्यादिना उपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशे रूपमेवम्। एवं तव्य-अनीयर्-ल्युटादिप्रत्ययेष्वपि प्रक्रिया ज्ञेया।
3. यवान् वपतीत्यर्थः। '**वपादेस्तु यचोब्** विश्वोट् दोषवीश्च पटोत् तुकि।' इति **प्रक्रियासर्वस्वे।**
4. निष्ठायां यजादित्वात् 'वचिस्व**पि**—' (6-1-15) इति संप्रसारणे रूपमेवम्। एवं यकृक्त्वाक्तिन्नादिष्वपि।

A. 'रामसंघुषितं नैतन्मृगस्यैव **विवप्सोः**।' भ. का. 5-55.
B. 'तरीषु तत्रत्यमफल्गु भाण्डं सांयात्रिकान् **आवपतो**ऽभ्यनन्दत्॥' शि. व. 3.76.
C. 'तस्योल्लसत्काञ्चनकुण्डलाग्रप्रत्युप्तगारुत्मतरत्नभासा।' शि. व. 3.5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वपः, वपनः[1], प्रवापी[2], निवापी, धान्यवापी, वापः, [A]विवप्सुः, वावपः ;

प्रणिवप्तव्यम्, वापयितव्यम्, विवप्सितव्यम्, वावपितव्यम् ;

प्रणिवपनीयम्, वापनीयम्, विवप्सनीयम्, वावपनीयम् ;

[3]वाप्यम्, वाप्यम्, विवप्स्यम्, वावप्यम् ;

ईषद्वपः-दुर्वपः-सुवपः ; — — —

उप्यमानः, वाप्यमानः, विवप्स्यमानः, वावप्यमानः ;

वापः, [4]उप्त्रिमम्,[B] वापः, विवप्सः, वावपः ;

वप्तुम्, वापयितुम्, विवप्सितुम्, वावपितुम् ;

उप्तिः, [5]वपा, वापना, विवप्सा, वावपा ;

प्रणिवपनम्, वापनम्, विवप्सनम्, वावपनम् ;

उप्त्वा, वापयित्वा, विवप्सित्वा, वावपित्वा ;

प्रवोप्य, प्रवाप्य, प्रविवप्स्य, प्रवावप्य ;

वापम् २ } वापम् २ } विवप्सम् २ } वावपम् २ ; }
उप्त्वा २ } वापयित्वा २ } विवप्सित्वा २ } वावपित्वा २; }

[6]वप्रिः, वापिः[7],

---

1. नन्द्यादिषु (3-1-134) पाठात् कर्तरि ल्युप्रत्ययः इति केचित्।
2. 'रक्षश्रुवपीनाम्' (वा. 3-1-134) इति ग्रहादिपाठाण्णिनिप्रत्ययः।
3. 'आसुयुवपि—' (3-1-126) इति ण्यत्प्रत्ययः। 'पोरदुपधात्' (3-1-98) इति यतोऽपवादः।
4. 'ड्वितः क्त्रिः' (3-3-88) इति क्त्रिप्रत्यये, 'क्त्रेर्मम्नित्यम्' (4-4-20) इति नित्यं मप्प्रत्यये च रूपमेवम्।
5. भिदादि (3-3-104) पाठात् स्त्रियां अङि रूपमेवम्। वपा=नाभेः श्वेतं मांसम्।
6. 'वद्कथादयश्च' (द. उ. 1-35) इति क्रिन्प्रत्यये रूपम्। वप्रिः=क्षेत्रम्।
7. 'वसिवपिवदि—' (द. उ. 1-53) इति इञ्प्रत्यये वृद्धौ च रूपमेवम्। वपति अस्यामिति वापिः=पुष्करिणी। कृतसोपानकः कूपः।

A. 'आतिथ्यमेभ्यः परिनिर्विवप्सोः कल्पद्रुमा योगबलेन फेलुः।' भ. का. 3.42.

B. 'असंस्कृत्रिमसंव्यानावनुप्त्रिमफलाशिनौ।' भ. का. 4.37.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वप्रः[A], [2]वपुः.

(1557) "**वभ्र गत्यर्थः**" (I-भ्वादिः-557. सक. सेट्. पर.)

'—**गतौ**—चलने' इति **काशकृत्स्नः।**

वभ्रकः-भ्रिका, वभ्रकः-भ्रिका, विवभ्रिषकः-[3]विवब्भ्रिषकः-षिका, वावभ्रकः-भ्रिका; वभ्रिता-त्री, वभ्रयिता-त्री, विवभ्रिषिता-विवब्भ्रिषिता-त्री, वावभ्रिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कर्बति**वत् (173) ऊह्यानि। शतरि वभ्रन्-न्ती इति। वभ्रः=विवादः।

(1558) "**टु वम उद्गिरणे**" (I-भ्वादिः-849. सक. सेट्. पर.)

'उद्गिरणे=वमने' इति **काशकृत्स्नः। ज्वलादिः, मिच्च।**
'**उद्गिरणम्**=अन्तर्गतस्य मुखेन निःसारणम्' इति **मा. धा. वृत्तिः।**
'—भुक्तस्योर्ध्वगतिः' इति **क्षीरस्वामी।** '**उदित्** इति **काशकृत्स्न**पाठः' इति **तरङ्गिण्याम्।** प्रकृतकाशकृत्स्नधातुपाठे तु '**डु वम**—' इत्येव दृश्यते।
'**काश्यपादीना**मपि उदित्पाठः' इति **मा. धा. वृत्तिः।**

[4]वामकः-मिका, वामकः-मिका, [5]वमकः-मिका, विवमिषकः-षिका, वंवमकः-मिका;

---

1. '**वृधिवपिभ्यां रन्**' (द. उ. 8-45) इति रन्प्रत्यये रूपमेवम्। उप्यतेऽस्मिन् बीजमिति **वप्रम्**=क्षेत्रम्, प्राकारजातिर्वा। '**वप्रोऽस्त्री** सानुमानयोः' इति **कोशः।**
2. '**अर्त्तिपृवपियजि**—' (द. उ. 9-39) इति उसिप्रत्ययः। उप्यते प्राक्कर्मभिरिति **वपुः**=शरीरं, तेजश्च।
3. सनि '**अनचि च**' (8-4-47) इति भकारस्य पक्षे द्विर्वचने '**झलां जश् झशि**' (8-4-53) इति पूर्वस्य जश्त्वे च रूपमेवम्। एवं सन्नन्ते सर्वत्र रूपद्वयं बोध्यम्।
4. '**नोदात्तोपदेशस्य मान्तस्य**—' (7-3-34) इत्यादिना वृद्धिनिषेधे प्राप्ते '**अनाचमिकमिवमीनाम्**—' (वा. 7-3-34) इति **वार्त्तिकात्** वृद्धिनिषेधो न। तेन ण्वुलि **वामकः** इति रूपम्।
5. '**ग्लास्नावनुवमाम्**—' (ग. सू. भ्वादिः) इति अनुपसृष्टस्य धातोः मित्त्वं विकल्पेन भवति। ततः '**मितां ह्रस्वः**' (6-4-92) इति ह्रस्वः, तेन ण्यन्ते सर्वत्र रूपद्वयं बोध्यम्।

A. '.......... ...तीव्रं महाव्रतमिवात्र चरन्ति **वप्राः**॥' शि. व, 4,58,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वमिता-त्री, वामयिता-वमयिता-त्री, विवमिषिता-त्री, वंवमिता-त्री ;
वमन्-न्ती, वामयन्-वमयन्-न्ती, विवमिषन्-न्ती ; —
वमिष्यन्-न्ती-ती, वामयिष्यन्-न्ती-ती, विवमिषिष्यन्-न्ती-ती ; —
— वामयमानः-वमयमानः, — वंवम्यमानः, वंवमिष्यमाणः ;
वमितम्-तः-तवान्, [1]वान्तम्-वान्तः-वान्तवान्, वमितः, विवमिषितः, वंवमितः-तवान् ;
वमः-[2]वामः, [3]वमी, [4]वमथुः[A], वामः-वमः वामी, [5]वामनः, विवमिषुः, वंवमः ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**चनति**वत् (494) ऊह्यानि । [6]वम्यम्, वान्तिः, [7]वमित्वा-वान्त्वा इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1559) " **वय गतौ** " (I-भ्वादिः-475. सक. सेट्. आत्म.)

वायकः-यिका, वायकः-यिका, विवयिषकः-षिका, वावयकः-यिका ;
वयिता-त्री, वाययिता-त्री, विवयिषिता-त्री, वावयिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**चयति**वत् (502) बोध्यानि । शानचि-

---

1. 'आदितश्च' (7-2-16) इति चकारस्यानुक्तसमुच्चयार्थकत्वात् निष्ठायामनिट्त्वम् इति **काशिकादौ**। " 'धारानिपातैः सह किन्तु **वान्तः** चन्द्रोऽयमित्यार्ततरं रसासे' इति **पाणिनिः**" इति **प्रक्रियासर्वस्वटीकायाम्** (पु. 26)। '**वम्**जप्-व्याश्वसो निष्ठायाः इड् वा इति **केचित्**' इत्युक्त्वा **वमितः-वान्तः** इति' **प्रक्रियाकौमुदी**।
2. कर्तरि 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति विकल्पेन णप्रत्ययः। अचोऽपवादः। तेन रूपद्वयम्।
3. 'जिदृक्षिविश्रीण्**वम**—' (3-2-157) इत्यादिना तच्छीलादिषु कर्तृषु इनिप्रत्यये रूपमेवम्।
4. भावादौ ट्वितो धातोः 'ट्वितोऽथुच्' (3-3-89) इति अथुच्प्रत्यये रूपमेवम्। 'पुमांस्तु **वमथुः** समाः' इत्य**मरः**।
5. वृद्धिपक्षे ण्यन्तात् नन्द्यादित्वात् (3-1-134) कर्तरि ल्युः। **वामनः**=लघुपरिमाणः विष्णोरवतारः।
6. 'पोरदुपधात्' (3-1-98) इति यत्प्रत्यये रूपम्। ण्यतोऽपवादः।
7. उदित्पक्षे क्त्वायाम् 'उदितो वा' (7-2-56) इति इड्विकल्पः। इडभावपक्षे 'अनुनासिकस्य—'(6-4-15) इति दीर्घे **वान्त्वा** इति रूपम्। तेन रूपद्वयं बोध्यम्।

A. 'सरक्तं **वमथुं** केचिद् भ्राजथुं न च केचन ॥' भ. का. 4-43.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वयमानः, [1]वयनः, [2]वयटः, [3]वायसः, [4]वयः, इमानि रूपाण्यधिकान्यत्रेति विशेषः । वयी=स्त्री, वायिः=सगोत्रः, वायः=व्यर्थः, वायम्=मुखम् ।

(1560) " वर ईप्सायाम् " (X-चुरादिः-1853. सक. सेट्. उभ.)

कथादिः, अदन्तश्च ।

[5]वरकः-रिका, विवरयिषकः-षिका, वरयिता-त्री, विवरयिषिता-त्री; वरयन्-न्ती, विवरयिषन्-न्ती, वरयिष्यन्-न्ती-ती, विवरयिषिष्यन्-न्ती-ती; क्विपि-वः-वरौ-वरः, ल्यपि-[6]संवरय्य, संविवरयिष्य इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**कलयति**वत् (176) ज्ञेयानि ।

(1561) " वर्च दीप्तौ " (I-भ्वादिः-162. अक. सेट्. आत्म.)

वर्चकः-र्चिका, वर्चकः-र्चिका, विवर्चिषकः-षिका, वावर्चकः-र्चिका; वर्चिता-त्री, वर्चयिता-त्री, विवर्चिषिता-त्री, वावर्चिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**चर्चति**वत् (505) ऊह्यानि । अस्य धातोः आत्मनेपदित्वात् शानचि-[A]वर्चमानः, क्विपि-[7]अवावर्क्-वर्चौ-वर्चः, सुवर्ची, सुवर्चिका, सुवर्चला, वर्चस्कम्, ब्रह्मवर्चसम्-हस्तिवर्चसम्, ण्यति-[8]वर्च्यम्, [9]वर्चा, [10]वर्चः इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्तीति बोध्यम् ।

---

1. तच्छीलादिषु कर्तृषु ' अनुदात्तेतश्च हलादेः ' (3-2-149) इति युच्प्रत्ययः ।
2. ' शकादिभ्योऽटन् ' (द. उ. 5-2) इत्यटन्प्रत्यये रूपमेवम् । **वयटः**=रसः ।
3. ' **वयो** णित् ' [द. उ. 9-46] इति असच्प्रत्यये णित्संज्ञके च रूपमेवम् । णित्वात् उपधावृद्धिः । **वायसः**=काकः ।
4. औणादिके [द. उ. 9-49] असुन्प्रत्यये रूपमेवम् । वयते गच्छति तदाशु इति **वयः**=शरीरावस्था । पक्षी इति **केचित्** ।
5. अत्र सर्वत्र अल्लोपस्य स्थानिवत्त्वात् उपधावृद्धिर्न भवति ।
6. ' ल्यपि लघुपूर्वात् ' (6-4-56) इति णेरयादेशे रूपमेवम् ।
7. ' रात् सस्य ' (8-2-24) इति नियमात् न संयोगान्तलोपः ।
8. ण्यति ' चजोः कु घिण्ण्यतोः ' (7-3-52) इति कुत्वं न भवति । ' न क्वादेः ' (7-3-59) इत्यत्र ' क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् ' इति **वार्तिकम्** । ये क्वादयोऽन्ये वा निष्ठायामनिटस्तेषां कुत्वम्, ये तु सेटस्तेषां नेति संग्रहार्थः । तेनात्र कुत्वं नेति ज्ञेयम् ।
9. ' गुरोश्च हलः ' (3-3-103) इति स्त्रियामकारप्रत्ययः । क्तिनोऽपवादः ।
10. औणादिके [द. उ. 9-49] असुन्प्रत्यये रूपमेवम् । **वर्चः**=आशुतेजसी इत्यर्थः ।

A. ' सुमङ्घिताः शिङ्घितपुष्पसौरभा यद्वर्चमानाः पशुपाः प्रसेचिरे ॥' धा. का. 1.22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1562) "वर्ण प्रेरणे" (X-चुरादिः-1551. सक. सेट्. उभ.)

'मैत्रेय एवमुक्तवान्' इति मा. धा. वृत्तिः। क्षीरस्वामी तु '—वर्णने' इत्याह। सि. कौमुद्यामपि '—प्रेरणे' इति पठित्वा, 'वर्णने इत्येके' इति दृश्यते।

वर्णकः-र्णिका, विवर्णयिषकः-षिका; वर्णयिता-त्री, विवर्णयिषिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिकचूर्णयतिवत् (559) बोध्यानि। वर्णं गृह्णाति इत्यर्थे वर्णयति—'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्ण—' (3-1-25) इति णिच्।

(1563) "वर्ण वर्णक्रियाविस्तारगुणवचनेषु"

(X-चुरादिः-1938. सक. सेट्. उभ.) अदन्तः।

वर्णक्रिया=वर्णनं, वर्णकरणं वा। कथां वर्णयति, सुवर्णं वर्णयति, विस्तृणातीत्यर्थः। विस्तारे—वर्णनेयम्। गुणवचनं=स्तुतिः, शुक्लाद्युक्तिर्वा। राजानमुपवर्णयति। '—रागे विस्तारे प्रशंसायां च' इति काशकृत्स्नः।

वर्णकः-र्णिका, विवर्णयिषकः-षिका; वर्णयिता-त्री, विवर्णयिषिता-त्री; इत्यादीनि रूपाणि सर्वाणि भेदनार्थकचौरादिककर्णयतिवत् (170) ज्ञेयानि।

(1564) "वर्ध छेदनपूरणयोः" (X-चुरादिः-1655. सक. सेट्. उभ.)

'छेदने पूरणे चार्थे वर्धः वर्धयतीति णौ॥' (श्लो. 123.) इति देवः। काशकृत्स्नेन 'वृधु वर्धने' इति पठित्वा वर्धकिः - तक्षकः इत्युक्तम्। तत्र टिप्पण्यां तु 'प्राङ् नाभिवर्धनात् पुंसः' इति मनु(2. 29.)वचने छेदनार्थ एव दृश्यते। वर्धकिप्रयोगेऽपि स एवार्थोऽभिप्रेतः। अतः काशकृत्स्नपाठे लेखकप्रमादात् भ्रष्टपाठः स्यात्, यद्वा वर्धनशब्दस्य छेदन एवात्रार्थो ग्रहीतव्यः' इत्येवमुक्तम्।

वर्धकः-र्धिका, विवर्धयिषकः-षिका, वर्धयिता-त्री, विवर्धयिषिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्चयतिवत् (507) ऊह्यानि।

(1565) "वर्फ गतौ" (I-भ्वादिः-412A. सक. सेट्. पर.)

"क्षीरस्वामिचन्द्रकातन्त्रहेरम्बादयः 'वर्फ—' इति पठन्ति। मैत्रेयसायणजैनकाशकृत्स्नशाकटायनप्रभृतयः न पठन्ति" इति पा. धा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समीक्षा। क्षीरतरङ्गिण्याम् 'वर्फ—' इति पठित्वा '**हिंसार्थे कण्ठः** पठति' इत्युक्तम्। 'वफ—' इति काशकृत्स्नः। 'वर्प—' इति **सायणः**।

वर्फकः-र्फिका, वर्फकः-र्फिका, विवर्फिषकः-षिका, वावर्फकः-र्फिका;
वर्फिता-त्री, वर्फयिता-त्री, विवर्फिषिता-त्री, वावर्फिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कर्दति**वत् (173) ज्ञेयानि।

(1566) "**वर्ष स्नेहने**" (I-भ्वादिः-613. अक. सेट्. आत्म.)

'…………**स्नेहे तु वर्षते**॥' (श्लो. 176) इति **देवः**।
'**पर्ष**—' इति **क्षीरस्वामी**। **चन्द्रकाशकृत्स्नकातन्त्रहेरम्बवोपदेवादयः** न पठन्ति। **शाकटायनदेवमैत्रेयसायणभट्टोजिदीक्षितादयः** 'वर्ष स्नेहने' इत्यभ्युपगच्छन्ति। **स्नेहनं**=स्निग्धीभावः। '**पर्ष वर्ष**' इति पृथक्त्वेन **मैत्रेयः** पठति।

वर्षकः-र्षिका, वर्षकः-र्षिका, विवर्षिषकः-षिका, वावर्षकः-र्षिका;
वर्षिता-त्री, वर्षयिता-त्री, विवर्षिषिता-त्री, वावर्षिता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कर्दति**वत् (173) ज्ञेयानि। अवावर्ट्-[1]अवावर्ड्-वर्षौ-वर्षः, [2]प्रियवर्षी, धनवर्षी, निष्ठायाम्-वर्षितम्-तः-तवान्, इमानि रूपाणि विशेषेण भवन्ति।

(1567) "**वर्ह परिभाषणहिंसाच्छादनेषु**"
(I-भ्वादिः-640. सक. सेट्. आत्म.)

'—**परिभाषणहिंसादानेषु**' इति **क्षीरस्वामिमैत्रेयद्रुमसायणादयः**। '—**प्राधान्यपरिभाषण….दानेषु**' इति **कातन्त्रे**। **चन्द्रकाशकृत्स्नौ** न पठतः। "अत्र **धनपालमैत्रेयौ** परिभाषणादावोष्ठ्यादित्वम्, वृद्धौ दन्त्योष्ठ्यादित्वं चाहतुः। 'छादयत्यनेनेति वर्हः घञ्' इति वदन् **शाकटायनो**ऽप्यत्रैवानुकूलः। यथा **वयं** तथा **स्वामी**।" इति **मा. धा. वृत्तिः**।
'**परिभाषणम**त्र वञ्चनवादः' इति **धा. का. व्याख्या** (1-81)।

---

1. क्विपि, 'रात् सस्य' (8-2-24) इति नियमात् न संयोगान्तलोपः।
2. ताच्छीलिके णिनिप्रत्यये रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्हकः-र्हिका, वर्हकः-र्हिका, विवर्हिषकः-षिका, वावर्हकः-र्हिका ;
वर्हिता-त्री, वर्हयिता-त्री, विवर्हिषिता-त्री, वावर्हिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**गर्हति**वत् (385) बोध्यानि । युचि-[1]वर्हणः, [2]वर्हा इति विशेषः ।

(1567-A) " **वर्ह भासार्थः** " (X-चुरादिः-1843. सक. सेट्. उभ.)

इति **क्षीरस्वामिशाकटायनौ** इति **पाणिनीयधातुपाठसमीक्षाया**मुपात्तम् । प्रकृत**क्षीरतरङ्गिण्यां** तु '**वर्ह**' इत्येव दृश्यते । रूपाणि यथासम्भवं बोध्यानि ।

(1568) " **वल संवरणसंचरणयोः** "

(I-भ्वादिः-491. सक. सेट्. आत्म.) **घटादिः** ।

'**—संवरणे**' इत्येव **क्षीरतरङ्गिणी** । '**—संवृतौ**' इति **जैनेन्द्रे** ।
'**—चलने** संवरणे च' इति **कातन्त्रः** । '**—स्मृतौ**' इति **वोपदेवः** ।
'**—संवरणे**—प्रसारे' इति **काशकृत्स्नः** । इतः पूर्वं भ्वादौ '**वल निष्पत्तौ**—फलितभावे' इति च पठितम् । अन्यत्र कोशेषु अस्य पाठो न दृश्यते । 'वलतेरात्मनेपदमनित्यम्' इति **वामनालंकारे** (5-2-3) ।

वालकः-लिका, [3]वलकः-वालकः-लिका, विवलिषकः-षिका, वावलकः-लिका ;
वलिता-त्री, वालयिता-त्री, विवलिषिता-त्री, वावलिता-त्री ;
— वालयन्-न्ती, वालयिष्यन्-न्ती-ती ; —
वलमानः, वाल्यमानः, विवलिषमाणः, वावल्यमानः ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कलति**वत् (174) बोध्यानि । शतरि वलन्-[4]न्ती ।

---

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युचि रूपमेवम् ।
2. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः । क्तिनोऽपवादः ।
3. 'दलिवलि......'इति घटादिषु **भोज**सम्मतः पाठः । 'घटादयो मितः' (ग. सू: भ्वादिः) इति मित्त्वात् 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाह्रस्वः । तेन **वलकः** इत्यादिकानि रूपाणि । ण्यन्ते सर्वत्र एवं ह्रस्वघटितरूपाणि ऊह्यानि ।
4. 'अनुदात्तेतां तङोऽनित्यत्वात् शतरि **वलन्**' इति **धा. का. व्याख्यायाम्** (1-63) ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वालः-वारः-वालिः, वलिः-[2]वली, वलिनः, [3]वलीकम्, वलिभः, वलभी, [4]वालाकिः, [5]वल्मीकम्, वलिः, [6]वल्कः, [7]वलाका–वलाकी, [8]वल्लूकम्, [9]वलयम्; इत्यादिकानि रूपाण्यधिकान्यत्रेति विशेषः।

(1569) "**वल्क परिभाषणे**" (X-चुरादिः-1571. सक. सेट्. उभ.)

'श्वल्क' इति **मैत्रेयादयः**। '—भाषणे' इति **चन्द्रजैनकाशकृत्स्नकातन्त्रादयः**।

वल्ककः-ल्किका, विवल्कयिषकः-षिका; वल्कयिता-त्री, विवल्कयिषिता-त्री; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**चर्चयति**वत् (507) बोध्यानि। निष्ठायां वल्कितं-तः-तवान् इति। [A]**वल्कलम्**=वृक्षत्वक्।

(1569-A) "**वल्क दर्शने**" (X-चुरादिः-1916. सक. सेट्. उभ.)

सर्वाण्यपि रूपाणि **चर्चयति**वत् (507) ऊह्यानि। **क्षीरस्वामिमाधवादयः** न पठन्ति।

---

1. संज्ञायाम् 'हलश्च' (3-3-121) इति करणे घञ्प्रत्यये रूपमेवम्। '**वालमूल**—' (वा. 8-2-18) इत्यादिना पक्षे रः। तेन रूपद्वयं बोध्यम्। **वालः**=केशः, पुच्छम् च। **वालिः**=देवेन्द्रस्य पुत्रः।
2. इन्नन्तात् 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति वा ङीष्।
3. वलति आवृणोतीत्यर्थे 'अलीकादयश्च' (द. उ. 3-43) इति ईकन्प्रत्ययः। '**वलीक**नीध्रे पटलप्रान्ते' इत्य**मरः**।
4. वलाकाया अपत्यमित्यर्थे 'बाह्वादिभ्यश्च' (4-1-96) इतीञ्प्रत्यये रूपम्।
5. 'अलीकादयश्च' (द. उ. 3-43) इत्यत्र ईकनन्तो निपातितः। मुमागमोऽपि निपातनादेव। 'वामलूरुश्च नाकुश्च **वल्मीकं** पुन्नपुंसकम्' इत्य**मरः**। वल्मीके भवः इत्यर्थे अण्प्रत्यये इञि च **वाल्मीकिः**=आदिकविः श्रीमद्रामायणस्य कर्ता।
6. 'शुक**वल्को**ल्काः' (द. उ. 3-20) इति कप्रत्यये निपातितः। **वल्कः**=वासः, तरुत्वक् च।
7. '**वलाका**दयश्च' (द. उ. 3-32) इत्याकप्रत्यये, टापि च रूपमेवम्। **वलाका**= पक्षिजातिः। वलाका अस्य सन्तीति 'व्रीह्यादिभ्यश्च' (5-2-116) इति मत्वर्थे इनिः।
8. 'वल्लूकः' [न्यल्लूकः] (द. उ. 3-45) इत्यूकप्रत्यये निरूढः। **वल्लूकम्**= उत्पलद्रव्यम्।
9. '**वलि**मलितनिभ्यः कयन्' (द. उ. 8-10) इति कयन्प्रत्यये रूपमेवम्। **वलयम्**=आभरणविशेषः। 'कटकं **वलये** सानौ' इत्य**मरः**।

A. '...**वल्कले**नापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।' शाकुन्तले-1-20

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1570) " **वल्ग गत्यर्थः**" (I-भ्वादिः-143. सक. सेट्. पर.)

'**वल्गि**—' इति मा. धा. **वृत्तिः** । '—**प्लुतगतौ**' इति **भट्टमल्लः** ।

वल्गकः-ल्गिका, वल्गकः-ल्गिका, विवल्गिषकः-षिका, वावल्गकः-ल्गिका ;
वल्गिता-त्री, वल्गयिता-त्री, विवल्गिषिता-त्री, वावल्गिता-त्री ;
वल्गन्-न्ती, इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**गल्भति**वत् (389) ऊह्यानि । ल्युटि-[A]वल्गनम्, निष्ठायाम्-वल्गितः[B] इति विशेषः । [1]वल्गुः ।

(1571) " **वल्भ भोजने** " (I-भ्वादिः-391. सक. सेट्. आत्म.)

वल्भकः-ल्भिका, वल्भकः-ल्भिका, विवल्भिषकः-षिका, वावल्भकः-ल्भिका;
वल्भिता-त्री, वल्भयिता-त्री, विवल्भिषिता-त्री, वावल्भिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि धार्ष्ट्यार्थकभौवादिक**गल्भति**वत् (389) ऊह्यानि । णिनिप्रत्यये-प्रवल्भी, युचि-वल्भनः, इति विशेषः । ण्यन्तात् शतरि-[2]वल्भयन्-न्ती, इति ।

(1572) " **वल्ल संवरणे संचरणे च** " (I-भ्वादिः-492. सक. सेट्. आत्म.)

अमुं धातुं **क्षीरस्वामी** न पठति । '—**चलने च**' इति **कातन्त्रः** । 'सौत्रोऽयं धातुः' इति **द. उ. वृत्त्याम्** (1-52)। **काशकृत्स्नीये '—संवरणे'** इति पठित्वा इतः पूर्वं (भ्वादौ) '**वल्ल निष्पत्तौ**' इत्यपि पृथक् धातुः पठितः ।
वल्लकः-ल्लिका, वल्लकः-ल्लिका, विवल्लिषकः-षिका, वावल्लकः-ल्लिका ;
वल्लिता-त्री, वल्लयिता-त्री, विवल्लिषिता-त्री, वावल्लिता-त्री ;
—वल्लयन्-न्ती, वल्लयिष्यन्-न्ती-ती ; वल्लमानः, वल्लयमानः, विवल्लिषमाणः, वावल्ल्यमानः ; इत्यादिकानि सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिक**कङ्कति**वत् (156) ज्ञेयानि ।

---

1. औणादिके (द. उ. 1-104) उप्रत्यये रूपमेवम् । **वल्गुः**=सरसं, दर्शनीयं च ।
2. निगरणार्थत्वेन णिजन्तात् '**निगरण**चलनार्थेभ्यश्च' (1-3-87) इति नित्यं परस्मैपदम् ।

A. 'एखचकोरोत्करमि[illegible]तं शुकैः प्रेङ्खत्तावल्गनरङ्गमण्डपम् ।' धा. का. 1-20.
B. 'विलोलतां चक्षुपि हस्तवेपथुं भ्रुवोर्विभङ्गं स्तनयुग्मवल्गितम् ।' भ, का. 11-37.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वल्लरी-वल्लरिः, [2]वलिः-[A]वल्लिः-वल्ली-लता, [3]वल्लभः[B] [4]वल्लकी, [5]वल्लवः वल्लूरः[6] इमानि रूपाण्यधिकानीति विशेषः।

(1573) "वल्ह परिभाषणहिंसाच्छादनेषु"

(I-भ्वादिः-641. सक. सेट्. आत्म.)

'केचित्तु ओष्ठ्यादिः इत्याहुः' इति **सि. कौमुद्याम्**। '—परिभाषणहिंसादानेषु' इति, **दन्त्यौष्ठ्यादिः**, 'अत्र **धनपालमैत्रेयौ** परिभाषणादावोष्ठ्यादित्वम्, वृद्धौ दन्त्यौष्ठ्यादित्वं चाहतुः' इति च **माधवः**। '**बल्ह** प्राधान्ये' इति **तरङ्गिण्याम्**। **पाणिनीयधातुपाठसमीक्षायाम्**—'वल्ह **प्राधान्ये**' इति **मैत्रेयकातन्त्रशाकटायनहेमादयः** पठन्ति। '—**श्रैष्ठ्ये**' इति **वोपदेवः**' इत्युक्तम्।

"—**दाने** च' इति **द्रुमे**। परिभाषणमत्र वञ्चनवादः।" इति **धा. का. व्याख्यायाम्** (1-81)।

वल्हकः-ल्हिका, वल्हकः-ल्हिका, विवल्हिषकः-षिका, वावल्हकः-ल्हिका; वल्हिता-त्री, वल्हयिता-त्री, विवल्हिषिता-त्री, वावल्हिता-त्री;

---

1. वाहुलकाद् अरप्रत्यये पिप्पल्यादित्वात् (ग. सू. 4-1-41) ङीष्प्रत्यये च रूपम्।
2. '**वल्लेर्वलिरहिरण्ये**' [द. उ. 1-52] इति इन्प्रत्यये, हिरण्यभिन्नार्थे वलिरित्यादेशे च रूपमेवम्। वलति वल्यते वा **वलिः**=त्वङ्मांससंकोचः। **वल्लिः** इत्यस्य तु हिरण्यशलाका इत्यर्थः। **वल्ली** इत्यत्र 'कृदिकारात्—' (वा. 4-1-45) इति ङीष्। '**सौत्रोऽयं धातुः**' इति **द. उ. वृत्त्याम्**।
3. 'रासि**वल्लिभ्यां** च' [द. उ. 7-21] इत्यभच्प्रत्यये रूपमेवम्। वलति वल्यते वा **वल्लभः**=दयितः, प्राणप्रिय इति **स्वामी**। '**वल्लभो** दयितेऽध्यक्षे सल्लक्षणतुरङ्गमे' इति **विश्वः**।
4. औणादिके (द. उ. 3-5) क्वुन्प्रत्यये गौरादित्वाद् ङीषि च रूपमेवम्। '....**वीणा** तु **वल्लकी**' इत्य**मरः**।
5. औणादिके (द. उ. 8-132) वन्प्रत्यये रूपमेवम्। **वल्लवः**=गोधुक्।
6. '**खर्जिपिञ्जादिभ्य ऊरोलचौ**' (द. उ. 10-10) इति ऊरप्रत्यये रूपमेवम्। **वल्लूरः**=शुष्कमांसम् इत्यर्थः। '**उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम्**' इत्य**मरः**।

A. 'विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुह**वल्लि**तन्तुभिः।' शि. व. 1-7

B. 'रात्रिर्यामत्रयपरिमिता **वल्लभा**स्ते सहस्रं....'। प्रतापरुद्रीयेम् नायकप्रकरणे—श्लो. 50,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकगर्हतिवत् (385) ज्ञेयानि। ल्यपि-प्रवश्य।

(1574) "वश कान्तौ" (II-अदादिः-1080. सक. सेट्. पर.) ग्रह्यादिः।

कान्ति =इच्छा इति क्षीरस्वामी।

वाशकः-शिका, वाशकः-शिका, विवशिषकः-षिका, [1]वावशकः-शिका;
वशिता-त्री, वाशयिता-त्री, विवशिषिता-त्री; वावशिता-त्री;
[2]उशन्-न्ती, वाशयन्-न्ती, विवशिषन्-न्ती; —
वशिष्यन्-न्ती-ती, वाशयिष्यन्-न्ती-ती, विवशिषिष्यन्-न्ती-ती; —
— वाशयमानः, वाशयिष्यमाणः, — वावश्यमानः, वावशिष्यमाणः;
उट्-उशौ-उशः; — —
उशितम्-तः-तवान्, वाशितम्-तः, विवशिषितः, वावशितः-तवान्;
वशः, [3]वशा, [4]गोवशा, वशी, वाशः, [5]वाशनः,[A] विवशिषुः, वावशः;
वशितव्यम्, वाशयितव्यम्, विवशिषितव्यम्, वावशितव्यम्;
वशनीयम्, वाशनीयम्, विवशिषणीयम्, वावशनीयम्;
वश्यम्, वाश्यम्, विवशिष्यम्, वावश्यम्;
ईषद्वशः-दुर्वशः-सुवशः; — —
उश्यमानः, वाश्यमानः, विवशिष्यमाणः, वावश्यमानः;
[6]वशः, वाशः, विवशिषः, वावशः;
वशितुम्, वाशयितुम्, विवशिषितुम्, वावशितुम्;

---

1. 'न वशः' (6-1-20) इति यङि परतः वशेः संप्रसारणं न भवति।
2. शतरि, 'ग्रहिज्यावयिव्यधिवष्टिविचति—' (6-1-16) इति किति ङिति च प्रत्यये परतः संप्रसारणं भवति। तेनैवं रूपम्। एवं क्विप्-निष्ठा-क्तिनादिषु च ज्ञेयम्।
3. पचाद्यचि, तदन्तात् टापि च रूपमेवम्। वशा=मांसम्।
4. अत्र 'पोटायुवतिस्तोककतिपयगृष्टिधेनुवशा—' (2-1-65) इत्यादिना तत्पुरुष-समासः। गोवशा=वन्ध्या गौरित्यर्थः।
5. ण्यन्तात्, 'नन्दिवाशि—' (वा. 3-1-134) इत्यादिना संज्ञायां ल्युप्रत्यये रूपमेवम्।
6. 'वशिरण्योरुपसंख्यानम्' (वा. 3-3-58) इति भावे घञपवादोऽप्प्रत्ययः।
A. 'भृङ्गालीकोकिलकुङ्भिर्वाशनैः पश्य लक्ष्मण।' भ. का. 6-74.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उष्टिः,	वाशना,	विवशिषा,	वावशा;
वशनम्,	वाशनम्,	विवशिषणम्,	वावशनम्;
[1]वशित्वा,	वाशयित्वा,	विवशिषित्वा,	वावशित्वा;
प्रोश्य,	प्रवाश्य,	प्रविवशिष्य,	प्रवावश्य;
वाशम् २ } वशित्वा २ }	वाशम् २ } वाशयित्वा २ }	विवशिषम् २ } विवशिषित्वा २ }	वावशम् २; } वावशित्वा २; }

[2]उशिक्, [3]उशीरम्, [4]उशनाः.

(1575) " **वष हिंसार्थः** " (I-भ्वादिः-691. सक. सेट्. पर.)

'—वधे' इति **वोपदेवः**।

वाषकः-षिका, वाषकः-षिका, विवषिषकः-षिका, वावषकः-षिका;
वषिता-त्री, वाषयिता-त्री, विवषिषिता-त्री, वावषिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**रूषति**वत् (179) ऊह्यानि। ल्युटि-वषणम्, क्विपि वट्-वड्-वषौ-वषः; इति। 'वष्यम्=भक्षितम्, वषिः=खाद्यम्, वषिता=उदरम्भरिः' इति **काशकृत्स्नः**।

(1576) " **वस निवासे** " (I-भ्वादिः-1005. अक. अनि. पर.)

'वस्यति स्तम्भने वस्ते, छादने वसयेत्, **वसेत्**॥ [**यजादिः**।
निवासे वासयेत् स्नेहे, वासयत्युपसेवने।' (श्लो. 187-8) इति **देवः**।
'अयं धातुः **उभयपदी**' इति **कातन्त्रशाकटायनादयः**।

वासकः-सिका, वासकः-सिका, [5]विवत्सकः-त्सिका, वावसकः-सिका;

---

1. क्त्वाप्रत्यये, 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् न संप्रसारणम्।
2. '**वशेः** कित्' (द. उ. 4-9) इति धातोरिजिप्रत्यये कित्त्वात् संप्रसारणम्। वष्टि उश्यतेऽसौ श्रेयोऽर्थिभिरिति **उशिक्**=अग्न्यादिः।
3. औणादिके [द. उ. 8-73] ईरन्प्रत्यये, कित्त्वात् संप्रसारणे च रूपमेवम्। उश्यते तदिति **उशीरम्**=गन्धद्रव्यम्। **उशीनरम्** इति तु देशविशेषवाचकं शब्दान्तरम्।
4. '**वशेः** कनसिः' (द. उ. 9-99) इति कनसिप्रत्यये, कित्त्वात् 'ग्रहिज्या—' (6-1-16) इत्यादिना सम्प्रसारणे रूपमेवम्। **उशनाः**=शुक्रः।
5. सन्नन्तात् ण्वुलि, धातुसकारस्य 'सः स्यार्धधातुके' (7-4-49) इति तकारे रूपमेवम्। एवं स्यप्रत्यये, सन्नन्तेषु सर्वत्रापि च ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वस्ता-त्री, वासयिता-त्री, विवत्सिता-त्री, वावसिता-त्री ;

वसन्-न्ती, वासयन्-न्ती, विवत्सन्-न्ती ; —

निवत्स्यन्-न्ती-ती, वासयिष्यन्-न्ती-ती, विवत्सिष्यन्-न्ती-ती ; —

— वासयमानः, वासयिष्यमाणः, — वावस्यमानः, वावसिष्यमाणः ;

[1]अध्युषितम्-[A][अनेन], प्रोषितः,[B] अनुषितो [गुरुं शिष्यः], गुरुः शिष्येण, तः-तवान्, वासितः, विवत्सितः, वावसितः-तवान् ;

वसः, [2]प्रवासी, जलवासी, सुवासी, नगरवासी, [3]ग्रामेवासी-ग्रामवासी, [4]अवासी, होतुरन्तेवासी,[C] पितुरन्तेवासी, [D]अध्यूषुषः [5]ऊषिवान्[E], वासः, वासनः, [6]वास्तव्यः,[F] विवत्सुः, वावसः ;

वस्तव्यम्, वासयितव्यम्, विवत्सितव्यम्, वावसितव्यम् ;

वसनीयम्, वासनीयम्, विवत्सनीयम्, वावसनीयम् ;

---

1. 'गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवस—' (3-4-72) इत्यादिना कर्तृकर्मणोः क्तः। 'वसतिक्षुधोरिट्' (7-2-52) इति इडागमः। सम्प्रसारणम्। पूर्वरूपादिकम्। 'शासिवसिघसीनां च' (8-3-60) इति षत्वम्।
2. ताच्छीलिकः 'प्रे लपसृद्रुमथवदवसः' (3-2-145) इति घिनुण्प्रत्ययः।
3. 'सुप्यजातौ—' (3-2-78) इति णिनिप्रत्यये 'शयवासवासिषु अकालात्' (6-3-18) इति सप्तम्या अलुक्। एवम् अन्तेवासी इत्यत्रापि ज्ञेयम्।
4. 'याचिव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् (ग. सू. 3-1-134) इति वसेः ग्रह्यादिपाठात् णिनिप्रत्ययः।
5. 'भाषायां सदवसश्रुवः' (3-2-108) इति लिटः क्वसुः। सम्प्रसारणपूर्वरूपादिकम्। अभ्यासस्य उत्तरखण्डस्य च सवर्णदीर्घः। 'शासिवसि—' (8-3-60) इति षत्वम्।
6. 'वसेस्तव्यत् कर्तरि णिच्च' (वा. 3-1-96) इति वचनात् कर्तरि तव्यत्प्रत्ययः। णिद्वद्भावेनोपधावृद्धिः। वसतीति वास्तव्यः।

A. 'बभञ्जाध्युषितं भूयः क्षुंधित्वा पत्रिभिर्वनम् ॥' भ. का. 9.39

B. 'आहर्तुमन्यानशिषत् प्रोषितत्रासकर्कशः ॥' भ. का. 9.68

C. 'रुतानि शृण्वन् वयसां गणोऽन्तेवासित्वमाप स्फुटमङ्गनानाम् ॥' शि. व. 3.55

D. 'अध्यूषुषो यामभजञ्जनस्य याः संपदस्ता मनसोऽप्यगम्याः ॥' शि. व. 3-59

E. 'स प्रोषिवानेत्य पुरं प्रवेक्ष्यन् शुश्राव घोषं न जनौघजन्यम्।' भ. का. 3-27

F. 'प्रसूनक्लृप्तिं दधतः सदर्तवः पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ॥' शि. व. 1-66

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वास्यम्, [1]अमावास्या[A]-अमावस्या, वास्यम्, विवत्स्यम्, वावस्यम्,
उष्यमाणः, वास्यमानः, विवत्स्यमानः, वावस्यमानः;
ईषद्वसः-दुर्वसः-सुवसः; — —
निवासः, [2]आवासः[B], लिप्तवासः, वनेवासः,[C] वनवासः, ग्रामेवासः,
[3]उदवासः, उदकवासः, उद्वासः, उपवासः, प्रावासः, वासः, विवत्सः, वावसः;
वस्तुम्, वासयितुम्, विवत्सितुम्, वावसितुम्;
[4]उष्टिः, [5]वासिः, वासना, विवत्सा, वावसा;
वसनम्, वासनम्, विवत्सनम्, वावसनम्;
[6]उषित्वा[D], वासयित्वा, विवत्सित्वा, वावसित्वा;
[E]प्रोष्य, प्रवास्य, प्रविवत्स्य, प्रवावस्य;
वासम् २, उषित्वा २, } वासम् २, वासयित्वा २, } विवत्सम् २, विवत्सित्वा २, } वावसम् २; वावसित्वा २; }

---

1. अमा=सह वसतः सूर्याचन्द्रमसौ इत्यर्थे '**अमावस्यद्** अन्यतरस्याम्' (3-1-122) इति ण्यत्प्रत्ययान्तो निपात्यते। पक्षे वृद्ध्यभावश्च निपातनादेव। तेन **अमावास्या अमावस्या** इति रूपद्वयम्।
2. 'हलश्च' (3-3-121) इति घञ्। 'शय**वास**—' (6-3-18) इति सप्तम्य अलुक्।
3. 'पेषंवासवाहनधिषु च' (6-3-58) इति सूत्रेण **वास**शब्द उत्तरपदे उदकशब्दस्य उदादेशः। **उदवासः** उदकस्य वास इत्यर्थः।
4. स्त्रियां क्तिनि सम्प्रसारणषत्वष्टुत्वादिकेषु रूपमेवम्। **वसतिः** इति तु औणादिकं रूपमिति ज्ञेयम्।
5. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति इक्प्रत्यये रूपम्। यद्यपि भाव एवायं प्रत्ययः, तथापि यथासम्भवं कर्तर्यपि भवति। **वासिः**=तक्षण आयुधविशेषः।
6. '**वसति**क्षुधोरिट्' (7-2-52) इति क्त्वायामिडागमः। 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधं बाधित्वा 'मृडमृदगुधकुषक्लिशवद**वसः** क्त्वा' (1-2-7) इति कित्त्वम्। तेन सम्प्रसारणादिकं भवतीति ज्ञेयम्।

A. 'स तामूचेऽथ कच्चित्त्व**ममावास्या**समन्वये।' भ. का. 6-64
B. '**आवासे** सिक्तसंमृष्टे गन्धैस्त्वं **लिप्तवासिता**।' भ. का. 5-90
C. 'रक्षन् **वनेवास**कृताद् भयात् तान् प्रातश्छलेनापजगाम रामः॥' भ.का.3-16
D. 'ते भुक्तवन्तः सुसुखं वसित्वा वासांस्यु**षित्वा** रजनीं प्रभाते।' भ. का. 3-45.
E. 'क्षणमतुहिनधाम्नि **प्रोष्य** भूयः पुरस्तात्......।' शि. व. 11-65

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वसतिः, [2]वासिः, [3]वसिः, [4]वस्तिः, [5]वसु, [6]वस्तु; [7]वास्तु, [8]आवसथः, [9]वत्सरः, [10]वासरः, [11]वसिष्ठः, [12]वस्नम्, [13]वसन्तः, [14]वस्त्रम्.

(1577) " **वस आच्छादने** " (II-अदादिः-1023. अक. सेट्. आत्म.)

'वस्यति स्तम्भने **वस्ते छादने** वसयेत् वसेत् ॥' (श्लो. 187) इति **देवः** ।

'**—स्मृतौ**' इति **वोपदेवः** ।

वासकः-सिका, वासकः-सिका, विवसिषकः-षिका, वावसकः-सिका; वसिता-त्री, वासयिता-त्री, विवसिषिता-त्री, वावसिता-त्री; —वासयन्-न्ती, वासयन् वासयमानो वा वस्त्रं देवदत्तेन, वासयिष्यन्-न्ती-ती,

---

1. '**वहिवस्यर्तिभ्यश्चित्**' (द. उ. 1-29) इत्यतिप्रत्ययः। **वसतिः**=आलयः।
2. '**वसिवपि—**' (द. उ. 1-53) इति इञ्प्रत्ययः। **वासिः**=तक्षकारभाण्डम्।
3. औणादिकः (द. उ. 1-68) इप्रत्ययः। **वसिः** शय्या, रात्रिर्वा।
4. '**वसेस्तिः**' (द. उ. 1-74) इति तिप्रत्ययः। वसत्यस्मिन् नानौषधियुक्तः स्नेह इति **वस्तिः**-अधःकायप्रदेशः, चर्ममयः पुटश्च । **वस्तिः** इति **गौडीयाः**।
5. औणादिके (द. उ. 1-95) उप्रत्यये रूपमेवम्। **वसु**=धनम्।
6. '**वसेस्तुन्**' (द. उ. 1-128) इति तुन्प्रत्ययः। **वस्तु**=द्रव्यम्।
7. 'अगारे णिच्च' (द. उ. 1-129) इति तुन्प्रत्ययः, तस्य णिद्वद्भावेनोपधावृद्धिः। **वास्तु**=गृहादिकम्।
8. 'आङि **वसः**' (द. उ. 6-39) इति आङ्युपपदे धातोरथप्रत्यये रूपमेवम्। **आवसथः**=गृहादिकम्।
9. '**वसेश्च**' (द. उ. 8-51) इति सरन्प्रत्यये 'सः स्यार्द्धधातुके' (7-4-49) इति तकारादेशे च रूपम्। वसन्त्यस्मिन् ग्रहनक्षत्रर्तुदेवता इति **वत्सरः**=अब्दः। 'संवत्सरो **वत्सरो**ऽब्दः हायनोऽस्त्री शरत्समाः' **इत्यमरः**।
10. णिजन्तात् औणादिके (द. उ. 8-100) अरप्रत्यये रूपमेवम्। 'घस्रो दिनाहनी वा तु क्लीबे दिवस**वासरौ**' **इत्यमरः**।
11. अतिशयेन वसुमान् **वसिष्टः**। वसुमच्छब्दात् इष्ठन्प्रत्यये मतुब्लुकि टिलोपे च रूपमेवम्।
12. 'धापृवस्यज्यतिभ्यो नः' (द. उ. 5-39) इति नः। "**वस्नम्** मूल्यम्" इति **धातुवृत्तिः**।
13. '**तृभूवहिवसि—**' (द. उ. 6-19) इति झच्प्रत्ययः। 'झोऽन्तः' (7-1-3) इति अन्तादेशे **वसन्तः** इति रूपम्। ऋतुविशेषः।
14. औणादिके (द. उ. 8-79) ष्ट्रन्प्रत्यये रूपमेवम्। **केचित्तु 'वस** आच्छादने' इत्यस्मात् व्युत्पादयन्ति, तदेव न्याय्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[A]वसानः, वासयमानः, विवसिषमाणः, वावस्यमानः ;

वसिष्यमाणः, वासयिष्यमाणः; विवसिषिष्यमाणः, वावसिष्यमाणः ;

[1]चर्मवः-चर्मवसौ-चर्मवसः ; — — —

वसितम्-तः, वासितम्, विवसिषितः, वावसितः-तवान् ;

वसः, [2]वसा, सुवासी, [3]वसनः, [4]वसिता, वासः, विवसिषुः, वावसः ;

वसितव्यम्, वासयितव्यम्, विवसिषितव्यम्, वावसितव्यम् ;

वसनीयम्, वासनीयम्, विवसिषणीयम्, वावसनीयम् ;

वास्यम्, वास्यम्, विवसिष्यम्, वावस्यम् ;

वस्यमानः, वास्यमानः, विवसिष्यमाणः, वावस्यमानः ;

ईषद्वसः-दुर्वसः-सुवसः ; — — —

वासः, आवासः, [5]कृत्तिवासाः, वासः, विवसिषः, वावसः ;

वसितुम्, वासयितुम्, विवसिषितुम्, वावसितुम् ;

वस्तिः, [6]वसा, वासना, विवसिषा, वावसा ;

वसनम्, वासनम्, विवसिषणम्, वावसनम् ;

वसित्वा, वासयित्वा, विवसिषित्वा, वावसित्वा ;

प्रवस्य, प्रवास्य, प्रविवसिष्य, प्रवावस्य ;

वासम् २, } वासम् २ } विवसिषम् २ } वावसम् २ ; }
वसित्वा २, } वासयित्वा २ } विवसिषित्वा २ } वावसित्वा २ ; }

---

1. चर्म वस्ते इति **चर्मवः** इति क्विप्प्रत्यये रूपमेवम्। 'अत्वसन्तस्य चाधातोः' (6-4-14) इत्यत्र **काशिकायां** प्रत्युदाहरणत्वेन प्रदर्शितम्।
2. पचाद्यजन्तात् स्त्रियां टाप्। **वसा**=शरीरान्तर्गतस्नेहद्रव्यम्।
3. वस्ते आच्छादयति इत्यर्थे 'अनुदात्तेतश्च—' (3-2-149) इति युचि रूपमेवम्।
4. 'तृन्' (3-2-135) इति तच्छीलादिषु कर्तृषु तृन्प्रत्यये रूपम्। '**वसिता** वस्त्रमित्येवं साधुकारिणि कर्तरि ॥' इति 'तृन्' सूत्रे **प्रक्रियासर्वस्व**श्लोकः।
5. औणादिकेऽसुन्प्रत्यये **वास**शब्दः। कृत्तिर्वासोऽस्येति 'अत्वसन्तस्य—' (6-4-14) इति असंबुद्धौ सौ परतः दीर्घो भवति। तेन रूपमेवम्।
6. भिदादिपाठात् (3-3-104) अङ्प्रत्ययः।

A, 'पिशङ्गमौञ्जीयुजमर्जुनच्छविं **वसा**नमेणाजिनमञ्जनद्युति।' शि. व. 1-6

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वसु, [2]वस्नम्, [3]संवत्सरः, [4]वस्त्रम्.[A]

(1578) "वस स्नेहच्छेदापहरणेषु"
(X-चुरादिः-1745. सक. सेट्. उभ.)

'वस्यति स्तम्भने वस्ते छादने वसयेत् वसेत् ॥
निवासे वासयेत् **स्नेह वासयत्युपसेवने** ।' (श्लो. 187-8) इति **देवः** ।
'— .... **उपहरणेषु** इति वा पाठः' इति **धा. का.** (3-41) ।
'— .... **अवहरणेषु**' इति **कातन्त्रशाकटायनहेमचन्द्रादयः** ।
'— .... **अवहननेषु** इति पाठान्तरम्' इति **क्षीरतरङ्गिण्याम्** ।
वासकः-सिका, विवासयिषकः-षिका, वासयिता-त्री, विवासयिषिता-त्री; वासयन्-न्ती, विवासयिषन्-न्ती; वासयिष्यन्-न्ती-ती, विवासयिषिष्यन्-न्ती-ती; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**चाटयति**वत् (488) ऊह्यानि । भिदादि-(3-3-104) पाठात् अङि-वसा इति रूपमिति विशेषः ।

(1579) "वस निवासे" (X-चुरादिः-1942. अक. सेट्. उभ.)

कथादिः, अदन्तश्च ।

'वस्यति स्तम्भने, वस्ते छादने **वसयेत्** वसेत् ॥
निवासे वासयेत्, स्नेहे वासयत्युपसेवने ।' (श्लो. 187-8) इति **देवः** ।
क्षीरस्वामिचन्द्रजैनकातन्त्रकाशकृत्स्नादयः धातुममुं नाभ्युपगच्छन्ति । अपि तु 'वस स्नेहनच्छेदावहरणेषु' इति पठित्वा अवहरणे=वर्तने इति

---

1. '**शृस्वृस्निहित्रप्यसिवसि—**' (द. उ. 1-95) इति उप्रत्यये रूपमेवम् । वस्ते भाग्यवतो जनानिति **वसु**=धनम् ।
2. औणादिके [द. उ. 5-39] नप्रत्यये रूपम् । वस्तेऽनेनेति **वस्नम्**=वासः ।
3. संपूर्वात् **वस**धातोः औणादिकः [द. उ. 8-52] सरन्प्रत्ययः । **संवत्सरः**=क्षण-लवमुहूर्ताहोरात्रपक्षमासायनानि च इत्यर्थः । एवं **परिवत्सरः, विवत्सरः, इद्वत्सरः, इडावत्सरः, उद्वत्सरः** इत्यादिषु बोध्यम् । वस्त्रेण समाच्छादयति इत्यर्थे संवस्त्रयन् इत्यत्र 'मुण्डमिश्र—' (3-1-21) इत्यादिना णिच् । 'वस्त्रात्स-माच्छादने' इति **काशिकावृत्तिः** ।
4. औणादिके [द. उ. 8-79] ष्ट्रन्प्रत्यये **वस्त्र**मिति रूपम् । वस्ते शरीरमिति वस्त्रम् ।

A. 'वैतानवेदिजनितं पवमानबन्धुं **वस्त्रेण** वद्धुमविनीत कथं यतेथाः ॥' चम्पूरामायणे 5-48

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

काशकृत्स्नः। **कातन्त्रास्तु** '—छेदावहननेषु' इति।
वसकः-सिका, विवसयिषकः-षिका; वसयिता-त्री, विवसयिषिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कलयति**वत् (176) ज्ञेयानि।
क्तप्रत्यये निवसितम्[A] इति।

(1580) "**वसु स्तम्भे**" (IV-दिवादिः-1214. अक. सेट्. पर.) [अ]

'**वस्यति स्तम्भने** वस्ते छादने वसयेद् वसेत्॥' (श्लो. 187) इति **देवः**।

वासकः-सिका, वासकः-सिका, विवसिषकः-षिका, वावसकः-सिका;
वसिता-त्री, वासयिता-त्री, विवसिषिता-त्री, वावसिता-त्री;
वस्यन्-न्ती, वासयन्-न्ती, विवसिषन्-न्ती; —
वसिष्यन्-न्ती-ती, वासयिष्यन्-न्ती-ती, विवसिषिष्यन्-न्ती-ती; —
— वासयमानः, वासयिष्यमाणः, — वावस्यमानः, वावसिष्यमाणः;
इत्यादिकानि रूपाणि सर्वाण्यपि प्रातिस्विकरूपाणि विना भौवादिक**ग्रसति**वत्
(440) ऊह्यानि।

(1581) "**वस्क गत्यर्थः**" (I-भ्वादिः-101. सक. सेट्. आत्म.)

वस्ककः-स्किका, वस्ककः-स्किका, विवस्किषकः-षिका, वावस्ककः-स्किका;
वस्किता-त्री, वस्कयिता-त्री, विवस्किषिता-त्री, वावस्किता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**गलभति**वत् (389) ज्ञेयानि।
क्विपि-वक्-वग्-वस्कौ-वस्कः; इति विशेषः।

(1581-A) "**वस्त अर्दने**" (X-चुरादिः-1683. सक. सेट्. आत्म.)

मैत्रेय-क्षीरस्वामि-माधव-दीक्षिताः 'बस्त' इत्येव पठन्ति। '**अर्दने**
प्रेरणे' इति **काशकृत्स्नः**। **केचित्** 'वस्त' इति पठन्ति। **धातुकाव्यव्या-
ख्याने** (3-34) **काशकृत्स्नीये**ऽपि च **वस्त** इति पाठ आदृतः।

A. '......**सदोनिवसितं** हरिं ययुरतूत्थिताङ्गाः क्रुधा।' धा. का. 3-64

[अ] अयं दन्त्योष्ठ्यादिः इति **आत्रेयदेवपुरुषकारकारादयः**। **केचित्** बकारादिं पठन्ति। 'घसिस्तु सान्तेषु **वसिः** प्रसारिणी॥' (व्याघ्रभूतिकारिका 7-2-10) इत्यत्र बशादिरेव (बकारादिः) **बसिः** इति **काशिकायामुपात्त** इति **धातुवृत्तिः**। परं तु साम्प्रतं **वृत्तौ** '**वसिः**' इति दन्त्योष्ठ्यादिपाठ एवोपलभ्यते। **बस्तशब्दस्तु** बशादित्व एव उपपन्नो भवतीत्यवधेयम्।

153

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वस्तकः-स्तिका, वस्तकः-स्तिका, विवस्तिषकः-षिका, वावस्तकः-स्तिका ;
वस्तिता-त्री, वस्तयिता-त्री, विवस्तिषिता-त्री, वावस्तिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**गर्जयति**वत् (378) बोध्यानि ।

(1582) " वह प्रापणे "

(I-भ्वादिः-1004. द्विकर्म. अनि. उभ.) **यजादिः** ।

' **प्रापणे**=धारणे ' इति **काशकृत्स्नः** ।

वाहकः-हिका, वाहकः-हिका, [1]विवक्षकः-क्षिका, वावहकः-हिका ;
[2]वोढा-ढ्री, [निर्वहिता], वाहयिता-त्री, विवक्षिता-त्री, वावहिता-त्री ;
परिवहन्-उद्वहन्[A]-न्ती, प्रणिवहन्, प्रवहन्-न्ती, [3]व्यतिवहन्-न्ती, [4]वाहयन् भारं देवदत्तेन, वाहयन् यवान् बलीवर्दान्, विवक्षन्-न्ती ; —
वक्ष्यन्-न्ती-ती, वाहयिष्यन्-न्ती-ती, विवक्षिष्यन्-न्ती-ती ; —
वहमानः[B], वाहयमानः, विवक्षमाणः, वावह्यमानः ;
वक्ष्यमाणः, वाहयिष्यमाणः, विवक्षिष्यमाणः, वावहिष्यमाणः ;

---

1. धातोरनिट्त्वात् सन्नन्ते, ' हो ढः ' (8-2-31) इति धातुहकारस्य ढत्वे, ' षढोः कः सि ' (8-2-41) इति ककारे ' आदेशप्रत्यययोः ' (8-3-59) इति षत्वे च रूपं बोध्यम् ।

2. तृचि, ' सहिवहोरोद् अवर्णस्य ' (6-3-112) इत्युपधाकारस्य ओकारे ढत्व-ष्टुत्वढलोपदीर्घेषु रूपमेवम् । एवं तव्यदादिष्वपि ज्ञेयम् । ' आकाशो ह वै नामरूपयो-**र्निर्वहिता**—' (छान्दोग्ये 8-14-1) इत्यत्र तु छान्दसत्वात् न ओकार उपधायाः । प्रत्ययस्येडागमोऽपि छान्दसत्वादेव । स्पष्टमिदमु**पनिषद्भाष्येषु** ।

3 " ' वि ' ' अति ' इत्युपसर्गद्वयपूर्वकात् वहधातोः ' कर्तरि कर्मव्यतिहारे ' (1-3-14) इत्यात्मनेपदे प्राप्ते ' न गतिहिंसार्थेभ्यः ' (1-3-15) इति निषेधे **व्यतिवहन्** इति रूपं सिद्ध्यति । **आचार्यचरणैः** ' **वहेर्न** निषेध इति **केचित्** ' इत्युक्तत्वात् तन्मते **व्यतिवहते** इत्युदाहृतम् " इति **प्रक्रियाकौमुदी** ।

4. ' **नीवह्योः** प्रतिषेधः ' (वा. 1-4-52) इति अण्यन्तावस्थायां कर्तुः ण्यन्ते कर्मत्वस्य प्रतिषेधात् रूपमेवम् । ' **वहेः** अनियन्तृकर्तृकस्य ' (वा. 1-4-52) इति कर्मत्वस्य प्रतिप्रसवसद्भावात्, अत्र च नियन्तृ=(सारथि) कर्तृकत्वात् कर्मत्वं भवत्येव ।

A. ' लाङ्गूलमुद्धतं धुन्वन् **उद्वहन्** परिघं गुरुम् । ' भ. का. 9.7.

B. ' सहैव चरमाणौ द्वौ **वहमानौ** मितं धनुः ' । अत्र वयोवचने चानश् इति **प्रक्रियासर्वस्वे** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]विश्वोट्, [2]अनड्वान्-अनड्वाहौ-अनड्वाहः ; — —

[3]ऊढम्-[4]कल्पनापोढः-[5]प्रौढः-ऊढवान्, वाहितः, विवक्षितः, वावहितः-तवान् ;

[6]वहः-वहनः-वाहः, [7]कूलमुद्वहः[A], वहः, [8]भारवाही, [9]प्रवाहणः ; [10]ऋषीवहः,

कपीवहः, मुनीवहः, [11]वावहिः, वाहः, विवक्षुः, वावहः ;

प्रणिवोढव्यम्, वाहयितव्यम्, विवक्षितव्यम्, वावहितव्यम् ;

[12]प्रणिवहनीयम्, वाहनीयम्, विवक्षणीयम्, वावहनीयम् ;

---

1. विश्वं वहतीत्यर्थे क्विपि सम्प्रसारणपूर्वरूपगुणढत्वादिकेषु रूपमेवम् ।

2. अनः वहतीत्यर्थे 'अनसि **वहेः**' इति क्विपि, 'डश्चानसः' (द्रष्टव्या द. उः 9-107) इति अनश्शब्दान्त्यवर्णस्य उकारे रूपमेवम् । '**सावनडुहः**' (7-1-82) इति नुम् ।

3. क्तप्रत्यये सम्प्रसारणढत्वष्टुत्वढलोपदीर्घादिषु रूपमेवम् । एवं क्त्वाक्तिन्प्रभृतिष्वपि ।

4. कल्पनायाः अपोढः इति वृत्तौ 'अपे**तापोढ**—' (2-1-38) इति क्तान्तेन पञ्चमीसमासः ।

5. 'प्रा**दूहोढोढ्ये**षैष्येषु' (वा. 6-1-89) इति वृद्धिः । एवं **प्रौढिः** इति क्तिन्नन्तेऽपि ज्ञेयम् ।

6. **वह** इत्यत्र पचाद्यच् । **वहनः** इति तु सारथ्यादिवाचकं पदं '**कृत्यल्युटो** बहुलम्' (3-3-113) इति बहुलग्रहणात् कर्तरि ल्युटि बोध्यम् ।

7. कूलं उद्वहतीति वृत्तौ उत्पूर्वात् **वहेः** 'उदि कूले रुजि**वहोः**' (3-2-31) इति खश् । खित्त्वात् नुम् । शित्त्वात् शपि तस्य '**अतो गुणे**' (6-1-97) इति **पररूपम्** ।

8. भारं वहतीति **भारवाही** । णिनिप्रत्ययान्तमिदम् ।

9. प्रपूर्वकात् ण्यन्तात् **वाहयतेः** नन्द्यादित्वात् कर्तरि ल्युः । '**कृत्यचः**' (8-4-29) इति णत्वम्, इति **केचित्** । वस्तुतस्तु '**णेर्विभाषा**' (8-4-30) इति प्राप्तं पाक्षिकं णत्वं बाधित्वाऽत्र संज्ञात्वात् '**पूर्वपदात् संज्ञायां**—' (8-4-3) इति नित्यं णत्वमिति बोध्यम् ।

10. 'इको **वहे**ऽपीलोः' (6-3-121) इति इगन्तस्य पूर्वपदस्य पीलुवर्जितस्य **वहे** उत्तरपदे दीर्घो भवति ।

11. '**सासहिवावहि**'—(वा. 3-2-171) इति निपातनात् यङन्तात् कर्तरि किः किन् वा प्रत्ययः । द्वित्वादिकं बोध्यम् ।

12. '**नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहति**—' (8-4-17) इत्यादिना उपसर्गस्थात् निमित्तादुत्तरस्य **नेः** णत्वं बोध्यम् ।

A. 'उत्तीर्णो वा कथं भीमाः सरितः **कूलमुद्वहाः** ।' भ. का. 6-96.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वह्यम्[A] [शकटम्], वाह्यम्, वाह्यम्, विवक्ष्यम्, वावह्यम्;
उह्यमानः, वाह्यमानः, विवक्ष्यमाणः, वावह्यमानः;
ईषद्वहः-दुर्वहः-सुवहः; — — —
[2]वहः, वाहः, परिवाहः-परीवाहः, वाहः, विवक्षः, वावहः;
प्रणिवोढुम्[B], वाहयितुम्, विवक्षितुम्, वावहितुम्;
[3]प्रौढिः, वहा, वाहना, विवक्षा, वावहा;
वहनम्, [4]इक्षुवाहणम्, वाहनम्, दाक्षिवाहनम्-इन्द्रवाहनम्, भारवाहणम्[C], विवक्षणम्, वावहनम्;
ऊढ्वा, वाहयित्वा, विवक्षित्वा, वावहित्वा;
प्रवह्य, प्रवाह्य, प्रविवक्ष्य, प्रवावह्य;
[5]पुरुषवाहं (वहति),
वाहम् २ } वाहम् २, } विवक्षम् २, } वावहम् २; }
ऊढ्वा २ } वाहयित्वा २, } विवक्षित्वा २, } वावहित्वा २; }
[6]वह्निः, [7]वधूः.

---

1. वहत्यनेनेति करणार्थे शकटादिके विवक्षिते 'वह्यं करणम्' (3-1-102) इति निपातनात् यत्प्रत्ययान्तता। ण्यतोऽपवादः। करणभिन्नयोः भावकर्मणोरर्थयोः विवक्षितयोस्तु वाह्यम् इति ण्यदन्तत्वमेव।
2. वहन्त्यनेन बलीवर्दादयः भारमिति वहः=स्कन्धः। करणे 'गोचरसञ्चरवह—' (3-3-119) इति घप्रत्ययान्तो निपातितः। हलन्तलक्षणघञोऽपवादः। वाहः अश्वः। अत्र तु वहतीति वाहः इति वा, उह्यतेऽनेनेति वा वृत्तिर्बोध्या।
3. प्रौढिरित्यत्र 'प्रादूहोढोढ्येषैष्येषु' (वा. 6-1-89) इति वृद्धिः। इयं च क्तिन्नन्त एव; क्तिजन्ते नेत्याहुः।
4. अत्र 'वाहनम् आहितात्' (8-4-8) इति णत्वम्। वाहने यत् आरोपितं तत् आहितम्; उपरि निपतितेक्षुकं वाहनमित्यर्थः। दाक्षिवाहनम् इन्द्रवाहनम् इत्यादिषु तु आहितार्थकत्वाभावात् न णत्वम्।
5. 'कर्त्रोर्जीवपुरुषयोर्नशिवहोः' (3-4-43) इति कर्तृवाचिनि पुरुषशब्दे उपपदे वहेः णमुल्। पुरुषप्रेष्यो भूत्वा वहतीत्यर्थः।
6. 'वहिश्रि—' (द. उ. 1-21) इति निप्रत्ययः। वहति, उह्यते वा वह्निः=अग्निः।
7. 'वहेर्धश्च' (द. उ. 1-166) इति ऊप्रत्ययः, धात्वन्तस्य धकारादेशश्च। वहति गृहकार्यमिति वधूः=स्नुषा।
A. 'तेन वह्येन हन्तासि त्वमयं पुरुषाशिनम्।' भ. का. 6-52
B. 'वृद्धौ रसां राज्यधुरां प्रवोढुं कथं कनीयानहमुत्सहेय।' भ. का. 3.54
C. 'दूरादपावर्तितभारवाहणाः पथोऽपसस्रुस्त्वरितं चमूचराः॥' शि. व. 12.34

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1583) " **वहि वृद्धौ** " (I-भ्वादि:-633. अक. सेट्. आत्म.) [अ]

वंहक:-हिका, वंहक:-हिका, विवंहिषक:-षिका, वावंहक:-हिका ;
वंहिता-त्री, वंहयिता-त्री, विवंहिषिता-त्री, वावंहिता-त्री ;
वंहन्-न्ती, वंहयन्-न्ती, विवंहिषन्-न्ती ; —

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कुण्ठति**वत् (149) ज्ञेयानि । युचि-वंहनः इति ।

(1584) " **वा गतिगन्धनयोः** " (II-अदादि:-1050. सक. अनि. पर.)

'**गतिगन्धनयोर्वाति** वायतीति तु शोषणे ।
वयते वयतीत्येवं तन्तुसन्तान इष्यते ॥' (श्लो. 10) इति **देवः** ।

" ....**हेमचन्द्रस्तु** '**वा तण्**' इति पठित्वा '**सुखसेवनयोरित्येके**' इति चोक्त्वा '**वेत्येके**' इत्यप्याह " इति **पुरुषकार**वचनमत्रानुसन्धेयम् । 'अर्दनं हिंसनं च गन्धनम् इति **लीलाशुकः**' इति **धातुकाव्ये** (2-49) । '**गन्धनं**—सौरभ्यकरणम्' इति **सहस्रनामभाष्ये** । '—गमनहिंसयोः' इति **वोपदेवः** । '—**गतिगन्धनयोः**—चलने दुर्गन्धे च' इति **काशकृत्स्नः** ।

वायक:-यिका, [1]वाजक:-जिका, वापक:-पिका, विवासक:-सिका, वावायक:-यिका ;
वाता-त्री, वापयिता-त्री, वाजयिता-त्री, विवासिता-त्री, वावायिता-त्री ;
[A]वान्-न्ती, [2]वापयन्-वाजयन्-न्ती, विवासन्-न्ती ; —
वास्यन्-न्ती-ती, वापयिष्यन्-वाजयिष्यन्-न्ती-ती, विवासिष्यन्-न्ती-ती ; —
[3]व्यतिवानः, वापयमानः, वाजयमानः, — वावायमानः ;
—वापयिष्यमाणः-वाजयिष्यमाणः, — वावायिष्यमाणः ;

---

1. ण्यन्तात् ण्वुलि '**वो** विधूनने जुक्' (7-3-38) इति विधूननेऽर्थे कम्पनार्थे णौ परतः जुगागमो भवति । विधूननभिन्नार्थे तु आदन्तलक्षणे पुगागमे **आवापकः** इत्यादीनि रूपाणि । ण्यन्ते सर्वत्र रूपद्वयमेवमूह्यम् ।
2. '**निगरणचलनार्थेभ्यश्च**' (1-3-87) इति कर्त्रभिप्रायक्रियाफलविवक्षायां ण्यन्ते परस्मैपदमेव भवति ।
3. 'कर्तरि कर्मव्यतिहारे' (1-3-14) इति तङ् ।

A. 'आघ्रायि **वान्** गन्धवहः सुगन्धस्तेनारविन्दव्यतिषङ्गवांश्च ॥' भ. का. 2-10

[अ] **सिद्धान्तकौमुद्यां [बालमनोरमायाम्]** एव उद्धृतोऽयं धातुः । **अन्ये सर्वे** '**वहि**' इत्येव पठन्ति । **धातुकाव्यव्याख्यायाम**पि (1-89) एवमेव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वातम्-तः, [1]निर्वाणः [अग्निः, भिक्षुर्वा], निर्वातो [वातः], वापितः, वाजितः, विवासितः, वावायितः-तवान्;

वातः, [2]वानः, वापः, वाजः, वातूलः,[A] विवासुः, वावायः;

[3]प्रणिवातव्यम्, वापयितव्यम्-वाजयितव्यम्, विवासितव्यम्, वावायितव्यम्;

वानीयम्, वापनीयम्-वाजनीयम्, विवासनीयम्, वावायनीयम्;

वेयम्, वाप्यम्-वाज्यम्, विवास्यम्, वावास्यम्;

[4]ईषद्वानः-दुर्वानः-सुवानः; — —

वायमानः, वाप्यमानः-वाज्यमानः, विवास्यमानः, वावाय्यमानः;

वायः, वापः-वाजः, विवासः, वावायः;

वातुम्, वापयितुम्-वाजयितुम्, विवासितुम्, वावायितुम्;

वातिः, वापना-वाजना, विवासा, वावाया;

वानम्, वापनम्-वाजनम्, विवासनम्, वावायनम्;

वात्वा, वापयित्वा-वाजयित्वा, विवासित्वा, वावायित्वा;

प्रवाय, प्रवाप्य-प्रवाज्य, प्रविवास्य, प्रवावाय्य;

वायम् २, } वापम् २-वाजम् २, } विवासम् २, } वावायम् २; }
वात्वा २, } वापयित्वा २-वाजयित्वा २, } विवासित्वा २, } वावायित्वा २; }

[5]वातिः, वातिकम्, वातकी, वात्या[B], [6]वायुः, [7]वातः, [8]वामः.

---

1. निष्ठायाम् '**निर्वाणोऽवाते**' (8-2-50) इति अवाताधिकरणत्वे निष्ठातकारस्य नकारादेशे, णत्वे च रूपमेवम्। वातार्थे तु **निर्वातो**=वायुः इति।
2. 'चलनशब्दार्थात्—' (3-2-148) इति युच्प्रत्ययः।
3. 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवाति—' (8-4-17) इति उपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्य णकारादेशो भवति।
4. ईषदाद्युपपदेषु खलपवादे आदन्तलक्षणे युच्प्रत्यये रूपमेवम्।
5. '**वातेर्नित्**' (द. उ. 1-78) इत्यतिप्रत्यये नित्संज्ञके च रूपमेवम्। वातीति **वातिः**=गन्धमिश्रपवनः।
6. '**कृवापा**—' (द. उ. 1-86) इत्यादिना उण्प्रत्ययः। वाति वायति वा द्रव्याणि इति **वायुः**।
7. औणादिके (द. उ. 6-7) तन्प्रत्यये रूपमेवम्।
8. औणादिके (द. उ. 7-26) मन्प्रत्यये **वामः** इति रूपम्।

A. '**वातूल** इव तूलानां वानराणां रणाजिरे।' च. रा. 6-72

B. 'मरुत्किमद्यापि न तासु शिक्षते वितत्य **वात्या**भयचक्रचङ्क्रमान्॥' नैषधे 1-73

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1585) " वा गतिसुखसेवनयोः " (X-चुरादिः-1885. सक. सेट्. उभ.)

'वात सुखसेवनयोः' इति धातुवृत्तिबालमनोरमादिषु दृश्यते। 'सुखाप्ति-गतिसेवासु' इति वोपदेवः। 'वात गतिसुखसेचनयोः — गतौ सुख-समाप्तौ' इति काशकृत्स्नः।

वापकः - पिका, विवापयिषकः - षिका, वापयिता - त्री, विवापयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककालयतिवत् (175) ज्ञेयानि। आदन्तत्वात् ण्यन्ते सर्वत्रास्य युगागमघटितरूपाणीति ज्ञेयम्।

(1586) " वाक्षि काङ्क्षायाम् " (I-भ्वादिः - 668. सक. सेट्. पर.)

वाङ्क्षकः - वाङ्क्षिका, वाङ्क्षकः - वाङ्क्षिका; विवाङ्क्षिषकः - षिका, वावाङ्क्षकः - वावाङ्क्षिका; वाङ्क्षिता-त्री, वाङ्क्षयिता - त्री, विवाङ्क्षिषिता - त्री, वावाङ्क्षिता - त्री; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककाङ्क्षतिवत् (184) ऊह्यानि।

(1587) " वाछि इच्छायाम् " (I-भ्वादिः-208. सक. सेट्. पर.)
'— कामे' इति वोपदेवः।

वाञ्छकः - ञ्छिका, वाञ्छकः - ञ्छिका, विवाञ्छिषकः - षिका, वावाञ्छकः - ञ्छिका; वाञ्छिता - त्री, वाञ्छयिता-त्री, विवाञ्छिषिता-त्री, वावाञ्छिता - त्री; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककाञ्छतिवत् (184) ज्ञेयानि। क्तप्रत्यये [A]वाञ्छितम्-तः, क्विपि-नाशवान्-नाशवांशौ-नाशवांशः[B], इति च विशेषः।

"कथादौ क्षीरस्वामी—'वा गतिसुखसेवनयोः'। वानेत्येके। वापयति अववातत्" इति। हेमचन्द्रस्तु 'वातण्'इति पठित्वा 'सुखसे-वनयोरित्येके' इति चोक्त्वा 'वा इत्येके' इत्यप्याह; णित्त्वं चुरादित्वचिह्नम्॥" इति पुरुषकारवचनमत्रानुसन्धेयम्।

(1588) " वाडृ आप्लाव्ये " (I-भ्वादिः-286. सक. सेट्. आत्म.)

'आप्लाव्यम्=आप्लवनम्। सि. कौमुदीबालमनोरमादिषु 'वाडृ—'

A. 'यत्र स्थिते वाञ्छितदे हरिद्रुमे तदाञ्छितहृीच्छनमास्त नन्दनम्॥' धा. का. 1-23

B. 'सुहृन्मनोजूर्तिकृतस्तथाऽपि तस्मान्मदीयान्वयनाशवांशः।' वा. वि. 3-28.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्येव पठ्यते, बशादिः इति च। **धातुवृत्तितरङ्गिण्यादिषु** 'वाडृ—' इति दृश्यते। 'व्रलेरित्येके' इत्यपि **क्षीरस्वामी** ।

वाडकः - डिका, वाडकः - डिका, विवाडिषकः - षिका, वावाडकः - डिका ; वाडिता - त्री, वाडयिता - त्री, विवाडिषिता - त्री, वावाडिता - त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**गाधति**वत् (394) ज्ञेयानि। [1]वाडः - वालः, इति ।

(1589) "वात सुखसेवनयोः"

(X-चुरादिः - 1883. सक. सेट्. उभ.) **कथादिः**, अदन्तश्च ।

'—**गतिसुखसेवनयोः**' इति **क्षीरस्वामी**। '—**गतिसुखसेवनेषु**' इत्येके।
'— गतिसुखसेचनयोः' इति **काशकृत्स्नः** ।

[2]वातकः - तिका, विवातयिषकः-षिका ; वातयिता - त्री, विवातयिषिता - त्री ; इत्यादीनि रूपाणि सर्वाणि चौरादिक**कालयति**वत् (185) ऊह्यानि ।

(1590) "वावृतु वरणे" (IV-दिवादिः-1160. सक. सेट्. आत्म.)

वरणम् = आवरणम् ।

'वृतु वरणे' इति **धातुवृत्ति-धातुकाव्य-सि. कौमुदी-काशकृत्स्नादयः**। **सि. कौमुद्यां** 'वृतु—' इति पठित्वा पक्षान्तरे-वावृत्यते इति। 'वृतु—' इति **धा. का. व्याख्या** (2.60) पाठः। किञ्च तत्र "**केचित्** पूर्वत्र पठितं वाग्रहणमस्यादिं कृत्वा '**वावृतु**—' इत्याहुः' इत्युपात्तम्। कर्मणि क्तप्रत्यये पक्षद्वयेऽपि प्रयोगा दृश्यन्ते । **क्षीरस्वामी** स्वतन्त्रेण 'वावृतु' इति पठित्वा "**अन्ये** भ्वादेरेव वरणे दिवादित्वं वा मन्यन्ते। तेन वरणे द्युतादिकार्यं न भवति। वर्तिष्यते, विवर्तिषते" इति उक्तम्। किं च भ्वादौ 'वृतु वरणे' (दिवादौ) इत्येके' इति तत्र दृश्यते ।

कातन्त्रीयाः 'तप ऐश्वर्ये, वावृतु वर्तने' इति पठन्ति। ये वा-शब्दं 'तप ऐश्वर्ये वा' इत्येवं संबध्नन्ति, **काशकृत्स्न**पाठानुरोधेन तेषां 'वा' पदं समुच्चायकं भवितुमर्हति, न विकल्पार्थकम्' इति **काशकृत्स्ने टिप्पण्या**-मुक्तम् ।

---

1. पचाद्यचि रूपमेवम्। वाडः=अश्वः। डलयोरेकत्वस्मरणमत्र विवक्षितम्।
2. '—सुखसेवनयोः' इति **धातुप्रदीपधातुवृत्तिबालमनोरमादिषु** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'ततो **वावृत्यमाना**ऽसौ रामशालां न्यविक्षत।' इति **भट्टि** (4-28) प्रयोगश्चात्र अनुकूलः। '—**वर्तने च**' इति **हेमचन्द्रः**। '—**संभक्तौ वरणे**' इति **वोपदेवः**।

वावर्तकः-र्तिका, वावर्तकः-र्तिका, विवावर्तिषकः-षिका, वरीवावर्तकः-र्तिका;
वावर्तिता-त्री, वावर्तयिता-त्री, विवावर्तिषिता-त्री, वरीवावर्तिता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि दैवादिक**गृध्यति**वत् (424) ज्ञेयानि। शानचि [1]वावृत्यमानः, क्यपि-[2]वावृत्यम्, वावर्तितम् इमानि रूपाणि अस्य धातोः विशेषः।

(1592) "वाश्टृ शब्दे" (IV-दिवादिः-1163. अक. सेट्. आत्म.) [अ]

'वास्ट—' इति **काशकृत्स्नः**। 'वाश्ट—' इति **कातन्त्राः, अन्ये च वैयाकरणाः**।

वाशकः-शिका, वाशकः-शिका, विवाशिषकः-षिका, वावाशकः-शिका;
वाशिता-त्री, वाशयिता-त्री, विवाशिषिता-त्री, वावाशिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**काशति**वत् (186) ऊह्यानि।
शानचि-[3]उद्वाश्यमानः[A], [4]वाशनः[B], वाशा, वाशिका, वाशिरा, [5]वाशुरा, [6]वाशरः, इमानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

---

1. '**रीगृदुपधस्य च**' (7-4-80) इति यङन्ते सर्वत्र अभ्यासे रीगागमः।
2. '**ऋदुपधात्**—' (3-1-110) इत्यादिना क्यप्प्रत्यये रूपमेवम्।
3. उत्पूर्वकात् धातोः, लटः शानचि कर्तरि शपि, तस्य श्यनि च रूपमेवम्।
4. नन्द्यादेः (3-1-134) आकृतिगणत्वात् ण्यन्तात् ल्युः प्रत्ययः।
5. 'मन्दि**वाशि**—' (द. उ. 8-21) इत्यादिना उरच्प्रत्यये रूपमेवम्। वाश्यतेऽत्यर्थमिति **वाशुरः**—गर्दभः। 'मन्दि**वासि**—' इति **नारायणश्वेतवनवासिनौ**। अत्र **धातुवृत्तौ** 'मन्दि**वाशि**—' इत्यादिना किरच्प्रत्यये **वाशिरः** इति दृश्यते। **वृत्त्यादावपि वाशुरा** इत्येवोदाह्रियते। **तरङ्गिण्या**मपि एवमेव।
6. 'अर्त्तिकमिभ्रमिदेविवा**शि**—' (द. उ. 8-62) इत्यादिना अरन्प्रत्यये रूपमेवम्। **वाशरः**=कोकिलः। अत्राह **मनोरमाकारः**— '**केचित्तु** सूत्रे **वाशिभ्य** इति तालव्यं पठित्वा '**वाशृ** शब्दे' वाश्यते इति **वाशरः**=कोकिलः इत्याहुः' इति।

[अ] '...**वाशति**...' (ऋक् 5-54-2) इति प्रयोगदर्शनात् भौवादिकोऽपि अयं धातुः इति ऊह्यते। 'चीचीकूचीति **वाशन्ति** सारिकाः—' (महाभारते 16-38) इति च।

A. '**उद्वाश्यमानः** पितरं सरामं लुठयन् सशोको भुवि रोरुदावान्॥' भ. का. 3-32
B. 'मृङ्गालीकोकिलकुङ्भि**र्वाशनैः** पश्य लक्ष्मण।' भ. का. 6-74

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1593) " **वास उपसेवायाम्** "

(X-चुरादिः-1885. सक. सेट्. उभ.) **अदन्तः** ।

'— **गतिसुखसेवनयोः**' इति **जैन-कातन्त्रौ** ।

'अयं **कथादा**वपि इति **दैवपुरुषकारयोः**' इति **माधवः** ।

वासकः-सिका, विवासयिषकः-षिका ; वासयिता-त्री, विवासयिषिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**कालय**तिवत् (185) ऊह्यानि ।

(1593-A) 'बर्ह चर्ह —' इत्यत्र दण्डके '**वाहृ प्रयत्ने**' इति भ्वादौ पठित्वा, 'वाहते वाहति, वाहकः, वाहमानः, वोढा। वाट्, वाहः, वाहनम्, वाहनीयम्, वाहिनी पञ्चनद्याम् सेनायाम्'' इति **काशकृत्स्नधातुपाठे** दृश्यते ।

(1594) " **विचिर् पृथग्भावे** "

(VII-रुधादिः-1442. सक. अनि. उभ.)

अयं पाठः **सर्वसम्मतः** । **धातुवृत्तौ** तु '**विजिर्**—' इति दृश्यते ।
वेचकः-चिका, वेचकः-चिका, विविक्षकः-क्षिका, वेविचकः-चिका ;
वेक्ता-त्री, वेचयिता-त्री, विविक्षिता-त्री, वेविचिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि प्रातिस्विकरूपाणि विना रौधादिक**रिच्**तिवत् (1404) ज्ञेयानि । क्तप्रत्यये-विक्तम्[A]-क्तः, घञि-[1]विवेकः, घिनुणि-[2]विवेकी,[3] विविचिः इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1595) " **विछ गतौ** " (VI-तुदादिः-1423. सक. सेट्. पर.)

'णौ विच्छयति भाषार्थे, **गतौ विच्छायतीति शे** ॥
विच्छेरायेे शतुर्वा नुं शे स्यादिति तुदादिता ।'
(श्लो. 56-57) इति **देवः** ।

---

1. निष्ठायामनिट्त्वात् 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वे रूपमेवम् ।
2. '**संपृचानुरुध...विविच**—' (3-2-142) इति तच्छीलादिषु कर्तृषु घिनुण्प्रत्यये कुत्वे च रूपमेवम् । **विवेकी**=युक्तायुक्तविशेषज्ञः ।
3. 'क्विकिनावुत्सर्गश्छन्दसि **सदादिभ्यो दर्शनात्**' (वा. 3-2-171) इति वचनेन (सदादिभ्योऽपि सूत्रानुपात्तेभ्यः) भाषायां क्विप्रत्यये, एत्वाभ्यासलोपयोश्च रूपमेवम् ।

A, 'रम्या इति प्राप्तवतीः पताका रागं **विविक्ता** इति वर्धयन्तीः ।' शि. व. 3-53

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तरङ्गिण्याम् — "विच्छेस्तुदादिपाठः-सार्वधातुकेऽप्यायानित्यत्वे लिङ्गम्.... तथा च शपि नित्यमिति **भाष्यम्** (3-1-31)। **आर्याः** शे विकल्पम् [नुम्], **द्रमिडास्तु** पाठबलाद् आयव्यवायेऽपि कार्यमाहुः—विच्छायन्ती-विच्छायती" इत्युपात्तं वचनमिहात्रानुसन्धेयम् । **भाष्यकारो** यदभिप्रैति तस्यानुकूलः **सुधाकरो**ऽपि । तथा च "तुदादिपाठात् नुम्विकल्पः संभवतीति तुदादिपाठस्येदमेव फलं न्याय्यम् । एवं च नुम्विकल्पात् विच्छन्ती विच्छायतीत्यौत्सर्गिकः शबेवेति नित्यो नुम्" इति **पुरुषकारः** ।

[1]विच्छायकः-यिका, विच्छकः-च्छिका, [2]विच्छायकः-यिका, विच्छकः-च्छिका, विविच्छायिषकः-षिका, विविच्छिषकः-षिका, वेविच्छकः[3]-च्छिका ;

विच्छायिता-त्री, विच्छिता-त्री, विच्छाययिता-त्री विच्छयिता-त्री, विविच्छायिषिता-त्री, विविच्छिषिता-त्री, वेविच्छिता-त्री ;

[4]विच्छायन्-न्ती-ती, विच्छाययन्, विच्छयन्-न्ती-ती, विविच्छायिषन्-विविच्छिषन्-न्ती-ती ; —

विच्छायिष्यन्-विच्छिष्यन्-न्ती-ती, विच्छाययिष्यन्-विच्छयिष्यन्-न्ती-ती, विविच्छायिषिष्यन्-विविच्छिषिष्यन्-न्ती-ती ; —

— विच्छाययमानः-विच्छायमानः, — विविच्छायिषमाणः, विविच्छिषमाणः, वेविच्छ्यमानः ;

— विच्छाययिष्यमाणः, विच्छायिष्यमाणः, विविच्छायिषिष्यमाणः, विविच्छिषिष्यमाणः, वेविच्छिष्यमाणः ;

---

1. 'गुपूधूपविच्छि—' (3-1-28) इति आयप्रत्ययः। 'आयादय आर्धधातुके वा' (3-1-31) इति आर्धधातुकविवक्षायाम् आयप्रत्ययो विकल्पेन भवति। तेन आयप्रत्ययाभावपक्षे **विच्छकः** इत्यादि। तेन आर्धधातुके सर्वत्र रूपद्वयं (शुद्धे) ज्ञेयम्। 'छे च' (6-1-73) इति तुक्। तस्य चर्त्वेन चकारः। अयं तुक् अन्तरङ्गः। तेन सर्वत्र प्रथममस्य श्रवणं भवति। अतश्च शुद्धात् णिजन्तात् च आयप्रत्ययाभावपक्षे उपधावृद्ध्यादिकं न भवतीति बोध्यम्।
2. ण्यन्तेऽपि आर्धधातुकविषये सर्वत्र आयप्रत्ययविकल्पः। तेन रूपद्वयं बोध्यम्।
3. आर्धधातुकविवक्षायां आयप्रत्ययस्य वैकल्पिकत्वात् आयप्रत्ययान्तस्य अनेकाच्त्वात् यङन्ते आयप्रत्ययो न भवति। तेन एकमेव रूपम्।
4. शतुः सार्वधातुकत्वेन नित्यमायप्रत्ययः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]गोविट्-गोविच्छौ-गोविच्छः ; [2]विच्छाः-विच्छायौ-विच्छायः ;

विच्छायितम्-तः; विच्छितम्-तः, विच्छाययितम्-तः, विच्छायितः, विविच्छायिषितः-विविच्छिषितः, वेविच्छितः-तवान् ;

विच्छायः-विच्छः, [3]विश्नः ; विच्छायः-विच्छः, विविच्छायिषुः-विविच्छिषुः, वेविच्छः ;

विच्छायितव्यम्-विच्छितव्यम् , विच्छाययितव्यम्-विच्छायितव्यम् , विविच्छायिषितव्यम्-विविच्छिषितव्यम् , वेविच्छितव्यम् ;

विच्छायनीयम्-विच्छनीयम् , विच्छायनीयम्-विच्छनीयम् , विविच्छायिषणीयम्--विविच्छिषणीयम् , वेविच्छनीयम् ;

विच्छाय्यम्-विच्छय्यम् , विच्छाय्यम्-विच्छय्यम् ; विविच्छायिष्यम्-विविच्छिष्यम् , वेविच्छय्यम् ;

ईषद्विच्छायः-दुर्विच्छायः-सुविच्छायः, ईषद्विच्छः-दुर्विच्छः-सुविच्छः; —

विच्छाय्यमानः-विच्छय्यमानः, विच्छाय्यमानः-विच्छय्यमानः, विविच्छायिष्यमाणः--विविच्छिष्यमाणः, वेविच्छय्यमानः ;

विच्छायः-विच्छः, विच्छायः-विच्छः, विविच्छायिषः-विविच्छिषः, वेविच्छः ;

विच्छायितुम्-विच्छितुम् , विच्छाययितुम्-विच्छयितुम् , विविच्छायिषितुम्-विविच्छिषितुम् , वेविच्छितुम् ;

विच्छाया-विच्छा, विच्छायना-विच्छना, विविच्छायिषा-विविच्छिषा, वेविच्छा ;

विच्छायनम्-विच्छनम् , विच्छायनम्-विच्छनम् , विविच्छायिषणम्-विविच्छिषणम्, वेविच्छनम् ;

विच्छायित्वा-विच्छित्वा, विच्छाययित्वा-विच्छयित्वा, विविच्छायिषित्वा-विविच्छिषित्वा-वेविच्छित्वा ;

प्रविच्छाय-प्रविच्छय्य, प्रविच्छाय्य-प्रविच्छय्य, प्रविविच्छायिष्य-प्रविविच्छिष्य, प्रवेविच्छय्य ;

---

1. आयप्रत्यया भावपक्षे क्विपि 'च्छ्वोः शूडनुनासिके च' (6-4-19) इति छकारस्य शकारे, षत्वे ष्टुत्वे च रूपमेवम् ।
2. आयप्रत्ययान्तात् क्विपि वलि लोपे रूपमेवम् ।
3. 'यजयाचयतविच्छ—' (3-3-90) इति भावे नङ्प्रत्ययः । 'नेड् वशि कृति' (7-2-8) इतीण्निषेधः । प्रत्ययस्य ङित्त्वेन न गुणः । 'च्छ्वोः—' (6.4.19) इति सतुक्कस्य छस्य शकारः । 'शात्' (8-4-44) इति निषेधात् न श्चुत्वम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विच्छायम् २-विच्छम् २, विच्छायित्वा २-विच्छित्वा२, } विच्छायम् २-विच्छम् २, विच्छाययित्वा २-विच्छयित्वा २, }

विविच्छायिषम् २-विविच्छिषम् २, विविच्छायिषित्वा २-विविच्छिषित्वा २, } वेविच्छम् २ ; वेविच्छित्वा २. }

(1596) "विच्छ भाषार्थः" (X-चुरादिः-1774. अक. सेट्. उभ.)

आस्वदीयः । '—भासार्थः' इति क्षीरस्वामिशाकटायनहेमचन्द्रादयः । 'णौ विच्छयति भाषार्थे गतौ विच्छायतीति शे ॥' (श्लो. 56) इति देवः । विच्छकः-च्छिका, विविच्छयिषकः-षिका ; विच्छयिता-त्री, विविच्छयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककुण्ठयति(210)वत् उह्यानि । शतरि-[A]विच्छयन् ।

(1597) "विजिर् पृथग्भावे" (III-जुहोत्यादिः-1094. सक. अनि. उभ.)

'वेवेक्तीति पृथग्भावे विविक्ते च भये पुनः ॥' (श्लो. 61) इति देवः ।
"'विचिर्-' इति सभ्याः" इति क्षीरस्वामी ।
वेजकः-जिका, वेजकः-जिका, विविक्षकः-क्षिका, वेविजकः-जिका ;
वेक्ता-त्री, वेजयिता-त्री, विविक्षिता-त्री, वेविजिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि जौहोत्यादिकणिजिर्(673)धातुवत् बोध्यानि। शतरि-वेविजत्[1] इति । शानचि-सुवेविजानः[B] ।

(1598) "ओ विजी भयचलनयोः"

(VI-तुदादिः-1289. अक. सेट्. आत्म.)

प्रायेणायं उत्पूर्वः । '— उद्वेगे च' इति पा. धा. समीक्षा ।
'वेवेक्तीति पृथग्भावे विविक्ते च भये पुनः ॥'

---

1. शतरि शपः 'जुहोत्यादिभ्यः श्लुः' (2-4-75) इति श्लौ, तस्य 'श्लौ' (6-1-10) इति द्वित्वे 'निजां त्रयाणां गुणः श्लौ' (7-4-75) इत्यभ्यासस्य गुणे 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधे च रूपमेवम् । एवं वेविजानः इत्यत्रापि गुणो ज्ञेयः ।

A. 'तांस्त्वं धूपय विच्छयन् क इव न त्वच्चीवनात् पोथयेत् ॥' धा. का. 3-44.

B. 'प्रणेनिजद्भिर्मतिमर्थतत्त्वं सुवेविजानैर्यदुभिः स विष्णुः । ' धा. का. 2-55.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विनक्ति विजते .... ।' (श्लो. 61-62) इति **देवः** ।

उद्वेजकः-जिका, उद्वेजकः-जिका, [1]उद्विविजिषकः-षिका, वेविजकः-जिका ;

[2]उद्विजिता-त्री, उद्वेजयिता-त्री, विविजिषिता-त्री, वेविजिता-त्री ;

[A]उद्वेजयन्-न्ती, उद्वेजयिष्यन्-न्ती-ती ; — —

उद्विजमानः, उद्विजिष्यमाणः ; — —

वेविज्यमानः, वेविजिष्यमाणः ; — —

उद्विक्-उद्विग्-विजौ-विजः ; — —

[3]उद्विग्नम्[B]-नः-नवान्, उद्वेजितः, विविजिषितः-वेविजितः-तवान् ;

उद्वेगः, उद्वेगनः, उद्वेगः, विविजिषुः, वेविजः ;

विजितव्यम्, वेजयितव्यम्, विविजिषितव्यम्, वेविजितव्यम् ;

वेजनीयम्, [4]उद्वेजनीयः, वेजनीयम्, विविजिषणीयम्, वेविजनीयम् ;

[5]उद्वेग्यम्, उद्वेज्यम्, विविजिष्यम्, वेविज्यम् ;

विज्यमानः, वेज्यमानः, विविजिष्यमाणः, वेविज्यमानः ;

ईषद्वेजः-दुर्वेजः-सुवेजः ; — — —

[6]उद्वेगः, [7]वेगितम्, उद्वेगः, उद्विविजिषः, उद्वेविजः ;

---

1. 'रलो व्युपधात्—' (1-2-26) इति सन्नन्तात् क्त्वायामपि पाक्षिककित्त्वस्यापवादत्वेन '**विज इट्**' (1-2-2) इति सूत्रस्य प्रवृत्तत्वात् इडादेः प्रत्ययस्य सर्वस्यापि नित्यं ङित्त्वमित्यतोऽत्र एकमेव रूपम्। एवं क्त्वायामपीति बोध्यम्।

2. तृचि, '**विज इट्**' (1-2-2) इति इडादिप्रत्ययस्य ङिद्वद्भावात् गुणो न भवति। एवं तव्यदादिषु च ज्ञेयम्।

3. निष्ठायाम्, ईदित्त्वात् 'श्वीदितो निष्ठायाम्' (7-2-14) इति अनिट्त्वात् इण्निषेधे ओदित्त्वात् निष्ठातकारस्य नकारे चकारस्य कुत्वे च रूपमेवम्।

4. 'उद्विजन्ति अस्मादिति **उद्वेजनीयः** खलः, बाहुलकादपादाने अनीयर्' इति **प्रक्रियासर्वस्वम्**।

5. निष्ठायामनिट्त्वात् 'चजोः —' (7-3-52) इति कुत्वे रूपमेवम्। एवं घ्यण्यपि।

6. 'हलश्च' (3-3-121) इति करणे घञ्।

7. घञन्तात् वेगशब्दात् तारकादित्वात्, इतचि रूपमेवम्।

A. 'कृपन् अजुषत क्रमात् नगरगर्भमुद्वेजयन् ....॥' धा. का. 2. 72.

B. 'तौ मुमुहतुरुद्विग्नौ वसुधायां च पेततुः ॥' भ. का. 14-47.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[A]उद्विजितुम्, उद्वेजयितुम्, उद्विविजिषितुम्, उद्वेविजितुम्;
उद्वेक्तिः, उद्वेजना, विविजिषा, वेविजा;
उद्वेजनम्, उद्वेजनम्, उद्विविजिषणम्, वेविजनम्;
[1]विजित्वा, वेजयित्वा, विविजिषित्वा, वेविजित्वा;
उद्वेज्य, उद्वेज्य, उद्विविजिष्य, उद्वेविज्य;
वेजम् २, वेजित्वा २, } वेजम् २, वेजयित्वा २, } विविजिषम् २, विविजिषित्वा २, } वेविजम् २; वेविजित्वा २. }

(1599) "ओ विजी भयचलनयोः"

(VII-रुधादिः-1460. सक. सेट्. पर.)

'वेवेक्तीति पृथग्भावे विवेक्ति च भये पुनः।
विनक्ति विजते..........................।' (श्लो. 61-62) इति **देवः**।
वेजकः-जिका, वेजकः-जिका, विविजिषकः-षिका, वेविजकः-जिका;
विजिता-त्री, वेजयिता-त्री, विविजिषिता-त्री, वेविजिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि अव्यवहितपूर्वलिखिततौदादिकधातुवत् (1598) ज्ञेयानि। शतरि, अस्य धातोः रुधादित्वात् श्नमि 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपे श्चुत्वे च—उद्विञ्जन्-ती इति। ण्यन्तात् तृचि-[B]उद्वेजयिता-त्री, क्त्वायाम्-[2]विजित्वा इति च विशेषः।

(1600) "विट शब्दे" (I-भ्वादिः-316. अक. सेट्. पर.)

'— **आक्रोशे स्वप्ने**' इति **वोपदेवः**। अत्र '**पिट**' इति **क्षीरस्वामी**।
'अर्थभेदाद् द्विः पाठः' इति चाह।
वेटकः-टिका, वेटकः-टिका, विवेटिषकः-विविटिषकः-षिका, वेविटकः-टिका;

---

1. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधं बाधित्वा '**विज इट्**' (1-2-2) इति नित्यं ङित्त्वम्।
2. क्त्वाप्रत्यये, 'न क्त्वा सेट्' (1-2-18) इत्यकित्त्वेऽपि '**विज इट्**' (1-2-2) इति ङित्त्वान्न गुणः।

A. 'नाऽयमुद्विजितुं कालः स्वामिकार्याद् भवादृशाम्।' भ. का. 7-92.
B. 'अत्यर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव स नन्दकोऽभूत्॥' शि. व. 3-19.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेटिता-त्री, वेटयिता-त्री, विवेटिषिता-विविटिषिता-त्री, वेविटिता-त्री ; इत्यादिकानि सर्वाणि रूपाणि भौवादिकक्रेटतिवत् (190) ऊह्यानि। [1]विटः, [2]विटपः, [3]विडङ्गः इति अस्य धातोः विशेषः ।

(1601) " **विट आक्रोशे** " (I-भ्वादिः-317. अक. सेट्. पर.)

क्षीरतरङ्गिण्याम्, 'विट —' इति पठित्वा 'डान्तोऽयमिति (विड) **नन्दी**' इति दृश्यते। **धातुवृत्तौ** '**बिट** — बशादिः' इति पठितम् ; तत्र **टिप्पण्यां** 'विट विड इति **मैत्रेयः**' इति च दृश्यते। **भट्टोजिदीक्षितो**ऽपि '**बिट** —' इत्येव (बशादिः) पठति। **काशकृत्स्नस्तु**— 'विट शब्दे हास्यशब्दे' इति।

वेटकः-टिका, वेटकः-टिका, विवेटिषकः-विविटिषकः-षिका-वेविटकः-टिका ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकक्रेटतिवत् (190) ज्ञेयानि। **डान्तपक्षे** विडालः[4] इति। विटः प्रसिद्धः।

(1602) " **विथृ याचने** " (I-भ्वादिः-33. सक. सेट्. आत्म.)

" '**विधृ**' इति **कौशिकः**। **क्षीरस्वामिना** त्वयं पक्षो दूषितः।" इति **धातुवृत्तावुक्तम्**। **सायणोक्तः** पाठस्त्वधुना **तरङ्गिण्यां** नोपलभ्यते।

वेथकः-थिका, वेथकः-थिका, विवेथिषकः-विविथिषकः-षिका, वेविथकः-थिका ; वेथिता-त्री, वेथयिता-त्री, विवेथिषिता-विविथिषिता-त्री, वेविथिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिकक्रेटतिवत् (190) ज्ञेयानि। निष्ठायाम्-विथितः-वेथितः इति।

---

1. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्ययः।
2. '**विटप**विष्टप—' (द. उ. 7-12) इति कपन्प्रत्यये निपात्यते इति **धातुवृत्ता**-वुक्तम्। **दशपाद्यां** तु 'विश प्रवेशने' इत्यस्मात् धातुशकारस्य टकारे रूपमिति उक्तम्।
3. 'विड इति **सौत्रो** धातुः' इति **द. उ. वृत्तिः**। तत्पक्षे 'विडादिभ्यः कित्' [द. उ. 3-61] इति अङ्गच्प्रत्ययः किच्च भवति। तेन रूपमेवम्। **विडङ्गः** द्रव्यजातिः।
4. " '**विड** इति **सौत्रो** धातुः ण्यन्तः।। औणादिके कालच्प्रत्यये रूपम् ; वेडयति मूषकानिति **विडालः** मार्जारः।" इति **दशपाद्युणादिवृत्तौ** (8-115) दर्शितम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1602A) "विद ज्ञाने" (II-अदादिः-1064. सक. सेट्. पर.)

'सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे।' (श्लो. 111) इति देवः।

'—मतौ' इति वोपदेवः।

आवेदकः-दिका, वेदकः-दिका, [1]विविदिषकः-षिका, वेविदकः-दिका;
वेदिता-त्री, वेदयिता-त्री, विविदिषिता-त्री, वेविदिता-त्री;
[2]विदन्-ती, [A]विद्वान्-विदुषी, निवेदयन्[B]-न्ती, वेदयः[3], विविदिषन्-न्ती;—
वेदिष्यन्-न्ती-ती, वेदयिष्यन्-न्ती-ती, विविदिषिष्यन्-न्ती-ती; —
[4]संविदानः, वेदयमानः, संविविदिषमाणः, वेविद्यमानः;
संवेदिष्यमाणः, वेदयिष्यमाणः, संविविदिषिष्यमाणः, वेविदिष्यमाणः;
[5]मन्त्रवित्, ब्रह्मवित्, शास्त्रवित्, वेदवित्, [C]अनिर्विदा, लोकवित्-प्रवित्-विदौ-विदः;
[D]विदितम्-तः-तवान्, वेदितः, विविदिषितः, वेविदितः-तवान्;

---

1. सनि, 'रलो व्युपधात्—' (1-2-26) इत्यादिना कित्त्वविकल्पे प्राप्ते 'रुदविद—' (1-2-8) इति नित्यं कित्त्वं भवति। तेन सन्नन्ते सर्वत्र एकमेव रूपम्। क्षीरस्वामी तु 'रुदविद—' (1-2-8) इति सूत्रं कित्त्वविकल्पार्थमिति व्याचकार। भाष्यादिषु नित्यकित्त्वविधायकत्वेनैव प्रकृतसूत्रस्य व्याख्यानात् क्षीरस्वामिमतं चिन्त्यम्।
2. शतरि, 'विदेः शतुर्वसुः' (7-1-36) इति सूत्रात् शतुः वस्वादेशविकल्पः। वस्वादेशपक्षे विद्वान् इति; तदभावपक्षे विदन् इति च रूपम्। नित्यं वसुरित्यादेश इति केषाञ्चिन्मतम्। काशिकादिषु तु वैकल्पिकमिति स्पष्टम्।
3. ण्यन्तात् 'अनुपसर्गाल्लिम्पविन्द—' (3-1-138) इति शप्रत्यये शपि गुणायादेशौ। वेदयतीति वेदयः।
4. 'विदिप्रच्छिस्वरतीनाम्' (वा.1-3-29) इति संपूर्वकात् विदेः आत्मनेपदं भवति।
5. 'सत्सूद्विषद्रुहदुयुजविद—' (3-2-61) इति क्विप्प्रत्यये रूपमेवम्।

A. 'विद्वानुपानेष्ट च तान् स्वकाले यतिर्वशिष्ठो यमिनां वरिष्ठः॥' भ. का. 1-15
B. 'स्पष्टं बहिः स्थितवतेऽपि निवेदयन्तः...... ।' शि. व. 5-97
C. 'अनिर्विदा या विदधे विधाता पृथ्वी पृथिव्याः प्रतियातनेव॥' शि.व. 3-34.
D. 'विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः।' कु.सं. 6-26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विदः, [1]विन्दुः, [2]विदुरः[A], सार्ववेद्यः, चतुर्वेदः, [3]विविदिवान्-विविद्वान्, चतुर्वेदी, [B]पराशयवेदी, धनुर्वेदी, वैदिकः, वेदः, [4]वैदनः [C]विविदिषुः, वेविदः ;

आवेदितव्यम्, वेदयितव्यम्, विविदिषितव्यम्, वेविदितव्यम् ;

आवेदनीयम्, वेदनीयम्, विविदिषणीयम्, वेविदनीयम् ;

वेद्यम्, त्रैविद्यः, वेद्यम्, विविदिष्यम्, वेविद्यम् ;

वेद्यमानः, वेदयमानः, विविदिषमाणः, वेविद्यमानः ;

[5]वेदः, वेदः, विविदिषः, वेविदः ;

वेदितुम्, वेदयितुम्, विविदिषितुम्, वेविदितुम् ;

[6]वित्तिः, विदा, [7]विद्या, अङ्गविद्या, त्रिविद्या, [8]वेदना, विविदिषा, वेविदा ;

---

1. 'विन्दुरिच्छुः' (3-2-169) इति तच्छीलादिषु कर्तृषु उप्रत्यये, निपातनात् नुमागमे च रूपमेवम्। वेदनशीलो **विन्दुः**। पवर्गीयादिस्तु 'बिदि अवयवे' इति धातोः 'मृगय्वादिभ्यः' (द. उणादिः 1-121) इति कौ बोध्यः, इति **बृहच्छब्देन्दुशेखरे**।

2. 'विदिभिदिच्छिदेः कुरच्' (3-2-162) इति कुरच्प्रत्यये रूपमेवम्। 'ज्ञाता तु **विदुरो** विन्दुः' इत्यमरः। अत्र सूत्रे ज्ञानार्थ एव **न्यासे** गृहीतः।

3. क्वसुप्रत्यये, 'विभाषा गमहन**विद**विशाम्' (7-2-68) इति विकल्पेन इडागमो भवति। **विविदिवान्-विविद्वान्** इति रूपद्वयम्। 'ज्ञानार्थस्य तु नित्यं **विविद्वान्** इत्येकमेव, भवति' इति **काशिकायाम्** (7-2-68) उक्तम्। अन्यत्रार्थे रूपद्वयं बोध्यम्।

4. विदन्नेव **वैदनः**, 'प्रज्ञादिभ्यश्च' (5-4-38) इति स्वार्थेऽण्प्रत्ययः। एतेनापि '**विदेः** शतुर्वसुः' (7-1-36) इति वसुविकल्पः सिद्धः। अन्यथा अणः प्रकृतिभूतस्य **विदन्** इति शत्रन्तस्यासिद्धिरित्यवधेयम्।

5. वेत्ति अनेनेति 'हलश्च' (3-3-121) इति करणे घञ्।

6. 'मन्त्रे वृषेषपचमन**विद**—' (3-3-96) इति स्त्रियां भावे क्तिन्प्रत्ययः।

7. विदन्त्यनया इति, 'संज्ञायां समजनिषदनिपतमन**विद**—' (3-3-99) इति स्त्रियां भावे क्यप्प्रत्ययः।

8. 'घट्टिवन्दि**विदि**भ्यश्च' (वा. 3-3-107) इति स्त्रियां युच्प्रत्ययः।

A. '**विदुरो** जित्वरः प्राप लक्ष्मणो गत्वरान् कपीन् ॥' भ.का. 7-22.

B. 'अकलयदसमाशुगाधिमग्नां झटिति **पराशयवेदिनो** हि विज्ञाः ॥' नैषधे 4-118.

C. 'नाविविदिषुमभ्येति संपद्गुरुषिषुं नरम्।' भ. का. 7-99.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेदनम्, वेदनम्, विविदिषणम्, वेविदनम्;

[1]विदित्वा,[A] वेदयित्वा, विविदिषित्वा, वेविदित्वा;

आवेद्य, प्रवेद्य, प्रविविदिष्य, प्रवेविद्य;

[2]ब्राह्मणवेदं [भोजयति] चोरवेदम् [B][निहन्ति] जिघांसुवेदम्,[C]

वेदम् २, विदित्वा २, } वेदम् २, वेदयित्वा २, } विविदिषम् २, विविदिषित्वा २, } वेविदम् २; वेविदित्वा २; }

[3]वेदिः, [4]विदथः, [5]नवेदाः, [6]विश्ववेदाः.

(1603) "**विद सत्तायाम्**" (IV-दिवादिः-1171. अक. अनि. आत्म.)

'**सत्तायां विद्यते**, ज्ञाने वेत्ति, विन्ते विचारणे।' (श्लो. 111) इति **देवः**।

वेदकः-दिका, वेदकः-दिका, विवित्सकः-त्सिका, वेविदकः-दिका;

वेदिता-त्री, वेदयिता-त्री, विवित्सिता-त्री, वेविदिता-त्री;

इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**खिद्यति**(349)वत् बोध्यानि।

शानचि-विद्यमानः, णिनिप्रत्यये-वेदी, क्तिनि-वित्तिः, इमानि रूपाणि विशेषेण भवन्ति।

---

1. क्त्वायां, 'रलो व्युपधात्—' (1-2-26) इति वैकल्पिककित्त्वे प्राप्ते 'रुद-**विद**—' (1-2-8) इत्यादिना नित्यं कित्त्वम्। तेन एकमेव रूपम् इति ज्ञेयम्।
2. 'कर्मणि दृशि**विदोः** साकल्ये' (3-4-29) इति कर्मण्युपपदे साकल्यविशिष्टेऽर्थे धातोः णमुल्प्रत्ययो भवति। **ब्राह्मणवेदं** भोजयति इत्यस्य यं यं ब्राह्मणं=ब्राह्मणत्वेन जानाति लभते विचारयति वा तान् सर्वान् भोजयतीत्यर्थः।
3. 'हृपिशिरुहिवृति**विदि**—' [द.उ. 1-47] इति इन्प्रत्ययः। वेत्ति विन्दति विद्यते वा **वेदिः**=त्रेताग्न्यधिष्ठानम्।
4. 'रुदि**विदि**भ्यां कित्' (द. उ. 6-41) इति अथप्रत्यये रूपमेवम्। वेत्तीति **विदथः**=ज्ञानी।
5. 'नभ्राण्नपान्न**वेदा**—' (6-3-71) इति निपातनात् न वेत्तीति **नवेदाः** इति असुन्प्रत्ययान्तोऽयम्।
6. '**विदि**भुजिभ्यां विश्वे' [द. उ. 9-98] इति विश्वशब्द उपपदे असिप्रत्ययः। **विश्ववेदाः**=हुताशनः।

A. '**विदित्वा** शक्तिमात्मीयां रावणं विजिघृक्षवः।' भ. का. 7-98.

B. 'यांश्चोरभूतान् लभते विचारयति वेत्ति वा।
तान् सर्वानपि हन्तीति **चोरवेदं** निहन्त्यसौ॥' इति **प्रक्रियासर्वस्वे**।

C. '**जिघांसुवेदं** धृतभासुरास्त्रस्तां ताडकाख्यां निजघान रामः॥' भ. का. 2-23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1604) "**विद विचारणे**" (VII-रुधादिः-1450. सक. अनि. आत्म.) '**—मीमांसे**' इति **वोपदेवः** ।

'सत्तायां विद्यते, ज्ञाने वेत्ति, **विन्ते विचारणे** ।' (श्लो. 111) इति **देवः** ।

वेदकः-दिका, वेदकः-दिका, विवित्सकः-त्सिका, वेविदकः-दिका ;

वेत्ता-त्री, वेदयिता-त्री, विवित्सिता-त्री, वेविदिता-त्री ;

इत्यादिकानि रूपाणि सर्वाणि दैवादिक**विद्यति**वत् (349) ज्ञेयानि । शानचि विन्दानः,[1] निष्ठायाम्-[2]वित्तः-विन्नः इति च विशेषः । [3]वेदिः ।

(1605) "**विद चेतनाख्याननिवासेषु**"

(X-चुरादिः-1709. सक. सेट्. आत्म.) **आकुस्मीयः** ।

'**—विवादेषु**' इति **क्षीरस्वामी** । '**—वेदने**' इत्येके । 'विद वेदनाख्यानपरिवादनेषु' इति **न्यासे** पाठः । "**निपातनेषु** इति **धनपालशाकटायनौ**" इति **पुरुषकारः** (श्लो. 111) ।

'विन्दते विन्दतीत्येवं लाभे, **वेदयते णिचि** ॥' (श्लो. 111) इति **देवः** ।

वेदकः-दिका, विवेदयिषकः-षिका, वेदयिता-त्री, विवेदयिषिता-त्री ;

इत्यादिकानि सर्वाण्यपि प्रातिस्विकरूपाणि विना—चौरादिक**केतयति**वत् (260) ज्ञेयानि । 'अनुपसर्गाद्—' (3-1-138) इति शप्रत्यये वेदयः इति । '**घट्टिवन्दिविदिभ्यश्च**' (वा. 3-3-107) इति ण्यन्तात् स्त्रियां युच्प्रत्यये वेदना इति रूपम् ।

(1606) "**विद्लृ लाभे**"

(VI-तुदादिः-1432. सक. अनि. उभ.) **मुचादिः** ।

'**विन्दते विन्दतीत्येवं लाभे** वेदयते णिचि ॥' (श्लो. 111) इति **देवः** ।

व्याघ्रभूत्यादिमते सेट्कोऽयम् । **वेदिता** इति ।

---

1. 'रुधादिभ्यः **श्नम्**' (3-1-78) इति विकरणप्रत्यये श्नमि, '**श्नसोरल्लोपः**' (6-4-111) इति अल्लोपे च रूपमेवम् ।
2. निष्ठायाम्, '**नुदविदोन्दत्रा—**' (8-2-56) इति निष्ठातकारस्य नकारादेशो विकल्पेन भवति । तेन रूपद्वयम् । तथा च **भाष्यम्** (7-2-58) —
'वेत्तेस्तु विदितो निष्ठा विद्यतेः विन्न इष्यते ।
वित्तेर्विन्नश्च वित्तश्च वित्तो भोगेषु विन्दतेः ॥' इति ।
3. औणादिके [द. उ. 1-47] इप्रत्यये रूपम् । वेत्ति विन्दति विन्ते वा **वेदिः**= वेतारन्यधिष्ठानम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेदकः-दिका, वेदकः-दिका, विवेदिषकः-विविदिषकः-[विवित्सकः]-षिका, वेविदकः-दिका ;

वेदिता, [वेत्ता]-त्री, वेदयिता-त्री, विवेदिषिता-विविदिषिता-त्री, विवित्सिता-त्री, वेविदिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि **क्लिदिवत्** (193) ज्ञेयानि । शतरि [1]विन्दः[A], [2]गोविन्दः-कुविन्दः, [B]अरविन्दम्[3], [4]वित्तम्-[धनम्], विन्नं [लब्धम्], [5]परिवेत्ता, विविद्वान्[6]-विविदिवान्, [7]वेदना[C]

---

1. 'अनुपसर्गाल्लिम्प**विन्द**—' (3-1-138) इति शप्रत्यये मुचादित्वात् '**शे मुचादीनाम्**' (7-1-59) इति नुमि शपि पररूपे च रूपमेवम् ।
2. 'गवादिषु **विन्देः** संज्ञायाम्' (वा. 3-1-138) इति शः । गां विन्दतीति **गोविन्दः** । एवं **कुविन्दः** इति **प्रक्रियासर्वस्वे** ।
3. **अरविन्दम्**-चक्रस्य नाभिनेम्योरन्तरालकाष्ठानि अराः, तत्सदृशानि दलानि विन्दति—लभत इत्यर्थः । **भाष्ये** तु **अरविन्दः** पुंलिङ्गत्वेन पठ्यते । 'कर्मण्यण्' (3-2-1) बाधनाय इदम् इति **बृ. शेखरे** ।
4. '**वित्तो** भोगप्रत्यययोः' (8-2-58) इति क्तप्रत्यये भोगे चाभिधेये तत्वाभावो निपात्यते । **वित्तो**ऽयं मनुष्यः । प्रतीत इत्यर्थः । **वित्तम्** धनम्, **वित्तं** प्रसिद्धम्, भुज्यत इति **भोगो** धनम् । प्रतीयत इति **प्रत्ययः** प्रसिद्धम् । अन्यत्र **विन्नम्** ।
5. तृजन्तोऽप्ययं 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' (द. उ. 2-1) इति संज्ञायां गम्यमानायामनिटौ भवतः । '**परिवेत्ता**ऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात्' **इत्यमरः** । ज्येष्ठे विवाहरहिते कृतदारपरिग्रहः कनिष्ठः **परिवेत्ता** इत्युच्यते । क्वसुप्रत्यये 'विभाषा गमहन**विद**—' (7-2-68) इतीड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः । तेन निष्ठानत्वपक्षे, नत्वाभावपक्षेऽपीण्निषेधो नित्य इत्यवधेयम् । **कातन्त्रे** तु अनिट्त्वेनास्य धातोः पाठात् तेषां मते निष्ठायामिण्निषेधः सिद्ध एव । **भाष्यादिषु** तु धातुरयं सेडित्येव सम्मतः । विस्तरस्तु **माधवीये** द्रष्टव्यः ।
6. 'विभाषा गमहन**विद**विशाम्' (7-2-68) इति क्वसौ विकल्पेन इडागमो भवति । तेन रूपद्वयम् । विशिना साहचर्यादिह **विदे**स्तौदादिकस्य लाभार्थस्य ग्रहणम् ।
7. ण्यन्तात् 'घट्टिवन्दि**विदिभ्य**श्च' (3-3-107) इति युचि रूपमेवम् ।

A. 'आर्चीद् द्विजातीन् **परमार्थविन्दा**नुदेजयान भूतगणान् न्यषेधीत् ।' भ. का. 1-15.

B. 'प्रजा इवाङ्गाद**रविन्द**नाभेः शंभोर्जटाजूटतटादिवापः ।' शि. व. 3-65

C. 'युक्त्वा योगं स्थितः शैले विघ्नन् चित्त**वेदनाम्** ॥' भ. का. 7-73

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]परिवित्तिः, [2]ब्राह्मणवेदं [भोजयति], [3]यावद्वेदं [भोजयति], [4]चोरवेदं निहन्त्यसौ] ।

(1607) "**विध विधाने**" (VI-तुदादिः-1325. सक. सेट्. पर.)

'अनेकार्थत्वाच्छिद्रकरणेऽप्ययम्' इति **दुर्गादासः** । निमित्तवेधी (म. भा. 5-96-30) । 'विधृ वेधृ' इत्यत्र (भ्वादौ) '**विधृ**' इति **कौशिकः** । **क्षीरस्वामिना** त्वयं पक्षो दूषितः ।

वेधकः-धिका, वेधकः-धिका, [5]विविधिषकः-विवेधिषकः-षिका, वेविधकः-धिका ; वेधिता-त्री, वेधयिता-त्री, विविधिषिता-विवेधिषिता-त्री, वेविधिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि तौदादिक**किलति**वत् (193) ऊह्यानि । शतरि [6]विधन् इति । [7]वेधाः ।

(1608) "**विल संवरणे**" (VI-तुदादिः-1358. सक. सेट्. पर.)

'— वरणे' इति **शाकटायनहेमचन्द्रौ** । '— **स्मृतौ**' इति **वोपदेवः** । 'दन्त्योष्ठ्यादिरयम् । '— **भेदने**' इति **द. उ. वृत्त्याम्** (8-115) । 'वेलेत्तु चलने वेलेर्वरणे **विलतीति शे** ॥' (श्लो. 157) इति **देवः** ।

---

1. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति क्तिच् । '**परिवित्तिस्तु** तज्ज्यायान्' **इत्यमरः** ।
2. 'कर्मणि दृशि**विदोः** साकल्ये' (3-4-29) इति साकल्यविशिष्टे कर्मण्युपपदे णमुल् भवति । यं यं ब्राह्मणं=ब्राह्मणत्वेन जानाति, लभते वा, तं तं भोजयति इत्यर्थः । अत्र सत्तार्थस्यैकस्य न ग्रहः; अकर्मकत्वात् ।
3. 'यावति **विन्द**जीवोः' (3-4-30) इति णमुल्प्रत्ययः । यावत् लभते तावद् भुङ्क्त इत्यर्थः ।
4. **चोरवेद**मित्यत्र, यान् चोरभूतान् लभते विचारयति वेत्ति वा तान् सर्वानपि हन्तीत्यर्थे 'कर्मणि दृशि**विदोः**—' (3-4-20) इति णमुल् । '**चोरवेदं** निहन्त्यसौ—' इति **प्र. सर्वस्वे** ।
5. '**रलो** व्युपधात्—' (1-2-26) इति सनः क्त्वाप्रत्ययस्य च कित्त्वविकल्पः । तेन क्त्वाप्रत्ययेऽपि **विधित्वा-वेधित्वा** इति रूपद्वयं ज्ञेयम् ।
6. '**तुदादिभ्यः शः**' (3-1-77) इति विकरणप्रत्ययः शः । तस्य ङिद्वद्भावादङ्गस्य गुणो न ।
7. **औणादिके** [द.उ. 9-85] असिप्रत्यये, प्रकृतेः 'वेध' इत्यादेशे **वेधाः** इति भवति । विधाता इत्यर्थः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेलकः-लिका, वेलकः-लिका, विवेलिषकः-विविलिषकः-षिका, वेविलकः-लिका ;
वेलिता-त्री, वेलयिता-त्री, विवेलिषिता-विविलिषिता-त्री, वेविलिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि तौदादिक**किलति**वत् (193) ज्ञेयानि ।
[1]विलालः । आविलम् [आवेलम्] ।

(1609) " **विल क्षेपे** " (X-चुरादिः-1605. सक. सेट्. उभ.)

'**वेलेत्तु चलने वेलेः** वरणे विलतीति शे ॥' (श्लो. 157) इति **देवः** ।
क्षीरस्वामी '**किल**—' इति पठति । **मैत्रेयस्तु** '**पिल**' इति पठति ।
क्षीरस्वामिमैत्रेयजैनकातन्त्रशाकटायनबोपदेवादयो धातुममुं नाभ्युपगच्छन्ति ।
वेलकः-लिका, विवेलयिषकः-षिका, वेलयिता-त्री, विवेलयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कीटयति**वत् (194) ज्ञेयानि ।
ल्युटि-[A]प्रवेलनम् ।

(1610) " **विश प्रवेशने** " (VI-तुदादिः-1424. सक. अनि. पर.)

अयं धातुरात्मनेपदेऽपि दृश्यते इति प्रयोगात् ज्ञायते । तथा हि—'एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा **विशते** ब्रह्मधाम ॥' (**मुण्डकोपनिषत्** 3-2-4) । **प्रवेशनम्**—अन्तर्गमनम् ।
वेशकः-शिका, वेशकः-शिका, [2]विविक्षकः-क्षिका, वेविशकः-शिका ;
[3]वेष्टा-ष्ट्री, वेशयिता-त्री, विविक्षिता-त्री, वेविशिता-त्री ;
प्रविशन्-ती-न्ती, वेशयन्-न्ती, विविक्षन्[B]-न्ती ; —
[C]प्रवेक्ष्यन्-न्ती-ती, वेशयिष्यन्-न्ती-ती, विविक्षिष्यन्-न्ती-ती ; —

---

1. 'तमिविडि**विलि**—' (द. उ. 8.115) इति कालन्प्रत्यये रूपम् । **विलालः**= भिदुरः ।
2. सन्नन्तात् ण्वुलि 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे 'व्रश्च—' (8-2-36) इत्यादिना षत्वे ककारे च रूपमेवम् । एवं सन्नन्ते सर्वत्र बोध्यम् ।
3. तृचि, 'व्रश्च—' (8-2-36) इत्यादिना शकारस्य षकारे, 'ष्टुना ष्टुः' (8-4-41) इति टकारे च रूपमेवम् । एवं तव्यदादिष्वपि ज्ञेयम् ।

A. 'काल्य**प्रवेलन**करोऽयमवेलयद् .... ।' धा. का. 3-22
B. 'फणावतस्त्रासयितुं रसायास्तलं **विवक्ष**न्निव पन्नगारिः ॥' शि. व. 3-23·
C. 'स प्रोषिवानेत्य पुरं **प्रवेक्ष्यन्** शुश्राव घोषं न जनौघजन्यम् ।' भ. का. 3-27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]निविशमानः-व्यतिविशमानः, वेशयमानः, विविक्षमाणः, वेविशमानः ; व्यतिवेक्ष्यमाणः, वेशयिष्यमाणः, विविक्षिष्यमाणः, वेविश्यमानः, [2]विट्-विड्-विशौ-विशः ;

[3]विष्टम्-ष्टः-ष्टवान्, वेशितम्-तः, विविक्षितः, वेविशितः-तवान् ;

इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकखिद्यतिवत् (349) ज्ञेयानि । विशः-[4]देवविशा, विविशिवान्[5]-विविश्वान्, [6]विशयी-विषयी, [7]वेशः, [8]प्रायोपवेशिका,[A] [9]ग्राममभिनिविशमानः, कल्याणेऽभिनिवेशः, पापेऽभिनिवेशः, गेहानुप्रवेशमास्ते, चारुशिलोपवेशम्,[B] [10]गेहं गेहमनुप्रवेशमास्ते गेहमनुप्रवेशमनुप्रवेशमास्ते,

---

1. '**नेर्विशः**' (1-3-17) इति तङ्। 'अङ्के **निविशतीं** भयात्' इत्यादिषु तङभाव उपसर्गप्रतिरूपकेण 'नि' इत्यनेन साकं **विशतेः** समासेनेति बोध्यम्।

2. क्विपि, षकारे, षकारस्य ष्टुत्वेन टकारे च रूपमेवम्।

3. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तप्रत्ययः।

4. क्विबन्तात् अजादिपाठाद्धलन्तादपि टापि च रूपमेवम्।

5. 'विभाषा गमहनविद**विशाम्**' (7-2-68) इति क्वसौ इड्विकल्पनात् रूपद्वयं बोद्धयम्।

6. णिनिप्रत्यये रूपमेवम्। वृद्ध्यभावो निपातनात्। **विषयी** इत्यत्र षत्वमपि **केचित्** आहुः।

7. 'पदरुज**विश**—' (3-3-16) इति कर्तरि घञ्। विशतीति **वेशः**। वेश्याजनोपभोगार्थे तु 'हलश्च' (3-3-121) इति अधिकरणे घञ्।

8. 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' (3-3-111) इति ण्वुच्प्रत्यये रूपम्। क्तिन्नादीनामपवादः। **प्रायोपवेशिका**=मरणपर्यन्तम् अनशनम्।

9. '**अभिनिविशश्च**' (1-4-47) इति अभिनिपूर्वस्य **विशतेः** कर्मसंज्ञा भवति। 'परिक्रयणे संप्रदानमन्यतरस्याम्' (1-4-44) इत्यतो मण्डूकप्लुत्याऽन्यतरस्यामित्यनुवृत्तेः, तस्य च व्यवस्थितविभाषात्वात् कल्याणे**ऽभिनिवेशः**, पापे**ऽभिनिवेशः**, 'या या संज्ञा यस्मिन् यस्मिन् संज्ञिन्य**भिनिविशते**', इत्यादिषु कर्मत्वाभावः।

10. '**विशि**पतिपदि—' (3-4-56) इति द्वितीयान्त उपपदे णमुल्प्रत्ययो भवति व्याप्यमाने आसेव्यमाने चार्थे गम्यमाने। तृतीयाप्रभृतित्वात् (2-2-21) समासविकल्पः। असमासे तु व्याप्यमानतायां द्रव्यवचनस्य द्विर्वचनम्। आसेव्यमानतायां तु क्रियावचनस्य 'उपपदमतिङ्' इति समासः। समासेन व्याप्त्यासेवयोरुक्तत्वात् 'नित्यवीप्सयोः' (8-1-4) इति द्विर्वचन न भवति।

A. 'अहं पर्यायसंप्राप्तां कुर्वे **प्रायोपवेशिकाम्** ॥' भ. का. 7-76.

B. 'कुतूहलाच्चारु**शिलोपवेशं** काकुत्स्थ ईषत्स्मयमान आस्त ॥' भ. का. 2. 11,

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेशन्तः,[1] वेश्म, [2]विटपः-विष्टपम्-त्रिविष्टपम्, विशिपम्, विशालम्, [4]विश्वम्।

(1611) "विष विप्रयोगे" (IX-क्र्यादिः-1526. अक. अनि. पर.)

'विप्रयोगे विषेः क्र्यादेर्विष्णातीति पदं भवेत्।' (श्लो. 175) इति **देवः**।
वेषकः-षिका, वेषकः-षिका, विविक्षकः-क्षिका, वेविषकः-षिका;
वेष्टा-वेष्ट्री, वेषयिता-त्री, विविक्षिता-त्री, वेविषिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**तुष्यति**वत् (758) ज्ञेयानि। शतरि विष्णन्-ती, इति विशेषः।
"विष्णाति इति प्रयोगे समुपलब्धे सत्येव निर्णयो धातोरस्य शक्यः कर्तुम्" इति **पा. धा. समीक्षा**।

(1612) "विषु सेचने" (I-भ्वादिः-698. सक. अनि. पर.)

'सेवने' इति **धातुकाव्यव्याख्या**पाठः (1-88)।
'........विषेः **वेषति सेचने**॥' (श्लो. 174) इति **देवः**।
"**आर्याणा**मुदित्, **द्रमिडानां** ऌदित्" इति **धनपालः**। 'पुषादि—' (3-1-55) इत्यत्र **सुधाकरः**—'**द्रमिडाना**मविषत्, **आर्याणां** तु 'शल इगुपधात्—' (3-1-45) इति अविक्षत् इति **नन्दी**" इति **पुरुषकारे** इति (श्लो. 175)।

---

1. 'जॄविशिभ्यां झच्' (द. उ. 6-17) इति झच्प्रत्यये, 'झोऽन्तः' (7-1-3) इत्यन्तादेशे च रूपमेवम्। **वेशन्तः** पल्वलः।
2. '**विटपविष्टपविशिपोलवाः**' (द. उ. 7-12) इति कपन्प्रत्यये निरूढः। शकारस्य टकारो निपातनात्। तेन विशन्त्यस्मिन् पक्षिण इति **विटपम्**=शाखावयवः। अस्यैव धातोः षकारेऽन्तादेशे तुडागमश्च निपात्यते। विशन्त्यस्मिन् पुण्यकृत इति **विष्टपम्**=पुण्यकृतां स्थानम्। **त्रिविष्टपम्**=स्वर्गः। अस्यैव धातोः प्रत्ययादेरित्वं निपात्यते। तेन **विशिपम्**=वेश्म, आसनं च इत्यर्थः। पद्मं चेत्येके।
3. औणादिके (द. उ. 8-115) कालन्प्रत्यये एवं रूपम्। विशन्ति तस्मिन् बहवोऽनेनेति **विशालं** प्रथु। वस्तुतः 'वेः शालच्—' (5-2-28) इति वेः शालच्प्रत्ययेनैव सिद्धमिदम्।
4. औणादिके (द. उ. 8.-125) क्वन्प्रत्यये रूपम्। विशति तस्मिन् सर्वम् इति **विश्वम्**।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेषकः-षिका, वेषकः-षिका, विविक्षकः-क्षिका, वेविषकः-षिका ;
वेष्टा-ष्ट्री, वेषयिता-त्री, विविक्षिता-त्री, वेविषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**तुष्यति**वत् (758) ऊह्यानि । विषः, विषम्, विषाणम्, विषिः विष्टिः=बलम्, इत्यादिकानि रूपाणि विशेषेण भवन्तीति ज्ञेयम् । क्त्वायाम्-[1]विषित्वा-वेषित्वा इति ।

(1613) " **विष्क हिंसायाम्** " (X-चुरादिः-1686. सक. सेट्. आत्म.)

आकुस्मीयः ।

क्षीरतरङ्गिण्यां धातुरयं न दृश्यते । अपि तु तत्र '**किष्क**' इति पठित्वा '**हिष्क**' इति **दुर्गः**' इति उक्तम् ।
'**किष्क**' इति पठित्वा, **हिष्क इत्येके**' इति च **धातुकाव्यव्याख्या** (3-34) ।
'**धातुप्रदीपादौ**—'**हिष्क**' इति पठ्यते' इति **मा. धा. वृत्तिः** ।
विष्ककः-ष्किका, विविष्कयिषकः-षिका, विष्कयिता-त्री, विविष्कयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाणि चौरादिक**चित्रयति**वत् (525) बोध्यानि । धातोरस्य आत्मनेपदित्वात् विष्कयमाणः, विविष्कयिषमाणः इति विशेषः । 'किष्क' इति पक्षे किष्किन्धा, किष्कुः, इति औणादिके । '**किष्कुर्द्वयोर्वितस्तौ च**—' इति **मेदिनी** ।

(1614) " **विष्क दर्शने** " (X-चुरादिः-1940. सक. सेट्. उभ.)

अदन्तः । क्षीरस्वामी धातुममुं न पठति ।
विष्ककः-ष्किका, विविष्कयिषकः-षिका ; विष्कयिता-त्री, विविष्कयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**चित्रयति**वत् (525) ज्ञेयानि ।

(1615) " **विष्लृ व्याप्तौ** " (III-जुहोत्यादिः-1095. अक. अनि. उभ.)

'**व्याप्तौ वेवेष्टि वेविष्टे**............ ॥' (श्लो. 174) इति **देवः** ।
'**विषृ**—' इति **काशकृत्स्नः** । तत्र '**विष्लृ** इति **कातन्त्रे** पाठः' इति च तत्रोक्तम् । "**उदिदित्येके । इरिदिति द्रुमे**" इति **धा. का. व्याख्या** (2-55) । वेष्टा, विष्टवान्, विष्टः, वेषन्, वेषकः इत्येते **व्यापके**ऽर्थे । वेषः, विष्टम्, वेषणीयम्, वेष्यम्, वैष्यम्, वेष्टव्यम्, वेषणं, विष्टिः इत्यष्टौ आवरणार्थे ।

---

1. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पनात् रूपद्वयमत्र ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेषकः-षिका, वेषकः-षिका, [1]विविक्षकः-क्षिका, वेविषकः-षिका ;
वेष्टा-ष्ट्री, वेषयिता-त्री, विविक्षिता-त्री, वेविषिता-त्री ;
[2]वेविषत्-ती, वेषयन्-न्ती, विविक्षन्-न्ती ; —
वेक्ष्यन्-न्ती-ती, वेषयिष्यन्-न्ती-ती, विविक्षिष्यन्-न्ती-ती ; —
वेविषाणः, वेषयमाणः, विविक्षमाणः, वेविषमाणः ;
वेक्ष्यमाणः, वेषयिष्यमाणः, विविक्षिष्यमाणः, वेविषिष्यमाणः ;
विट्-विषौ-विषः, वेट्-वेषौ-वेषः ; — —
विष्टम्-विष्टः-विष्टवान्, [3]आविष्टलिङ्गम्, वेषितम्-तः, विविक्षितः, वेविषितः-तवान् ;

इत्यादिकानि रूपाणि सर्वाण्यपि जौहोत्यादिक**णिजिर्**धातुवत् (673) ऊह्यानि । [4]विष्टिः, [5]विष्णुः, [6]वेष्पम्, [7]वैष्ट्रः, [8]विषम् । इमानि औणादिकनिष्पन्न-रूपाणीति ज्ञेयानि । [9]विषयम्=आवरणम् । विषयो=देशः ।

---

1. सन्नन्तात् ण्वुलि, 'हलन्ताच्च' (1-2-10) इति सनः कित्वे 'षढोः कः सि' (8-2-41) इति षकारस्य ककारे 'इण्कोः' (8-3-57) इति सकारस्य षत्वे च रूपमेवम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

2. '**जुहोत्यादिभ्यः—**' (2-4-75) इति श्लौ, 'श्लौ' (6-1-10) इति द्वित्वे, 'निजां त्रयाणां गुणः श्लौ' (7-4-75) इति अभ्यासस्य गुणे, 'नाभ्यस्ताच्छतुः' (7-1-80) इति नुम्निषेधे च रूपमेवम् । एवं **वेविषाणः** इत्यत्रापि गुणो ज्ञेयः । अनिट्कारिकायां विषिग्रहणेन जौहोत्यादिकोऽयं गृह्यते इति **न्यासे** ।

3. '**आविष्ट**लिङ्गा जातिर्यंल्लिङ्गमुपादाय प्रवर्तते उत्पत्तिप्रभृति आविनाशान्न तं लिङ्गं जहाति' इति **महाभाष्यवचनं** (1-2-52) अत्र द्रष्टव्यम् ।

4. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच् ।

5. '**विषेः** किच्च' (द. उ. 1-149) इति णुप्रत्ययः किच्च भवति । वेवेष्टि कृत्स्नमिति **विष्णुः**=सर्वव्यापी भगवान् ।

6. 'पानी**विषिभ्यः** पः' (द. उ. 7-2) इति पप्रत्यये रूपम् । **वेष्पम्**=परमात्मा ।

7. औणादिके (द. उ. 8-80) ष्ट्रन्प्रत्यये रूपमेवम् । **वैष्ट्रः**=विष्णुः वायुश्च इति ।

8. व्याप्तिकर्मणि गम्यमाने औणादिकः (द.उ. 9.20) कन्प्रत्ययो भवति । **विषम्**= प्राणहरद्रव्यम् इत्यर्थः । जलार्थको **विष**शब्दो वेदे प्रयुज्यते । द्रष्टव्या **निघण्टुः** (1.12) ।

9. बाहुलकात् औणादिके (द. उ. 1-12) कयन्प्रत्यये रूपमेवम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1616) "**विसृ गतौ**" (I-भ्वादिः-719. सक. सेट्. पर.)

पिसृ इत्यत्र 'इह **क्वचित् कोशे** '**विसृ** वेसृ—' इत्यपि पठ्येते । आद्यौ दन्त्यौष्ठ्यादी' इति **मा. धा. वृत्तौ** । **मैत्रेया**दिषु न दृश्यते इति च। 'विश—' इति पठित्वा '**विस**' इति **कातन्त्राः** इति **काशकृत्स्ने**। '**मैत्रेय-कातन्त्रशाकटायनहेमादयः** पठन्ति' इति **पा. धा. समीक्षायां** दृश्यते। (वस्तुतस्तु) **अन्ये सर्वे**ऽपि '**विस**' इत्येव पठन्ति। **बालमनोरमायां** तु '**विस प्रेरणे**' इति **दिवादौ** पठ्यते। **सि. कौमुद्यां** त्वत्र '**बिस**' इत्येव। वेसकः-सिका, वेसकः-सिका, विविसिषकः-विवेसिषकः-षिका, वेविसकः-सिका; वेसिता-त्री, वेसयिता-त्री, विवेसिषिता-विविसिषिता-त्री, वेविसिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**किटति**वत् (190) बोध्यानि।

(1617) "**वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु**"

(II-अदादिः-1048, सक. अनि. पर.) [अ]

अत्र **व्याप्तिः** इत्यर्थः **धातुवृत्ति, क्षीरतरङ्गिणी, जै, का. कृ, द. उ. वृत्ति, कातन्त्रशाकटायनीयेषु** न दृश्यते। "**प्रजनः**=प्रथमगर्भग्रहणम्, **असनं**= क्षेपणं, **अशनं**=व्याप्तिरित्येके" इति **क्षीरस्वामी**। '**प्रजननकान्त्यासन-खादनेषु च**' इति **काशकृत्स्न**धातुपाठे। "**कन्नडटीकायाम् आसनार्थस्य** निर्देशात् **काशकृत्स्ने** '**आसन**' इति पाठो द्रष्टव्यः। यद्वा मूलपाठे प्रमाद-पठितस्यैव **टीकाकृता** तथा व्याख्यानं कृतं स्यात्" इति **का. कृ. टीका**। 'अजेर्व्यघञपोः' (2-4-56) इति **सूत्रभाष्यरीत्या** अस्य धातोः आर्धधातुके नास्ति प्रयोग इति **शब्देन्दुशेखरे** स्थितम्। "'वी' इत्यत्र **ईकारो**ऽपि धात्वन्तरं प्रश्लिष्यते" इति **सि. कौमुदी**। '—कान्तिगतिव्याप्तिक्षेपप्रजन-खादनेषु' इति **वोपदेवः**।

वायकः-यिका, वायकः, [1]वापकः-पिका, [2]विवीषकः-षिका, वेवीयकः-यिका;

---

1. 'प्रजने वीयतेः' (6-1-55) इति प्रजने वर्तमानस्य णौ विभाषा आत्वे, पुकि च रूपमेवम्।

2. सन्नन्तात् ण्वुलि 'इको झल्' (1-2-9) इति सनः कित्त्वान्न गुणः।

[अ] 'ईज' इत्यत्र '**वीजेरलौकिकादवीजयत्**' इति **क्षीरतरङ्गिण्यां** दृश्यते। '**वीज-धातुः** शास्त्रेष्वपठितोऽपि लोके लब्धप्रचार इत्यर्थः। '**संवीजते**' इति प्रयोगस्तु **जाम्बवतीविजये** दृश्यते यथा—'घर्मालसाङ्गीं मधुराणि कूजन् **संवीजते** पक्षपुटेन कान्ताम्॥' इति **तट्टीकायामुक्तम्**। '**वीजन्ति** वालव्यजनैः—' इति **हरिवंशे** (13-92) (**म. भारते** 7-307) इति च।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वेता-त्री, वाययिता-वापयिता-त्री, विवीषिता-त्री, वेवीयिता-त्री ;
[1]वियन्-ती, वाययन्-पुरोवातो गाः, प्रवापयन्, वापयन्-न्ती, विवीषन्-न्ती ;—
वेष्यन्-न्ती-ती, वाययिष्यन्-वापयिष्यन्-न्ती-ती, विवीषिष्यन्-न्ती-ती ;—
इत्यादिकानि रूपाणि सर्वाण्यपि क्रैयादिक**लिनाति**वत् (1492) ज्ञेयानि, प्रातिस्विकरूपाणि विना। निष्ठायाम् वीतम्-तः, [2]वयः, क्तिनि-वीतिः, वेणिः[3], वेणुः[4], वीणा[5], [6]वेतनम्. [7]वेत्रम्, [8]वेतसः, वयः, इत्यादिकानि रूपाणि अस्य धातोः विशेषेण भवन्ति।

(1617-A) **"वीथृ याचने"** (भ्वादौ) इति **काशकृत्स्नेन** पठ्यते।

वीथः, वेथकः[9] वेथमानः इति त्रयं **भिक्षुके** इति च तत्र उक्तम्। वीथी, वीथिका—द्वौ मार्गे।

---

1. 'अदिप्रभृतिभ्यः शपः' (2-4-72) इति शपो लुकि प्रकृतेः इयङादेशे च रूपमेवम्।
2. 'एरच्' (3-3-56) इति भावे अकर्तरि च कारके संज्ञायामच्प्रत्यये रूपम्। घञोऽपवादः।
3. 'वीज्याज्वरिभ्यो निः' (द. उ. 1-18) इति निप्रत्ययः। बाहुलकात् णत्वम्। **वेणिः**=केशबन्धः।
4. औणादिके (द. उ. 1-148) णुप्रत्यये रूपमेवम्। **वेणुः**=वंशः। अत्रापि बाहुल॰ कादेव णत्वम्।
5. औणादिके (द. उ. 5-47) नप्रत्ययो णत्वं गुणाभावश्च निपातनात्। तेन रूपमेवम्। वेति जायते स्वरोऽस्यामिति **वीणा**=वल्लकी। '**वीणा** तु वल्लकी। विपञ्ची' इत्य**मरः**।
6. '**वी**पतिभ्यां तनन्' (द. उ. 6-56) इति तनन्प्रत्ययः। **वेतनम्**=भृतकदानम्। भृतकर्मैकधनमिति **केचित्**।
7. 'गुधृ**वी**—' (द. उ. 8-89) इति त्रप्रत्यये रूपमेवम्। **वेत्रम्**=वीरुद्विशेषः।
8. '**वियस्तुट् च**' (द. उ. 9-45) इति असच्प्रत्यये तुडागमे च रूपमेवम्। **वेतसः**=काष्ठजातिः।
9. शानचि **वेथमानः** इति प्रयोगे दृष्टत्वात् अयं धातुः आत्मनेपदी इति ज्ञायते। अन्यत्र सर्वेषु ग्रन्थेषु अयं धातुः न दृश्यते। अत्र **बाहुलकात्** गुणो बोध्यः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1618) "**वीर विक्रान्तौ**" (X-चुरादि:-1903. अक. सेट्. आत्म.) **आगर्वीय:, अदन्तश्च** । '—शौर्ये' इति **वोपदेव:** ।

वीरक:–रिका, विवीरयिषक:-षिका ; वीरयिता-त्री, विवीरयिषिता–त्री ; वीरयन्-न्ती, विवीरयिषन्-न्ती ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक-**कीटयति**वत् (194) ज्ञेयानि । ल्युटि–वीरणम्=कटार्थो द्रव्यविशेष: ।

(1618-A) "**वुख चलने**"

(भ्वादि: सक. सेट्.पर.) इति **काशकृत्स्नेन** पठ्यते ।

"वखि:, वुखु:, वोखनम्, वोखनीयम्— ' चत्वार: कम्पनेऽर्थे" इति च तत्रोक्तम् । **धातुवृत्ति, क्षीरतरङ्गिण्यादिषु** न पठ्यते ।

(1619) "**वुगि वर्जने**" (I-भ्वादि:-158. सक. सेट्. पर.) '—त्यागे' इति **वोपदेव:** । '**बुगि**' इति **सि. कौमुदी** । **केचित्** 'भुगि' इति चतुर्थादिं पठन्ति ।

वुङ्गक:-ङ्गिका, वुङ्गक:-ङ्गिका, वुवुङ्गिषक:-षिका, वोवुङ्गक:-ङ्गिका ; वुङ्गिता-त्री, वुङ्गयिता-त्री, वुवुङ्गिषिता-त्री, वोवुङ्गिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि । ल्यपि-परिवुङ्ग्य ।

(1620) "**वृक आदाने**" (I-भ्वादि:-92. सक. सेट्. आत्म.) '—**अदने**' इति पाठान्तरमिति **क्षी. टीका** ।

वर्कक:-र्किका, वर्कक:-र्किका, विवर्किषक:-षिका, [1]वरीवृकक:-किका ; वर्किता-त्री, वर्कयिता-त्री, विवर्किषिता-त्री, वरीवृकिता-त्री ;

— वर्कयन्-न्ती, वर्कयिष्यन्-न्ती-ती ; —

वर्कमाण:, वर्कयमाण:, विवर्किषमाण:, वरीवृक्यमाण: ;

वर्किष्यमाण:, वर्कयिष्यमाण:, विवर्किषिष्यमाण:, वरीवृकिष्यमाण: ;

वृकितम्–त:, वर्कित:, विवर्किषित:, वरीवृकित:-तवान् ;

वृक्-वृकौ-वृक: ; — — —

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**गर्जति**वत् (422) ज्ञेयानि । [2]वृक:

---

1. यङन्ते 'रीगृदुपधस्य च' (7-4-90) इत्यभ्यासस्य रीगागम: ।
2. '**इगुपधज्ञाप्रीकिर: क:**' (3-1-135) इति कप्रत्यय: । **वृक:** मृगविशेष:, आयुधजीविसंघविशेषश्च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वर्कणः, [2]वृक्यम्, [3]वर्करः, इमानि रूपाण्यधिकान्यत्रेति विशेषः। **वृकोदरः**=भीमः।

(1621) " **वृक्ष वरणे** " (I-भ्वादिः-604. सक. सेट्. आत्म.)

'स्पर्श स्नेहने' इति '**कातन्त्र**पाठः, **चान्द्र**पाठश्च। **वरणे**—आवरणे इति **काशकृत्स्नः**।

वृक्षकः-क्षिका, वृक्षकः-क्षिका, विवृक्षिषकः-षिका, वरीवृक्षकः-क्षिका;
वृक्षिता-त्री, वृक्षयिता-त्री, विवृक्षिषिता-त्री, वरीवृक्षिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**वृक्षति**वत् (765) बोध्यानि। ल्यपि [A]संवृक्ष्य, शानचि वृक्षमाणः। इति विशेषः। [4]वृक्षः, इगुपधलक्षणकप्रत्यये रूपम्।

(1622) " **वृङ् संभक्तौ** " (IX-क्र्यादिः-1509. सक. सेट्. आत्म.)

'**भक्तौ वृणीते**, वरणे वृणोति वृणुते वृञः।' (श्लो. 32) इति **देवः**।
'**तुदादौ** वृङ् संभक्तौ **व्रियते**' इति **क्षीरस्वामी** इति **पुरुषकारेण** उक्तम्। प्रकृत**क्षीरतरङ्गिण्यां** तुदादौ न दृश्यते। **संभक्तिः**=संसेवा इति **क्षीरस्वामी**। '**स्वीकारः**' इति **धातुकाव्यव्याख्या** (3-9)।

वारकः-रिका, वारकः-रिका, [5]विवरिषकः-विवरीषकः-वुवूर्षकः-र्षिका, [6]वेव्रीयकः-यिका;

---

1. 'अनुदात्तेतश्च—' (3-2-149) इति युच्प्रत्ययस्ताच्छीलिकः।
2. 'ऋदुपधाच्च—' (3-1-110) इति क्यप्प्रत्यये रूपमेवम्।
3. बाहुलकाद् अरच्प्रत्यये रूपमेवम्। **वर्करः**=तरुणः पशुः। अजोऽपि।
4. 'किंस्विद् वनं क उ स **वृक्ष** आसीद् यतो द्यावापृथिवी निष्टतक्षुः।'(यजुः 1.7-20)
5. 'इट् सनि वा' (7-2-41) इतीड्विकल्पः। इट्पक्षे '**वृतो वा**' (7-2-38) इति इटो दीर्घविकल्पः। इडभावपक्षे 'इको झल्' (1-2-19) इति सनः कित्त्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घे 'उदोष्ठ्यपूर्वस्य' (7-1-102) इति उत्वे, रपरत्वे च 'हलि च' (8-2-77) इति इक उपधाया दीर्घः। तेन सन्नन्ते सर्वत्र रूपत्रयं बोध्यम्।
6. यङन्ते 'रीङृतः' (7-4-27) इति ऋकारान्तस्याङ्गस्य रीङ् इत्यादेशे रूपमेवम्।

A. '**संवृक्ष्य** वेदमतशिक्षकभिक्षुगम्यम्........।' धा. का. 1-17

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वरिता-वरीता-त्री, वारयिता-त्री, विवरिषिता-विवरीषिता-वुवूर्षिता-त्री, वेव्रीयिता-त्री ;

— वारयन्-न्ती, वारयिष्यन्-न्ती-ती ; —

वृणानः, वारयमाणः, विवरिषमाणः-विवरीषमाणः-वुवूर्षमाणः, वेव्रीयमाणः ;

वरिष्यमाणः, वारयिष्यमाणः, विविरिषिष्यमाणः-विवरीषिष्यमाणः, वूवुर्षिष्यमाणः, वेव्रीयिष्यमाणः ;

वृत्-वृतौ-वृतः ; — — —

वृतम्-तः,[2] वारितः, विविरिषितः-विवरीषितः-वुवूर्षितः, वेव्रीयितः-तवान् ;

वरः, [3]वराकः-वराकी, वारः, विवरिषुः-विवरीषुः-वुवूर्षुः, वेव्रियः ;

वरितव्यम्, वरीतव्यम्, वारयितव्यम्, विवरिषितव्यम्-विवरीषितव्यम्-वुवूर्षितव्यम्, वेव्रीयितव्यम् ;

वरणीयम्, वारणीयम्, विवरिषणीयम्-विवरीषणीयम्-वुवूर्षणीयम्, वेव्रीयणीयम् ;

वर्यम्, वर्यः[A] [सहस्रेण] [4]वर्या, वार्याः [ऋत्विजः,] वृत्यम्,

वार्यम्, विवरिष्यम्-विवरीष्यम्-वुवूर्ष्यम्, वेव्रीय्यम् ;

ईषद्वरः-दुर्वरः-सुवरः ; — — —

वर्यमाणः, वार्यमाणः, विवरिष्यमाणः-विवरीष्यमाणः-वुवूर्ष्यमाणः, वेव्रीय्यमाणः ;

वारः, [5]नीवारः, वारः, विवरिषः-विवरीषः-वुवूर्षः, वेव्रियः ;

वरितुम्[B]-वरीतुम्, वारयितुम्, विवरिषितुम्-विवरीषितुम्-वुवूर्षितुम्, वेव्रीयितुम् ;

[6]वृतिः, वारणा, विवरिषा-विवरीषा-वुवूर्षा, वेव्रीया ;

---

1. 'वृतो वा' (7-2-38) इति इटः विकल्पेन दीर्घः। तेन तव्यतुमुन्नादिषु रूपद्वयं बोध्यम्।
2. सन्नन्ते इड्विकल्पनात् निष्ठायाम् 'यस्य विभाषा' (7-2-15) इतीण्निषेधः।
3. 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' (3-2-155) इति तच्छीलादिषु कर्तृषु षाकन्प्रत्ययः। तेन रूपमेवम्। स्त्रियां षित्त्वात् ङीष्प्रत्यये **वराकी** इति।
4. 'अवद्यपण्य**वर्याः**—' (3-1-101) इति अनिरोधेष्वर्थेषु **वर्या** इति निपात्यते। ण्यदपवादोऽयम्। **वर्येति** स्त्रियां निपात्यते। अनिरोधः=अप्रतिबन्धः। **वृत्या** अन्या। क्यब्विधौ **वृञो** ग्रहणम्, न तु वृङः। **वार्याः**=ऋत्विजः।
5. 'नौ वृ धान्ये' (3-3-48) इति निशब्द उपपदे धान्यविशेषेऽभिधेये धातोः घञ्प्रत्यये उपसर्गस्य—' (6-3-122) इति दीर्घे च रूपमेवम्। अपोऽपवादः। **नीवारो** नाम व्रीहिः। अकृष्टपच्यधान्यम्। **निवरा** तु कन्या इति।
6. 'श्रुयुकः क्किति' (7-2-11) इतीण्निषेधः। एवं क्त्वाप्रत्ययादिष्वपि ज्ञेयम्।

A. 'सुग्रीवो नाम **वर्यो**ऽसौ भवता चारुविक्रमः॥' भ. का. 6-51
B. '......अवपरिमलगन्धः केन शक्यो **वरीतुम्**॥' शि. व. 11-34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वरणम्, धारणम्, विवरिषणम्-विवरीषणम्-वुवूर्षणम्, वेव्रीयणम्;
वृत्वा, वारयित्वा, विवरिषित्वा-विवरीषित्वा-वुवूर्षित्वा, वेव्रीयित्वा ;
निवृत्य, निवार्य, निविवरिष्य-निविवरीष्य-निवुवूर्ष्य, निवेव्रीय्य ;
वारम् २, वृत्वा २, } वारम् २, वारयित्वा २, } विवरिषम् २-विवरीषम् २-वुवूर्षम् २, विवरिषित्वा २-विवरीषित्वा-वुवूर्षित्वा २, }
[1]वर्वरीका, [2]वरेण्यः, [3]वरूषः, [4]वर्पः. वेव्रीयम् २ ; वेव्रीयित्वा २ ; }

(1623) "**वृजी वर्जने**" (II-अदादिः-1029. सक. सेट्. आत्म.)

सूत्रमिदं **क्षीरस्वामी** दौर्गपाठत्वेन पठति। "इदित् इति **आत्रेयमैत्रेय-दुर्गादयः**। तथा चाधीयते—'चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' इति। तथा च **शाबरभाष्ये** 'प्रवृञ्जनम्' इति प्रयुज्यते। तथा च **स्वामी**—"वृज इति **दौर्गाः**, तेषां वृक्ते, वर्जिता इति। **शाकटायन**स्यापीदित्त्वमेवेष्टम्" इति **मा. धातुवृत्ति**रिहानुसन्धेया। 'वृज गतौ' इति **क्षीरस्वामी** (भ्वादौ) पठित्वा **वृजी** इति **दौर्गाः**। वृक्ते वर्जिता इत्याह' इत्येवमुक्तम्। यत्त्वत्र **पुरुषकारेण** '**क्षीरस्वामिना वृजि** इति पठित्वा' इत्युक्तं तन्नोपलभ्यते **क्षीरतरङ्गिण्याम्**। **काशकृत्स्नो**ऽपि '**वृजी**—' इत्येव पपाठ। '—त्यागे वृत्तौ च' इति **वोपदेवः**।

'वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति।' (श्लो. 59) इति **देवः**।

वर्जकः-र्जिका, वर्जकः-र्जिका, विवर्जिषकः-षिका, [5]वरीवृजकः-जिका ;
वर्जिता-त्री, वर्जयिता-त्री, विवर्जिषिता-त्री, वरीवृजिता-त्री ;
— वर्जयन्-न्ती, वर्जयिष्यन्-न्ती-ती ; — —

1. 'शॄपॄवृञां द्वे रुक् चाभ्यासस्य' (द. उ. 3-37) इति ईकन्प्रत्यये, अभ्यासस्य रुगागमे च रूपमेवम्। **वर्वरीका**=संवरणम्।
2. '**वृङ** एण्यः' (द. उ. 8-3) इति एण्यप्रत्ययः। वृणीते व्रियते वा **वरेण्यः**= परब्रह्मधाम। परं ब्रह्म, वाचंयमः इति च **केचित्**।
3. 'अञ्जूषः' (द. उ. 9-19) इति ऊषन्प्रत्यये रूपमेवम्। **वरूषः**=भोजनम्।
4. औणादिके (द. उ. 9-61) असुन्प्रत्यये, पुडागमे च रूपमेवम्। रूपस्वाङ्गयोरभिधेययोः व्रियते तदिति **वर्पः**=रूपम्।
5. ऋदुपधस्याङ्गस्य '**रीगृदुपधस्य च**' (7-4-90) इति अभ्यासे रीगागमः। एवं यङन्ते सर्वत्र बोध्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्जमानः, वर्जयमानः, विवर्जिषमाणः, वरीवृज्यमानः ;

वर्जिष्यमाणः, वर्जयिष्यमाणः, विवर्जिषिष्यमाणः, वरीवृजिष्यमाणः ;

वृक्-वृग्-वृजौ-वृजः ; — — —

[1]वृक्तम्-क्तः-क्तवान्, वर्जितम्-तः, विवर्जिषितः, वरीवृजितः-तवान् ;

वर्जः, वर्जः, प्रवर्जी, विवर्जिषुः, वरीवृजः ;

इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**गर्जति**वत् (422) ज्ञेयानि ।

[2]वृज्यः, [3]वृजयः, वृजिकः, [4]वर्गः, वर्ग्यः, कवर्गीयः, वासुदेववर्ग्यः-वासुदेववर्गीणः, वासुदेववर्गीयः, [5]एकवर्जम्, [6]वृजिनम्, [7]वृजनम् इमानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम् ।

(1624) "**वृजी वर्जने**" (VII-रुधादिः-1461. सक. सेट्. पर.)

'—त्यागे वृतौ च' इति **वोपदेवः** । '—त्यागे' इति **काशकृत्स्नो**ऽपि । '**वृणक्ति वर्जने** वृङ्क्ते यौ वर्जयति वर्जति ।' (श्लो. 59) इति **देवः** । '—वरणे' इति **धनपालशाकटायनौ** । 'वृजी —' इति पठित्वा '**वृची वरणे** इति **दौर्गाः**—वर्कः (अदादौ वृक्ते)' इति **क्षीरतरङ्गिण्यां** दृश्यते । '**वृचि** वरणे इति **दुर्गादयः** पठन्ति' इति **मा.धा. वृत्तिः** ।
काशकृत्स्नधातुपाठे '**वृची हिंसायाम्**' इति स्वतन्त्रो धातुः दृश्यते । तत्र रुधादौ इतः पूर्वं 'वृजी वर्जने' इति च पठितम् । **धातुकाव्यव्याख्याने** (3. 3) 'वृची वरणे इति **केचित्**' इत्युक्तम् ।

---

1. निष्ठायाम्, '**श्वीदितो निष्ठायाम्**' (7-2-14) इति अनिट्त्वम्, ततश्च 'चोः कुः' (8-2-30) इति कुत्वे रूपमेवम् ।
2. '**ऋदुपधाच्च**—' (3-1-110) इति क्यप्प्रत्यये रूपमेवम् ।
3. '**इक् कृष्यादिभ्यः**' (वा. 3-3-108) इति इक् । **वृजयो** जनपदाः ।
4. घञि '**चजोः कु**—' (7-3-52) इति कुत्वम् ।
5. '**द्वितीयायाञ्च**' (3-4-53) इति द्वितीयान्त उपपदे परीप्सायां गम्यमानायां णमुल्प्रत्यये रूपमेवम् । परीप्सा=त्वरा । अत्र निदानं तु 'अनुदात्तं पदमेकवर्जम्' (6-1-158) इति निर्देश एव । परीप्सायामिति नानुवर्ततेऽत्र, इति **हरदत्तः** ।
6. '**वृजेः किच्च**' (द. उ. 5-53) इति इनच्प्रत्ययः, किच्च भवति । **वृजिनम्**=पापम् । कित्वान्न गुणः ।
7. '**कृपृवृजि**—' (द. उ. 5-26) इति छन्दसि विषये क्युप्रत्यये अनादेशे च रूपमेवम् । **वृजनम्**=निवारणम्, अन्तरिक्षं च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्जकः-र्जिका, वर्जकः-र्जिका, विवर्जिषकः-षिका, वरीवृजकः-जिका ;
वर्जिता-त्री, वर्जयिता-त्री, विवर्जिषिता-त्री, वरीवृजिता-त्री ;
[1]वृञ्जन्-ती, वर्जयन्-न्ती, विवर्जिषन्-न्ती ; —
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**गर्जति**वत् (422) ज्ञेयानि । [2]वृक्तः,[A] [3]प्रवर्ग्यम् , [4]वर्जित्वा, [5]वृजिनम् , वर्णः,[6] इत्यादिकानि रूपाण्यधिकान्यत्रेति विशेषः।

(1625) " **वृजी वर्जने** " (X-चुरादिः-1813. सक. सेट्. उभ.)

आधृषीयः । तेन णिज्विकल्पः ।

'—**त्यागे**' इति **काशकृत्स्नवोपदेवौ** ।

वर्जकः-र्जिका, विवर्जयिषकः-षिका ; वर्जकः-र्जिका, विवर्जिषकः-षिका, वरीवृजकः-जिका ;
वर्जयिता-त्री, विवर्जयिषिता-त्री, वर्जिता-त्री, विवर्जिषिता-त्री, वरीवृजिता-त्री ;
इत्यादिकानि रूपाणि ण्यन्ते । ण्यन्तप्रकृतिकसन्नन्ते तु चौरादिक**छर्दयति**वत् (574) ज्ञेयानि । शुद्ध-तत्प्रकृतिकसन्नन्ते यङन्ते च सर्वाणि रूपाणि भौवादिक**गर्जति**वत् (422) बोध्यानि । [B]अपवृक्तः ।

(1626) " **वृञ् वरणे** " (V-स्वादिः-1254. सक. सेट्. उभ.)

'भक्तौ वृणीते **वरणे वृणोति वृणुते** वृञः ।
वृञ आवरणे वा णौ वारयेद् वरते वरेत् ॥' (श्लो. 32) इति **देवः** ।

'वरणे—**आवरणे**' इति **काशकृत्स्नः** । 'वरणम् स्वीकारश्च्छादनं वा' इति **धा. का. व्याख्या** (2-68)।

---

1. शतरि, विकरणप्रत्ययस्य शपः 'रुधादिभ्यः श्नम्' (1-3-78) इति श्नमि 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपे, अनुस्वारपरसवर्णयोः कृतयोः णत्वे च रूपमेवम् ।
2. ईदित्त्वात् 'श्वीदितो निष्ठायाम्' (7-2-14) इति निष्ठायामिडागमनिषेधः ।
3. ण्यति, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम् ।
4. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद् गुणः ।
5. '**वृजेः** किच्च' (द. उ. 5-13) इति इनच्प्रत्ययः किच्च भवति । कित्वान्न गुणः । वृज्यते वृणक्ति वा **वृजिनम्**=पापम् ।
6. वृणोति व्रियते वाऽसौ इति वर्णः=श्वेतादिगुणसंज्ञा, ब्राह्मणादीनां वा । औणादिके (द. उ. 8-46) नन्प्रत्यये णत्वे च रूपम् ।

A. 'संतक्तनद्धवसनाः परिवेग**वृक्ताः**........॥' धा. का. 3-3

B. '......स्थैर्यं सुदूर**मपवृक्त**धृतिप्रभावः ॥' धा. का. 3-48

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वारकः-रिका, वारकः-रिका, [1]विवरिषकः-विवरीषकः-वुवूर्षकः-र्षिका,
[2]वेव्रीयकः-यिका ;
वरिता-वरीता-त्री, वारयिता-त्री, विवरिषिता-विवरीषिता-वुवूर्षिता-त्री, वेव्रीयिता
-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि क्रैयादिकवृणातिवत् (1622) ऊह्यानि। शतरि [3]विवृण्वन्[A]-ती, ण्यन्तात् क्विपि-वाः-वारौ-वारः [[4]वारांनिधिः], [5]प्रावारः,[B] प्रवरः उत्तरासङ्गः, [6]यवेभ्यो गां वारयन्, [7]विवारी, [8]परिवारः-परीवाराः,

---

1. सन्नन्ते 'इट् सनि वा' (7-2-41) इति इडागमविकल्पः। तस्य च 'वृतो वा' (7-2-38) इति वा दीर्घः। अनिट्पक्षे 'इको झल्' (1-2-9) इति सनः कित्त्वे 'अज्झनगमां सनि' (6-4-16) इति दीर्घे 'उदोष्ठ्यपूर्वस्य' (7-1-102) इति उत्वे, रपरत्वे च 'हलि च' (8-2-27) इति (उपधायाः) इकः दीर्घे च रूपमेवम्।

2. यङन्ते 'रीङ् ऋतः' (7-4-27) इति रीङादेशे रूपमेवम्।

3. शतरि, 'स्वादिभ्यः श्नुः' (3-1-73) इति श्नुप्रत्ययः। यणादेशः।

4. ण्यन्तात् क्विपि **वाः—वारांनिधिः** इति **क्षीरस्वामिना** उक्तम्।

5. प्रोपसृष्टात् '**वृणोते**राच्छादने' (3-3-5) इति आच्छादनेऽर्थे घञ्प्रत्ययः। 'उपसर्गस्य घञि—' (6-3-122) इति दीर्घे **प्रावारः**। आच्छादनादन्यत्र **प्रवरः**-उत्तरासङ्ग इति अवेव। 'अन्यत्रापि बाहुलकात् क्तिन्विषये **प्रवरा** गौरिति अवेव भवति' इति **हरदत्तः**।

6. '**वारणार्थाना**मीप्सितः' (1-4-27) इति वारणार्थे यवस्य अपादानसंज्ञा भवति। वारणम् प्रवृत्तिविघात इत्यर्थः।

7. णिनिप्रत्यये रूपमेवम्।

8. 'द्वौ वारावय मे **वारो** गवां **वार**श्च सञ्चये।
परिवारस्तु ण्यन्ताद् बाहुलकेन कर्तरि घञि॥' इति **भोजः** इति **प्रक्रियासर्वस्वे**। **परिवारस्तु**—ण्यन्तात् बाहुलकेन कर्तरि घञ्। अन्यत्र **परीवाराः**=कृपयः इति।

A. 'तेजः क्षात्रं **विवृण्वन्तं** दिधक्षन्तमिवानलम्॥' भ. का. 6-40

B. 'यशुर्विन्ध्यं शरन्मेघाः **प्रावारैः प्रवरै**रिव।' भ. का. 7-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परिवारयमाणाः कण्टका वृक्षं स्वयमेव, [1]वृत्यम्[A], [2]वार्यम्, वर्यः, [B]पतिंवरा[3], [4]वराकः, [C]वराकी, [5]वरः, [6]नीवारः, वारम्, [D]अश्ववाराः, निवरः, [7]वर्मा-वर्मी, वार्मिकायणिः, संवर्मयिता, चाक्रवर्मणः, वरितुम्-[E]आवरीतुम्,[8] आपहारवर्मणः, [9]वर्णः, वर्णी-ब्रह्मचारी, ब्राह्मणवर्णी, [10]वरुणः, वारुणी,

---

1. 'एतिस्तुशास्वृ—' (3-1-109) इति क्यप्प्रत्यये तुकि च रूपमेवम्।
2. 'ण्यदपीष्यते' इति **क्षीरस्वामी**। अस्य मूलं मृग्यम्। तन्मते ण्यति रूपमेवम्। **वर्यः** इत्यत्र तु 'अवद्यपण्य**वर्याः**—' (3-1-101) इति निपात्यते अनिरोधेऽर्थे। **वार्यो**ऽन्यः। स्त्रियां **वर्या**।
3. 'संज्ञायां भृतॄवृजि—' (3-2-46) इति खच्। 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुमागमे रूपमेवम्।
4. 'जल्पभिक्षकुट्टलुण्टवृङः—' (3-2-155) इति षाकन्प्रत्ययः। स्त्रियां ङीष्प्रत्यये **वराकी**। स्त्रियां बाहुलकात् क्तिनं बाधित्वाऽयमेव भवति इति **हरदत्तः**।
5. 'ग्रहवृदृ—' (3-3-58) इत्यप्प्रत्ययः। **निवरः** इत्यप्। **निवरा** कन्या। 'लिङ्गकारिकायामवन्तस्य पुंस्त्वानुशासनं प्रायिकम्' इति **न्यासः** (3-3-48)। इति **धातुवृत्तिः**।
6. 'नौ वृ धान्ये' (3-3-48) इति निशब्द उपपदे धान्यविशेषेऽभिधेये घञ्प्रत्ययः। अपोऽपवादः। 'उपसर्गस्य घञि—' (6-3-122) इति दीर्घः। अधान्ये **निवरः**।
7. औणादिके मनिन्प्रत्यये रूपमेवम्। **वर्मी**—इत्यत्र व्रीह्यादित्वात् इनिप्रत्यये रूपमेवम्।
8. '**वृतो** वा' (7-2-38) इति दीर्घविकल्पः।
9. 'कृवृ—' (द. उ-5-42) इति नप्रत्यये, गुणे रेफात्परस्य नकारस्य णत्वे च रूपमेवम्।
10. 'कृवृ—' (द. उ. 5-52) इत्यादिना उनन्प्रत्यये गुणणत्वयोश्च रूपमेवम्।

A. 'आददत्यस्तेन **वृत्येन** स्तुत्यो जुष्येण सङ्गतः।' भ. का. 6-56.

B. 'विश्वंभरा साम रथन्तराख्यं **पतिंवरा** चापि धनञ्जयश्च।' इति **प्रक्रियासर्वस्वे**।

C. 'मृत्योरुपेतात् परिपालये सतीम् एतां **वराकी**मथ सोऽभ्युपैतु वा।' वा.वि. 1-52

D. 'परस्परोत्पीडितजानुभागा दुःखेन निश्चक्रमुर**श्ववाराः**॥' शि. व. 3-66.

E. '**आवरीतु**मिवाकाशं **वरितुं** वीनिवोत्थितम्।' भ. का. 9-24.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वरुणानी, मैत्रावरुणः, [1]वारि, [2]वर्णुः, [3]वृकः, [4]वर्गः, [5]वरण्डः, [6]वरणम्, वारणः, वरणा, [7]वरसानः, [8]वरूथः, [9]वर्वरः-वर्वरी, [10]वरत्रा, [11]वरुत्रम्, [12]वरूषः, [13]वृशः, सन्नन्तात् उप्रत्यये-विवरिषुः-विवरीषुः-वुवूर्षुः[A] ।

(1627) " वृञ् आवरणे " (X-चुरादिः-1814. सक. सेट्. उभ.)

आधृषीयः । तेन णिज्विकल्पः ।

'वृञ आवरणे वा णौ वारयेद् वरते वरेत् ॥' (श्लो. 32) इति देवः ।

वारकः-रिका, विवारयिषकः-षिका, वारकः-रिका, विवरिषकः-विवरीषकः-वुवूर्षकः-र्षिका, वेव्रीयकः-यिका ;

वारयिता-त्री, विवारयिषिता-त्री, वरिता-वरीता-त्री, विवरिषिता-विवरीषिता-वुवूर्षिता-त्री, वेव्रीयिता-त्री ;

---

1. णिजन्तात् औणादिके (द. उ. 1-53) इञ्प्रत्यये रूपम् । वार्यते तदिति **वारि** जलम् ।
2. औणादिके (द. उ. 1-148) णुप्रत्यये रूपमेवम् । वृणोति व्रियते वा **वर्णुः**= नदविशेषः ।
3. 'सृवृभूशुषि—' (द. उ. 3-19) इति कप्रत्ययो भवति किच्च । **वृकः**—श्वापदः, क्षुद्रश्च ।
4. औणादिकः (द. उ. 3-62) गन्प्रत्ययः । **वर्गः**=संघातः ।
5. औणादिके (द. उ. 5-9) अण्डन्प्रत्यये रूपमेवम् । वृणोति व्रियते वा **वरण्डः**= काष्ठादिसंघातः ।
6. 'सुयुरुवृञो युच्' (द. उ. 5-20) इति युच्प्रत्ययः । **वरणम्**=कन्याप्रदानम् । ल्युटि सिद्धमपीदं पदं संज्ञार्थमुणादिष्वपि निष्पादितमिति ज्ञेयम् । 'रूढिशब्दप्रकाराः ताच्छीलिकाः' (भाष्यम् 3-2-56) इत्यत्र स्पष्टमिदम् ।
7. औणादिके (द. उ. 5-29) असानच्प्रत्यये रूपमेवम् । **वरसानः**=मनोरथः ।
8. औणादिकः (द. उ. 6-31) ऊथन्प्रत्ययः । **वरूथः**=रथगुप्तिः ।
9. 'कृगॄशॄवृञ्चतिभ्यः ष्वरच्' (द. उ. 8-47) इति ष्वरच्प्रत्यये रूपमेवम् । **वर्वरः**=कामः । स्त्रियां तु ङीषि **वर्वरी**=नदी ।
10. 'वृञश्चित्' (द. उ. 8-58) इति अत्रन्प्रत्ययो भवति । **वरत्रा**=चर्मरज्जुः ।
11. औणादिके (द. उ. 8. 93) उत्रप्रत्यये रूपमेवम् । **वरुत्रम्**=अभिप्रेतम् ।
12. औणादिके (द. उ. 9-19) ऊषन्प्रत्यये रूपमेवम् । **वरूषः**=भोजनम् ।
13. औणादिके (द. उ. 10-15) शक्प्रत्यये रूपमेवम् । **वृशः**=आर्द्रकम् ।

A. '**संवुवूर्षुः** स्वमाकूतमाज्ञां **विवरिषुर्द्रुतम्**' ।' भ. का. 9-26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि ण्यन्तं, तत्प्रकृतिकसन्नन्तं विना क्रैयादिक-**वृणाति**वत् (1622) ज्ञेयानि। ण्यन्ते तत्प्रकृतिकसन्नन्ते च यथासम्भवमूह्यानि।

(1628) **"वृण प्रीणने"** (VI-तुदादिः-1330. अक. सेट्. पर.)

'**पृण** प्रीणने' इत्यत्र '**वृण** इति दन्त्योष्ठ्यादिरप्यत्र पठितव्यः।' इति **मा. धा. वृत्तिः**। तथा च **भाष्यम्**—'धात्वन्तरं **पृणिवृणी**' इति। 'धात्वन्तरम् इति। तौदादिकौ इत्यर्थः' इति **कैयटः**। **क्षीरतरङ्गिण्यां** नोपात्तः।

वर्णकः-र्णिका, वर्णकः-र्णिका, विवर्णिषकः-षिका, वरीवृणकः-णिका; वर्णिता-त्री, वर्णयिता-त्री, विवर्णिषिता-त्री, वरीवृणिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**गर्जति**वत् (422) ऊह्यानि। कर्मणि क्तः-वर्णितः।

(1629) **"वृतु वर्तने"** (I-भ्वादिः-758. अक. सेट्. आत्म.) **वृतादिः**।

'वर्तयेद् भाषणार्थे णौ वर्तने शपि वर्तते ॥' (श्लो. 96) इति **देवः**।

वर्तनं=स्थितिः इति **क्षीरस्वामी**।

[1]वर्तकः-र्तिका, [2]वर्तकः-र्तिका, विवृत्सकः-[3] विवर्तिषकः-षिका, [4]वरीवृतकः-

---

1. 'सार्वधातुकार्धधातुकयोः' (7. 3. 84) इति गुणः। स च 'उरण् रपरः' (1-1-51) इति रेफपरो भवति। एवमुत्तरत्रापि ऊह्यम्।
2. '**वर्तका** शकुनौ प्राचाम्' (वा. 7. 3. 45) इति निपातनात् शकुनौ वाच्ये 'प्रत्ययस्थात्—' (7-3-44) इति इत्वं न भवति; **वर्तका** लट्वाख्यः शकुनिः। **उदीचां तु वर्तिका** इत्येव। **वर्त्तिका**—दीपस्य दशा।
3. '**वृद्भ्यः** स्यसनोः' (1-3-92) इति वा परस्मैपदम्। 'न **वृद्भ्यश्च**तुर्भ्यः' (7-2-59) इति **वृतादिभ्यः** सकारादेरार्धधातुकस्य परस्मैपदेषु इडभावे, झलादेः सनः 'हलन्ताच्च' (1-2-10) इति कित्त्वात् न गुणः। "'न वृद्भ्यः चतुर्भ्यः' (7-2-59) इत्यत्र **भाष्यवार्तिकयोः**—'सिद्धं तु **वृतादीना**मात्मनेपदेन समान-पदस्थस्येड्वचनात्' इत्युक्तत्वात् कृत्परेऽपि सादौ परस्मैपदलुकि च इटः प्रतिषेधो भवति।" इति **धातुवृत्तिः**। यदा तु **विवृत्सति** इति निष्पाद्य तदन्तात् कृतो विवक्ष्यन्ते तदा **विवृत्सकः** इत्यादीनीति बोध्यम्। यदा तु **विवर्तिषते** इति निष्पाद्य, तदन्तात् कृतोविवक्ष्यन्ते, तदा **विवर्तिषकः** इत्यादि भवति। एवं सन्नन्ते सर्वत्र रूपद्वयं बोध्यम्।
4. '**रीगृत्वतः**' (वा. 7-4-90) इति रीगागम इति **मा. धा. वृत्तौ**। वस्तुतः '**रीगृदुपधस्य** च' (7-4-90) इति सूत्रेण अभ्यासस्य रीगागमे रूपमेवम् इति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तिका ; वर्तिता-त्री, वर्तयिता-त्री, विवर्तिषिता-त्री, विवृत्सिता-त्री, वरीवृतिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकतृप्यतिवत् (770) ऊह्यानि । [1]वृत्तम्-[A]त्तः, वर्तितम्-तः, [2]नीवृत्-उपावृत् , [3]निर्वर्त्स्यन्[B] [C]वर्तिष्यमाणः, [4]वर्तिष्णुः,[D] [5]वनवर्ती, [6]व्यावर्ती, [7]वृत्यम्, वार्त्तः [8]समावर्तनीयः, वृत्त्वा, [9]आर्यावर्तः वर्तित्वा,

---

1. 'णेरध्ययने वृत्तम्' (7-2-26) इति ण्यन्तस्य निष्ठायाम् अध्ययनार्थे इडभावो णिलुक् च निपात्यते । तेन **वृत्तो** गुणो देवदत्तेन, **वृत्तं** पारायणं देवदत्तेन । अन्यत्र **वर्तित**मिति । "वृतिरयमकर्मकः, स ण्यर्थे वर्तमानः सकर्मको भवति । 'तेन निर्वृत्तं' (4-2-68; 5-1-79) इति हि प्रकृतेरेव कर्मणि क्तप्रत्ययो दृश्यते । तद्वदिहापि ण्यर्थवृत्तेरेव च **वृतेः** 'वृत्तो गुणो देवदत्तेन' इति भविष्यति; निपातनमनर्थकम् ? तत्क्रियते–यदापि णिचैव ण्यर्थोऽभिधीयते, तदा-**वर्तित**मित्यध्ययने मा भूदिति **केचित्**। **अपरे** तु-**वर्त्तितो** गुणो देवदत्तेन इत्यपि इच्छन्ति ।" इति **काशिकावृत्तिः** (7-2-6)। शुद्धे तु धातोः उदित्त्वादस्य क्त्वायां वेट्कत्वात् 'यस्य विभाषा' (7-2-15) इतीट्प्रतिषेधः।
2. क्विपि, संहितायां विषये 'नहिवृति—' (6-3-116) इति पूर्वपदस्य दीर्घो भवति । **नीवृत्**=जनपदः, **उपावृत्**=उपावृत्तिः ।
3. '**वृद्भ्यः स्यसनोः**' (1-3-92) इति स्यप्रत्यये विवक्षिते वा परस्मैपदम् । तेन रूपद्वयम् ।
4. 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतु—' (3-2-136) इति तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययः ।
5. वने वर्तन्ते इति, 'व्रते' (3-2-80) इति णिनिप्रत्ययः ।
6. 'कर्मव्यतीहारे णच् स्त्रियाम्' (3-3-43) इति णच्प्रत्ययः । तदन्तात् 'णचः स्त्रियामञ्' (5-4-14) इत्यञ् । तदन्तात् 'टिड्ढाणञ्—' (4-1-15) इति ङीप् । '**वार्त्ता प्रवृत्तिर्वृत्तान्तः**' **इत्यमरः**।
7. 'ऋदुपधात्—' (3-1-110) इति क्यप्प्रत्ययः । **वृत्तिरस्त्यस्याम्** इत्यर्थे 'वृत्तेश्च' (वा. 5-2-101) इति णप्रत्ययः ।
8. समावृत्यतेऽस्मादिति **समावर्तनीयः**=गुरुः । 'बाहुलकात् अपादाने अनीयर्' इति **प्रक्रियासर्वस्वे** ।
9. आर्याः वर्तन्ते यत्रेति अधिकरणे घञ्प्रत्ययः । **आर्यावर्तः** पुण्यभूमिः ।

A. 'उद्वृत्तनयनो मित्रान् मन्त्रिणः स्वान् व्यसर्जयत् ॥' भ. का. 9-16.
B. 'रामोऽपि हतमारीचो **निवर्त्स्यन्** खरनादिनः ।' भ. का. 6-5.
C. '**वर्त्स्यिष्यमाण**मात्मानं सीतापत्युरिवान्तिके ।' भ. का. 8-68.
D. 'निराकरिष्णवो भानुं दिवं **वर्तिष्णवो**ऽभितः । ' भ. का. 7-3.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वृत्त्वा[1], ल्यपि-निर्वर्त्य,[A] [2]हस्तवर्तं वर्तयन्, [3]वर्तिः, [4]वर्तनिः वर्तनी, [5]वर्तिका, [6]वर्त्म, [7]वृत्रः ; इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्ति ।

(1630) " **वृतु वरणे** " (IV-दिवादिः-1160. सक. सेट्. आत्म.) **वृतादिः** । '**केचित्** पूर्वत्र वाग्रहणमस्यादिं पठित्वा (कृत्वा) 'वावृतु वरणे' इत्याहुः' इति **धा. का. व्याख्या** (2-60)। अन्यत्सर्वं पूर्वधातौ (1591) द्रष्टव्यम् । **धातुवृत्तौ** 'वृतु —' इत्येव उक्तम् । '**वरणे श्यनि वृत्येत**' इति **देवः** पपाठेति **पुरुषकार** (श्लो. 131) वचनादुन्नीयते । सांप्रतं **देवे** पाठागमभ्रंशान्नोपलभ्यते ।

वर्तकः-र्तिका, वर्तकः-र्तिका, विवर्तिषकः-षिका, वरीवृतकः-तिका ; वर्तिता-त्री, वर्तयिता-त्री, विवर्तिषिता-त्री, वरीवृतिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकपर्षतिवत् (1054) ज्ञेयानि । [8]वृत्तम्, निष्ठायाम्-वृत्तः वृत्तवान्, क्यपि-[9]वृत्यम्, [10]वृत्त्वा-वर्तित्वा[B], इमानि रूपाण्यधिकानि इति विशेषः ।

---

1. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । तेन रूपद्वयं बोध्यम् ।
2. ण्यन्तादस्मात् 'हस्ते **वर्त्ति**ग्रहोः' (3-4-39) इति हस्तवाचिनि करणे उपपदे णमुल् । **हस्तवर्तं** वर्त्तयन्, हस्तेन वर्त्तयन् । एवं **करवर्त्तम्**, इत्यादि च ।
3. 'हृपिशिरुहिवृति—' (द. उ. 1-47) इति इन्प्रत्ययः । वर्तते वृत्यते वा **वर्त्तिः**-द्रव्यम्, चेलवेष्टनं दीपाङ्गं च ।
4. '**वृतेः**' (द. उ. 1-6) इति अनिप्रत्यये रूपमेवम् । वर्तन्तेऽनेनेति **वर्त्तनिः**= मार्गः । 'स्तोत्रे **वर्त्तनिः**, उञ्छादित्वात् (6-1-160) अन्तोदात्तः' इति **श्वेतवनवासी** । **वर्तनी** इति तु ल्युडन्तात् स्त्रियां टित्त्वेन ङीपि बोध्यम् । **वर्तनी** एकपदी ।
5. '**वृते**स्तिकन्' (द. उ. 3-28) इति तिकन्प्रत्ययः । **वर्त्तिका**=पक्षिजातिः । '**वर्त्तिका**=व्याख्याग्रन्थविशेषः, शकुनिविशेषश्च' इति **श्वेतवनवासी** । वर्त्तिकैव **वार्त्तिकम्** ।
6. औणादिके (द. उ. 6-73) मनिन्प्रत्यये रूपमेवम् । 'भूतेऽपि दृश्यन्ते' (3-3-2) इति भूतेऽयं प्रत्ययः । वृत्तं तत् इति **वर्त्म** पन्थाः, इतिवृत्तं च ।
7. औणादिके (द. उ. 8-31) रक्प्रत्यये रूपमेवम् । **वृत्रः**=दानवः, वायुश्च ।
8. धातोरुदित्त्वेन क्त्वायामिड्विकल्पनात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीट्प्रतिषेधः ।
9. 'ऋदुपधात्—' (3-1-110) इति क्यप्प्रत्ययः ।
10. '**उदितो** वा' (7-2-56) इति क्त्वायामिड्विकल्पः । तेन रूपद्वयं बोध्यम् ।

A. 'तस्य **निर्वर्त्य** कर्तव्यं सुग्रीवो राघवाज्ञया ।' भ. का. 6-145.

B. 'निकुञ्जे तस्य **वर्त्तित्वा** रम्ये प्रक्ष्वेदिताः परम् ।' भ. का. 7-103.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1631) "**वृतु भाषार्थः**" (X-चुरादिः-1782. अक. सेट्. उभ.)

आस्वदीयः ।

'**वर्तयेद् भाषणार्थे णौ** वर्तने शपि वर्तते ॥' (श्लो. 96) इति **देवः** । 'भासार्थः' इति **क्षीरस्वामिशाकटायनादयः** । '—दीप्तौ' इति **वोपदेवः** । 'तथा च **क्षीरस्वामी**—'भासा दीप्तिरर्थो येषां ते भासार्थाः' इति **मा. धा. वृत्तौ** । **क्षीरतरङ्गिण्यां** तु नायं पाठ उपलभ्यते । उदित्करणात् णिचो वैकल्पिकत्वम् इति ज्ञेयम् ।

वर्तकः-र्तिका, विवर्तयिषकः-षिका, वर्तकः-विवर्तिषकः-वरीवृतकः-तिका; वर्तयिता-त्री, विवर्तयिषिता-त्री, वर्तिता, विवर्तिषिता, वरीवृतिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**जासयति**वत् (596) ऊह्यानि । यङन्ते सर्वत्र '**रीगृदुपधस्य**—' (7-4-90) इति रीगागमः ।

(1632) "**वृधु वृद्धौ**" (I-भ्वादिः-759. सक. सेट्. आत्म.)

'तदेव रूपं भाषार्थे **वृधेर्वृद्धौ तु** वर्धते ।' (श्लो. 124) इति **देवः** । वर्धकः-र्धिका, वर्धकः-र्धिका, विवर्धिषकः-षिका, विवृत्सकः-त्सिका, वरीवृधकः-धिका; वर्धिता-त्री, वर्धयिता-त्री, विवर्धिषिता-विवर्त्सिता-त्री, वरीवृधिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**वृतु**(1629)धातुवत् ऊह्यानि । [1]वर्द्धनः, [2]वर्धिष्णुः, वृद्धः, वर्षिष्ठः, वर्षीयान्, [3]वृद्धिः, वार्धुषिकः, [4]वर्धमानः,

---

1. '**नन्दिग्रहिपचादिभ्यः**—' (3-1-134) इति नन्द्यादित्वात् संज्ञायां कर्तरि ल्युः । एवम् **आनन्दवर्धनः** इत्यत्रापि कर्मण्यणं बाधित्वा ल्युरेव ।
2. तच्छीलादिषु कर्तृषु '**अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधु**—' (3-2-136) इति **इष्णुच्**प्रत्ययः ।
3. वृद्धिनिमित्तं द्रव्यम् **वृद्धिः** तादर्थ्यात् ताच्छब्द्यम् । '**क्तिच्क्तौ च**—' (3-3-74) इति संज्ञायां क्तिच् । यद्वा क्तिन् । '**वृद्धिरादैच्**' (1-1-1) इत्यत्र **वृद्धिशब्दस्तु** संज्ञात्वेऽपि क्तिन्नन्त एव, न क्तिजन्त इति पस्पशायां **भाष्ये** प्रतिपादितत्वात् स्पष्टम् ।
4. '**ताच्छील्यवयोवचनशक्तिषु**—' (3-2-129) इत्यादिना यथासम्भवमर्थत्रयेऽपि चानश्प्रत्ययः । **वर्धमानः** त्रिविक्रमः । '**रूढिशब्दप्रकाराः ताच्छीलिकाः**' (**भाष्यम्** 3-2-56) इति वचनात् रूढोऽयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वृधसानः, [2]वर्ध्रम् इत्यादिकानि रूपाण्यस्य धातोः विशेषेण भवन्तीति ज्ञेयम् ।

(1633) "वृधु भाषार्थः" (X-चुरादिः-1783. अक. सेट्. उभ.) आस्वदीयः ।

'छेदने पूरणे चार्थे वर्धे्र्वर्धयतीति णौ ॥ (श्लो. 123) इति देवः ।

वर्धकः-र्धिका, विवर्धयिषकः-षिका, वर्धकः-र्धिका, विवर्धिषकः-षिका, वरीवृधकः-धिका ; वर्धयिता-त्री, विवर्धयिषिता-त्री, वर्धिता-त्री, विवर्धिषिता-त्री, वरीवृधिता-त्री; इत्यादिकानि रूपाणि सर्वाणि चौरादिकजासयतिवत् (596) ज्ञेयानि । णिजभावपक्षे यङन्ते सर्वत्र अभ्यासस्य रीगागमो भवतीति विशेषः ।

(1634) "वृश वरणे" (IV-दिवादिः-1226. सक. सेट्. पर.)

वर्शकः-र्शिका, वर्शकः-र्शिका, विवर्शिषकः-षिका, वरीवृशकः-शिका ; वर्शिता-त्री, वर्शयिता-त्री, विवर्शिषिता-त्री, वरीवृशिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकक्रुश्यतिवत् (254) ज्ञेयानि । [3]वृशः, अतिशयेन वृशः-वृशिष्ठः, वृशीयान् ।

(1635) "वृष शक्तिबन्धने" (X-चुरादिः-1705. सक. सेट्. आत्म.) आकुस्मीयः ।

'शक्तौ वर्षयने, सेके वर्षेत्, स्नेहे तु वर्षते ॥' (श्लो. 176) इति देवः ।

'—शक्तिबन्धनम्=प्रजननसामर्थ्यम्' इति क्षीरस्वामी । धातुवृत्तौ केशवस्वामिनाम्नोद्ध्रियतेऽयं पाठः । '—शक्तिसंबन्धने' इति मैत्रेयः । 'धृष—' इत्येके ।

वर्षकः-र्षिका, विवर्षयिषकः-षिका ; वर्षयिता-त्री, विवर्षयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिकचर्चयतिवत् (507) विशेषरूपाणि विना ज्ञेयानि ।

---

1. वर्धते इति वृधसानः गर्भः । 'ऋजिवृधि—' [द. उ. 5-30] इत्यसानच्-प्रत्ययः । प्रत्ययस्य कित्वान्न गुणः ।
2. वर्धतेऽम्भसा स्पृष्टम् इति वर्ध्रम् चर्मच्छेदः । 'वृधिवपिभ्यां रन्' [द. उ. 8-45] इति रन्प्रत्ययः ।
3. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कप्रत्यये रूपमेवम् । वृशः= यवसः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1636) **" वृषु सेचने "** (1-भ्वादिः-706. सक. सेट्. पर.) [अ]

'........सेके वर्षेत्, स्नेहे तु वर्षते ॥' (श्लो. 176) इति **देवः** ।

'—हिंसासंक्लेशनयोः' इति **धातुवृत्तिः** ।

वर्षकः-र्षिका, वर्षकः-र्षिका, विवर्षिषकः-षिका, वरीवृषकः-षिका ; वर्षिता-त्री, वर्षयिता-त्री, विवर्षिषिता-त्री, वरीवृषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकपर्षतिवत् (1054) ज्ञेयानि । [1]वर्षम्, [2]वृषः, [3]प्रवर्षुकः[A], [4]प्रावृट्-उपावृट्-वृषौ-वृषः, [5]वृष्यम्[B]-वर्ष्यम्, [6]वर्षणम्, वृष्ट्वा-वर्षित्वा, [7]वृष्टिः, [8]वृषणः, [9]वृष्णिः, [10]वृषा,

---

[अ] अयं धातुः सकर्मकः । कर्मणः प्रसिद्धत्वात्तु न प्रयुज्यते । यथा 'मेघो **वर्षति**' इत्यत्र अनुक्तमपि जलरूपं कर्म गम्यते । यदि जलातिरिक्तं कर्म स्यात्; तदा प्रयुज्यते कर्म 'पार्थः शरान् **वर्षति**' इति ।

1. वर्षतीति—**वर्षम्** । 'अज्विधौ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्' (वा. 3-3-56) इति अच्प्रत्ययः । **वर्षा**=ऋतुः । "अजन्तस्य पुंस्त्वं प्रायिकम् । 'वर्षोऽस्त्री' इति दर्शनाद् घञपि" इति **प्र. सर्वस्वे** ।
2. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः ।
3. 'लषपतपदस्थाभूवृष—' (3-2-154) इति तच्छीलादिषु कर्तृषु उकञ्प्रत्यये रूपमेवम् । **प्रवर्षुकः**=पर्जन्यः ।
4. सम्पदादित्वात् स्त्रियां क्विप्प्रत्यये संहितायां विषये **'नहिवृतिवृषि—'** (6-3-116) इति उपसर्गस्य दीर्घः ।
5. ऋदुपधत्वान्नित्ये क्यपि प्राप्ते 'विभाषा **कृवृषोः**' (3-1-120) इति विकल्पेन क्यप्प्रत्ययः । तेन रूपद्वयं बोध्यम् । वृषाय हितम् इत्येतस्मिन् तद्धितार्थे 'खलय-वमाषतिलवृष—' (5-1-7) इति यत्प्रत्ययः ।
6. **'वृषभो वर्षणात्'** (पस्पशायां **महाभाष्ये** 1-1-1) इति **भाष्यकार**प्रयोगात् ल्युडपि भवति । नपुंसके क्तप्रत्ययस्य पाक्षिकोऽपवादोऽयम् ।
7. 'तितुत्र—' (7-2-9) इति निषेधात् इडागमो न भवति ।
8. बाहुलकात् औणादिके क्युन्प्रत्यये, णत्वे च रूपमेवम् ।
9. **'सृवृषिभ्यां कित्'** [द. उ. 1-19] इति निप्रत्ययः किच्च भवति । तेन रूपमेवम् । वर्षतीति **वृष्णिः**=वसुदेववंशः, मेघो वा ।
10. 'कनिन् युवृषि—' [द. उ. 6-51] इति कनिन्प्रत्यये रूपमेवम् । **वृषा**=महेन्द्रः वृषभश्च । महेन्द्राद्रिः, नभश्च इति **केचित्** ।

A. 'जग्मुः प्रसादं द्विजमानसानि यौवर्षुका पुष्पचयं बभूव ।' भ. का. 2-37.

B. 'धर्मैकसरतां नित्यमवृष्यफलभोजनाम् !' भ का. 6-63.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वृषभः, [2]वृषलः, वृष्टो देवः, इमानि विशेषरूपाणि।

(1637) "**वृहू उद्यमने**" (VI-तुदादिः-1347. अक. वेट्. पर.)

'**उद्यमः**=उद्धरणम्' इति **क्षीरस्वामी**। दन्त्योष्ठ्यादिः इति **सर्वे**। **केचित्** 'बृहू पवर्गादिः' इति। **क्षीरतरङ्गिण्याम**पि 'बृहू' इत्येव दृश्यते। वर्हकः-र्हिका, वर्हकः-र्हिका, विवर्हिषकः-[3]विवृक्षकः-क्षिका, वरीवृहकः-हिका; वर्हिता-त्री, वर्हयिता-त्री, विवर्हिषिता-त्री, विवृक्षिता-त्री, वरीवृहिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**दर्हति**वत् (868) ज्ञेयानि। [4]वृढः-वृढवान्, [5]वर्हित्वा-वृढ्वा इमानि रूपाण्यधिकान्यत्रेति विशेषः। '**वृहु**' इति उदित्पक्षे क्त्वायामेवेड्विकल्पः इति विशेषः।

(1638) "**वॄ वरणे**" (IX-क्र्यादिः-1490. सक. सेट्. पर.)

'—वृत्त्यां भृत्याम्' इति **वोपदेवः**। **प्वादिः, ल्वादिश्च**।

'**वृवॄञोरञितो धातोर्वृणाति** वरणे भवेत्।
वृणाति च वृणीते च वृञस्तत्रार्थ इष्यते॥' (श्लो. 37) इति **देवः**।

अत्र **पुरुषकारस्त्वाह**—"वॄ वरणे, वॄञ् वरणे, ...
तत्र चाद्यं (वॄ इत्यस्य) पवर्गतृतीयादिं **बहवः** पठन्ति। वॄ भरणे इति **स्वामिशाकटायनौ**" इति। **धातुवृत्तौ** तु 'आद्यशब्देन ञित् वृणातिरुच्यते। **स्वामिशाकटायनाव**प्येवं पठित्वा भरणार्थत्वमाहतुः' इति। **क्षीरतरङ्गिण्यां** मुद्रित**शाकटायन**धातुपाठे चोभयत्र दन्त्योष्ठ्यादिपाठ एवोपलभ्यते। 'बॄञ् वरणे' इति पठित्वा, 'भरणे इत्यप्येके' इति **धा. का. व्याख्यायाम्** (3-6)।

---

1. '**ऋषिवृषिभ्यां** कित्' (द. उ. 7-19) इत्यभच्प्रत्यये रूपमेवम्। **वृषभः**= गोपतिः, युवा वा। वायुः इति **केचित्**।
2. '**वृषादिभ्यश्चित्**' (द. उ. 8-109) इति कलप्रत्ययः। **वृषलः**=शूद्रः।
3. ऊदित्त्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' (7-2-44) इति वलादेरार्धधातुकस्य विकल्पेन इडागमः। तेन सन्नन्ते सर्वत्र रूपद्वयं बोध्यम्। '**हलन्ताच्च**' (1-2-10) इति सनः कित्त्वान्न गुणः।
4. निष्ठायाम् 'यस्य विभाषा' (7-2-15) इति इण्निषेधः।
5. क्त्वायाम् 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणः। इड्विकल्पात् रूपद्वयं ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वारकः-रिका, वारकः-रिका, विवरीषकः-विवरिषकः-वुवूर्षकः-र्षिका, वोवुरकः-रिका;
वरिता-वरीता-त्री, वारयिता-त्री, विवरिषिता-विवरीषिता-वुवूर्षिता-त्री, वोवुरिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि जौहोत्यादिक**पिपर्ति**वत् (1055) ज्ञेयानि । [1]वर्विः ।

(1639) " **वृञ् वरणे** " (IX-क्र्यादिः-1486. सक. सेट्. उभ.)

प्वादिः, ल्वादिश्च ।

'वृवृञोरञितो धातोर्वृणाति वरणे भवेत् ।
वृणाति च वृणीते वृञस्तत्रार्थ इष्यते ॥' (श्लो. 37) इति **देवः** ।
'वृञ्-इति **नन्दी**' इति **क्षीरस्वामी** ।

वारकः-रिका, वारकः-रिका, विवरिषकः-विवरीषकः-वुवूर्षकः-र्षिका, वोवुरकः-रिका;
वरिता-त्री, वारयिता-त्री, विवरिषिता-विवरीषिता-वुवूर्षिता-त्री, वोवुरिता-त्री ;
इत्यादिकानि रूपाणि सर्वाणि जौहोत्यादिक**पिपर्ति**वत् (1055) ऊह्यानि ।
शतरि-[2]वृणन्-ती, शानचि-वृणानः, वारयमाणः, [3]वरः, [4]वूर्णिः, [5]वरुणः, इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1640) " **वेञ् तन्तुसन्ताने** " (I-भ्वादिः-1006. सक. अनि. पर.)

यजादिः ।

'**वयने वयतीत्येवं तन्तुसन्तान** इष्यते ॥' (श्लो. 10) इति **देवः** ।
'व्याप्तौ छादने चाह **भट्टिः**' इति **धा. का. व्याख्या** (2-43) ।

---

1. 'वृदृभ्यां विन्' (द. उ. 1-23) इति विन्प्रत्यये रूपमेवम् । वृणातीति **वर्विः**= धात्री । अत्र "वृ' इत्यस्य 'पृ' इति **नारायणश्वेतनवासिनौ** । **अन्ये** तु'वृ' इत्येव पठन्ति " इति तत्र **टिप्पण्यामुक्तम्** ।
2. शतरि 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्ना विकरणप्रत्ययः । 'श्नाभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे च रूपमेवम् । एवं शानजन्तेऽपि प्रक्रिया ऊह्या ।
3. 'ऋदोरप्' (3-3-57) इति भावे अप्प्रत्ययः । घञोऽपवादः ।
4. 'ऋल्वादिभ्यः—' (वा. 8-2-44) इति निष्ठातकारस्य नकारादेशे णत्वे च रूपमेवम् ।
5. 'कृवृदृ—' (द.उ. 5-52) इति उनन्प्रत्यये रूपम् । 'वृ' इति **स्वामिसम्मतः** पाठः । **द. उ. वृत्त्याम्** 'वृ' इत्येव दृश्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वायकः-यिका, [2]वायकः-यिका, [3]विवासकः-सिका, [4]वावायकः-यिका ;
वाता-त्री, वाययिता-त्री, विवासिता-त्री, वावायिता-त्री ;
[5]वयन्-न्ती, वाययन्-न्ती, विवासन्-न्ती ;—
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षायतिवत् (263) ज्ञेयानि । [6]तन्तुवायः, [7]प्रवाणी-निष्प्रवाणिः, [8]उतम्-उतः-उतवान्, प्रोतः, [9]प्रवयणम्, उत्वा, [10]प्रवाय, [11]ऊतिः, [12]विः=पक्षी, वेमा । [13]आवायः, [14]पटोत् ।

---

1. 'आदेच उपदेशे—' (6-1-45) इत्याकारः। 'आतो युक्—' (7-3-33) इति युगागमः।
2. ण्यन्ते सर्वत्रादन्तलक्षणपुगपवादः 'शाच्छासाह्वाव्यावेपां युक्' (7-3-37) इति युगागमः।
3. धातोरनिट्त्वात् रूपाण्येवम्। सन्नन्तेऽभ्यासस्यैकारः।
4. यङन्ते सर्वत्र औपदेशिकस्य एकारस्य आकार इति विशेषः। नच वाच्यम्, 'ग्रहिज्यावयि—' (6-1-16) इत्यनेन यङन्ते ङित्त्वात् कथं न सम्प्रसारणमिति ; यतोऽत्र 'वयि' ग्रहणात् 'वेञो वयिः' (2-4-41) इति प्राप्तस्य वय्यादेशविशिष्टस्य वेञ एव ग्रहणम् ; न त्वस्येति यङन्ते ङित्त्वेऽपि प्रत्ययस्य न सम्प्रसारणमिति ज्ञेयम्। क्त्वादिषु तु यजादित्वात् सम्प्रसारणमिति विशेषः।
5. '—अशिति' (6-1-45) इत्युक्तत्वात् शतरि न आकारः। अयादेशः।
6. तन्तून् वयति इति तन्तुवायः। 'ह्वावामश्च' (3-2-2) इति कर्मणि उपपदे अण् प्रत्ययः। 'आतोऽनुपसर्गे कः' (3-2-3) इत्यस्यापवादः।
"आत्वभाविन एजन्तात् आकारान्तनिमित्तकः। [(6-1-45)।
प्रत्ययो ज्ञाप्यते सर्वो "ह्वावामश्चे" (3-2-2) त्वणा पुनः॥" इति पदमञ्जरी
7. नवं वासः प्रवयन्त्यस्यामिति प्रवाणी तन्तुवायशलाका। 'ल्युट् च' (3-3-115) इति अधिकरणे ल्युट्। टित्त्वात् स्त्रियां ङीप्।
8. निष्ठायाम् 'वचिस्वपियजादीनाम् किति' (6-1-15) इति सम्प्रसारणे, पूर्वरूपे च रूपमेवम्। एवं क्त्वाप्रभृतिष्वपि ज्ञेयम्।
9. प्रवयणम् इत्यत्र ल्युट्। 'कृत्यचः' (8-4-29) इति णत्वम्।
10. 'न ल्यपि' (6-1-49) इति सम्प्रसारणनिषेधः।
11. 'ऊतियूति—' (3-3-97) इति क्तिन्नन्तो निपातितः। ऊतिः=वयनम्—इति क्षीरस्वामी। काशिकादिषु तु अवतेरूठि स्वरार्थं निपातनम् इत्युक्तम्।
12. 'वेञो डित्' (द. उ. 1-62) इति इण्प्रत्ययः। प्रत्ययस्य डित्त्वात् टिलोपः। नीडं—वयतीति विः पक्षी ; तन्तुवायो वा।
13. 'अवहाराधारावायानामुपसंख्यानम्' (वा. 3-3-122) इति आङ्पूर्वकादस्मात् घापवादो घञ्। आवयन्ति अस्मिन् इति आवायः=तन्तुवायवाटिका।
14. पटं वयतीति पटोत्। 'क्विप् च' (3-2-76) इति क्विप्। सम्प्रसारणे पूर्वरूपे च 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुक्। इति प्रक्रियासर्वस्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1641) " वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु "

(I-भ्वादिः-877. सक. सेट्. उभ.)

'वादित्रं वाद्यभाण्डम्, तस्य वादनार्थग्रहणम्' इति **क्षीरस्वामी**। 'वीणृ ज्ञानचिन्तानिशामनेषु' इति **काशकृत्स्नः**। तत्र भ्वादौ इतः पूर्वं णकारदण्डके '**वेणृ** गतिप्रेषणाश्लेषणेषु' इति दृश्यते। 'उत माता महिषमन्ववेनत्' (तै. सं. 3-2-113) इत्यत्र **भाष्यकारा**स्तवर्गपञ्चमान्तममुं पेठुः। '**वेनृ**— इत्येके' इति पक्षमवलम्ब्य **धा. का. व्याख्यायां** (2-77) शानचि प्रयोगः दृश्यते- '**प्रवुन्ध्यवेणीजववेनमाना....**' इति।

वेणकः-णिका, वेणकः-णिका, विवेणिषकः-षिका, वेवेणकः-णिका;
वेणिता-त्री, वेणयिता-त्री, विवेणिषिता-त्री, वेवेणिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**केलति**वत् (262) ऊह्यानि। [1]वेणिः, वेणिका, [2]वेणी, [3]वीणा इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1642) " वेथृ याचने " (I-भ्वादिः-34. द्विक. सेट्. आत्म.)

'वेद्द—' इति **कौशिकः** इति **मा. धा. वृत्तिः**। धातुरयं द्विकर्मकः इति च तत्रोक्तम्।

वेथकः-थिका, वेथकः-थिका, विवेथिषकः-षिका, वेवेथकः-थिका;
वेथिता-त्री, वेथयिता-त्री, विवेथिषिता-त्री, वेवेथिता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**केलति**वत् (262) ज्ञेयानि।

(1643) " टु वेपृ कम्पने " (I-भ्वादिः-367. अक. सेट्. आत्म.)

'—चलने' इति **जैन-कातन्त्र-शाकटायन-हेमादयः**।

वेपकः-पिका, वेपकः-पिका, विवेपिषकः-षिका, वेवेपकः-पिका;
वेपिता-त्री, वेपयिता-त्री, विवेपिषिता-त्री, वेवेपिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**केपति**वत् (261) ज्ञेयानि। शानचि

---

1. औणादिके (द. उ. 1-46) इन्प्रत्यये रूपमेवम्। ततो ण्वुलि स्त्रियां टापि च **वेणिका** इति।
2. 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीष्प्रत्यये रूपम्। **वेणी**=स्त्रीजटा।
3. '**रास्नासास्नास्थूणावीणाः**' (द. उ. 5-47) इति (नकारपाठपक्षे) नकारस्य णत्वं अगुणत्वं च निपात्यते। तेन रूपमेवम्। **वीणा**=वल्लकी।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[A]प्रवेपमानः, [1]वेपथुः[B], [2]प्रवेपनम्[C], [3]विपिनम् इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1644) "वेल कालोपदेशे" (X-चुरादिः-1881. सक. सेट्. उभ.)

अदन्तः।

'काल इत्यपि धातुः इति मैत्रेयः' इति मा. धा. वृत्तिः।
धा. का. व्याख्यायामपि (3-56) एवमेव। '—कालोपयोगे' इति केचित्। 'कालोपदेशे—काले सन्दर्भे च' इति काशकृत्स्नः।
वेलकः-लिका, विवेलयिषकः-षिका; वेलयिता-त्री, विवेलयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककेतयतिवत् (260) ज्ञेयानि।

(1645) "वेलृ चलने" (I-भ्वादिः-535. सक. सेट्. पर.)

'वेलेत्तु चलने वेलेर्वरणे विलतीति शे॥' (श्लो. 157) इति देवः।
'—गतौ' इति काशकृत्स्नकातन्त्रौ पठतः। 'वेल्ल–' इति पठित्वा वेल्लेर्द्विर्बद्धो लकारः—वेल्लति' इति क्षीरस्वामी।
वेलकः-लिका, वेलकः-लिका, विवेलिषकः-षिका, वेवेलकः-लिका;
वेलिता-त्री, वेलयिता-त्री, विवेलिषिता-त्री, वेवेलिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककेलतिवत् (262) ज्ञेयानि।
[4]वेला, [5]वेलनः, 'वेलुः=हस्ताभरणम्' इति काशकृत्स्नः।

---

1. 'द्वितोऽथुच्' (3-3-19) इति अथुच्प्रत्यये रूपमेवम्।
2. 'न भाभूपूकमिगमिप्यायीवेपाम्' (8-4-34) इति निषेधात् कृत्स्थस्य नकारस्य णकारादेशो न भवति।
3. 'वेपितुह्योः—' (द. उ. 5-18) इति इनन्प्रत्ययः, किच्च, प्रकृतेः ह्रस्वश्च भवति। विपिनम्=गहनम् अब्जं वा। 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः।
4. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये रूपमेवम्। "वेला तु 'वेल कालोपदेशे' (10-165) इत्यस्मात्" इति क्षीरतरङ्गिण्यां दृश्यते। तदेव न्याय्यम्।
5. 'चलनशब्दार्थात्—'(3-2-148) इति ताच्छीलिके युच्प्रत्यये अनादेशे च रूपमेवम्।

A. 'प्रवेपमानो नितरां स्मरारिमिदं वचो व्यक्तमथाध्युवाच॥' कु. सं. 9.6.
B. 'विलोलतां चक्षुषि हस्तवेपथुं भ्रुवोर्विभङ्गं स्तनयुग्मवल्गितम्।' भ. का. 11.37.
C. 'नातिप्रवेपनं वायोर्मया गोपायिते वने॥' भ. का. 9-107.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1646) " वेल्ल चलने " (I-भ्वादिः-540. अक. सेट्. पर.)

तरङ्गिण्यां पाठोऽयं न दृश्यते। **मैत्रेय**सम्मतः पाठः इति **धातुवृत्ति**दर्शनात् ज्ञायते।

वेल्लकः-ल्लिका, वेल्लकः-ल्लिका, विवेल्लिषकः-षिका, वेवेल्लकः-ल्लिका ;
वेल्लिता-त्री, वेल्लयिता-त्री, विवेल्लिषिता-त्री, वेवेल्लिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**केलति**वत् (262) बोध्यानि।
[1]वेल्लः, कर्तरि क्तप्रत्यये प्रवेल्लितम्[A] इति।

(1647) " वेवीङ् वेतिना तुल्ये "

(II. अदादिः-1077. सक. सेट्. आत्म.) [अ] **छान्दसः**।

'—वी(धातु)समानार्थे' इति **हेमचन्द्रः**। 'कान्तिगतिव्याप्तिक्षेपप्रजनखादनेषु' इति **वोपदेवः**।' इति **पा. धा. समीक्षा**। 'वी गतिप्रजनकान्त्यसनखादनेषु', इत्युक्तेन वेतिना तुल्येऽर्थ इत्यर्थः' इति **धा. का. व्याख्याने** (2-52)। 'सेटावात्मनेभाषौ इमौ छान्दसौ' इति **भाष्यवार्त्तिकयोः** स्थितम् (महाभाष्यम् 1-1-6)। नेति **कातन्त्रीयाः**। **पाणिनि**स्तु न विशेषमाह' इति **क्षी. टिप्पण्यां** दृश्यते। '—वेतनातुल्ये कर्मकरवद् व्यवहारे' इति **काशकृत्स्नः**। अयं पाठोऽपपाठ इति **क्षीरस्वामिना** दूषितम्।

वेवायकः-यिका, वेवायकः-यिका, [2]विवेविषकः-षिका ;
वेवयिता-त्री, वेवाय-यिता-त्री, विवेविषिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि आदादिक**दीधीङ्**धातुवत् (845) बोध्यानि।
[B]वेव्यानः इति शानचि।

[अ] 'दरिद्राजागृदीधीङाम् एकाचां च चिरेर्जिरेः।
अदन्तोर्णोति**वेवीङां** स्मर्यते नेत् तथा लङेः॥' इति **वचनात्**
अस्य धातोरनेकाच्त्वात् यङ् न भवति।

1. संज्ञायां घञि रूपमेवम्। **वेल्लः**=विषम्।
2. सन्नन्तात् ण्वुलि सन इडागमे द्वित्वादिकेषु कृतेषु उत्तरखण्डे 'यीवर्णयोर्दीधीवेव्योः' (7-4-65) इतीकारलोपे षत्वे च रूपमेवम्।

A. 'फणीश्वरक्ष्वेलरुषं **प्रवेल्लित**स्रजं मुहुः पेलववातफेलनात्॥' धा. का. 1-69.
B. 'देवं स्फुरद्दीधितिमम्बुजाक्ष्यो **वेव्यान**मालोक्य विमोहमापुः॥' धा. का. 2-52.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1648) **" वेष्ट वेष्टने "** (I-भ्वादिः-255. सक. सेट्. आत्म.)

'वेष्ट **विलुठने**' इति **धा. का. व्या.** (1-34) पाठः अकर्मक इति च।
'वेष्टनम्—ग्रन्थनम्, लोटनम्—परिहाणिश्च [परिणाहश्च (हाणं)]' इति **क्षीरस्वामी। काशकृत्स्नः** धातुममुं न पपाठ।

वेष्टकः-ष्टिका, वेष्टकः-ष्टिका, विवेष्टिषकः-षिका, वेवेष्टकः-ष्टिका;
वेष्टिता-त्री, वेष्टयिता-त्री, विवेष्टिषिता-त्री, वेवेष्टिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि **गोष्टति**वत् (434) बोध्यानि। यङ्विषये न सारूप्यम् इति ज्ञेयम्। वेवेष्टकः इत्यादिकं यङन्ते सर्वत्र ऊह्यम्।

(1649) **" वेसृ गतौ "** (I-भ्वादिः-720. सक. सेट्. पर.)

'पिसृ पेसृ' इत्यत्र भ्वादौ '....**वेसृ** इति **सभ्याः**। वेसरः-नासाभूषणम्। [A]वेसरोऽश्वतरः' इति **क्षीरस्वामी। धातुवृत्तावपि** 'इह **क्वचित्कोशे** विसृ **वेसृ**....इत्यपि पठ्यते' इत्युक्तम्। 'एते **मैत्रेयादिषु** न दृश्येते' इति चोक्तम्।

वेसकः-सिका, वेसकः-सिका, विवेसिषकः-षिका, वेवेसकः-सिका;
वेसिता-त्री, वेसयिता-त्री, विवेसिषिता-त्री, वेवेसिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**पेसृति**वत् (1061) ज्ञेयानि।

(1650) **" वेहृ प्रयत्ने "** (I-भ्वादिः-643. अक. सेट्. आत्म.)

'वेहृ—' **इत्येके** इति **धा. का. व्या.** (1-81)। " दन्त्यौष्ठ्यादिः। केवलौष्ठ्यादिः **इत्येके,**" इति **मा. धा. वृत्तिः**।

वेहकः-हिका, वेहकः-हिका, विवेहिषकः-षिका, वेवेहकः-हिका;
वेहिता-त्री, वेहयिता-त्री, विवेहिषिता-त्री, वेवेहिता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**पेसृति**वत् (1061) ज्ञेयानि। [1]वेहत्, गोवेहत्।

(1651) **" ओ वै शोषणे "** (I-भ्वादिः-921. सक. अनि. पर.)

'गतिगन्धनयोर्वाति **वायतीति तु शोषणे**।' (श्लो. 10) इति **देवः**।

---

1. 'संश्चतृपद्वेहत्' (द. उ. 6-6) इति कतिप्रत्यये निपात्यते। तेन रूपमेवम्। **वेहद्**=गर्भोपघातिनी गौः। **गोवेहत्** इत्यत्र तु 'पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्—' (2-1-65) इत्यादिना कर्मधारयः।

A. 'तूर्णं प्रणेत्रा कृतनादमुच्चकैः प्रणोदितं **वेसरयुग्म**मध्वनि।' शि. व. 12-9.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वायकः-यिका, [1]वापकः-यिका, विवासकः-सिका, वावायकः-यिका ;
वाता-त्री, वापयिता-त्री, विवासिता-त्री, वावायिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि विशेषरूपाणि विना भौवादिक**पायति**वत् (1062) ज्ञेयानि । [2]वानम्, [3]वायुः इमे रूपे विशेषेण भवतः ।

(1652) " **व्यच व्याजीकरणे** " (VI-तुदादिः-1293. सक. सेट्. पर.)

अत्र **क्षीरतरङ्गिण्यां** '**व्यच संभवे**' इति पठित्वा '**व्यज** व्याजीकरणे' इति पृथक् धातुत्वेन पठ्यते। किं च '–'**व्याजीकरणे**' लिङ्गाद् घञि कुत्वाभावः-व्याजः' इति च दृश्यते। '—व्याजीकरणे—निमित्ते' इति **काशकृत्स्नः**। **मैत्रेयचन्द्रकाशकृत्स्नशाकटायनहेमादयः** 'व्यच—' इत्येव पठन्ति। '**व्यच**—' इत्येव न्याय्यम् इति **धा. का. व्या.** (2-73) दर्शनाज्ज्ञायते।
व्याचकः-चिका, व्याचकः-चिका, [4]विव्यचिषकः-षिका, वाव्य[वेवि]चकः-चिका ;
व्यचिता-त्री, व्याचयिता-त्री, विव्यचिषिता-त्री, वाव्य[वेवि]चिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कुथति**वत् (280) ज्ञेयानि।
[5]विचन्-ती, [6]विचिता-त्री,

---

1. णिजन्ते सर्वत्र आदन्तलक्षणः पुगागम इति विशेषः।
2. 'ओदितश्च' (8-2-45) इति निष्ठातकारस्य नत्वे रूपमेवम्।
3. '**कृवापा**—' [द. उ. 1-86] इति उण्प्रत्यये रूपमेवम्। वाति वायति वा द्रव्याणि इति **वायुः**। "**भाष्यकार**मते अजेरपि धातोः 'यजिमनि—' (द. उ. 1-134) इत्यादिना बहुलग्रहणाद् युचि 'वा यौ' (2-4-57) इत्यनेन वादेशे '**वायुः**' इति पदं सिद्ध्यति" इति प्रकृतसूत्रे (द. उ. 1-86) **टिप्पण्या**मुक्तम्। तथा च **भाष्ये** 'न तर्हीदानीमिदं 'वा यौ' (2-4-75) इति वक्तव्यम्। वक्तव्यं च। किं प्रयोजनम्? नेयं विभाषा। किं तर्हि? आदेशोऽयं विधीयते। 'वा' इत्ययमादेशो भवत्यजेर्यौ परतः—**वायुरिति**" इत्येवं दृश्यते।
4. सनोऽकित्त्वात् न सम्प्रसारणम्। '—अनसि' (वा. 1-2-1) इति प्रसज्यप्रतिषेध इति वादिनां मते तु सनोऽपि कित्त्वेन 'ग्रहिज्यावयिव्यधिवष्टि**विचति**—' (6-1-16) इत्यादिना सम्प्रसारणे,पूर्वरूपे च **विविचिषकः-षिका**, इत्यादीनि रूपाणीति बोध्यम्।
5. शतरि 'दिवादिभ्यः—' (3-1-69) इति श्यन्। तस्य 'सार्वधातुकमपित्' (1-2-4) इति अपित्सार्वधातुकत्वात् ङिद्वद्भावः। तेन चकारात् क्ङिति च संप्रसारणम् भवति। अतो गुणाभावश्च। तेन रूपमेवम्।
6. '**व्यचेः** कुटादित्वमनसीति वक्तव्यम्' (वा. 1-2-1) इति ङिद्वद्भावात् संप्रसारणमिति ज्ञेयम्। **उरुव्यचाः** इत्यत्र गतिकारकपूर्वस्यापि असुन्। '–अनसि'(वा.1-2-1) इति पर्युदासात् न ङित्वम्। **पदमर्यम् उद्विचिता** इति। **न्यासे**ऽपि एवमेव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

घञि-[1]व्याचः, [2]विचित्वा इमानि रूपाण्यधिकान्यत्रेति विशेषः। अस्य धातोः ण्यन्ते सर्वत्र व्याचयिता-त्री, इत्येवमादीनि ऊह्यानि।

(1653) "**व्यथ भयसंचलनयोः**" (I-भ्वादिः-764. सक. सेट्. आत्म.)

घटादिः, षिच्च। '—दुःखभयचलनयोः' इति **काशकृत्स्नः**। '—दुःखचलनयोः' इति **दुर्गः**। 'दुःखे चाले भये' इति **वोपदेवः** इति **पा. धा. समीक्षा**।

व्याथकः-थिका, [3]व्यथकः-थिका, विव्यथिषकः-षिका, वाव्यथकः-थिका; व्यथिता-त्री, व्यथयिता-त्री, विव्यथिषिता-त्री, वाव्यथिता-त्री;

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**क्रुथति**वत् (280) ऊह्यानि।

[4]अव्यथ्यः[A], [5]अव्याथी, [6]अव्यथी[B], [7]व्यथनः, [8]व्यथा, [9]व्याथं-व्याथम्-व्यथं-व्यथम्,

---

1. घञि कुत्वाभावे रूपमेवम्।
2. 'न क्त्वा सेट्' (1-2-18) इत्यकित्त्वेऽपि क्त्वः कृत्त्वाद् '**व्यचेः** कुटादित्वम्–' (वा. 1-2-1) इति ङित्त्वेन संप्रसारणं गुणाभावश्च। तेन रूपमेवम् इति ज्ञेयम्।
3. धातोरस्य घटादित्वात् ण्यन्ते, '**घटादयो** मितः' (ग. सू. भ्वादिः) इति मित्त्वात् 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वे रूपमेवम्। ण्यन्ते सर्वत्र एवमेव प्रक्रिया ऊह्या।
4. 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्या**व्यथ्याः**' (3-1-114) इति कर्तरि क्यप्प्रत्यये निपात्यते। न व्यथते—**अव्यथ्यः**।
5. '...**व्यथ**वदवसां प्रतिषिद्धानाम्' (ग. सू. 3-1-134) इति ग्रह्यादिपाठात् णिनिप्रत्यये **अव्याथी** इति रूपं सिद्ध्यति इति **क्षीरस्वामी**। प्रकृतगणसूत्रे '**व्यथ**' इत्यत्र 'व्रज' इत्येव दृश्यते।
6. 'जिदृक्षिविश्रीण्वमा**व्यथ**—' (3-2-157) इति तच्छीलादिषु कर्तृषु इनिप्रत्यये रूपमेवम्।
7. तच्छीलादिषु कर्तृषु युच्प्रत्यये रूपमेवम्।
8. अस्य धातोः षित्त्वाद् '**षिद्**भिदादिभ्योऽङ् (3-3-104) इति स्त्रियामङ्प्रत्ययः।
9. णमुलि, 'चिण्णमुलोः—' (6-4-93) इति णौ परत उपधायाः दीर्घः विकल्पेन भवति। तेन रूपद्वयं बोध्यम्।

A. 'समुत्तरन्ताव**व्यथ्यौ** नदान् भियोद्ध्यसन्निभान्।' भ. का. 6-60.

B. 'न्याय्यं परिभवी ब्रूहि पापम**व्यथिनं** कपिम्॥' भ. का. 7-20.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विथुरः, [1]विधुरः इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्ति। शानचि-[A]व्यथ्यमानः।

(1654) "व्यध ताडने" (IV-दिवादिः-1181. सक. अनि. पर.)

'—ताडनं—प्रायेण विदारणपर्यन्तम्' इति धा. का. व्या. (2-63)।

व्याधकः-धिका, व्याधकः-धिका, विव्यत्सकः-त्सिका, [2]वेविधकः-धिका;
व्यद्धा-व्यद्ध्री, व्याधयिता-त्री, विव्यत्सिता-त्री, वेविधिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि प्लीधातुवत् (1081) बोध्यानि। [3]मृगावित्-[B]मर्मावित्-दैत्यावित्-हृदयावित्, व्यद्धा, [4]व्यधः, आव्याधः, [5]आविधम्, विध्यन्,

---

1. 'व्यथेः संप्रसारणं धः किच्च' (द. उ. 8-22) इति उरच्प्रत्यये, संप्रसारणे, धातुथकारस्य धकारादेशे च रूपमेवम्। **विधुरः**=चोरः, अनग्निकः, राक्षसश्च। **धातुवृत्ता**वपि एवमेव स्थितम्। "...**व्यथ**धातौ न त्वेतद् युक्तम्। 'त्वमेषां विथुरा शवांसि' (ऋ. 6-25-3) 'अतिविद्धा **विथुरेणा** चिदस्रा' (ऋ. 8-96-2) इत्यादिमन्त्रेषु थकारपाठस्य निर्विवादत्वात्। यदपि **माधवे**नोक्तम्— 'विदिभिदि -' (3-2-162) इत्यत्र '**व्यथेः** संप्रसारणं च' इति वचनात् कुरचि थान्तं रूपमिति तदतिस्थवीयः। कुरज्विधायके सूत्रे **व्यथे**रुपसंख्यानस्याप्रसिद्धत्वात्। तस्मादिह 'धः किच्च' इति **दशपादी**पाठं पुरस्कुर्वन्तः **प्रसादकारादयो**ऽप्युपेक्ष्याः। कथं तर्हि **विधुर** इति प्रयोगस्य निर्वाह इति चेत्—धुरो विगत इति प्रादिसमासेनेत्यवधेहि। 'समासान्ताः' (5-4-69) इति सूत्रे **वृत्तिपदमञ्जर्यो**-स्तथैवोक्तत्वात्" इति **प्रौढमनोरमाकारः**। एवं **तत्त्वबोधिनीकारो**ऽपि। (द. उ 8-22) **टिप्पण्य**पीहानुसन्धेया। **काशिकायां** तु (3-2-162) '**व्यधेः** सम्प्रसारणं कुरच्च वक्तव्यः' इति दृश्यते।
2. यङन्ते 'ग्रहिज्यावयिव्यधि—' (6-1-16) इति सम्प्रसारणम्। तच्च 'न सम्प्रसारणे सम्प्रसारणम्' (6-1-37) इति निषेधात् पूर्वस्य वकारस्य न। यकारस्य सम्प्रसारणे पूर्वरूपादिकेषु च कृतेषु रूपमेवम्।
3. मृगं आविध्यतीति **मृगावित्**। 'ग्रहिज्यावयिव्यधि—' (6-1-16) इति संप्रसारणे, 'नहिवृतिवृषिव्यधिरुचि—' (6-3-116) इति क्विप्प्रत्ययान्तेषु उत्तरपदेषु पूर्वपदस्य दीर्घः संहितायां विषये। **दैत्यावित्** इत्यादिष्वपि एवमेव प्रक्रिया ज्ञेया।
4. '**व्यध**जपोरनुपसर्गे' (3-3-61) इति अनुपसर्गे अप्प्रत्ययः। घञोऽपवादः। उपसर्गे तु **आव्याधः** इति।
5. 'घञर्थे कविधानं स्थास्नापाव्यधि—' (वा. 3-3-58) इति अकर्तरि च कारके संज्ञायाम् कप्रत्ययो भवति। घञोऽपवादः। सम्प्रसारणादिकम्। आविध्यन्ति अनेनेत्या**विधम्** शस्त्रम्।

A. 'मन्मथायुधसंपातव्य**थ्यमान**मतिः पुनः॥' भ. का. 4-30.
B. 'ताविच्छनीकाशरुचिप्रतीचि स्ववैरि**मर्माविधि** पुंसि रागात्।' वा. वि. 3-21.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]व्याधः, णमुलि-व्याधं-व्याधम्[A], [2]विधुः, [3]विधुरः इमानि रूपाण्यधिकान्यत्रेति विशेषः। यगन्ते[B] विध्यमानः आविद्धम्-आविद्धः, आविद्धवान्, विद्धिः, विद्ध्वा।

(1655) " व्यय गतौ " (I-भ्वादिः-881. सक. सेट्. उभ.)

'वित्तत्यागे व्यययति व्ययति व्ययते गतौ।' (श्लो. 150) इति देवः।

व्यायकः-यिका, व्यायकः-यिका, विव्ययिषकः-षिका, वाव्ययकः-यिका;
व्ययिता-त्री, व्याययिता-त्री, विव्ययिषिता-त्री, वाव्ययिता-त्री;
व्ययन्[C]-न्ती, व्याययन्-न्ती, विव्ययिषन्-न्ती, वाव्ययन्-न्ती; —
व्ययिष्यन्-न्ती-ती, व्याययिष्यन्-न्ती-ती, विव्ययिषिष्यन्-न्ती-ती; —
व्ययमानः, व्याययमानः, विव्ययिषमाणः, वाव्यय्यमानः;
व्ययिष्यमाणः, व्याययिष्यमाणः, विव्ययिषिष्यमाणः, वाव्ययिष्यमाणः;
[4]व्यत्-व्ययौ-व्ययः; — —
व्ययितम्-तः, व्यायितम्-तः, विव्ययिषितः, वाव्ययितः-तवान्;
व्ययः, प्रव्ययी, व्ययः, विव्ययिषुः, वाव्ययः;
व्ययितव्यम्, व्याययितव्यम्, विव्ययिषितव्यम्, वाव्ययितव्यम्;
व्ययनीयम्, व्यायनीयम्, विव्ययिषणीयम्, वाव्ययनीयम्;
व्याय्यम्, व्याय्यम्, विव्ययिष्यम्, वाव्यय्यम्;
व्यय्यमानः, व्याय्यमानः, विव्ययिष्यमाणः, वाव्यय्यमाणः;
ईषद्व्ययः-दुर्व्ययः-सुव्ययः; — —
व्ययः, व्यायः, विव्ययः, वाव्ययः;
व्ययितुम्, व्याययितुम्, विव्ययिषितुम्, वाव्ययितुम्;

---

1. 'श्याद्व्यध—' (3-1-141) इत्यनुपसर्गे धातोः णप्रत्ययो भवति।
2. 'पृभिदिव्यधि—' (द. उ. 1-108) इति कुप्रत्यये संप्रसारणे च रूपमेवम्। विध्यतीति विधुः=आयुधः, विष्णुशशिवाय्वग्नयश्च।
3. 'विदिभिदि—' (3-2-162) इत्यत्र 'व्यधेः संप्रसारणं कुरच' (वा. 3-2-162) इति कुरच्प्रत्यये संप्रसारणे च विधुरः इति रूपं भवति। **प्रक्रियासर्वस्वे** तु औणादिके कुरच्प्रत्यये रूपमिदं साधितम्।
4. क्विपि वलिलोपे तुकि रूपमेवम्।

A. '**व्याधं व्याध**ममूढौ तौ यमसाच्चक्रतुर्विषौ ॥' भ. का. 5-3.
B. '**मर्माविद्धि**स्तमस्काण्डैः **विध्यमानो**ऽप्यनेकधा ॥' भ. का. 9-66.
C. 'चाप्या **व्ययद्**दाशविलोकमेषभ्रेषज्झषा यासदघं स्पशन्ती ॥' धा. का. 2-27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]व्यतिः, व्यायना, विव्ययिषा, वाव्यया ;
व्ययनम्, व्यायनम्, विव्ययिषणम्, वाव्ययनम् ;
व्ययित्वा, व्यायित्वा, विव्ययिषित्वा, वाव्ययित्वा ;
प्रव्यय्य, प्रव्याय्य, प्रविव्ययिष्य, प्रवाव्यय्य ;
व्ययम् २, व्ययित्वा २, } व्यायम् २, व्यायित्वा २, } विव्ययिषम् २, विव्ययिषित्वा २, } वाव्ययम् २ ; वाव्ययित्वा २. }

(1656) "व्यय वित्तसमुत्सर्गे" (X-चुरादिः-1932. सक. सेट्. उभ.)

अदन्तः ।

'**वित्तत्यागे व्यययति** व्ययति व्ययते गतौ ।' (श्लो. 150) इति **देवः** । 'व्यय गतौ' इति, 'वित्तसमुत्सर्गे' **समुत्सर्गस्त्यागः** । वित्तयति,........ **व्यय** वित्तसमुत्सर्गे इति **सभ्याः**" इति **क्षीरतरङ्गिण्यां** दृश्यते । इतः पूर्वं चुरादावग्रे 'व्यय क्षये' इति पठित्वा '**व्यप व्यय** इति **कौशिकः**, व्युदि व्यय इति **नन्दी**' इति च तत्रोपात्तमपीहानुसन्धेयम् । 'षट्ट हिंसायाम्' (चुरादौ) इत्यत्र "इह 'व्यय क्षये' इति **नन्दी** पठति । व्यपेत्य**परे** । **मैत्रेयदेवादयस्तु** उभयमपि न पठन्ति" इति **धातुवृत्तौ** दृश्यते । **काशकृत्स्नेना**पि 'व्यय क्षये' 'व्यय वित्तसमुत्सर्गे' इति पृथक्त्वेन पठितम् ।

व्ययकः-यिका, विव्ययिषकः-षिका, व्ययिता-त्री, विव्ययिषिता-त्री ; इत्येवमादीनि रूपाणि ऊह्यानि । अस्य धातोः अदन्तपाठसामर्थ्यात् ण्यन्ते ण्यन्तप्रकृतिकसन्नन्ते च सर्वत्र अल्लोपस्य स्थानिवत्त्वात् उपधावृद्धिः नेति ज्ञेयम् । बाहुल्कात् णिजभावपक्षे शानचि-[A]अपव्ययमानः इति ।

(1657) "व्युष दाहे" (IV-दिवादिः-1114. सक. सेट्. पर.)

धातुरयं "दन्त्योष्ठ्यादिः मूर्धन्यान्तश्च । तथा च **वैद्यके** (सुश्रुते 1-44) त्रिकटुकपर्याये **व्योष**शब्दः पठ्यते । अयमन्त्ये पुषादौ विभागे (अर्थे) पठिष्यते । **क्वचित् (तरङ्गिण्यादौ)** उभयत्र **विभागा**र्थो दन्त्यान्त ओष्ठ्यादिश्च

1. क्तिनि वलिलोपे रूपमेवम् ।
A. 'पृष्टेऽपव्ययमानस्तु........।' मनुः (8-60) ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(प्युस इति) पठ्यते। तत्र पुनःपाठे फलमेकत्रैवार्थे रूपद्वयसिद्धिः'' इति **धातुवृत्तौ** उक्तमिहानुसन्धेयम्। अयं धातुः **काशकृत्स्नीये** न पठितः।
व्योषकः-षिका, व्योषकः-षिका, वुव्योषिषकः-वुव्युषिषकः-षिका, वोव्युषकः-षिका; व्योषिता-त्री, व्योषयिता-त्री, वुव्योषिषिता-वुव्युषिषिता-त्री, वोव्युषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**कुप्यति**वत् (224) बोध्यानि। कित्त्वविकल्पनात् क्त्वायां व्युषित्वा-व्योषित्वा इति रूपद्वयमिति ज्ञेयम्।

(1658) **"व्युष विभागे"** (IV-दिवादिः-1215. सक. सेट्. पर.)

पुषादिः। अयं दाहार्थे पठितः, अर्थभेदेन अङर्थं दिवादावेव पुनः पठ्यते। '**प्युस**—' इति पठित्वा, "**प्युष** इति **दुर्गः**, **पुस** इत्ये**के**—पुस्तकम्, पुस्तं लेप्यादि कर्म'' इति **क्षीरस्वामी**। "**केचिदमुमोष्ठ्यादिं** दन्त्यान्तमिच्छन्ति—**व्युसे**ति। **अपरे** त्वयकारं **बुसे**ति'' इति **सायणः**। '**व्युस—वुस**' इति **सि. कौमुदी**। '**पुष**—' इति **काशकृत्स्नः**। '**प्युष**' इति **कातन्त्राः**, **अन्ये च वैयाकरणाः**' इति तत्र **टिप्पण्यां** दृश्यते। युक्तायुक्तत्वे त्वत्र सूरयः प्रमाणम्।
व्योषकः-षिका, व्योषकः-षिका, वुव्योषिषकः-वुव्युषिषकः-षिका, वोव्युषकः-षिका; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**पोषति**वत् (1026) ज्ञेयानि।

(1659) **"व्येञ् संवरणे"** (I-भ्वादिः-1007. सक. अनि. उभ.)

यजादिः। '**—संवरणे**—उपयोगितायाम्' इति **काशकृत्स्नः**।
'**—संवरणम्**—आच्छादनम्' इति **क्षीरस्वामी**।
व्यायकः-यिका, [1]व्यायकः-यिका, विव्यासकः-सिका, [2]वेवीयकः-यिका; व्याता-त्री, व्याययिता-त्री, विव्यासिता-त्री, वेवीयिता-त्री;

---

1. णौ परतः 'शाच्छासाह्वाव्यावेपां युक्' (7-3-37) इति युगागमो भवति। आदन्तलक्षणपुकोऽपवादः।
2. 'स्वपिस्यमिव्येञां यङि' (6-1-19) इति यङि परतः संप्रसारणे पूर्वरूपत्वे, 'हलः' (6-4-2) इति दीर्घे द्विर्वचने च रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**व्ययति**वत् (1640) ज्ञेयानि। शतरि व्ययन्-न्ती, [1]वीतम्-तः, क्विपि-संवीः-संव्यौ-संव्यः; [2]दोषवीः, [3]संव्याय, [4]परिवीय-परिव्याय, संवीय-संव्याय, [5]नीवी[A], [6]नीविः, इत्यादिकानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

(1660) "**व्रज गतौ**" (I-भ्वादिः-253. सक. सेट्. पर.)

व्राजकः-जिका, व्राजकः-जिका, विव्रजिषकः-षिका, वाव्रजकः-जिका;
व्रजिता-ती, व्राजयिता-त्री, विव्रजिषिता-त्री, वाव्रजिता-त्री;
इत्यादिकानि रूपाणि समस्तान्यपि भौवादिक**व्रजति**वत् (926) ज्ञेयानि।
[7]व्रजः, [8]व्रज्या, [9]व्राज्यम्, [10]परिव्राट्-परिव्राड्-परिव्राजौ-परिव्राजः, इमानि रूपाण्यधिकान्यत्रेति विशेषः। [11]व्राजिः, [12]वज्रम्।

---

1. निष्ठायाम् **यजादि**त्वात् संप्रसारणे, दीर्घे च रूपमेवम्।
'वपादेस्तु यवोव् विश्वोद् **दोषवी**श्च पटोत्तुकि।' इति **प्र. सर्वस्वे**।
2. दोषान् व्ययते इति **दोषवीः**। क्विपि रूपमेवम्।
3. ल्यपि 'व्यश्च' (6-1-43) इति संप्रसारणनिषेधः। तेन एवं रूपम्।
4. **परि**पूर्वकात् **व्येञ**स्तु 'विभाषा परेः' (6-1-44) इति ल्यपि सम्प्रसारणनिषेधविकल्पात् रूपद्वयमिति बोध्यम्। 'समो वा इत्येके' इति; तेन **संवीय—संव्याय** इति **प्र. सर्वस्वे**।
5. 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीषि रूपमेवम्। **नीवी** मूलधनम् इति **केचित्**। **नीवी**—वस्त्रग्रन्थिः।
6. '**नौ व्यो** यलोपः पूर्वपदस्य च दीर्घः' (द. उ. 1-64) इति नावुपपदे धातोः इण्-प्रत्ययः, डिच्च यलोपः पूर्वपदस्य च दीर्घः। निवीयतेऽसाविति **नीविः**।
7. 'गोचरसञ्चरवहव्रज—' (3-3-119) इत्यधिकरणे घप्रत्ययान्तो निपातितः। **व्रजः**=गोकुलम्।
8. '**व्रजयजोर्भावे क्यप्**' (3-3-98) इति भावे स्त्रीलिङ्गे क्यप्प्रत्ययः। क्तिनोऽपवादः। **परिव्रज्या** सन्न्यासः।
9. ण्यति, 'अजिव्रज्योश्च' (7-3-60) इति कुत्वनिषेधः।
10. परावुपपदे औणादिके (द. उ. 9-8) क्विप्प्रत्यये, दीर्घे जकारस्य षकारे च रूपमेवम्। परित्यज्य सर्वं व्रजति इति **परिव्राट्**=यतिः।
11. औणादिके (द. उ. 1-53) ञिप्रत्यये, ञित्त्वादुपधावृद्धिः। तेन रूपमेवम्। **व्राजिः**=मनः [मुनिः]।
12. व्रजति सर्वत्र प्रेरित इति औणादिके (द. उ. 8-46) रन्प्रत्यये निरूढः। रेफलोपो निपातनात्। **वज्रम्**=पविः।

A. '**नीवी**मतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः॥' कु. संभवे 1-38.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1661) "**व्रज मार्गसंस्कारगत्योः**" (X-चुरादिः. सक. सेट्. उभ.)
"**वजि** (व्रजि ?) मार्गसंस्कारयोर्गतौ चेति **मैत्रेयादयः**। **स्वामी** तु व्रजस्थाने **वजि** पठित्वा **मार्गे**ति द्वितीयं धातुमाह" इति **धातुवृत्तावुक्तम्**। '—मार्गणे' इति **धनपालः**। 'द्वौ धातू इत्यन्ये' इति **क्षीरस्वामी**। 'व्रज—' इति **चन्द्रः**। 'व्रज मार्गसंस्कारे' इति **दुर्गः**। उभयोरप्यनयोर्वज-व्रजपक्षयोर्मार्गणं संस्कार इत्येवार्थस्तन्त्रान्तरे पठ्यते" इति **पुरुषकारे** प्रोक्तम् (दैवश्लो. 57)।

व्राजकः-जिका, विव्राजयिषकः-षिका; व्राजयिता-त्री, विव्राजयिषिता-त्री; व्राजयन्-न्ती, विव्राजयिषन्-न्ती; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक-**क्षपयति**वत् (282) ज्ञेयानि।

(1662) "**व्रण शब्दार्थः**" (I-भ्वादिः-451. अक. सेट्. पर.)
'**व्रणेच्छब्दार्थविषये** व्रणयेद् गात्रचूर्णने।' (श्लो. 93) इति **देवः**।
'अयं बशादित्वेन **क्वचित्** पठ्यते। **सर्वत्र** दन्त्योष्ठ्यादिरेव।' इति **धातुवृत्तिः**।
व्राणकः-णिका, व्राणकः-णिका, विव्रणिषकः-षिका, वंव्रणकः-णिका;
व्रणिता-त्री, व्राणयिता-त्री, विव्रणिषिता-त्री, वंव्रणिता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**क्वणति**वत् (293) ज्ञेयानि।
'व्रण **क्रिमिभक्षणे**' इति **काशकृत्स्नः**।

(1663) "**व्रण गात्रविचूर्णने**" (X-चुरादिः-1937. सक. सेट्. उभ.)
अदन्तः। 'व्रणेच्छब्दार्थविषये **व्रणयेद् गात्रचूर्णने**' (श्लो. 93) इति **देवः**। **धातुवृत्तौ** 'व्रणति इति **दीप्त्यर्थे शपि**' इति दृश्यते। भ्वादौ तु **शब्दार्थे** एव पठितः।

व्रणकः-णिका, विव्रणयिषकः-षिका, व्रणयिता-त्री; विव्रणयिषिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कलयति**वत् (176) ऊह्यानि।

(1664) "**ओ व्रश्चू छेदने**" (VI-तुदादिः-1292. सक. वेट्. पर.)
[1]व्रश्चकः-श्चिका, व्रश्चकः-श्चिका,

---

1. अनुबन्धद्वयं विहाय धातुरयं उपदेशे सकारोपधः। तदुक्तम्—'नकारजावनुस्वार-पञ्चमौ झलि धातुषु। सकारजः शकारश्चेर्षाट्टवर्गस्तवर्गजः॥' इति। एवञ्च 'स्तोः श्चुना श्चुः' (8-4-40) इति श्चुत्वेन सर्वत्र शकारश्रवणमिति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]विव्रश्चिषकः-विव्रक्षकः-क्षिका, [2]वरीवृश्चकः-श्चिका ;
व्रश्चिता-त्री, [3]व्रष्टा-ष्ट्री, व्रश्चयिता-त्री, विव्रश्चिषिता-विव्रक्षिता-त्री, वरीवृश्चिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकमज्जतिवत् (1235) ज्ञेयानि । [4]व्रश्चित्वा, [5]वृक्णः-वृक्णवान् , [6]व्रस्च्यः, [7]व्रस्कः, [8]मूलवृट् , [9]वृश्चिकः, [10]वृक्षः इति विशेषरूपाणि ।

---

1. ऊदित्त्वादिड्विकल्पः । इडभावपक्षे 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति सकारलोपे, 'व्रश्चभ्रस्ज—' (8-2-36) इत्यादिना चकारस्य षकारे, 'षढोः कः सि' (8-2-41) इति ककारे, सनः सकारस्य षत्वे च **विव्रक्षकः** इत्यादीनि रूपाणि सन्नन्तेषु बोध्यानि ।

2. यङन्ते 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' (परि. 129) इति वचनात् प्रथमं सम्प्रसारणपूर्वरूपे, अनन्तरम्, 'रीग् ऋत्वतः' (वा. 7-4-90) इति रीगागमः ।

3. ऊदित्त्वेनेड्विकल्पनात् तृजादिषु रूपद्वयम् । इडभावपक्षे 'स्कोः—' (8-2-29) इति सलोपे, 'व्रश्च—' (8-2-36) इत्यादिना षत्वे, तृचस्तकारस्य ष्टुत्वेन टकारे च **व्रष्टा** इति रूपम् ।

4. धातोरूदित्त्वेनेड्विकल्पं प्राप्तं बाधित्वा, 'जॄव्रश्च्योः क्त्वि' (7-2-55) इति नित्यमिट् । 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् न सम्प्रसारणम् ।

5. निष्ठायाम् 'यस्य विभाषा' (7-2-15) इतीण्निषेधः । सम्प्रसारणपूर्वरूपादिकम् । 'स्कोः—' (8-2-29) इति सकारलोपः । ओदित्त्वात् निष्ठातकारस्य नकारः । 'चोः कुः' (8-2-30) इति कुत्वम् । 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः' (वा. 8-2-3) इति वचनेन 'व्रश्च—' (8-2-36) इति षत्वं प्रति निष्ठानत्वस्य सिद्धत्वात्, झल्परकत्वाभावात् न षत्वम् । णत्वम् । इयमत्र गहना प्रक्रिया ।

6. ण्यति 'चजोः—' (7-3-52) इति कुत्वे, अझल्परकत्वात् 'स्कोः—' (8-2-29) इति न सकारलोपः । 'निमित्तापाये नैमित्तिकस्याप्यपायः' (परि. 57) इति वचनेन चकारमाश्रित्य श्रुतः शकारः, शकारविगमे स्वयमेव सकारतां प्रत्यापद्यते ।

7. घञि चकारस्य कुत्वे पूर्ववत् शकारस्य सकारभावे च रूपमेवम् ।

8. मूलं वृश्चतीति **मूलवृट्** । 'क्विप् च' (3-2-76) इति क्विपि, सम्प्रसारणपूर्वरूपयोः सकारलोपे, व्रश्चादिषत्वे तस्य जश्त्वेन डकारे चर्त्वे च रूपमेवम् । **मूलवृत्** इति **क्षीरतरङ्गिण्यां** दृश्यते । स च अपपाठ इति भाति, तुकोऽप्रसिद्धेः ।

9. 'व्रश्चिकृषोः किकन्' (द. उ. 3-12) इति किकन्प्रत्यये सम्प्रसारणादिके च रूपमेवम् । **वृश्चिकः**=दन्दशूकविशेषः ।

10. 'स्नुव्रश्चि—' (द. उ. 9-25) इति क्सप्रत्ययः । सम्प्रसारणादिकम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1665) "व्री वरणे" (IX-क्र्यादिः-1504. सक. अनि. पर.) प्वादिः । '—वरणे - आवरणे' इति 'व्रीतः-व्रीतवान् आवारकेऽर्थे' इति च काशकृत्स्नः । '—गतौ च द्रुमे' इति धा. का. व्या (3. 9.) । 'व्रीणाति वरणे तत्र व्रीडो व्रीयेत तु श्यनि ।' (श्लो. 19) इति देवः ।

व्रायकः-यिका, व्रायकः-यिका, विव्रीषकः-षिका, वेव्रीयकः-यिका ;

व्रेता-त्री, व्राययिता-त्री, विव्रीषिता-त्री, वेव्रीयिता-त्री ;

[1]व्रिणन्-न्ती, व्राययन्-न्ती, विव्रीषन्-न्ती ; —

व्रेष्यन्-न्ती-ती, व्राययिष्यन्-न्ती-ती, विव्रीषिष्यन्-न्ती-ती ; —

इत्यादिकानि रूपाणि सर्वाण्यपि क्रैयादिकप्लिनातिवत् (1081) ज्ञेयानि । [2]व्रेपयति ।

(1666) "व्रीङ् वृणोत्यर्थे" (IV-दिवादिः-1140. सक. अनि. आत्म.) '—वरणे-आवरणे सामीप्ये' इति काशकृत्स्नः ।

'व्रीणाति वरणे तत्र व्रीडो व्रीयेत तु श्यनि ।' (श्लो. 19) इति देवः ।

'—छादनं परिग्रहो वा तत्' इति धा. का. व्याख्यायाम् (1-58) ।

व्रायकः-यिका, व्रायकः-यिका, विव्रीषकः-षिका, वेव्रीयकः-यिका ;

व्रेता-त्री, व्राययिता-त्री, विव्रीषिता-त्री, वेव्रीयिता-त्री ;

इत्यादीनि रूपाणि सर्वाण्यपि दैवादिकधीङ्धातुवत् (901) ज्ञेयानि । धातोरस्य आत्मनेपदित्वात् शानचि व्रीयमाणः, व्रेष्यमाणः इति ज्ञेयम् ।

(1667) "व्रीड चोदने लज्जायां च"

(IV-दिवादिः-1126. अक. सेट्. पर.)

धातुवृत्तौ तु '—चोदने' इत्येव । तरङ्गिण्याम् '—चोदने' इति पठित्वा

---

1. शतरि, 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्ना विकरणप्रत्ययः । तस्य 'श्नाभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे च रूपमेवम् । ये तु प्वादित्वमस्य नाभ्युपगच्छन्ति, तेषां मते व्रीणन् इति दीर्घघटितमेव रूपम् ।
2. "स्वामिकाश्यपादयः 'अर्तिह्रीव्री—'(7-3-36) इति पठन्तो व्रेपयतीति पुकं प्रतिपन्नाः" इति धातुवृत्तिः । क्षीरतरङ्गिण्यां तु अत्र नैतादृशः पाठः उपलभ्यते । इतः पूर्वं 'व्ली वरणे' इत्यत्र (धातौ) व्लेपयतीति पुग्विशिष्टत्वेन उदाहियते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'**चोदनं**=लज्जा' इति दृश्यते। 'लज्जायामप्यधीयते' इति **मैत्रेयः**। **भट्टोजिदीक्षित-काशकृत्स्न-आत्रेयादयस्तु** '—चोदने लज्जायां च' इत्येव पठन्ति। '**—प्रेरणे च द्रुमे**' इति **धा. का. व्याख्यायाम्** (1-57)।

व्रीडकः-डिका, व्रीडकः-डिका, विव्रीडिषकः-षिका, वेव्रीडकः-डिका;
व्रीडिता-त्री, व्रीडयिता-त्री, विव्रीडिषिता-त्री, वेव्रीडिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**क्रीडति**वत् (275) बोध्यानि। व्रीडः-[1]आव्रीडः, [2]व्रीडा।

(1668) "**व्रुड संवरणे**" (VI-तुदादिः-1393. सक. सेट्. पर.) [अ]

कुटादिः।

व्रोडकः-डिका, व्रोडकः-डिका, [3]वुव्रुडिषकः-षिका, वोव्रुडकः-डिका;
[4]व्रुडिता-त्री, व्रोडयिता-त्री, वुव्रुडिषिता-त्री, वोव्रुडिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि तौदादिक**कुटति**वत् (204) ज्ञेयानि। व्रुडन्-न्ती-ती, इति शतरि विशेषः।

(1669) "**व्ली वरणे**" (IX-क्र्यादिः-1502. सक. अनि. पर.)

प्वादिः, ल्वादिश्च। अयं धातुः **काशकृत्स्नीये** न दृश्यते।

व्लायकः-यिका, [5]व्लेपकः-षिका, विव्लीषकः-षिका, वेव्लीयकः-यिका;
व्लेता-त्री, व्लेपयिता-त्री, विव्लीषिता-त्री, वेव्लीयिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि क्रैयादिक**प्लिनाति**वत् (1081) बोध्यानि। [6]व्लीनः-व्लीनवान्, "'प्रहीणं व्लीनाति, नैनं दक्षिणा व्लीनाति' इत्यादौ दीर्घः

[अ] 'व्रुड—' इति व्रश्चादिषु (तुदादौ) यः पठितः तस्य पाठभेदोऽयम्।

1. घञ्प्रत्यये रूपमेवम्। लघूपधत्वाभावात् न गुणः।
2. 'गुरोश्च हलः' (3-3-103) इत्यकारः स्त्रियां भवति।
3. सन्नन्ते नित्यङित्त्वात् गुणनिषेधः। अन्यथा रलन्तत्वात् उकारोपधत्वाच्च वैकल्पिकं कित्त्वं स्यात्।
4. 'गाङ्कुटादिभ्यः—' (1-2-1) इति तृचो ङित्त्वात् गुणनिषेधः। एवं तव्यदादीनामपि ङित्त्वं ज्ञेयम्।
5. ण्यन्ते, 'अर्तिह्रीव्ली—' (7-3-36) इत्यादिना पुगागमे '**पुगन्त**लघूपधस्य च' (7-3-86) इति गुणे च रूपमेवम्।
6. **ल्वादित्वात्** 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वे रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

छान्दसः'' इति **धातुवृत्तिः**। [1]क्लिनन्-ती।

(1670) "शक विभाषितो मर्षणे"

(IV-दिवादिः-1187. सक. अनिट्. उभ.)

'—क्षमायाम्' इति **कातन्त्रकाशकृत्स्नौ**। '—शक्तौ' इति **वोपदेवः**। '**शक्यते शक्यतीत्येवं** शपि श्नौ **श्यनि** च क्रमात्॥' (श्लो. 43) इति **देवः**।

शाककः-किका, शाककः-किका, [2]शिक्षकः-क्षिका, शाशककः-किका; [3]शक्ता-त्री, शाकयिता-त्री, शिक्षिता-त्री, शाशकिता-त्री; इत्येवमादीनि रूपाणि सर्वाण्यपि दैवादिक**नश्यति**वत् (667) ज्ञेयानि। [4]शक्यन्-शक्यमानः, [5]भोक्तुं शक्यते, [6]शक्तो घटः कर्तुम्-शकितो घटः कर्तुम्, [7]शक्तिः, शक्तिः, [8]शक्यम्, [9]शका-शकरी, [10]शकलम्,

---

1. शतरि श्नाप्रत्यये '**श्नाभ्यस्तयोः—**' (6-4-112) इत्याकारलोपे, '**प्वादीनां—**' (7-3-80) इति ह्रस्वे च रूपमेवम्।
2. '**सनि मीमाघुरभलभशक—**' (7-4-54) इति अकारस्य इस्। '**स्कोः—**' (8-2-29) इति सकारलोपः। 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः। षत्वम्। इक्समीपात् हलः परस्य झलादेः सनः कित्वात् न गुणः इति बोध्यम्। एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
3. धातोरनिट्त्वं **सर्वसम्मतम्**। तेनैवं तृजादिषु रूपम्। **क्षीरस्वामी** तु '**विभाषितः**' इत्यस्य 'इड् वा इति मतभेदः........**शकिता शक्ता**।' इत्याह।
4. '**विभाषितः**' इत्यस्य **तन्त्रान्तर**प्रसिद्धया उभयपदित्वं **क्षीरस्वामि-शाकटायनदेव**प्रभृतिभिरुक्तम्। तत्पक्षे शता श्यन् च। एतत्पक्षखण्डकानां **पुरुषकारधातुवृत्तिकारादीनां** मते तु **शक्यन्** इति एकमेव **परस्मैपदं** रूपम्।
5. '**शकधृष—**' (3-4-65) इत्यनेन धातावस्मिन् उपपदभूते सति धात्वन्तरस्य तुमुन् भवति।
6. '**सौनागाः** कर्मणि निष्ठायां **शके**रनिटमिच्छन्ति विकल्पेन' (काशिका 7-2-17) इति वचनादत्रेड्विकल्पः। इति **धातुवृत्तिः**।
7. स्त्रियां क्तिनि **शक्तिः**। 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति क्तिचि **शक्तिः**=ऋषिविशेषस्य संज्ञा। पुंल्लिंगोऽयं शब्दः। **शक्तिः**=आयुधविशेषस्य संज्ञा।
8. '**शकिसहोश्च**' (3-1-99) इति ण्यदपवादो यत्प्रत्ययः।
9. 'अन्येभ्योऽपि दृश्यन्ते' (3-1-99) इति वनिप्प्रत्यये रूपमेवम्। स्त्रियां तु '**वनो र च**' (4-1-7) इति ङीप्, तत्सन्नियोगेन रेफश्चान्तादेशः। तेन **शक्वरी** इति सिद्धयति। **शक्वरी** छन्दोविशेषः।
10. औणादिके [द. उ. 8-112] कलप्रत्यये रूपमेवम्। 'भित्तं **शकलम्**' (8-2-59); सारोऽपि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]शक्रः, [2]शकुनः-शकुन्तः-शकुन्तिः-शकुनिः, [3]शकृत्, शकटः, इति विशेषरूपाणि ।

(1671) " शकि शङ्कायाम् " (I-भ्वादिः-86. अक. सेट्. आत्म.)

'—त्रासशङ्कयोः' इति **वोपदेवः** ।

'**शङ्कते शकि शङ्कायां** शक्तौ शक्नोति मर्षणे' (श्लो. 43) इति **देवः** ।

शङ्ककः-ङ्किका, शङ्ककः-ङ्किका, शिशङ्किषकः-षिका, शाशङ्ककः-ङ्किका ;

शङ्किता-ती, शङ्कयिता-त्री, शिशङ्किषिता-त्री, शाशङ्किता-त्री ;

इत्येवमादीनि रूपाणि सर्वाण्यपि भौवादिककङ्कतिवत् (140) ज्ञेयानि ।

शङ्कः, शङ्का-आशङ्का, शानचि [A]आशङ्कमानः, [4]शङ्कुः, [5]शङ्कुला, इत्यादिकानि रूपाण्यस्य धातोः अधिकानीति ज्ञेयम् ।

(1672) " **शक्लृ शक्तौ** " (V-स्वादिः-1261. अक. अनि. पर.)

'शङ्कते शकि शङ्कायां **शक्तौ शक्नोति** मर्षणे ।' (श्लो. 43) इति **देवः** ।

'**शक्लृञ्**—' इति **काशकृत्स्नः** । 'उभयपदी' इति **कातन्त्रशाकटायन-वोपदेवादयः** ।

शाककः-किका, शाककः-किका, शिशक्षकः-क्षिका, शाशककः-शिका ;

शक्ता-त्री, शाकयिता-त्री, शिशक्षिता-त्री, शाशकिता-त्री ;

शक्नुवन्-ती, शाकयन्-न्ती, शाकयमानः, [6]शिक्षमाणः, शाशक्यमानः ;

शक्तम्-क्तः, शक्तवान्, शकितः, हरिः द्रष्टुं शकितः, शक्तो वा, शाकितः, शिक्षितः, शाशकितः-तवान् ;

---

1. औणादिके (द. उ. 8.31) रक्प्रत्यये रूपम् । **शक्रः**=इन्द्रः ।
2. '**शकेरुनोन्तोन्त्युनयः**' (द. उ. 10-5) इति उन-उन्त-उन्ति-उनिप्रत्ययाः । पक्षिनामान्येतानि ।
3. औणादिके (द. उ. 6-26) ऋतिन्प्रत्यये रूपमेवम् । **शकृत्**=गोपुरीषम् ।
4. औणादिके (द. उ. 1-20) कुप्रत्यये रूपमेवम् । **शङ्कुः**=जलजन्तुभेदः, स्थाणुः, शल्यं च । '...... **शङ्कवो** मकरादयः ।' इत्यमरः (१. १०. २०) ।
5 '**हृषेरुलच्**' (द. उ. 8-106) इत्यत्र बाहुलकाद् उलच्प्रत्यये रूपमेवम् । **शङ्कुला**=आयुधम्, कुमारक्रीडा च ।
6. '**शिक्षेर्जिज्ञासायाम्**' (वा. 3-2-1) इति सन्नन्तात् जिज्ञासार्थे तङ्त्र । 'पूर्ववत् सनः' (1-3-62) इत्यस्यापवादः । अभ्यासलोपादिकं **शक**धातुवत् बोध्यम् ।

A. '**आशङ्कमानो** वैदेहीं खादितां निहतां मृताम् ।' भ, का. 6-6

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**शक्यति**वत् (1670) ज्ञेयानि। शक्यम्, [1]शक्नुवानः, शक्तिः, [2]शका, [3]शेकिवान्, [4]शकः [देशः], शक्तिः, [5]शाकः, शकटम्, शकृत्, शक्वा-शक्वरी, शक्या, शक्रः, शकलम्, शक्लम्, शकुनः-शकुनिः-शकुन्तः-शकुन्तिः, इमानि रूपाण्यधिकान्यत्रेति विशेषः। एतेषां रूपाणां निष्पत्तिप्रकारो दैवादिकधातावेव लिखितः। तत्रैव द्रष्टव्यः।

(1672-A) " **शक्वृ गतौ** " (1. भ्वादिः....सक. सेट्. आत्म.)

काशकृत्स्नेन धातुरयं पठितः। 'शक्वरते-वृषभ इव शब्दयति, शक्वरः—वृषभः, शक्वरी-गौः, छन्दोविशेषश्च' इति तत्र दृश्यते। अन्यत्र धातुरयं न दृश्यते।

(1673) " **शच व्यक्तायां वाचि** " (I-भ्वादिः-165. सक. सेट्. आत्म.)

शाचकः-चिका, शाचकः-चिका, शिशचिषकः-षिका, शाशचकः-चिका ;
शशिता-त्री, शाचयिता-त्री, शिशचिषिता-त्री, शाशचिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कचति**वत् (144) ऊह्यानि। शचिः [6]शची[A]।

(1674) " **शट रुजाविशरणगत्यवसादनेषु** "

(I-भ्वादिः-299. सक. सेट्. पर.) [अ]

शाटकः-टिका, शाटकः-टिका, शिशटिषकः-षिका, शाशटकः-टिका ;

[अ] अत्र **काशकृत्स्न**धातुपाठे '**शट निवासे**—आवासे, आच्छादने च' इति पठित्वा तदनन्तरम् 'रुट विशरणे गत्यवसादनेषु' इति पृथग्धातुत्वेन पठितम्।

1. शतरि स्वादित्वात् श्नुप्रत्ययः। उवङादेशः।
2. स्त्रियां भिदादिपाठात् (3-3-104) अङ्।
3. लिटः क्वसुप्रत्यये, 'अत एकहल्मध्ये—' (6-4-120) इति एत्वाभ्यासलोपयोः, '**वस्वे**काजाद्घसाम्' (7-2-67) इतीडागमः। छान्दसोऽपि क्वसुः लोके बहुलं प्रयुज्यते इत्यसकृदधस्तात् प्रतिपादितमस्माभिः। **काशिकायाम्** (7-2-67) उदाहृतोऽयं शब्दः।
4. पचाद्यचि रूपमेवम्। **शकः** देशविशेषः। राजविशेषो वा।
5. 'हलश्च' (3-3-121) इति संज्ञायां घञ्। **शाकः**=वार्ताकादिः।
6. इन्नन्तात्, 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीषि रूपमेवम्। **शची**=इन्द्राणी।

A. 'सुलोचना यत्र **शची**समप्रभाः अशाश्चचुः श्वञ्चितसौरभाः कचे।' धा. का, 1-23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शटिता-त्री, शाटयिता-त्री, शिशटिषिता-त्री, शाशटिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कठति**वत् (148) ज्ञेयानि ।
[1]शाटकः, [2]शाटी इति रूपे भवतः । शाट्यायनः=मुनिविशेषः ।

(1675) " **शठ शाठ्ये कैतवे च** " (1-भ्वादिः-340. अक. सेट्. पर.)
'**कैतवे शठतीति** स्यात् श्लाघायां शाठयेत णौ ।' (श्लो. 82) इति **देवः** ।
' शठ कैतवे **च** ' चकारात्—(पूर्वधात्वर्थभूतौ) 'हिंसासंक्लेशनयोः' इत्युक्तावर्थौ गृह्येते ।' इति **पुरुषकारः** । **धातुवृत्ता**वपि एवमेव । **क्षीरस्वामिशाकटायनादयः** पुनश्चकारं नैव पठन्ति । **काशकृत्स्न**धातुपाठे तु '—कैतवे च —द्यूते स्पर्धायां च ' इति दृश्यते । '—हिंसायां कैतवे च ' इति **चन्द्रः** ।
'—वधक्लेशकैतवे ' इति **वोपदेवः** ।
शाठकः-ठिका, शाठकः-ठिका, शिशठिषकः-षिका, शाशठकः-ठिका ;
शठिता-त्री, शाठयिता-त्री, शिशठिषिता-त्री, शाशठिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कठति**वत् (148) ऊह्यानि । शठः= नैकृतिकः ।

(1676) " **शठ असंस्कारगत्योः** " (X-चुरादिः-1564. सक. सेट्. उभ.)
'**गत्यसंस्कारधात्वर्थे शाठये**च्छ्वाठयेदिति ॥' (श्लो. 81) इति **देवः** ।
'—**संस्कार**गत्योः ' इति **मैत्रेय-काशकृत्स्न-कातन्त्रादयः** ।
'—संस्कारगत्योः—अनृतभाषणे गतौ च ' इति **काशकृत्स्नः** ।
'—आलस्ये च' इति **धा. का. व्याख्यायाम्** (3-16)
'—आलस्ये गत्यसंस्कृतसंस्कृते ' इति **वोपदेवः** ।
शाठकः-ठिका, शिशाठयिषकः-षिका ; शाठयिता-त्री, शिशाठयिषिता-त्री ;
शाठयन्-न्ती, शिशाठयिषन्-न्ती, शाठयिष्यन्-न्ती-ती, शिशाठयिषिष्यन्-न्ती-ती ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**काणयति**वत् (159) ऊह्यानि ।

(1677) " **शठ श्लाघायाम्** " (X-चुरादिः-1692. सक सेट्. आत्म.)
आकुस्मीयः ।

---

1. घञन्तात् संज्ञायां कन्प्रत्यये रूपमेवम् । **शाटकः**=वस्त्रम् ।
2. घञन्तात् 'जातेरस्त्री—' (4-1-63) इति जातिलक्षणे ङीषि **शाटी** इति रूपम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'........श्लाघायां शाठयेत णौ ।' (श्लो. 82) इति देवः ।
'शल—' इति कौशिकः इति क्षीरतरङ्गिण्याम् ।
शाठकः-ठिका, शिशाठयिषकः-षिका ; शाठयिता-त्री, शिशाठयिषिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि चौरादिककाणयतिवत् (159)ऊह्यानि । यत्प्रत्यये [A]शाठ्यम् ।

(1678) "शठ सम्यगवभाषणे" (X-चुरादिः-1855. सक. सेट्. उभ.)

कथादिः, अदन्तश्च ।

'शठयेत् श्वठयेदेते द्वे सम्यगवभाषणे ।' (श्लो 81) इति देवः ।
'—सम्यगाभाषणे सम्यग्वचनक्रियायामिति क्षीरस्वामी' इति पुरुषकारः ।
क्षीरतरङ्गिण्यां तु '—असम्यगाभाषणे' इत्येव दृश्यते ।
शठकः-ठिका, शिशठयिषकः-षिका ; शठयिता-त्री, शिशठयिषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककलयतिवत् (176) ज्ञेयानि ।

(1679) "शडि रुजायां संघाते च" (I-भ्वादिः-279. सक. सेट्. आत्म.)

'—हिंसागत्योः' इति काशकृत्स्नः । किंच भ्वादौ इत उत्तरत्र '—रुजायाम्' इति पृथक् धातुत्वेन पठितः ।
शण्डकः-ण्डिका, शण्डकः-ण्डिका, शिशण्डिषकः-षिका, शाशण्डकः-ण्डिका ;
शण्डिता-त्री, शण्डयिता-त्री, शिशण्डिषिता-त्री, शाशण्डिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककण्ठतिवत् (149) ऊह्यानि । शण्डः-असुरपुरोहितः, शण्डिलः, ल्युटि [B]शण्डनम् । इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1680) "शण दाने" (I-भ्वादिः-797. सक. सेट्. पर.) घटादिः ।

'दाने च' इति पठित्वा चकारात् गतौ इति मा. धा. वृत्तिः । क्षीरतरङ्गिण्याम् अयं धातुः न दृश्यते । '—गतौ इत्येके इति मैत्रेयः' इति धा. का. व्याख्यायाम् (2-97) । '—दाने इत्यपि दुर्गः' इति क्षीरस्वामी ।

A. 'आकूणिताक्षमपि च स्मिततूणितास्यं भ्रूणस्य शाठ्यजनयक्ष्यमवेक्ष्य गात्रम् ।' धा. का. 3-35.

B. 'असुण्डितोच्चण्डगतीनशण्डनान्......।' धा. का. 1-37

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शाणकः-णिका, शणकः-णिका, शिशणिषकः-षिका, शंशणकः-णिका ;
शणिता-त्री, शणयिता-त्री, शिशणिषिता-त्री, शंशणिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि ण्यन्तं विना भौवादिकक्कणतिवत् (157) ज्ञेयानि। ण्यन्ते तु (158 धातुवत्) ऊह्यानि। शतरि-[A]शणन्, [1]शणः, शाणः, शाणा, शाणिः-बुद्धिमान्, शाणी[B], शणिः-शनिः, शणुः-पत्रम्; इमानि रूपाणि विशेषेण भवन्तीति विशेषः।

(1681) "शद्लृ शातने" (I-भ्वादिः-855. सक. अनि. पर.)

ज्वलादिः।'—अवशातने' इति जैनः। शातनम्-तनूकरणमिति क्षीरस्वामी। '—शातनम्-तीक्ष्णीभावः। विशीर्णतायामित्येके। [2]गतावप्यस्ति' इति धा. का. व्याख्यायाम् (2-24)। "'—विशातने' विशीर्णतायां वर्तते, शातनं-विषयभावेन निर्दिश्यते प्रसिद्धत्वात्'' इति मैत्रेयः-इति मा.धा.वृत्तिः।

शादकः-दिका, शादकः-दिका, पुष्पाणां [3]शातकः-तिका, शिशत्सकः-त्सिका, [शाशदकः-दिका ;
शत्ता-शत्त्री, शादयिता-शातयिता-त्री, शिशत्सिता-त्री, शाशदिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकगत्यर्थकपत्लृ (968) धातुवत् ऊह्यानि।
[4]शादः, शदः, शाद्वलम्,

---

1. संज्ञायां घप्रत्ययः। शणः=रज्जुसाधनीभूत ओषधिविशेषः। घञि शाणः= घर्षणशिला।
2. 'शदेरगतौ तः' (7-3-42) इति गतिभिन्नार्थे तकारविधानाज्ज्ञाप्यते, धातोरस्य गतिरप्यर्थ इति।
3. णिजन्ते सर्वत्र 'शदेरगतौ तः' (7-3-42) इति दकारस्य तकारः। गत्यर्थकत्वे तु 'गाः शादयन् गोपालकः' इत्यादिप्रयोगे न तकारः। 'पुष्पाणि शातयन्' इत्यादिषु तु भवत्येव। एवं सर्वत्र ज्ञेयम्।
4. संज्ञायां घञ्। शादः= तृणविशेषः। शद इति तु आयुधविशेषः। संज्ञायामत्र घः। शाद्वलम् इति तु शादाः सन्त्यस्मिन् देशे इत्यर्थे 'नडशादाद् ड्वलच्' (4-2-88) इति मत्वर्थीयो ड्वलच्प्रत्ययः। प्रत्ययस्य डित्त्वात् टिलोपः।

A. 'चणन् विषादं विशणन् विचिन्तां श्रणन् विमोहं श्रथितोऽस्तु सद्यः॥' धा. का. 2-9.

B. 'वस्त्राणां प्रवरा शाणी......' म. भारते 3-120-27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शद्रुः, [2]शत्रुः । [3]शीयमानः ।

(1682) " **शद्ऌ शातने** " (VI-तुदादिः-1428. सक. अनि. पर.)

शादकः-दिका, शादकः-दिका-शातकः-तिका, शिशत्सकः-त्सिका, शाशदकः-दिका ; शीयमानः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**शीयति**वत् (1681) ज्ञेयानि । भौवादिकधात्वपेक्षया नास्य धातो रूपेषु भेदः । '**शदेः शितः**' (1-3-60) इति तङ्विधानात् नापि शताऽस्तीति प्रयोजनं कल्पयितुं शक्यते, येन 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पः प्रयोजयितुं शक्येत । ततश्च विफलत्वे सति यथाकथञ्चित् स्वरभेदः प्रयोजनत्वेन कल्प्यः इति **प्राञ्चः** । वस्तुतस्तु शपः-शप्रत्ययस्य च प्रसक्त्यभावात्—शब्निमित्तकः पित्स्वरोऽनुदात्तः, शनिमित्तकः प्रत्ययस्वरोऽपि लक्ष्याभावादेव दुर्लभ इति नैतदपि प्रयोजनं वक्तुं शक्यमित्यास्तां तावत् ।

(1683) " **शप आक्रोशे** " (I-भ्वादिः-1000. अक. अनि. उभ.)

'**आक्रोशे** शप्यते शप्येत्, **शपते शपतीति** च ।
उपालम्भे शपेर्वाक्यात्तङि स्यात् शपते पदम् ॥' (श्लो. 132) इति **देवः** ।
'**आक्रोशो**-विरुद्धानुध्यानम्' इति **क्षीरस्वामी** ।

शापकः-पिका, शापकः-पिका, शिशप्सकः-प्सिका, शाशपकः-पिका ;
शप्ता-त्री, शापयिता-त्री, शिशप्सिता-त्री, शाशपिता-त्री ;
शपन्-न्ती, शापयन्-न्ती, शिशप्सन्-न्ती ; — —
शप्स्यन्-न्ती-ती, शापयिष्यन्-न्ती-ती ; — —

---

1. 'दाधेट्सि**शद**सदो रुः' (3-2-159) इति रुप्रत्ययः ताच्छीलिकः ।
2. शातयतीति **शत्रुः** = अरिः । णिजन्तात् गतिभिन्नार्थे तकारान्तात् धातोः '**रुशादि**भ्यां त्रुन्' (द. उ. 1-159) इति त्रुन्प्रत्ययः ; बाहुलकात् णेर्लोपः, वृद्ध्यभावश्च । प्रत्ययलक्षणेन णिजाश्रिता वृद्धिः ; इत्यादिकमूह्यम् ।
3. '**शदेः** शितः' (1-3-60) इति आत्मनेपदम् । शिद्भावी यः **शदि**धातुः स तङ लभते इति निष्कृष्टोऽर्थः । विस्तरस्तु **न्यासपदमञ्जर्यो**र्द्रष्टव्यः । 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौ**शीय**सीदाः' (7-3-78) इति शिति प्रत्यये परे प्रकृतेः '**शीय**' इति सर्वादेशः । एवञ्चास्य धातोः शता नेति अवधेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृष्णाय [1]शपमानः, शापयमानः, शिशप्समानः, शाशप्यमानः ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**तपति**वत् (703) ऊह्यानि। शपनम्, [2]शप्यम्, [3]शपथः, [4]शब्दः, शाब्दिकः, [5]शबलः, [6]शप्वः, इत्यादीनि रूपाणि अस्य धातोः विशेषेण भवन्ति।

(1684) "**शप आक्रोशे**" (IV-दिवादिः-1168. अक. अनि. उभ.)

'**आक्रोशे शप्यते शप्येत्** शपते शपतीति च।
[7]उपालम्भे शपेर्वाक्यात्तङि, स्याच्छपते पदम्॥' (श्लो. 132.) इति **देवः**।

शापकः-पिका, शापकः-पिका, शिशप्सकः-प्सिका, शाशपकः-पिका ;
शप्ता-त्री, शापयिता-त्री, शिशप्सिता-त्री, शाशपिता-त्री ;
शप्यन्-न्ती, शापयन्-न्ती, शिशप्सन्-न्ती ;—
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**तपति**वत् (703) ऊह्यानि।

---

1. धातोरुभयपदित्वेऽपि '**शप** उपलम्भने' (वा. 1-3-21) इत्यकर्त्रभिप्रायेऽपि तङेव। 'श्लाघह्नुङ्स्था**शपां**—' (1-4-34) इति ज्ञीप्स्यमानस्य सम्प्रदानता। तेन 'कृष्णाय' इत्यत्र चतुर्थी। **वार्तिके** 'वाचा शरीरस्य स्पर्शनम्=**उपलम्भनम्**' इति **काशिका**। अत्र **हरदत्तः** "—'त्वत्पादौ स्पृशामि—नैतत् मया कृतम्' इत्येतद्रूपः शपथविशेष उपलम्भः" इति। **कैयटस्तु** '**उपलम्भनम्**=प्रकाशनम्' इत्याह। **शाकटायनस्तु** प्रकाशनार्थमङ्गीकृत्य, 'स्वाभिप्रायस्य परत्र आविष्करणं तत्'—इत्यप्याह। "**चन्द्रभोजकौमारास्तु** 'प्रोषितस्य देवदत्तस्य भावाभावयोरुपलब्धव्ययोः किञ्चिदासेवनमुपलम्भनम्। 'देवदत्ताय **शपते**—' प्रोषितस्य देवदत्तस्य भावाभावयोरुपलब्धव्ययोः किञ्चिदासेवते इत्यर्थः—" इति **धातुवृत्तिः**। विस्तरस्तु **माधवीये** द्रष्टव्यः।
2. '**पोरदुपधात्**' (3-1-98) इति ण्यदपवादो यत्प्रत्ययः।
3. '**शीङ्शपि**—' (द. उ. 6-38) इत्यथप्रत्ययः। **शपथः**=प्रतिज्ञा।
4. '**शाशपिभ्यां**—' (द. उ. 6-48) इति दन्प्रत्ययः। '**शब्दवैर**—' (3-1-17) इति निपातनात् पकारस्य दकारः।
5. '**शपेर्बश्च**' (द. उ. 8-108) इति कलप्रत्ययः, पकारस्य बकारश्च।
6. '**शपेर्वन्**' (द. उ. 8-131) इति वन्प्रत्ययः। शप्यते इति **शप्वः**=आक्रोशः।
7. '**शप उपलम्भने**' इत्येव **भाष्यादिषु** पाठः। '**उपालम्भने**' इत्यपि प्रायपाठ इति **पुरुषकारे** प्रतिपादितम्। प्रकृते **दैव**श्लोकेऽपि '**उपालम्भे**' इत्येव दृश्यते। पाठनिर्णये विद्वांसः प्रमाणम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1685) "शमु उपशमने" (IV-दिवादिः-1201. अक. सेट्. पर.)

शमादिः ।

'आलोचने शमयते **शाम्यत्युपशमे श्यनि** ।' (श्लो. 149) इति **देवः** ।

[1]शमकः-मिका, [2]निशामकः-मिका, शमकः-मिका, शिशमिषकः-षिका, शंशमकः, शम्शमकः-मिका ; शमिता-त्री, निशामयिता रूपम्, निशमयिता वचः, शिशमिषिता-त्री, शंशमिता-शम्शमिता-त्री ;

[3]शाम्यन्[A]-न्ती, निशामयन्[B]-न्ती, निशमयन् वचः, शिशमिषन्-न्ती ;— इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकदा**म्यति**वत् (819) ज्ञेयानि । [4]शान्तः, [5]शान्तः[C]-शमितः[D], [6]प्रशान्, [7]शमी, [8]शमनः, [9]शान्तिः[E], [10]शमित्वा-शान्त्वा,

---

1. ण्वुलि 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (7-3-34) इति वृद्धिनिषेधः ।
2. धातोरमन्तत्वेन 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिः) इति मित्त्वम् । तेन 'मितां ह्रस्वः' (6-4-92) इति णौ सर्वत्र ह्रस्वः । '**शमो** दर्शने' (ग.सू. भ्वादिः) इति दर्शनार्थे मित्त्वं निषिद्धम् । एवञ्च '**निशामयति** रूपम्' इत्यत्र मित्त्वाभावात् दीर्घः, '**निशमयति** वचः' इत्यत्र मित्त्वम्, इति बोध्यम् ।
3. शतरि, शपः श्यनि, '**शमा**मष्टानां—' (7-3-74) इति दीर्घः ।
4. निष्ठायां 'यस्य विभाषा' (7-2-15) इति इण्निषेधः । 'अनुनासिकस्य क्विझलोः—' (6-4-15) इति दीर्घः । अनुस्वारपरसवर्णौ ।
5. ण्यन्तात् निष्ठायां 'वा दान्त**शान्त**—' (7-2-27) इति सूत्रे निपातनात् णिलुक्, अनिट्त्वं च पक्षे भवतः । 'निष्ठायां सेटि' (6-4-52) इति णिलोपः । दीर्घोऽपि नित्यो निपातनादेव । पक्षे **शमितः** इति ।
6. प्रशाम्यतीति **प्रशान्** । क्विपि 'अनुनासिकस्य—' (6-4-15) इति दीर्घः । 'मो नो धातोः' (8-2-64) इति पदान्ते नकारः । स्वरादिषु पाठात् अव्ययत्वम् ।
7. तच्छीलादिषु कर्तृषु '**शमि**त्यष्टाभ्यो घिनुण्' (3-2-141) इति घिनुण्प्रत्ययः । प्रत्ययस्य णित्त्वेऽपि धातोर्मान्तत्वात् न वृद्धिः ।
8. शमयतीति **शमनः**=यमः । बाहुलकात् नन्द्यादित्वात् कर्तरि ल्युप्रत्ययः ।
9. क्तिचि, 'तितुत्र—' (7-2-9) इतीण्निषेधः । दीर्घानुस्वारपरसवर्णाः ।
10. उदित्वात् क्त्वायामिड्विकल्पः। इडभावपक्षे दीर्घानुस्वारपरसवर्णादिकं यथाशास्त्रमूह्यम् ।

A. '**अशाम्य**दात्मापि तमी नमामि दमिप्रियं श्रान्तिहरं भवन्तम् ।' धा. का. 2-65.
B. 'रथेन तं राजपथे प्रयान्तं निर्व्याजसङ्गेन **निशामयन्ती** ।' या. अ. 13-58.
C. 'दमितारिः **प्रशान्तौ**जा नादापूरितदिङ्मुखः ।' भ. का. 9-20.
D. '**शमित**तापमपोढमहीरजः प्रथमबिन्दुभिरम्बुमुचोऽम्भसाम् ।' शि. व. 6-33.
E. 'प्रायोपासनया **शान्तिं** मन्वानो वालिसम्भवः ।' भ. का. 7-73.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[A]निशाम्य-निशम्य, [B]शमं शमं, [1]शण्ढः, [2]शमलम्, [3]शम्बलम्, [4]शङ्खः, शम्बुः, इत्यादीनि रूपाण्यधिकान्यत्रेति विशेषः। णिजन्तात् ल्यपि-प्रशमय्य इति च विशेषः।

(1686) " **शम आलोचने** " (X-चुरादिः-1696. सक. सेट्. आत्म.) **आकुस्मीयः।**

'**आलोचने शामयते** शाम्यत्युपशमे श्यनि।' (श्लो. 149) इति **देवः।**

शामकः-मिका, शिशामयिषकः-षिका; शामयिता-त्री, शिशामयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कालयति**वत् (175) ऊह्यानि। शामा-कृष्णवर्णा, शाकविशेषः।

(1687) " **शम्ब संबन्धे** " (X-चुरादिः-1556. अक. सेट्. उभ.)

क्षीरतरङ्गिण्यां '**साम्ब**—' इति पठित्वा '**चन्द्रः शम्ब** इत्याह' इति दृश्यते। "**षम्ब** संबन्धने' इति पठित्वा '**शम्ब** चेति **मैत्रेयः।** शम्बेत्येके इति **स्वामी।**" इति **मा. धा. वृत्तौ।**

शाम्बकः-म्बिका, शिशाम्बयिषकः-षिका; शाम्बयिता-त्री, शिशाम्बयिषिता-त्री; इत्यादिकानि ण्यन्ते तत्प्रकृतिकसन्नन्ते च ऊह्यानि। रूपाणि सर्वाण्यपि भौवादिक-**कम्बु**धातुवत् (168) [5]शम्बरः[C], [D]शाम्बरी, शम्बलम्।

---

1. औणादिके (द. उ. 5-11) ढप्रत्यये रूपमेवम्। शान्तमस्य स्पर्शनेन्द्रियमिति **शण्ढः**=नपुंसकः।
2. औणादिके (द. उ. 8-112) कलप्रत्यये रूपम्। शमयति शाम्यते वा तत् प्रायश्चित्तादिभिरिति **शमलम्**=दुरितम्।
3. औणादिके (द. उ. 8-114) कलप्रत्यये रूपम्। अस्य बुगागमश्च निपातनात्। शाम्यते मार्गपरिश्रान्तोऽनेनेति **शम्बलम्**=पाथेयम्, सञ्चयश्च।
4. औणादिके (द. उ. 10-15) इति खप्रत्यये रूपमेवम्। शाम्यतीति **शङ्खः**=प्रसिद्धः।
5. बाहुलकादरप्रत्यये रूपमेवम्। **शम्बरः**=असुरविशेषः। 'अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशाम्बरम्' इत्यमरः।

A. 'रतौ ह्रिया यत्र **निशाम्य (निशम्य)** दीपाञ्जालागताभ्योऽधिगृहं गृहिण्यः।' शि. व. 3-45.

B. '**शमं शमं** नभस्वन्तः पुनन्ति परितो जगत्।' भ. का. 18-27.

C. '**शम्बरं** पर्वतेषु क्षियन्तम्' (ऋग्-2-12-11) इति।

D. '........आसम्वयन् जनमतिं निज**शाम्बरीभिः॥**' धा. का. 3-15.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1688) " शर्द कुत्सिते शब्दे " इति काशकृत्स्नेन (भ्वादौ) पठितम्। स धातुः आत्मनेपदी इति च ज्ञायते। यथा शर्दते—अपानं त्यजति।

(1689) " शर्ब गतौ " (I-भ्वादिः- 423. सक. सेट्. पर.)

'एकः शर्बस्तालव्यादिः, अपरः षोपदेशः, अन्यो दन्त्यादिः।'
इति क्षीरतरङ्गिण्याम्। '—गतौ हिंसायां च' इति कातन्त्रः। 'नोपधः इति कौशिकः' इति माधवः। 'शर्व—' इति काशकृत्स्नः।
शर्बकः-र्बिका, शर्बकः-र्बिका, शिशर्बिषकः-षिका, शाशर्बकः-र्बिका ;
शर्बिता-त्री, शर्बयिता-त्री, शिशर्बिषिता-त्री, शाशर्बिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि गत्यर्थककर्बतिवत् (173) ऊह्यानि।

(1690) " शर्व हिंसायाम् " (I-भ्वादिः-585. सक. सेट्. पर.)

शर्वकः-र्विका, शर्वकः-र्विका, शिशर्विषकः-षिका, शाशर्वकः-र्विका ;
शर्विता-त्री, शर्वयिता-त्री, शिशर्विषिता-त्री, शाशर्विता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककर्वतिवत् (173-A) ज्ञेयानि। शर्वः-[1]शर्वाणी।

(1691) " शल चलनसंवरणयोः " (I-भ्वादिः-490. सक. सेट्. आत्म.)

'गतौ शलति संवृत्यां चलने शलते शलेः।' (श्लो. 154) इति देवः।
शालकः-लिका, शालकः-लिका, शिशलिषकः- षिका, शाशलकः-लिका ;
शलिता-त्री, शालयिता-त्री, शिशलिषिता-त्री, शाशलिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककलतिवत् (174) ज्ञेयानि। शलः, शाला=गृहपर्यायः, [2]शलभः, [3]शल्यम्, शालिः-धान्यम्, णिनिप्रत्यये-शाली। इमानि रूपाण्यधिकान्यत्रेति विशेषः।

---

1. शर्वति हिनस्तीति शर्वः शिवः। शर्वस्य स्त्री इत्यर्थे 'इन्द्रवरुणभवशर्व—' (4-1-49) इति पुंयोगे ङीषानुगौ भवतः। 'शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला' इत्यमरः।
2. औणादिके (द. उ. 7-18) अभच्प्रत्यये रूपमेवम्। शलभः=पतङ्गः।
3. औणादिके (द. उ. 10-17) यक्प्रत्यये शल्यमिति रूपम्। शरीरान्तर्गतं शस्त्रमित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1692) " शल गतौ " (I-भ्वादि:-843. सक. सेट्. पर.) ज्वलादि: । 'गतौ शलति संवृत्यां चलने शलते शले: ।' (श्लो. 154) इति देव: । तरङ्गिण्यां 'शल गतौ' इति पठित्वा इत: पूर्वं भ्वादौ 'शल आशुगमने' इति दृश्यते। 'शल आशुगमने इति ज्वलादौ क्षीरस्वामी' इति पुरुषकार: । क्षीरतरङ्गिण्यां ज्वलादौ न दृश्यते। '—श्लाघायाम्' इति कौशिक:' इति हेमचन्द्र: ।
सर्वाण्यपि रूपाणि भौवादिककलतिवत् (174) ऊह्यानि ।

(1693) " शल्भ कत्थने " (I-भ्वादि:-390. सक. सेट्. आत्म.)

समस्तान्यपि रूपाणि भौवादिकगलभतिवत् (389) ज्ञेयानि ।

(1694) " शव गतौ " (I-भ्वादि:-725. अक. वेट्. पर.)

'शवतिर्गतिकर्मा कम्बोजेषु भाष्यते; विकार एवैनमार्या आहु:' इति निरुक्तम् (2-2) महाभाष्यं च (1-1-1)। '—विकारे' इत्येव वोपदेव: । पचाद्यचि शव: । वबयोरभेदात् औणादिके (द. उ. 8-100) शबर:=वन्यजाति-विशेष: । क्विपि, ऊठि शौ: इति भवति । इतररूपाणि सर्वाण्यपि क्रैयादिक-खवतिवत् (345) बोध्यानि ।

(1695) " शश प्लुतगतौ " (I-भ्वादि:-726. सक. सेट्. पर.)

'—प्लुतिगतौ । प्लुतिभिर्गमने' इति क्षीरस्वामी । पचाद्यचि—शश:= मृगविशेष: । शश एव शशक: । शशन:—'चलनशब्दार्थात्—' (3-2-148) इति युच् । समस्तान्यपि रूपाणि भौवादिककशतिवत् (178) बोध्यानि ।

(1696) " शष हिंसार्थ: " (I-भ्वादि:-690. सक. सेट्. पर.)

[1]शष्पम्=बालतृणम्, श्मश्रु च । इतराणि समस्तान्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिककषतिवत् (179) ज्ञेयानि ।

---

1. 'खष्पशिल्पशष्प—' (द. उ. 7-7) इत्यादिना पप्रत्यये सिद्धयतीति माधव: । दशपाद्युणादिवृत्तौ तु (7-7) "'शिष हिंसायाम्' अस्योपधाया अत्वं निपात्यते। शिष्यते गवादिभिरिति शष्पम्= घास:, वीरुच।" इत्युक्तम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1697) "[आङः] शसि इच्छायाम्"

(I-भ्वादिः-629. सक. सेट्. आत्म.)

'आशंसे स्यादिच्छायां शंसतीति स्तुतौ भवेत्।
हिंसायां शसति—' (श्लो. 183, 184) इति देवः।

"आङः शसि' इति पाठात् अयमाङ्पूर्व एव प्रयोक्तव्यः। तथा च काश्यपः 'अयमाङ्पूर्व एव प्रयोक्तव्यः' इति। सम्मतायाम् 'न च केवलो नाप्युपसर्गान्तरपूर्वः' इति ॥" इति माधवः। "दुर्गः 'आङः शासु—' इत्याह ।.... आशासित्वा-आशास्त्वा।" इति क्षीरस्वामी। एतेन क्त्वायां आङा सह समासेऽपि न ल्यप् दुर्गमते, इति सिद्ध्यति। माधवस्तु नैतदनुमेने; य एवमाह—'आशस्य; क्त्वो ल्यप्' इति। उदित्त्वेन क्त्वायामिड्विकल्पपक्षः परं दुर्गाणामधिकः। [1]आशंसुः। 'शन्सु' इति दुर्गपाठ इति मा. धा. वृत्तिदर्शनाज्ज्ञायते। इदित्पक्षपाती माधवोऽपि ल्यपि आशस्य इति कथं रूपसिद्धिमभिप्रैतीति विचार्यं वर्तते; यतः स एव निष्ठायां आशंसितम् इत्याह। ईदृशेषु स्थलेषु प्रयोगाः पाठाश्च अनियता दृश्यन्ते। सर्वाण्यपि रूपाणि चौरादिककुंशयतिवत् (232) बोध्यानि।

(1698) "शसु हिंसायाम्" (I-भ्वादिः-727. सक. सेट्. पर.)

'हिंसायां शसति—' (श्लो. 184) इति देवः। '—वधे' इति बोपदेवः। [2]कसौ-शशसिवान्, क्त्वायाम्-[3]शसित्वा-शस्त्वा, [4]विशस्तः-विशसितः, [5]शस्त्रम्-शस्त्री, [6]विशसिता-वैशस्त्रम्,

1. 'सनाशंसभिक्ष उः' (3-2-168) इति कर्तरि उप्रत्ययस्ताच्छीलिकः।
2. लिटः कसौ, 'न शस—' (6-4-126) इत्यादिना एत्वाभ्यासलोपनिषेधः।
3. उदित्त्वेन क्त्वायामिड्विकल्पः; तेन रूपद्वयम्।
4. 'धृषिशसी वैयात्ये' (7-2-19) इति वैयात्ये (= अविनीते) अर्थे एव 'यस्य विभाषा' (7-2-15) इतीण्निषेधः; इति नियमात् 'शस्तो वृषलः' इत्यविनीतार्थे एवेण्निषेधः। 'विशसितः पशुः' इत्यत्र न।
5. 'दाम्नीशस—' (3-2-182) इत्यादिना करणे ष्ट्रन्प्रत्ययः। षित्त्वात् स्त्रियां ङीष्।
6. ताच्छीलिकः 'तृन्' (3-2-135) इति तृन्प्रत्ययः। विशसितुर्धर्म्यं इत्यर्थे 'विशसितुरिड्लोपश्च' (वा. 4-4-49) इतीड्लोपसंयोगशिष्टोऽञ्प्रत्ययः। आदिवृद्धिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]शस्यम्-शास्यम् इति विशेषः। इतराणि सर्वाण्यपि रूपाणि भौवादिककसतिवत् (180) बोध्यानि।

(1699) "शंसु स्तुतौ" (I-भ्वादिः-728. सक. अनि. पर.)

'आशंसे स्यादिच्छायां शंसतीति स्तुतौ भवेत्। हिंसायां शसति—' (श्लो. 183, 4) इति देवः। 'अयं हिंसायामपि' इति दुर्गः।

[2]शस्यम्-शंस्यम्, [3]शंसित्वा, शस्त्वा, [4]शस्तम्, [5]नृशंसः, [6]नराशंसः, [7]ब्राह्मणाच्छंसी, [8]प्रशस्तिं विन्दन्ति, [9]प्रशंसा, आशंसा, [10]आशंसुः,

---

1. 'तकिशसि—' (वा. 3-1-97) इति ण्यदपवादो यत्प्रत्ययः। शास्यम् इति तु 'हन्त्यर्थाश्च' (ग. सू. चुरादौ) इति वचनात् स्वार्थे णौ, णिजन्ताद्यति बोध्यम्।
2. 'शंसिदुहिगुहिभ्यो वा' (काशिका 3-1-109) इति वचनात् क्यब्विकल्पः। क्यप्पक्षे प्रत्ययस्य कित्त्वेनोपधानकारलोपः। अनुस्वारोपधत्वेऽपि, उपदेशे 'नकारजावनुस्वारपञ्चमौ झलि धातुषु' इत्यभियुक्तवचनात् नोपधः। क्यवभावपक्षे ण्यति शंस्यम् इति भवति। 'प्रशस्यस्य श्रः' (5-3-60) इति निर्देशबलात् क्यब्विकल्पपक्षः सिद्ध इति बोध्यम्।
3. उदित्त्वेन क्त्वायामिड्विकल्पः। इडभावपक्षे उपधानकारलोपः। इट्पक्षे 'न क्त्वा सेट्' (1-2-18) इति नियमात् न कित्त्वम्; तेन नोपधानकारलोपः।
4. 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधः।
5. नॄन् शंसतीति नृशंसः=क्रूरः। 'कर्मण्यण्' (3-2-1) इत्यण्। अत्र दुर्गोक्तरीत्या हिंसैव धात्वर्थः।
6. नरा एनं शंसन्ति इति, नराः अस्मिन् आसीनाः शंसन्ति इति वा नराशंसः= अग्निः, देवविशेषो वा। 'हलश्च' (3-3-121) इति संज्ञायां घञ्। अत्र पूर्वपदस्य वनस्पत्यादिषु (6-2-140) पाठाद् दीर्घ इति माधवः। काशिकायां तु (6-2-140) 'अन्येषामपि—' (6-3-137) इति दीर्घ उक्तः।
7. अत्र ब्राह्मणादादाय शंसति इति वृत्तिपक्षे 'साधुकारिण्युपसंख्यानम्' (वा. 3-2-78) इति णिनिः। माधवस्तु 'सुप्यजातौ—' (3-2-78) इति णिनिमाह। तत्तु रूढिशब्देष्वसन्नतमिति बोध्यम्। 'ब्राह्मणाच्छंसिन उपसंख्यानम्' (वा. 6-3-2) इति पञ्चम्या अलुक्। यदा तु ब्राह्मणानि शंसति इति वृत्तिः, तदा 'बहुलमाभीक्ष्ण्ये' (3-2-81) इति णिनिः। द्वितीयायाः पञ्चमी निपातनादेव। पञ्चम्या अलुक् तु 'तत्पुरुषे कृति—' (6-3-14) इति। उभयथाऽपि ब्राह्मणाच्छंसी कश्चन ऋत्विग्विशेषः।
8. स्त्रियां क्तिनि नलोपे रूपमेवम्।
9. 'प्रशंसावचनैश्च' (2-1-66) इति निर्देशात् क्तिनं पक्षे बाधित्वा अकारप्रत्ययोऽपि भवतीति बोध्यम्। तेन प्रशस्तिः, प्रशंसा इत्युभयमपि साधु।
10. 'सनाशंसभिक्ष उः' (3-2-168) इति तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु उप्रत्ययः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]अभिमतफलशंसी[A], इति विशेषरूपाणि। सामान्यरूपाणि तु ण्यन्तप्रकृतिकसन्नन्तं विना चौरादिककुंशयतिवत् (232) बोध्यानि।

(1700) "**शाखृ व्याप्तौ**" (I-भ्वादिः-126. अक. सेट्. पर.)

[2]शाखा, विशाखा। सर्वाण्यपि रूपाणि भौवादिकद्राखति (879) वत् बोध्यानि। [3]शाखोटकः=वृक्षविशेषः।

(1701) "**शाडृ श्लाघायाम्**" (I-भ्वादिः-289. सक. सेट्. आत्म.)

[4]शाला, [5]रूपशाली, [6]शालिः, [7]शालूकम्। सर्वाण्यपि रूपाणि भौवादिककाशतिवत् (186) बोध्यानि।

(1702) "**शान तेजने**" (I-भ्वादिः-995. सक. सेट्. उभ.)

तेजनम्=आयुधानां तीक्ष्णीकरणम्। [8]शीशांसकः-सिका;

1. अत्र 'सुप्यजातौ—' (3-2-78) इति णिनिः।
2. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः। विशिष्टा शाखा **विशाखा**=नक्षत्रविशेषः। शाखाशब्दादेव **शाखी**, प्रतिशाखं भवं **प्रातिशाख्यं** इत्यादीनि तद्धितरूपाणि भवन्तीति बोध्यम्।
3. औणादिकप्रत्ययविशेषनिष्पन्नोऽयं शब्दः।
4. शालते (शाडते) इति **शाला** इति **क्षीरस्वाम्यादिभिः** उदाहृतम्। 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययोऽत्रेति तेषामाशयः। **भाष्यकैयटयोस्तु** 'लस्य' (3-4-77) इत्यत्र 'शो तनूकरणे' इत्यस्मात् औणादिके लन्प्रत्यये **शाला**-शब्दो निष्पन्न इति स्पष्टमेव प्रतिपादितम्। अतश्च 'उपायस्य उपायान्तरादूषकत्वम्' इति न्यायेन साम्प्रतमस्माकमुभयमपि प्रमाणमेवेति बोध्यम्।
5. डकारलकारयोरेकत्वस्मरणात् रूपेण शाडते=शालते, इत्यर्थे **रूपशाली** इति **मैत्रेये**-णात्रोदाहृतमिति **माधवः**। एवं **काश्यपो**ऽपीति स एवाह। अत्र णिनिप्रत्ययः।
6. 'इन्' (द. उ. 1-46) इतीन्प्रत्यये रूपम्। **शालिः**=व्रीहिविशेषः। अत्रापि डलयोरेकत्वस्मरणात् लकारश्रवणम्।
7. औणादिके (द. उ. 3-47) ऊकण्प्रत्यये रूपम्। **शालूकम्**=उत्पलादीनां कन्दः। अत्रापि डलयोरेकत्वस्मरणात् लकारस्य श्रवणम्।
8. 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (3-1-6) इत्यत्र '**शानेर्निशाने**' (वा. 3-1-6) इति अर्थविशेषे धातोः स्वार्थे सन्, अभ्यासस्य दीर्घश्च विधीयेते। अस्य सनः 'धातोः' अभ्यासकार्याणि, हलादिशेषाभ्यासेत्वादीनि भवन्ति। अस्य सनः 'धातोः' (3-1-91) इति अधिकृत्य विहितत्वाभावात् नेडागम इति विशेषः। विस्तरस्तु **दान**धातौ (832) द्रष्टव्यः।

A '**अभिमतफलशंसी** चारु पुस्फोर बाहुः.........॥' भ. का. 1-27

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकदीदांसतिवत् (832) ज्ञेयानि ।

(1703) "[आङः] शासु इच्छायाम्"

(II-अदादिः-1022. सक. सेट्. आत्म.)

"**आत्रेय-मैत्रेय-स्वामि-काश्यपाः** अमुमुदितं पठन्ति । **वर्धमान-सम्मता-कारहरदत्तगर्गादयः** अनुदितं पठन्ति" इति **माधवः** ।

'—इच्छायामाशास्ते, शास्ति शासने ।' (श्लो. 184) इति **देवः** । 'नमोवाकं **प्रशास्महे** ।' इति **भवभूति** (उत्तररामचरिते 1-1) प्रयोगात् प्रायेणायम् आङ्पूर्वः । [1]आशीः, [2]आशिषा, [3]अन्यदाशीः-अन्याशीः, [4]आशासा-आशास्तिः, [5]आशास्यम्, [6]आशासितः,[A]

---

1. '**आङः शासः** क्वौ' (वा. 6-4-34) इति आङ्पूर्वकादस्मात् क्विपि, उपधाया इत्वम् । '**आशिषि** लिङ्लोटौ' (3-3-137), 'क्षिया**शीः**—' (8-2-104) इत्यादिनिर्देशाद्वा उपधाया इकारः । धातुसकारस्य 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घः । **मित्रशीः आर्यशीः** इत्यादि तु नास्माद्धातोः, किन्तु 'शासु अनुशिष्टौ' इत्यस्मादिति **न्यासपदमञ्जर्यादिषु** स्पष्टम् ।
2. 'आपं चैव हलन्तानाम्—' इति वचनात् क्विबन्तात् टाप् । क्विबन्तात्, धातोः इत्वे, '**शासि**वसि—' (8-3-60) इत्यादिना षत्वे च एवं सम्पद्यते ।
3. अन्या आशीः **अन्यदाशीः** । 'अषष्ठ्यतृतीयास्थस्यान्यस्य दुग् **आशीराशा**—' (6-3-99) इत्यादिना दुगागमः । षष्ठीतृतीयान्तत्वे तु **अन्याशीः** इत्येव ।
4. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्यये रूपमेवम् । एतच्च **माधव**-मतेनोक्तम् । **क्षीरस्वामी** तु "**आशास्तिः** । 'गुरोश्च हलः' (3-3-103) इति नास्ति; निष्ठायां सेटोऽकारवचनात् (द्रष्टव्यम् वा. 3-3-94) ।" इत्याह । अत्र प्रयोगः प्रमाणम् ।
5. 'एतिस्तुशास्वृ—' (3-1-109) इत्यत्र उदितो निर्देशात् न अस्मात् क्यपः प्रसङ्ग इति **आशास्यम्** इति ण्यदेव—इति **माधवः** । अयमाशयः—'निरनुबन्धकग्रहणे न सानुबन्धकस्य' (परि-82) इति वचनात् प्रकृतसूत्रे 'शासु अनुशिष्टौ' इत्यस्यैव ग्रहणम्, नास्येति । तेनात्र ण्यदेवेति । '**शास** इद् अङ्हलोः' (6-4-34) इत्यनेनात्र ण्यत्प्रत्यये इत्वं नाशङ्क्यम्; संयोगस्य 'संयोगो विप्रयोगश्च साहचर्यं...... विशेषस्मृतिहेतवः ॥' (वाक्यपदीयम् 2-315) इति विशेषस्मृतिहेतुत्वात् अङ्सम्बन्धिन एवं **शासेः** इकारविधौ ग्रहणात्, अस्य च अङ्भावात् ।
6. '**आङः शास**' इति **दुर्ग**सम्मतपाठे निष्ठायामिटि एवं रूपम् । उदित्पक्षपातिनौ **आत्रेयमैत्रेयौ** तु **आशास्तः आशास्तवान्** इति निष्ठायां रूपमाहतुरिति **माधवीये** स्पष्टम् । अयं भावः—उदित्पक्षे क्त्वायामिड्विकल्पनात् निष्ठायाम् 'यस्य विभाषा' (7-2-15) इतीण्निषेधः, इति तेषां मतम् ।

A. 'ईड्योऽयमीशः समुपास्तिशीलै**राशासितः**—।' धा. का. 2-45.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]आशासनः, [2]आशासित्वा-आशास्त्वा, इति विशेषरूपाणि। इतररूपाणि सर्वाण्यपि आदादिकासधातुवत् (61) बोध्यानि।

(1704) " शासु अनुशिष्टौ "

(II. अदादिः-1075. द्विकर्म. सेट्. पर.) जक्षित्यादिः।

' अनुशिष्टिः=नियोगः ' इति क्षीरस्वामी। विविच्य ज्ञापने प्रसिद्धः।

'—इच्छायामाशास्ते, शास्ति शासने।' (श्लो. 184) इति देवः।

[3]शिष्यः, [4]शास्यम्, [5]दुश्शासनः - दुश्शासः, [6]आशीः, [7]शिष्ट्वा—शासित्वा, [8]शिष्टः, [9]शिष्टिः-शास्तिः, [10]शास्ता प्रशास्ता, माणवकं धर्मं

---

1. तच्छीलादिषु कर्तृषु ' अनुदात्तेतश्च हलादेः ' (3-2-149) इति युच्प्रत्ययः।
2. " 'क्त्वाऽपि च्छन्दसि ' (7-1-38) इति ल्यपोऽपवादे क्त्वादेशे **आशास्त्वा आशासित्वा** इतीड्विकल्पः " इति **आत्रेयमैत्रेया**वाहतुरिति **माधवः**। छन्दसि एवं सम्भवेऽपि लोके ' समासेऽनञ्पूर्वे—' (7-1-37) इति क्त्वाप्रत्ययस्य ल्यबादेशे **आशास्य** इत्येव न्याय्यमिति बोध्यम्।
3. ' एतिस्तुशास्—' (3-1-109) इति क्यप्। ' **शास** इदङ्हलोः ' (6-4-34) इत्युपधाया इकारः। ' **शासि**वसि—' (8-3-60) इत्यादिना षत्वम्।
4. **शास्यम्** इति तु ' शसु हिंसायाम् ' इति भौवादिकधातोः ' हन्त्यर्थाश्च ' (ग. सू. चुरादिः) इति वचनाण्णिचि, णिजन्ताद् यति ज्ञेयम्।
5. ' भाषायां **शासि**—' (वा. 3-3-130) इत्यादिना खलपवादो युच्प्रत्ययः। तस्य वैकल्पिकत्वं **प्रक्रियाकौमुद्या**मुक्तम्; तेन **दुश्शास** इति खलपीति **केचित्**।
6. भावे सम्पदादित्वात् (वा. 3-3-94) क्विपि ' **आशासः** क्वावुपधायाः—' (वा. 6-4-34) इति उपधाया इकारः।
7. ' उदितो वा ' (7-2-56) इति क्त्वायामिड्विकल्पः। इडभावपक्षे इत्वमुपधायाः, इट्पक्षे धात्वाकारस्य उपधात्वाभावाद् नेकार इति विशेषः। अत एव षत्वमपीकाराश्रयं न भवति।
8. ' यस्य विभाषा ' (7-2-15) इति इण्निषेधात् एकमेव रूपं निष्ठायाम्।
9. **शिष्टिः** इत्यत्र ' तितुत्र—' (7-2-9) इतीण्निषेधः। **शास्तिः** इति तु अस्मादेव धातोः क्तिच्प्रत्यये, यद्वा, धातुनिर्देशे श्तिप्प्रत्यये वा ज्ञेयम्। णिजन्तात् **शासना** इति भवति। णिजन्तादेव **शास्तिः** इत्यपि **माधवः**। तस्यायमाशयः—बाहुलकात् युचा न बाधः, इति।
10. ' तृन् ' (3-2-135) इति ताच्छीलिकः तृन्प्रत्ययः। **प्रशास्ता** इत्यप्येवमेव। **प्रशास्ता**=ऋत्विग्विशेषः। ' तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां च अनिटौ ' (वा. 3-2-135) इत्यनिट्त्वम्। संज्ञाभिन्नस्थलेषु ' **प्रशासितारं** सर्वेषाम्—' (मनुः 12-1-22) इत्यादिषु इड् भवत्येवेति विशेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]शासत्, [2]मित्रशीः-आर्यशीः, इति विशेषरूपाणि। सामान्यरूपाणि तु आदादिकचकास्तिवत् (485) बोध्यानि।

(1705) "शिक्ष विद्योपादाने" (I-भ्वादिः-605. सक. सेट्. आत्म.)

[3]शिक्षा। 'शिक्षेर्जिज्ञासायाम्' (वा. 1-3-21) इति वार्त्तिकं नियमार्थम् इत्यभिप्रयन्तः, अयं धातुः शिक्षाभिन्नार्थे परस्मैपदी इति **क्षीरस्वामिप्रभृतय** आहुः। [4]शक्लधातोः सन्नन्तस्य विध्यर्थत्वसम्भवात् नैतन्नियमार्थमिति **कैयटन्यासपदमञ्जरीधातुवृत्त्यादिषु** स्पष्टम्। अतः सर्वत्रात्मनेपदमेवेति सिद्धान्तः। सर्वाण्यपि रूपाणि यथासम्भवमूह्यानि।

(1706) "शिखि गत्यर्थः" (I-भ्वादिः (पा.) सक. सेट्. पर.)

भ्वादिषु 'उख उखि—' इति दण्डके **कैश्चित्** पठितो धातुरयम्। भौवादिक-**कण्ठति**वत् (149) रूपाणि ज्ञेयानि।

(1707) "शिघि आघ्राणे" (I-भ्वादिः-161. सक. सेट्. पर.)

भौवादिक**कुण्ठति**वत् (149) सर्वाण्यपि रूपाण्यस्यापि ज्ञेयानि।

शिङ्घान[ण]कः रोगविशेषः। 'लङ्ग्शिङ्घि—' [द. उ. 3-27] इत्यादिना आन[ण]कप्रत्ययः। **शिङ्घाणम्** नासामलम्। बाहुलकात् आनक्प्रत्ययः।

(1708) "शिजि अव्यक्ते शब्दे" (II-अदादिः-1027. अक. सेट्. आत्म.)

शिञ्जानः-शानच्। 'तालैः शिञ्जद्वलय—' (मेघदूतम् 2-19) इति तु 'अनुदात्तेत्वप्रयुक्तमात्मनेपदमनित्यम्' इति परिभाषया (98) साधुरिति **माधवः**। 'अव्यक्ते शब्दे' इत्युक्तावपि भूषणध्वनावेवायं **कविभिः** प्रयुज्यते—यथाह**ामरसिंहः**— 'भूषणानां तु शिञ्जितम्' इति। एतच्च शब्दशक्तिस्वाभाव्यादुपपद्यते।

---

1. शतरि रूपमेवम्। 'जक्षित्यादयः षट्' (6-1-6) इत्यभ्यस्तसंज्ञायाम्, 'नाभ्यस्ताच्छतुः (7-1-78) इति नुम्निषेधः।

2. मित्राणि शास्तीति **मित्रशीः**। आर्यान् शास्तीति **आर्यशीः**। कर्तरि 'क्विप् च' (3-2-76) इति क्विप्। अत्राप्युपधाया इकार इति विशेषः।

3. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः।

4. शक्लधातोः सन्नन्ते 'शिशिक्ष' इति स्थिते 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः। तेन 'शिक्ष' इति सन्नन्ता प्रकृतिः सम्पन्नेति ज्ञेयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शिञ्जिनी—आवश्यकार्थे 'आवश्यकाधमर्ण्ययोः—' (3-3-170) इति णिनि-प्रत्यये तदन्तात् ङीष्। शिञ्जा-पचाद्यचि टाप्। इतराणि समस्तान्यपि रूपाणि आदादिक**णिजि**धातुवत् (672) बोध्यानि।

(1709) "**शिञ् निशाने**" (V-स्वादिः-1249. सक. अनि. उभ.) **निशानम्**=तीक्ष्णीकरणम्। सर्वाण्यपि रूपाणि सौवादिक**चिनोति**वत् (519) बोध्यानि। शिन्वन्-ती; शिन्वानः।

(1710) "**शिट अनादरे**" (I-भ्वादिः-303. सक. सेट्. पर.) शेटकः-शेटकः-शिशिटिषकः-शिशेटिषकः-षिका, शेशेटकः, इत्यादीनि रूपाणि भौवादिक**क्रेटति**वत् (190) बोध्यानि। शेटनीयम्।

(1711) "**शिल उञ्छे**" (VI-तुदादिः-1362. अक. सेट्. पर.) '**उञ्छः**=उद्धृतसस्यशेषाहरणम्' इति **दुर्गः**। पचाद्यचि—शिलम्। भिदादित्वादङि—शिला। सर्वाण्यपीतराणि रूपाणि तौदादिक**केलति**वत् (193) बोध्यानि।

(1712) "**शिष हिंसार्थः**" (I-भ्वादिः-687. सक. अनि. पर.)
'शिषोऽसर्वोपयोगे यौ शेषयेत् शेषतीत्युभे॥
लुङ्यभावादङोऽशेषीत् शिनष्टीति विशेषणे।' (श्लो. 178-9) इति **देवः**।
'**शिषिं** पिषिं श्लिष्यतिपुष्यती त्विषिम्,' इति **व्याघ्रभूति**वचनात् (काशिका 7-2-10) अनिट्त्वं धातोरस्य बोध्यम्।
शेषकः-षिका, शेषकः-षिका, शिशिक्षकः-क्षिका, शेशिषकः-षिका, [1]शिष्पः, [2]शेषः, इत्यादीनि समस्तान्यपि रूपाणि रौधादिक**पिनष्टि**वत् (1002) बोध्यानि। '**शिष्यति**' 'तल्लोकं **शिषति**' (गोपथब्राह्मणम् 3-82-2) इत्यादयः प्रयोगाः यथासम्भवं दिवादिषु तुदादिगणेऽवसाने मुचाद्यन्तर्गणे च छान्दसत्वेन पठित्वा साधुत्वसम्भावनार्हाः। अतो न तदर्थं तुदादिपाठावश्यकतेति बोध्यम्।

(1713) "**शिष असर्वोपयोगे**" (X-चुरादिः-1818. अक. सेट्. उभ.)
'शिषोऽसर्वोपयोगे यौ शेषयेत् शेषतीत्युभे। [आधृषीयः।

1. "'खष्प**शिष्प**—' (द.उ. 7-7) इति निपातनात् पप्रत्ययः। **शिष्पः**=कलायोगः" इति **माधवः**।
(द. उ. वृत्तौ 7-7) उपधाया अत्वे **शष्पम्**=घासः इति दृश्यते।
2. शेषति=हिनस्तीति **शेषः**=नागः। कर्तरि वाहुलकात् घञ्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लुङ्यभावादङोऽशेषीत् शिनष्टीति विशेषणे ॥' (श्लो. 178-9) इति **देवः** । विपूर्वोऽयमतिशये वर्तते—यथा—**विशेषः** । आधृषीयत्वेन णिजभावपक्षे अनिट्त्वमस्यापि धातोरिति **माधवीये** स्पष्टम् । [1]शष्पम् । सर्वाण्यपि रूपाणि यथासम्भवं **चेतयति**वत् (522), पूर्वलिखितधातुवच्च स्वयमेवोह्यानि । आधृषीयत्वात् णिज्विकल्पः ।

(1714) " **शिष्लृ विशेषणे** " (VII-रुधादिः-1451. अक. अनि. पर.)

'**विशेषणम्**=उपरञ्जनम्' इति **दुर्गादासः** ।
[2]विशेषः-वैशेषिकः, शेषः, [3]महाविशिष्टः । यथासम्भवं सर्वाण्यपि रूपाणि रौधादिक**पिनष्टि**वत् (1002) बोध्यानि ।

(1715) " **शीक आमर्षणे** " (X-चुरादिः-1827. सक. सेट्. उभ.)

आधृषीयः ।

'शीकरः' इत्यादिषु जलसेचनार्थकलाभार्थं **वोपदेव**प्रभृतिभिः धातुरयं '**सेके** आमर्षे च' इति पठितः । तत्तु 'शीकृ सेचने' इति भ्वादिधातोः सम्पद्यत इति व्यर्थमेव । तथा चोक्तम्—'मर्षणे शीकयेत् शीकेत्; सेचने शपि शीकते' (श्लो. 42) इति **देवेन** । आधृषीयत्वेन णिज्विकल्पः । रूपाणि यथासम्भवं चौरादिक**चीकयति**वत् (529) बोध्यानि ।

चुरादिष्वेव '**शीक भाषार्थः**' इति धात्वन्तरं अनाधृषीयं **स्वामि-काश्यपादयः** पठन्ति । तस्य प्रायपाठविरलत्वात् नास्माभिरुल्लेखः कृतः ।

(1716) " **शीकृ सेचने** " (I-भ्वादिः-75. सक. सेट्. आत्म.)

गत्यर्थकोऽपि कश्चित् शीकृधातुः **क्षीरस्वामिना** भ्वादिषु पठितः । "'**सीकृ**'

---

1. औणादिके (द. उ.7-7) पप्रत्यये उपधाया अकारे च रूपमेवम् । **शष्पम्**=बालतृणम् ।
2. विशिष्यते इति **विशेषः**—**कणाद**संमतः पदार्थविशेषः । विशेष एव **वैशेषिकः** विनयादित्वात् (5-4-34) स्वार्थे ठक् । ठस्य इकादेशः ।
3. विपूर्वकात् निष्ठायां **विशिष्टः** इति सिद्धम् । महत्या विशिष्टः **महाविशिष्टः** । संज्ञाविशेषः । 'महदात्वे घासकर**विशिष्टे**षूपसंख्यानम्' (वा. 6-3-46) इत्यात्वम्; पुंवद्भावश्च ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति आर्याः'' इति धनपालः। [1]शीकायमानः। अयम् अनुदित् इति केचित्। सर्वाणि रूपाणि भौवादिकचीभतिवत् (530) ऊह्यानि।

(1717) " शीङ् स्वप्ने " (II-अदादिः-1032. अक. सेट्. आत्म.)

शायकः-यिका, शायकः-यिका, [2]शिशयिषकः-षिका, [3]शाशय्यकः-य्यिका ;
[4]शयिता-त्री, शाययिता-त्री, शिशयिषिता-त्री, शाशय्यिता-त्री ;
— शाययन्-न्ती, — शाययिष्यन्-न्ती-ती ; —
[5]शयानः,[A] [6]शाययमानः, शिशयिषमाणः, शाशय्यमानः ;
शयिष्यमाणः, शाययिष्यमाणः, शिशयिषिष्यमाणः, शाशय्यिष्यमाणः ;
[7]सुखशीः-सुखश्यौ-सुखश्यः ; — — —
[8]शयितम्-तः[B]-तवान्, शायितः, शिशयिषितः, शाशयितः-तवान् ;
[9]शयः, [10]विशयी,

---

1. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्यये शीका इति सिद्ध्यति। शीकां करोति इत्यर्थे 'अटाट्टाशीका—' (वा. 3-1-17) इत्यादिना क्यङ्। अयं च क्यङ् 'तत्करोति' (वा. 3-1-26) इति णिचोऽपवादः। 'णिजपीष्यते' इति न्यासकारः। क्यङन्तात् शानचि रूपमेवम्। शीकायमानः=सेचक इत्यर्थः।
2. सन्नन्तात् द्विर्वचनादिकेषु कृतेषु सर्वत्र रूपमेवं बोध्यम्।
3. यङन्ते प्रत्ययस्य ङित्त्वात् 'अयङ् यि क्ङिति' (7-4-22) इत्ययङ् सर्वत्र बोध्यः।
4. 'इवर्णेष्वथ शीङ्श्रिनावपि' (व्याघ्रभूतिकारिका ; काशिका 7-2-10) इति वचनाद् धातोः इड् भवतीति बोध्यम्।
5. शानच्प्रत्ययस्य 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावेन यद्यपि 'क्ङिति च' (1-1-5) इति गुणनिषेधोऽत्र प्राप्तः ; तथापि 'शीङः सार्वधातुके गुणः' (7-4-21) इति विशेषविधानाद् गुणो भवतीति बोध्यम्। 'शयाना भुञ्जते यवनाः' इत्यत्र 'लक्षणहेत्वोः क्रियायाः' (3-2-126) इति शानच् इति ज्ञेयम्।
6. अचित्तवत्कर्तृकत्वे एवं शानजपि ण्यन्तात् भवतीति माधवः। चित्तवत्कर्तृकत्वे तु 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति नित्यं परस्मैपदमेव।
7. सुखं शेते इति सुखशीः। द्विवचनादौ 'एरनेकाचोऽसंयोगपूर्वस्य' (6-4-82) इति यणि सुखश्यौ सुखश्यः इत्यादीनि बोध्यानि।
8. 'निष्ठा शीङ्—' (1-2-19) इति वचनात् धातोरत्र निष्ठाया अकित्त्वम्। तेन गुणः।
9. पचादिपाठादच्प्रत्ययः। गुणायादेशौ।
10. 'विशयी देशे' [ग. सू. 3-1-134] इति ग्रह्यादिपाठात् विपूर्वकात् णिनिप्रत्ययः। निपातनात् देशविशेषवाचकत्वे वृद्ध्यभावः। अन्यत्र विशायी इत्येव।

A. 'शयानां कुछले तारां दिविष्ठामिव निर्मलाम् ॥' भ. का. 9-84.
B. 'मणिरत्नाधिशयितं प्रत्युदैक्षन्त तोयधिम् ॥' भ. का. 7-103.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]खेशयः-खशयः, [A]बिलेशयः, [2]पूर्वाह्णशयः, [3]पार्श्वशयः, उरश्शयः, उदरशयः, पृष्ठशयः, हस्तशयः,

ऊर्ध्वशयः, [4]उत्तानशयः,[B] अवमूर्धशयः, [5]दिग्धसहशयः, [6]गिरिशः,[C] [7]शयालुः,[D] [8]शयितः, [9]अतिशयितो गुरुं शिष्यः-अतिशयितो गुरुः शिष्येण,

---

1. खे शेते इति **खेशयः—खशयः**। 'अधिकरणे **शेतेः**' (3-2-15) इति अच्प्रत्ययः। '**शय**वासवासिष्वकालात्' (6-3-18) इति पाक्षिकः सप्तम्या अलुक्। एवं **रङ्गेशयः अद्रिशयः विलेशयः कुशेशयम्** इत्यादयो बोध्याः।
2. पूर्वाह्णे शेते इति **पूर्वाह्णशयः**। अत्र कालार्थकत्वात् न सप्तम्याः पाक्षिकोऽप्यलुक्—'—अकालात्' (6-3 18) इत्युक्तेः।
3. पार्श्वाभ्यां शेते **पार्श्वशयः**। उरसा शेते **उरश्शयः**। एवं **उदरशयः पृष्ठशयः** इत्यादयो ज्ञेयाः। अत्र सर्वत्र 'पार्श्वादिषूपसंख्यानम्' (वा. 3-2-15) इति अच्प्रत्ययः।
4. उत्तानः शेते **उत्तानशयः**। अवमूर्धा शेते **अवमूर्धशयः**। अत्र 'उत्तानादिषु कर्तृषु' (वा. 3-2-15) इति अच्प्रत्ययः।
5. दिग्धेन सह शेते इति **दिग्धसहशयः**। 'दिग्धसहपूर्वाच्च' (वा. 3-2-15) इति अच्प्रत्ययः। '**दिग्धसह**' इत्यत्र, मयूरव्यंसकादित्वात् (2-1-72), अस्मादेव निर्देशाद्वा तत्पुरुषसमासः। तत उपपदसमासः।
6. 'गिरौ डश्छन्दसि' (वा. 3-2-15) इति गिरावुपपदे **शेतेर्**डप्रत्ययः। प्रत्ययस्य डित्त्वेन टेर्लोपः। गिरिरस्यास्तीत्यर्थे लोमादित्वात् (5-2-100) शप्रत्ययेन प्रसाध्य **भाष्ये वार्त्तिक**मिदं प्रत्याख्यातम्। निमित्तावधिसंकरत उभयमपि प्रमाणमथत्वे इति सिद्धान्तः।
7. 'आलुचि **शीङो** ग्रहणम्' (वा. 3-2-158) इत्यालुच् ताच्छीलिकः। शयनशीलः **शयालुः**।
8. 'मतिबुद्धि—' (3-2-188) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् अस्मादपि धातोः वर्तमाने क्तप्रत्ययः।
9. 'गत्यर्थाकर्मकश्लिषशीङ्—' (3-4-72) इत्यादिनाऽत्र कर्तृकर्मणोर्यथासम्भवं क्तप्रत्ययो ज्ञेयः। उपसर्गवशादत्र धातुस्सकर्मक इत्यवधेयम्।

A. 'अभ्रेण खे सञ्चरमाण आरात् **बिलेशय**द्वेषिसमानजूतिः। वा. वि. 2-23.

B. 'शौरिर्यशोदा**शयने** न्यधात्ताम् आदत्त **चोत्तानशयां** कुमारीम्।' वा.वि. 3-40.

C. 'आरोपितं यद्**गिरिशेन** पश्चादनन्यनारीकमनीयमङ्कम्॥' कु. सं. 1-37.

D. 'हन्ति **नोपशयस्थो**ऽपि **शयालु**र्मृगयुर्मृगान्॥' शि. व. 2-80.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ग्रामम् [1]अधिशयानः, [2]स्थण्डिलशायी[A] तरुस्थलशायी, [3]शेषशायी-अब्धिशायी,[B] रङ्गशायी, [4]शयानो भुङ्क्ते यवनः, शायः, शिशयिषुः-शिशाययिषुः, शाशयः; शयितव्यम्, शाययितव्यम्, शिशयिषितव्यम्, शाशय्यितव्यम्;
[5]शयनीयम्[C], शायनीयम्, शिशयिषणीयम्, शाशय्यनीयम्;
शेयम्, शाय्यम्, शिशयिष्यम्, शाशय्यम्;
ईषच्छयः- दुश्शयः- सुशयः ; — —
[6]शय्यमानः, शाय्यमानः, शिशयिष्यमाणः, शाशय्यमानः ;
[7]शयः, तव [8]उपशायः[D]-विशायः, उपशयः, विशयः, [9]संशयः - सांशयिकः,

---

1. अत्र '**अधिशीङ्स्थाऽऽसां** कर्म' (1-4-46) इत्याधारस्य कर्मत्वम्।
2. 'व्रते' (3-2-80) इति णिनिः। स्थण्डिल एव शेते **स्थण्डिलशायी**। यस्स्थण्डिल एव व्रतविशेषानुपालनार्थं शेते स एवमुच्यते। यस्तु कदाचित् कटाद्यभावात् स्थण्डिले शेते सः **स्थण्डिलशय** इत्युच्यते इति बोध्यम्।
3. 'सुप्यजातौ—' (3-2-78) इति णिनिः।
4. 'लक्षणहेत्वोः क्रियायाः' (3-2-126) इति लक्षणार्थे शानच्। शयानानामेव सतां भोजनकरणं यवनलक्षणमिति समुदितार्थः।
5. अधिकरणेऽप्यनीयर्प्रत्ययो भवति, बाहुलकात्। शेरतेऽस्मिन् इति **शयनीयम्**।
6. यकि, 'अयङ् यि क्ङिति' (7-4-22) इति अयङ् आदेशः। आदेशस्य अनेकाल्त्वेऽपि 'ङिच्च' (1-1-53) इत्यन्त्यस्येकारस्यादेशः।
7. 'एरच्' (3-3-56) इति भावेऽच्प्रत्ययः।
8. पर्यायार्थे गम्यमाने, वि, उप इत्युपसर्गाभ्यां परस्मात् 'व्युपयोः **शेतेः** पर्याये' (3-3-39) इति घञ् प्रत्ययः, इवर्णान्तत्वलक्षणाच्प्रत्ययस्यापवादः। तव **विशायः**। मम **राजोपशायः**, राजानमुपशयितुं पर्याय इत्यर्थः। पर्यायभिन्नार्थे तु **उपशयः, विशयः** इत्यजेव।
9. संशय्यते इति **संशयः** =सन्देहः। संशयं आपन्नोऽर्थः **सांशयिकः**। '**संशयमाप**न्नः' (5-1-73) इति ठञ्। **सांशयिकः** स्थाणुः। स्थाणुः संशयं=पुरुष इति सन्देहमापन्न इत्यर्थः। **अमरसिंहस्तु** '**सांशयिकः** संशयापन्नमानसः' (3-1-5) इति संशयकर्तर्यपि प्रयोगमनुमेने ; द्वितीयान्तप्रकरणे पुनः '**संशयं—**' (5-1-73) इति द्वितीयान्तत्वेनैव पाठात् कर्मण्येव प्रत्ययो न तु कर्तरि इति **न्यासपदमञ्जर्यादिषु** स्पष्टम्।

A. 'वाचंयमान् **स्थण्डिलशायि**नश्च युयुक्षमाणाननिशं मुमुक्षून्।' भ. का. 3-41
B. 'पृक्ताप्रजः पृञ्जितगोपसूनुर्दृष्टोऽब्धि**शायी** स जनैर्युवद्भिः॥' धा. का. 2-46
C. 'गतमाभरणप्रयोजनं **शयनीयं** परिशून्यमद्य मे॥' रघु. 8-65
D. 'निशो**पशायः** कर्तव्यः फलोच्चायश्च संहतैः॥' भ. का. 7-41

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]अतिशयः-आतिशायिकः-आतिशयिकः, शायः, शिशयिषः, शाशय्यः ;
शयितुम्, शाययितुम्, शिशयिषितुम्, शाशय्यितुम् ;
[2]संशीतिः [3]शय्या[A], [4]सुखशायिका, [5]सुशयिका, शायना, शिशयिषा-
शिशाययिषा, शाशय्या ;
शयनम्, [6]सुखशयनम्-सौखशायनिकः, श्मशानम्[7], [8]अतिशायनम्-अतिशयनम्-आतिशायनिकम्, शायनम्, शिशयिषणम्, शाशय्यनम् ;
[9]शयित्वा,[B] शाययित्वा, शिशयिषित्वा, शाशय्यित्वा ;

---

1. अतिशेते इत्यतिशयः। उपसर्गवशाद्धातोरर्थान्तिरे वृत्तिः। अतिशये भवः **आतिशायिकः**, अध्यात्मादित्वात् (5-4-44) ठञ्। अनुशतिकादित्वात् (7-3-20) उभयपदवृद्धिः। 'व्याप्तमातिशयिकेन रसेन' (माघः 10-23) इत्यत्र तु विनयादित्वात् (5-4-34) ठक्।
2. भावे क्तिन्। **संशीतिः**=संशयः। 'तितुत्र—' (7-2-9) इतीण्निषेधः।
3. 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' (3-3-99) इति संज्ञायां गम्यमानायां स्त्रियां भावादौ क्यप्प्रत्ययः। शेरतेऽस्यामिति **शय्या**। क्तित्वादयङ्।
4. सुखशयनम् **सुखशायिका**। धात्वर्थनिर्देशे स्त्रियां ण्वुल्।
5. शोभनः शायोऽस्याः **सुशयिका**। 'प्रत्ययस्थात् कात्—' (7-3-44) इतीकारः।
6. सुखेन शयनम्—**सुखशयनम्**। सुखशयनं पृच्छतीति **सौखशायनिकः**। 'पृच्छतौ सुस्नातादिभ्यः' (वा. 4-4-1) इति ठक्। 'भृग्वादीन् अनुगृह्णन्तं **सौखशायनिकान्** ऋषीन्॥' (रघुवंशः 10-14)
7. शवानां शयनम्=**श्मशानम्**। पृषोदरादित्वात् (6-3-109) शवशब्दस्य श्मादेशः, **शयन**शब्दस्य '**शान**' इत्यादेशः। **काशिका** (6-3-9) द्रष्टव्या।
8. अतिशयनम् एव **अतिशायनम्**। '**अतिशायने** तमविष्ठनौ' (5-3-55) 'नित्ययोगेऽ**तिशायने**।' (वा. 5-2-94) इति **सूत्रवार्त्तिकादिनिर्देशात्** ल्युडन्ते दीर्घः पाक्षिकः ; तेन **अतिशयनम् अतिशायनम्** इत्युभयमपि साधु। न च वाच्यम्– 'बाधकान्येव निपातनानि' (परिभाषा. 119) इति वचनात् **अतिशयनम्** इत्यसाध्वेवेति ; यतः 'अबाधकान्यपि निपातनानि' (परि 120) इति वचनात् उभयमपि साध्वेवेति **माधवः**। वस्तुतः 'अज्विधौ भयादीनामुपसंख्यानम्—नपुंसके क्तादिनिवृत्त्यर्थम्' (वा. 3-3-56) इति वचनात् अस्य धातोः अतिपूर्वस्य ल्युटि रूपस्यानभिधानमेव ; अत एव च निर्देशात् **अतिशायनम्** इत्येकमेव रूपं साधु इति प्रतीमः।
9. 'न क्त्वा सेट्' (1-2-18) इति सेटः क्त्वायाः कित्वनिषेधात् गुणोऽत्र।

A. '**शय्यो**त्थायं मृगान् विध्यन्नातिथेयो विचक्रमे॥' भ. का. 4-8
B. '.........**शयित्वा** रजनीं सपौरः।' भ. का. 3-16

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उपशय्य, विशाय्य, प्रशिशयिष्य, प्रशाशय्य ;

शायम् २ } शायम् २ } शिशयिषम् २ } शाशय्यम् २; }
शयित्वा २ } शाययित्वा २ } शिशयिषित्वा २ } शाशय्यित्वा २; }

[1]शयुः, [2]शयानकः, [3]शीधुः-शीलम्-शैवालम्-शेवलः, [4]शेवः, शेपः, [5]शिखा, [6]शिनिः, [7]निशीथः ।

(1718) " **शीभृ कत्थने** " (I-भ्वादिः-383. सक. सेट्. आत्म.)

शीभरः-बाहुलकात् औणादिकोऽरप्रत्ययः । कत्थन इत्यर्थः । समस्तान्यपि रूपाणि भौवादिक**चीभति**वत् (530) ज्ञेयानि ।

(1719) " **शील समाधौ** " (I-भ्वादिः-523. अक. सेट्. पर.)

'समाधौ श(शी ?)लतीति स्यात् शीलयत्युपधारणे ॥' (श्लो. 154) इति **देवः** । '**समाधिः** ऐकाग्र्यम्' इति **क्षीरस्वामी** । [8]अनुशीलितः-शीलितः, [9]स्तुतिशीलः-स्तुतिशीला, [10]शैलूषः=नटः, [11]शीलम्-शैली । इतराणि रूपाणि भौवादिक**कीलति**वत् (195) ज्ञेयानि ।

---

1. अत्यर्थं शेरते इति **शयुः**=अजगरः । औणादिकः [द. उ. 1-92] उप्रत्ययः ।
2. औणादिके (द. उ. 26) आकप्रत्यये **शयानकः** इति भवति ।
3. '**शीङो** धुक्लग्वलन्वालनः' (द. उ. 10-9) इति क्रमेण धुगादिप्रत्ययेषु रूपाणीमानि सिद्धानि । **शीधुः**=मदिरा । **केचित् शीथुः** इति पठन्ति । **शीलम्**=स्वभावः । **शेवल-शैवालौ** जललताविशेषवाचकौ ।
4. औणादिके (द. उ. 8-126) वन्प्रत्यये रूपम् । **शेवः** सर्पः । **शेवा** इति **केचित्** । औणादिके (द. उ. 6-69) इति क्वनिप्प्रत्यये तु **शीवा** इति भवति ।
5. औणादिके (द. उ. 3-55) खप्रत्यये **शिखा** केशबन्धः ।
6. औणादिके निप्रत्यये धातोर्ह्रस्वे च रूपम् । **शिनिः** क्षत्रियविशेष इति **माधवः** ।
7. नितरां शेरतेऽस्मिन् प्राणिन इति **निशीथः**=अर्धरात्रम् । औणादिकस्थक्प्रत्ययोऽत्र ।
8. 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-188) इति वर्तमाने क्तप्रत्ययः । तदुक्तं **भाष्ये** (3-2-188) '**शीलितो** रक्षितः क्षान्तः आक्रुष्टो जुष्ट इत्यपि' इति । 'भूते' (3-2-84) इत्यस्यापवादः ।
9. स्तुतिं शीलति, इति **स्तुतिशीलः** । 'शीलिकामि—' (वा. 3-2-1) इत्यादिना कर्मण्युपपदे णप्रत्ययः । अणोऽपवादः । तेन स्त्रियां ङीपं बाधित्वा टाप् इति विशेषः । एवं **मांसशीलः**, इत्यादयोऽपि बोध्याः ।
10. बाहुलकात् ऊषन्प्रत्यये साधुः । **शैलूषः** नटः ।
11. इगुपधलक्षणे कप्रत्यये, घञि वा साधुः । घञ्यपि नोपधाया गुणः, गुरूपधत्वादिति बोध्यम् । शीले भवा वृत्तिः **शैली** । भवार्थेऽणि ङीष् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1720) "शील उपधारणे" (X-चुरादिः-1879. सक. सेट्. उभ.)
अदन्तः ।

'समाधौ शीलतीति स्यात् शीलयत्युपधारणे ॥' (श्लो. 154) इति **देवः** ।

उपधारणम्=अभ्यासः । चौरादिक**कीटयति**वत् (194) रूपाणि बोध्यानि ।

(1721) "शु गतौ" (I-भ्वादिः....सक.अनि.पर.)

शाकटायन-क्षीरस्वाम्यादयो धातुममुं पठन्ति । 'सु' इति **देवादयः** । 'श्रु' इति प्रसिद्धः पाठः । '**शवति**र्गतिकर्मा **कम्भोजेषु**, विकार एवैनम् **आर्याः** पठन्ति' (भाष्यम् 1-1-1) इत्यत्रोपात्तः शवतिस्तु 'शव' धातुप्रकृतिकः, न त्वयम् । रूपाणि सर्वाणि **कवति**वत् (198) बोध्यानि । **शुङ्गा**—औणादिकोऽयम् ।

(1722) "शुक गतौ" (I-भ्वादिः....सक.सेट्.पर.)

मैत्रेयक्षीरस्वामिप्रभृतिभिः पठितोऽयं धातुः । **माधवस्तु** अमुं नानुमेने । [1]शुकः, [2]शुक्रः । इतराणि रूपाणि भौवादिक**कुकति**वत् (197) बोध्यानि ।

(1723) "शुच शोके" (I-भ्वादिः-183. अक. सेट्. पर.)

'शुच्यते शुच्यतीत्येवं पूतीभावे शुचेः श्यनि ।
शोके शोचति—॥' (श्लो. 53) इति **देवः** ।

---

1. इगुपधलक्षणे कप्रत्यये रूपम् । **शुकः**=मुनिः, पक्षिविशेषश्च ।
2. औणादिके रक्प्रत्यये **शुक्र** इति सिद्धयति । **शुक्रः**=ग्रहविशेषः, अग्निः, शुद्धो वा । उभावपि शब्दौ **मैत्रेयाद्यनुसारेण** अस्माद् व्युत्पादितौ । **माधवस्तु** न सहतेऽमुम् । यदाह—" अस्मिन् (धातौ) हि सति '**शुक्र**वल्कोल्काः' (द. उ. 3-20) इति **शुभेः** कनि भलोपे **शुक**शब्दनिपातनम् अनर्थकं स्यात् ; इगुपधलक्षणकप्रत्ययेनैव सिद्धत्वात् । तथा **शुकेः** रग्विधानेनापि **शुक्र**शब्दसिद्धेः '**ऋज्रेन्द्र**—' (द. उ. 8-46) इत्यादौ **शुचे**र्निपातनम् अनर्थकं स्यात् ; इति अस्य पाठोऽनार्ष एव प्रतीयते ।" इति । **प्राचीनैः** वैयाकरणैः **मैत्रेय**प्रभृतिभिः पठितत्वात् उणादिरूपाणां बहुधातुप्रकृतिकत्वस्य बहुत्र दृष्टत्वात् , तदनुसारेणैतन्निराकरणस्यान्याय्यत्वादेतन्न सारम् इति **युधिष्ठिरमीमांसक**प्रभृतय अभिप्रयन्ति (द्रष्टव्या **क्षीरतरङ्गिणीटीका पृ.** 32) ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]शुचिः, [2]शोकः-हृच्छोकः, [3]शोच्यम्, [4]शोचनः, [5]शुक्, [6]शुक्रः, [7]शोशुच्यमानः, [8]शोचिः, [9]शुचित्वा-शोचित्वा, शुशुचिषकः-शुशोचिषकः, [10]शुचितः-शोचितः, [11]शूद्रः-शूद्रा, महाशूद्री। इतराणि सर्वाण्यपि रूपाणि भौवादिक**कोचतिवत्** (200) ऊह्यानि।

(1725) "ई शुचिर् पूतीभावे" (IV-दिवादिः-1165. अक. सेट् उभ)

पूतीभावः = क्लेदः।

[12]शुचित्वा-शोचित्वा, [13]शुक्तम्, [14]शुक्तिः-शुक्तिका, इतीमानि रूपाण्यस्माद् भवन्ति।

---

1. 'इगुपधात् कित्' (द. उ. 1-48) इति इन्प्रत्ययः। तस्य कित्त्वात् न गुणः। अहरहः क्लिश्यमाजनं दृष्ट्वा शोचतीति **शुचिः**=विद्वान्। **शुचिः** दक्षश्च।
2. घञि रूपमेवम्। 'तुन्द**शोक**योः—' (3-2-5) इति निपातनात् कुत्वम्। अन्यथा **वार्त्तिक**मते 'निष्ठायामनिटः—' (सि. कौ. वा. 7-3-52) इति संकोचितत्वात् धातोरस्य निष्ठायां सेट्त्वात् कुत्वाप्रसक्तेः। **प्रक्रियासर्वस्वे** तु न्यङ्क्वादित्वं (7-3-53) आश्रित्यात्र कुत्वं समर्थितम्। **हृच्छोकः** इत्यत्र 'वा **शोक**ष्यञ्रोगेषु' (6-3-51) इति हृदयशब्दस्य हृदादेशः।
3. ण्यति, 'चजोः कु घिण्ण्यतोः' (7-3-52) इति **सूत्रकार**मते यद्यपि प्राप्तं कुत्वम्; तथापि 'निष्ठायामनिटः—' (वा. 7-3-56) इति नियमान्निवर्तते।
4. 'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वल**शुच**—' (3-2-150) इत्यादिना तच्छीलादौ युच्।
5. भावे स्त्रियां सम्पदादित्वात् (वा. 3-3-108) क्विप्। क्तिनोऽपवादः।
6. 'ऋज्रेन्द्र—' (द. उ. 8-46) इत्यत्र निपातनात् रक्प्रत्ययान्तः साधुः। **शुक्रः**=भार्गवः।
7. यङन्तात् शानचि रूपमेवम्।
8. शोचति इति **शोचिः**=दीप्तिः, शोको वा। सकारान्तः शब्दः। 'अर्चि**शुचि**—' (द. उ. 9-30) इति इसिप्रत्ययः।
9. 'रलो व्युपधात्—' (1-2-26) इति सेटोः क्त्वासन्प्रत्यययोः कित्त्वविकल्पः; तेन रूपद्वयम्।
10. 'उदुपधात् भावादिकर्मणोः—' (1-2-21) इति सेटो निष्ठायाः कित्त्वविकल्पः। तेन रूपद्वयम्।
11. '**शुचे**र्दक् रश्च' इति **उणादिसूत्रेण** रक्प्रत्ययो दकारादेशः, उपधादीर्घश्च इति **माधवः**। **दशपाद्युणादौ** तु 'शदेरू च' (द. उ. 8-34) इति शदेर्धातोरिदं पदं निष्पाद्यते। **माधव**पक्ष एव प्राचीनः।
12. 'न क्त्वा सेट्' (1-2-18) इति प्राप्तं कित्त्वनिषेधं बाधित्वा, 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः। एवं सन्नन्तेऽपि **शुशोचिषकः-शुशुचिषकः-षिका** इत्यादीनि रूपाणि ज्ञेयानि।
13. ईदित्वात् निष्ठायामिण्निषेधः। **शुक्तम्**=स्फोटः।
14. क्तिन्नन्तोऽयम्। मुक्तास्फोटः **शुक्तिः**। शुक्तिरेव **शुक्तिका**।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इतराणि सर्वाण्यपि रूपाणि दैवादिक**दीप्यति**वत् (846) ज्ञेयानि ।

(1726) " **शुच्य अभिषवे** " (I-भ्वादिः-513. सक. सेट्. पर.)

'**अभिषवः**-द्रवेणाद्रवणम् , परिवासनम्' इति **स्वामी** । '—स्नानम्' इति **चान्द्राः** । '**शुच्यी**—' इति **क्षीरस्वामी** । '**चुच्यी**—' इति **दुर्गसम्मतः** पाठः । '**चुच्य**' इत्यपि पठति **मैत्रेयः** । "अवयवानां शिथिलीकरणं, सुरायाः सन्धानं वाऽ**भिषवः** ; यथा 'सोममभिषुणोत्यृजीषमभिषुणोति' इति । सुराप्रकरणे च 'सन्धानं स्याद**भिषवः**' इति" **माधवः** । '**अभिषवः**=निष्पीडनस्नपनसुरासन्धानस्नानादिः' इति **धातुकाव्यव्याख्या** (1-66) ।

शुच्यकः-च्यिका, शुच्यकः-च्यिका, शुशुच्यिषकः-षिका, शोशुच्यकः-च्यिका ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**चुच्यति**वत् (534) ऊह्यानि । [1]शुक्तिः, [A]प्रशुच्य ।

(1727) " **शुठ गतिप्रतीघाते** " (I-भ्वादिः-341. सक. सेट्. पर.)

'**गतिप्रतिहतौ शोठति**, आलस्ये शोठयेदिति ।' (श्लो. 80) इति **देवः** । '—**प्रतिघाते**' इत्येव **धनपालः** । '**शूठ**—' इति **क्षीरस्वामी** इति **पुरुषकारे** उक्तम् । **क्षीरतरङ्गिण्यां** तु '**शुठि**—' इत्येव दृश्यते ।

शोठकः-ठिका, शोठकः-ठिका, शुशुठिषकः-शुशोठिषकः-षिका, शोशुठकः-ठिका ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कुकति**वत् (197) बोध्यानि ।

(1728) " **शुठ आलस्ये** " (X-चुरादिः-1645. अक. सेट्. उभ.)

'— **आलस्ये शोठयेदिति** ।' (श्लो. 80) इति **देवः** ।

'**शठ इत्येके**' इति **क्षीरस्वामी** ।

शोठकः-ठिका, शुशोठयिषकः-षिका ; शोठयिता-त्री, शुशोठयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाणि चौरादिक**कोटयति**वत् (205) ऊह्यानि । कर्तरि क्तप्रत्यये [B]अविशोठितः ।

---

1. अत्र 'लोपो व्योर्वलि' (6-1-66) इति वलिलोपे 'तितुत्र—' (7-2-9) इत्यादिना इण्निषेधे, कुत्वे च रूपम् ।

A. '**प्रशुच्य** सोमं कृतहर्यतैर्नुतं समालितं फुल्लसरोजमालया ॥' धा. का. 1-66.

B. 'अर्क्येण तेन समरेष्व**विशोठित**स्त्वं......॥' धा. का. 3-27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1729) " शुठि खण्डनप्रमर्दनयोः "

(I-भ्वादि:-341-. सक. सेट्. पर.)

'—गतिप्रतिघाते' इति **क्षीरस्वामी**। '**शुठ**—' इति **दुर्गः**। **पुरुषकारे** तु "'**शूठ** गति....' इति **क्षीरस्वामी**" इत्युक्तम्; परं तु **क्षीरतरङ्गिण्यां** 'शुठ' इत्येव दृश्यते।

शुण्ठकः-ण्ठिका, शुण्ठकः-ण्ठिका, शुशुण्ठिषकः-षिका, शोशुण्ठकः-ण्ठिका; इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिक**कुण्ठति**वत् (209) ऊह्यानि। **शुण्ठी** ओषधिमूलिकाविशेषः।

(1730) " शुठि शोषणे " (I-भ्वादि:-344. सक. सेट्. पर.)

'शुण्ठयेत् **शुण्ठती**त्येवं **शोषणे** णौ **शपि** क्रमात्॥' (श्लो. 80) इति **देवः**।

शुण्ठकः-ण्ठिका, शुण्ठकः-ण्ठिका, शुशुण्ठिषकः-षिका, शोशुण्ठकः-ण्ठिका; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कुण्ठति**वत् (209) ज्ञेयानि।

(1731) " शुठि शोषणे " (X-चुरादि:-1646. सक. सेट्. उभ.)

'**शुण्ठयेत्** शुण्ठतीत्येवं **शोषणे णौ** शपि क्रमात्॥' (श्लो. 80) इति **देवः**।

शुण्ठकः-ण्ठिका, शुशुण्ठयिषकः-षिका; शुण्ठयिता-त्री, शुशुण्ठयिषिता-त्री; इत्यादिकानि सर्वाण्यपि रूपाणि चौरादिक**कुण्ठयति**वत् (210) ऊह्यानि। कर्मणि क्तप्रत्यये [A]संशुण्ठितः।

(1732) " शुध शौचे " (IV-दिवादि:-1191. सक. अनि. पर.)

शौचम्=नैर्मल्यम् इति **क्षीरस्वामी**।

'शुद्धौ शुन्धति भूवादेः शुधेः **शौचे तु शुध्यति**॥' (श्लो. 117) इति **देवः**।

शोधने, व्यवस्थिते, अन्वेषणे नाशने च दृश्यते। यदाह **मनुः** 'वेदाभ्यासेन **शुध्यति**।' (11-46) इति। 'अत्र नश्यति इत्यर्थः' इति **कुल्लूकभट्टः**।

शोधकः-धिका, शोधकः-धिका, शुशुत्सकः-त्सिका, शोशुधकः-धिका; शोद्धा-शोद्ध्री, शोधयिता-त्री, शुशुत्सिता-त्री, शोशुधिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**क्षुध्यति**वत् (315) ऊह्यानि।

A. '**संशुण्ठिता**हितमदेन विजोडितोऽसि॥' धा. का. 3-27.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1733) "शुन गतौ" (VI-तुदादिः-1336. सक. सेट्. पर.)

शोनकः-निका, शोनकः-निका, शुशुनिषकः-षिका, शोशुनकः-निका ; इत्यादिकानि रूपाणि सर्वाणि कुटतिवत् (204) ज्ञेयानि ।

औणादिके क्वुन्प्रत्यये—शुनकः[A], शुनासीरः इति च विशेषः ।

(1734) "शुन्ध शुद्धौ" (I-भ्वादिः-74. अक. सेट्. पर.)

'शुन्धयेत् शुन्धते शुन्धेद्यौ वा णौ शौचकर्मणि ।
शुद्धौ शुन्धति भूवादेः .... ॥' (श्लो. 117.) इति **देवः** ।

'**शुन्धन्ते** .... ।' (काण्वब्रा. 1-2-3-7) इति आत्मनेपदेऽपि दृश्यते ।

'**शुन्धध्वं** दैव्याय कर्मणे—' (तैत्तिरीयसंहिता 1-1-1-4) इत्यत्रापि ।

शुन्धकः-न्धिका, शुन्धकः-न्धिका, शुशुन्धिषकः-षिका, शोशुधकः-धिका ; इत्यादीनि रूपाणि सर्वाण्यपि **कुन्थतिवत्** (222) ऊह्यानि । [1]शुधितम्-तः-[B] तवान्, शुन्धित्वा[2], शुन्ध्युः (शुध्युः इति **केचित्**), इतीमानि रूपाणि विशेषेण भवन्ति ।

(1735) "शुन्ध शौचकर्मणि"

(X-चुरादिः-1833. सक. सेट्. उभ.) **आधृषीयः** ।

'—शौचकरणे' इति **क्षीरस्वामी** ।

'**शुन्धयेत् शुन्धते** शुन्धेद् यौ वा णौ **शौचकर्मणि** ।' (श्लो. 117) इति [देवः ।
'**शाकटायनस्य** त्वात्मनेपदी' इति **पुरुषकारे** ।

शुन्धकः-न्धिका, शुशुन्धयिषकः-षिका, शुन्धकः-न्धिका, शुशुन्धिषकः-षिका, शोशुः-धकः-धिका ; इत्यादिकानि रूपाणि सर्वाण्यपि ण्यन्तात् सन्नन्तं विना, **कुन्थतिवत्** (222) ज्ञेयानि ।

---

1. निष्ठायां 'अनिदितां हलः—' (6-4-24) इत्युपधानकारलोपः । 'उदुपधात्—' (1-2-21) इति (निष्ठायाः) अत्र कित्त्वविकल्पो न भवति । 'सन्निपातलक्षण—' (परि-86) विरोधात् ।

2. सेटः क्त्वायाम्, कित्वाभावात् नकारलोपो न भवति ।

A. '......मल्लाश्च यत्र चुकुणुः **शुनका** इवोच्चैः ।' धा. का. 2-76.

B. 'अकिन्दनीयान् **शुधितात्मनो** जनान् प्रशीकते यः करुणावलोकनैः ।' धा. का. 1-11.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1736) " शुन्भ भाषणे " I-भ्वादिः-433. सक. सेट्. पर.)

'—दीप्तौ हिंसने च' इति वोपदेवः। '—भासने' इति दुर्गः। '—भाषणे हिंसायां च'- इति क्षीरस्वामी। एवं देवमैत्रेयादयोऽपि।

'शोभते शपि दीप्त्यर्थे शुम्भेरन्यत् तङः समम्।' (श्लो. 114) इति देवः।

"स्वामी तु निरनुषङ्गं न पपाठ। इदमेव आत्रेयस्यापि मतम्; तुदादौ 'शोभत इति शपि' इति वचनात्। दुर्गस्तु भासने इत्यस्यार्थमाह। एवं धनपालशाकटायनौ। गुप्तस्तु 'सावष्टम्भनिषुम्भ(शुम्भ) संभ्रमनमद्भूकोलम्' मालतीमाधवम् (5-22) इत्यादिदर्शनान्मूर्धन्यादित्वमाह" इति माधवः। शुम्भकः-म्भिका, शुम्भकः-म्भिका, शुशुम्भिषकः-षिका, शोशुभकः-भिका; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककुश्वतिवत् (222) ज्ञेयानि। इगुपधलक्षणकप्रत्यये क्त्वादुपधानकारलोपे शुभः, 'स्फायितञ्चि—' (द. उ. 8-31) इत्यादिना रक्प्रत्यये नकारलोपे च शुभ्रम् इति च विशेषः।

(1737) " शुन्भ शोभार्थे "

(VI-तुदादिः-1322. अक. सेट्. पर.) तृम्फादिः।

'—हिंसायां च द्रुमे' इति धा. का. व्याख्या (2-75)। '—दीप्तौ हिंसने च' इति वोपदेवः।

'हिंसाभाषणयोः शोभेत् शोभार्थे शुभतीति शे॥' (श्लो. 143) इति देवः।

सर्वाण्यपि रूपाणि भौवादिककुश्वतिवत् (222) ऊह्यानि।

(1738) " शुभ भाषणे " (I-भ्वादिः-432. अक. सेट्. पर.)

क्षीरस्वामि-चन्द्र-जैन-कातन्त्र-हेमचन्द्रादयः न पठन्ति।

'हिंसाभाषणयोः शोभेत, शोभार्थे शुभतीति शे॥' (श्लो. 143) इति देवः।

शोभकः-भिका, शोभकः-भिका, शुशुभिषकः-शुशोभिषकः-षिका, शोशुभकः-भिका;

शोभिता-त्री, शोभयिता-त्री, शुशुभिषिता-शुशोभिषिता-त्री, शोशुभिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिककुप्यतिवत् (224) ऊह्यानि। णिनिप्रत्यये शोभी[A] इति। शोभनः-शब्दार्थत्वमयुक्तयुच्प्रत्ययः।

A. 'द्विरदान् सिंहलेन्द्रस्य द्विचतुर्दन्तशोभिनः।' या. अ. 22. 190.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1739) " शुभ दीप्तौ " (I-भ्वादिः-750. अक. सेट्. आत्म.)

'शोभते शपि दीप्त्यर्थे शुम्भेरन्यत् तङः समम् ।' (श्लो. 144) इति **देवः**।
'—हिंसने च' इति **वोपदेवः**। अर्थभेदात् पुनः पाठः।
शोभकः-भिका, शोभकः-भिका, शुशुभिषकः-शुशोभिषकः-षिका, शोशुभकः-भिका; इत्यादिकानि रूपाणि सर्वाण्यपि **क्रुप्यति**वत् (224) ज्ञेयानि।
शुभम्, शोभनः, शोभनम्, शोभा[A], इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1740) " शुभ शोभार्थे " (VI-तुदादिः-1321. अक. सेट्. पर.)

'हिंसाभाषणयोः शोभेत् **शोभार्थे शुभतीति** शे ॥' (श्लो. 143) इति **देवः**।
सर्वाण्यपि रूपाणि दैवादिक**कुप्यति**वत् (224) ऊह्यानि।
'**शोभा**[1] इति साधुः' इति **स्वामी**। औणादिके [द. उ. 8-31] रक्प्रत्यये **शुभ्र**मिति रूपम्। [2]शोभनः[B]।

(1741) " शुल्क अतिस्पर्शने " (X-चुरादिः-1619. अक. सेट्. उभ.)

'—**सर्जने**' इति **स्वामी**। '—भाषणे' इति **काशकृत्स्नः**। किं च अन्यत्र चुरादौ '**शुल्ल सर्जने**' इति च तत्र दृश्यते। '—अतिसर्जने' इति **केचित्**। '—सर्जने, वर्जने (वर्णने)' इति **वोपदेवः**। '**सर्जनम्**=आर्जनम्; वर्जनभाषणयोश्च **द्रुमे**' इति **धा. का. व्याख्या** (3-23)।
शुल्ककः-ल्किका, शुल्ककः-ल्किका, शुशुल्कयिषकः-षिका; शुल्कयिता-त्री, शुशुल्कयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कुत्सयति**वत् (217) ऊह्यानि। '**शुल्काय** देयाम्' [ऋक् 8-1-5] इति। 'शुल्कम्-शुल्कशाला-करः, मांसम्' इति **काशकृत्स्नीये**।

(1742) " शुल्ब माने " (X-चुरादिः-1611. सक. सेट्. उभ.)

'**शूर्प माने** इति **चन्द्रः**' इति **क्षीरतरङ्गिण्याम्**। '**शूर्प माने**' इति

---

1. '**शोभेति** निपातनात्' (काव्यालंकारसूत्रे 5-2-41) इति **वामनः**।
2. 'ल्युट् च' (3-3-115) इति भावे (कर्तरि च) ल्युट्।
A. 'कृष्णोऽपि तापोल्लुण्ठिताङ्ग**शोभा** आश्वास्य मारक्षुभिता महेलाः।' धा. का. 2-2. "'नाम्नि तु पुंस्त्वं प्रायिकम्' इति घञन्तस्यापि स्त्रीत्वम्" इति अत्र दृश्यते।
B. 'अशनीयमिवांशुमद्दानायादशो**भनः**॥' भ. का. 7-81.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीभद्रमैत्रेयादयः इति **माधवीयधातुवृत्तौ** । '—सर्जने' इति **कातन्त्रशाकटायनौ** । '––माने सर्जने च' इति **हेमचन्द्रः** । सर्वाण्यपि रूपाणि चौरादिक**कुट्टयति**वत् (207) ज्ञेयानि ।

(1743) "शुष शोषणे" (IV-दिवादिः-1183. सक. अनि. पर.)

शोषकः-षिका, शोषकः-षिका, शुशुक्षकः-क्षिका, शोशुषकः-षिका ;
शोष्टा-ष्ट्री, शोषयिता-त्री, शुशुक्षिता-त्री, शोशुषिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**तुष्यति**वत् (758) ऊह्यानि । [1]शुष्कः, शुष्कवान्, [2]आतपशुष्कः, [3]ऊर्ध्वशोषं[A] शुष्यति, [4]शुष्कम्, [5]शुष्णम्, [6]शुष्मं, शुष्मा-बर्हिः, [7]शुषिरम्, इत्यादिकानि रूपाणि अधिकान्येत्रेति विशेषः ।

(1744) "शूर विक्रान्तौ" (X-चुरादिः-1902. अक. सेट्. आत्म.)

आगर्वीयः, अदन्तश्च ।

'**शूरयेतेति विक्रान्तौ**, शूर्यते स्तम्भहिंसयोः ॥' (श्लो. 151) इति **देवः** ।
शूरकः-रिका, शुशूरयिषकः-षिका ; शूरयिता-त्री, शुशूरयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कूटयति**वत् (240) ज्ञेयानि । तृचि [B]शूरयिता ।

(1745) "शूरी हिंसास्तम्भनयोः"

(IV-दिवादिः-1157. सक. सेट्. आत्म.)

'शूरयेतेति विक्रान्तौ, **शूर्यते स्तम्भहिंसयोः** ॥' (श्लो. 151) इति **देवः** ।

---

1. '**शुषः कः**' (8-2-51) इति निष्ठातकारस्य ककारः ।
2. '**सिद्धशुष्कपक्वबन्धैश्च**' (2-1-41) इति सप्तमीसमासः ।
3. '**ऊर्ध्वे शुषिपूरोः**' (3-4-44) इत्यूर्ध्वे कर्तरि णमुल्प्रत्यये रूपमेवम् । ऊर्ध्वं शुष्यतीत्यर्थः । 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुल्प्रयोजकस्यैव धातोरनुप्रयोगः ।
4. शुष्यतीत्यर्थे औणादिके (द. उ. 3-39) कप्रत्यये रूपमेवम् । **शुष्कम्**=निर्मांसम् ।
5. औणादिकः (द. उ. 5-44) नप्रत्ययः, किच्च भवति । **शुष्णम्** = अनुदकम् ।
6. औणादिके (द. उ. 7-30) मन्प्रत्यये रूपमेवम् । शोषयति शुष्यते वा भयादिभिरिति **शुष्मम्** । '**शुष्मं** तेजसि सूर्ये ना' इति **मेदिनी** ।
7. औणादिके (द. उ. 8-26) किरच्प्रत्यये रूपमेवम् । **शुषिरम्**=शुष्कम् । '—कुहरं **शुषिरं** विवरं बिलम्' इत्य**मरः** ।

A. 'प्रबोधकालात् त्रिदशेन्द्रशत्रोः प्रागूर्ध्व**शोषं परिशोष्यमाणः** ।' भ.का.11-40
B. 'द्रष्टॄणां कुहकोऽथ **शूरयितृभिः** स्तुत्योऽसिना वीरयां-चक्रे......॥' धा.का. 3-58

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शूरकः-रिका, शूरकः-रिका, शुशूरिषकः-षिका, शोशूरकः-रिका ;
शूरिता-त्री, शूरयिता-त्री, शुशूरिषिता-त्री, शोशूरिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**शूर्यति**वत् (1037) ज्ञेयानि । शूरः-शूरी, मानशूरी, रणशूरी इमान्यधिकान्यत्रेति विशेषः ।

(1746) **"शूर्प माने"** (X-चुरादिः-1612. सक. सेट्. उभ.)
दुर्गश्रीभद्रमैत्रेयादयः एवं पठन्ति। तदनुसारेण धातुरयं लिखितः । [1]शूर्पम्, [2]शौर्पम्-शौर्पिकम् इमानि रूपाणि विशेषः । अन्यानि सर्वाण्यपि रूपाणि चौरादिक**चूर्णयति**वत् (550) ऊह्यानि । घञि-शूर्पः । शूर्पसदृशं नखमस्या इति [3]शूर्पनखा[A] ।

(1747) **"शूल रुजायां संघाते च"** (I-भ्वादिः-526. सक. सेट्.पर.)
'—रुजायाम्' इति **क्षीरस्वामि-चन्द्र-जैन-काशकृत्स्न-कातन्त्र-हेमचन्द्रादयः**।
शूलकः-लिका, शूलकः-लिका, शुशूलिषकः-षिका, शोशूलकः-लिका ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कूलति**वत् (244) ज्ञेयानि । शूलम्=शस्त्रविशेषः, शूली=शिवः, 'शिवः **शूली** महेश्वरः' इत्य**मरः**। शूलः=उदररोगविशेषः, [4]शूल्यम्, [5]शूलाकरोति, [6]शूलीकृत्य, इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

---

1. एरचि पचाद्यचि वा णिलोपे रूपमेवम् । **शूर्पम्**=प्रस्फोटनम् ।
2. शूर्पेण क्रीतं **शौर्पम् शौर्पिकम्** । अत्र '**शूर्पा**दञ् अन्यतरस्याम्' (5-1-26) इति आर्हीयेष्वर्थेषु अञ्प्रत्ययः । ठञोऽपवादः । पक्षे सोऽपि भवति ।
3. 'नखमुखात् संज्ञायाम्' (4-1-5) इति ङीप् । 'पूर्वपदात् संज्ञायामगः' (8-4-3) इति णत्वं च संज्ञायामेवेति णत्वाभावष्टाप् च' इति **धा. का. व्याख्यायाम्** (3-22)। **मल्लिनाथस्तु** '**शूर्पणखा**' इति णत्वविशिष्टमेव पठित्वा व्याचख्यौ । (रघुवंशव्याख्याने (12-32) ।
4. शूलेषु संस्कृतमित्यर्थे '**शूलो**खाद्यत्' (4-2-17) इति सप्तम्यन्तात् संस्कृतमित्यर्थे यत्प्रत्ययस्तद्धितः ।
5. '**शूलात्** पाके' (5-4-65) इति पाकविषये डाच्प्रत्ययः । 'ऊर्यादिच्विडाचश्च' (1-4-61) इति गतिसंज्ञायाम्, कृञोऽनुप्रयोगे 'कुगतिप्रादयः' (2-2-18) इति समासः । **शूला**करोति मांसम्—शूले पचतीत्यर्थः ।
6. '**शूली**' इति ऊर्यादिषु (1-4-61) पाठ इत्यभ्युपगन्तॄणां मते गतिसंज्ञायां समासे ल्यपि रूपमेवम् । **शूलीकृत्य**=रुजां सम्पाद्य इत्यर्थः ।

A. 'संपालयेद् विमतलक्ष्यपशुल्बभूमा क्ष्मामेष राम इव **शूर्पनखा**विचोटी ॥'
धा. का. 3-22.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1747) "शूष प्रसवे" (I-भ्वादिः-679. सक. सेट्. पर.)

'**षूष** प्रसवे' इति **क्षीरस्वामि-मैत्रेयौ**। तालव्यादिरिति **चरकः**। **शूषा** शाकम्' इति **तरङ्गिण्यामुक्तम्**। '**शूषम्**=बलम्' इति **ऋग्वेदे** (1-9-10)। '**प्रसवः** स चानुज्ञा (अभ्यनुज्ञा)' इति **धा. का. व्याख्या** (1-86)। **उत्पादन**मपि **प्रसवः** इति च तत्रोक्तम्। 'तालव्योष्मादिरिति **पारायणिकाः** इति **स्वामी**' इति **धातुवृत्तौ** उद्धृतम्। अयं पाठस्त**रङ्गिण्याम्** अक्षरशः नोपलभ्यते। "**तैत्तिरीयके**— 'सक्षशूष—' इति। **केचित्** दन्त्यादिं पठन्ति। तदनार्षम्; षोपदेशलक्षणविरोधात्।" इति **माधवः**।

शूषकः-षिका, शूषकः-षिका, शुशूषिषकः-षिका, शोशूषकः-षिका;
शूषिता-त्री, शूषयिता-त्री, शुशूषिषिता-त्री, शोशूषिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**चूषति**वत् (552) ऊह्यानि।
शतरि [A]शूषन्।

(1748) "शृधु शब्दकुत्सायाम्" (I-भ्वादिः-760. अक. सेट्. आत्म.)

'शब्दकुत्सा पायुशब्दः' इति **स्वामी**। **वृतादिः**।

'**शर्धते शब्दकुत्सायाम्** उन्दे शर्धति शर्धते। (श्लो. 118) इति **देवः**।
शर्धिता-त्री, शर्धयिता-त्री, शिशर्धिषिता-त्री, शरीशृधिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**पर्षति**वत् (1054) ऊह्यानि।
युचि-[B]शर्धनम्।

(1749) "शृधु उन्दने" (I-भ्वादिः-873. सक. सेट्. उभ.)

'........**क्लेदने**' इति **वोपदेवः**। '**उन्दः**=क्लेदनम्' इति **स्वामी**।
'शर्धते शब्दकुत्सायाम् **उन्दे शर्धति शर्धते**।' (श्लो. 118) इति **देवः**।
सर्वाण्यपि रूपाणि तौदादिक**तर्पति**वत् (772) ज्ञेयानि। णिनिप्रत्यये [C]परिशर्धी इति।

(1750) "शृधु प्रसहने" (X-चुरादिः-1735. सक. सेट्. उभ.)

'हिक्कादौ **शर्धयत्यस्य शृधेः प्रसहने णिचि**॥' (श्लो. 118) इति **देवः**।

A. '**शूषन्** दृशोरमृतयूषमजूषकस्त्वं ......॥' धा. का. 1-86.

B. '**अशर्धनैः** गोपकुलैः सहासौ ययौ कृतास्यन्दमुक्लृप्तमोदैः॥' धा. का. 2-3.

C. 'या नेदितोर्वी**परिशर्धि**वीची विमृद्धवृक्षादिविबोध्यशैत्या॥' धा. का. 2-26.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

" 'शृध अप्रसहने' अप्रसहनम्=अमर्षः। 'प्रसहने=अभिभवे इत्येके" इति स्वामी। उदित्त्वात् णिज्विकल्पः। 'प्रहसनम्=विद्रवः' इति गोविन्दभट्टः इति शब्दकल्पद्रूमे।

'—प्रहसने' इति शाकटायनकाशकृत्स्नौ। '—प्रहसनम्=अभिभवः' इति धा. का. व्याख्या (3-40)।

शर्धकः-र्धिका, शिशर्धयिषकः-षिका, शर्धकः-र्धिका, शिशर्धिषकः-षिका, शरीशृधकः-धिका;

शर्धयिता-त्री, शिशर्धयिषिता-त्री, शर्धिता-त्री, शिशर्धिषिता-त्री, शरीशृधिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकगृध्यतिवत् (424) ऊह्यानि।

निष्ठायाम्-शर्धितम्, शृद्धम्-शृद्धः, ल्युटि-[A]शर्धनम्, क्त्वायाम्-शर्धित्वा-शृद्ध्वा इति विशेषः।

(1751) "शॄ हिंसायाम्" (IX-क्र्यादिः-1488. सक. सेट्. पर.)

प्वादिः, ल्वादिश्च। 'शॄञ्—' इति क्षीरस्वामी।

अयं धातुः दैवादिकोऽपि इति प्रयोगात् ऊह्यते। यथा '....विशीर्यन्तीं नावमिव' (म. भा. 3-157-13); 'स्रवत्यनोंकृतं पूर्वं पुरस्ताच्च विशीर्यति॥' (मनुस्मृतिः 2-74) इति! शारकः-रिका, शारकः-रिका, [1]शिशरिषकः-शिशरीषकः-शिशीर्षकः-र्षिका, [2]शेशिरकः-रिका; [3]शरिता-शरीता-त्री, शारयिता-त्री, शिशरिषिता-शिशरीषिता-शिशीर्षिता-त्री, शेशिरिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि कृणातिवत् (258) ज्ञेयानि। [4]शृणन्, [5]शरः, [6]नीशारः, [7]शरारुः,

---

1. सन्नन्ते 'इट् सनि वा' (7-2-41) इतीड्विकल्पः। 'वृतो वा' (7-2-38) इतीटो दीर्घविकल्पः। तेन रूपत्रयं सन्नन्ते सर्वत्र बोध्यम्।
2. यङ्निमित्तकं इत्वम्, अभ्यासे गुणश्च। एवं यङन्ते सर्वत्र बोध्यम्।
3. तृजादिषु सर्वत्र 'वृतो वा' (7-2-38) इति इटो दीर्घविकल्पः।
4. शतरि, श्नाप्रत्यये, 'प्वादीनाम्—' (7-3-80) इति ह्रस्वे, 'श्नाभ्यस्तयोः—' (6-4-112) इत्याकारलोपे, 'ऋवर्णान्नस्य—' (वा. 8-4-1) इति णत्वे च रूपमेवम्।
5. शीर्यतेऽनेनेति शरः बाणः। 'ऋदोरप्' (3-3-57) इत्यप्प्रत्ययः।
6. 'शॄ वायुवर्णनिवृतेषु' (वा. 3-3-21) इति घञ्। अचोऽपवादः। 'उपसर्गस्य घञि—' (6-3-122) इति दीर्घः। नीशारः वायुविशेषः। नीशारः=चित्रवर्णः। नीशारः=आवरणम्-यथा—'गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः' इति। निवृतम् इत्यस्य आवरणमर्थः। निवृत्तमिति वार्तिके क्वाचित्क अपपाठः।
7. 'शॄवन्द्योः—' (3-2-173) इत्यारुप्रत्ययस्ताच्छीलिकः। शरारुः=हिंसकः।

A. '......तौ शर्धनाय समयातयतां नियुद्धम्॥' धा. का. 3-40.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]शारुकः, [2]शश्र्वान्-शशर्वान्, [3]शीर्णिः, [4]विशरणम् - शरणम्, [5]आशरः, [6]पराशरः, [7]किंशारुः, [8]शरुः, [9]शरीरम्, [10]शरत्, [11]परशुः, [12]शृङ्गम्, [13]शृङ्गारः, [14]शिशिरः, [15]शर्वः, [16]शर्वा-शर्वरी, [17]शिरीषम्,

---

1. 'लषपतपदस्थाभूवृषहनकमगमशॄभ्यः—' (3-2-154) इत्युकञ्प्रत्ययस्ताच्छीलिकः। '**किंशारुकं** तीक्ष्णमाहुः' इति **काशिका** (3-2-154)।
2. क्वसौ 'शॄदॄप्रां—' (7-4-12) इति ह्रस्वविकल्पः। ह्रस्वपक्षे **शशृवान्**, ह्रस्वाभावपक्षे **शशर्वान्** इति च रूपम्। **केचित्** सूत्रमेतत् प्रत्याचक्षते, तेषां मते तु **शशर्वान्** इत्येकमेव रूपम्। विस्तरस्तु **काशिकायां** (7-4-12) द्रष्टव्यः।
3. क्तिनि, 'ॠत इत्—(7-1-100) इतीकारः। दीर्घः, ल्वादित्वात् क्तिनस्तकारस्य नकारः, णत्वम्।
4. ल्युटि रूपमेवम्। **विशरणम्**=विनाशः। '**शरणं** गृहरक्षित्रोः' इत्य**मरः**।
5. आश्रृणातीति **आशरः**। पचाद्यचि रूपमेवम्।
6. परा श्रृणातीति **पराशरः**। अत्रापि पचाद्यच्। **पराशरः** ऋषिः।
7. किम्शब्द उपपदे औणादिकः (द. उ. 1-89) ञुण् प्रत्ययो भवति। **किंशारुः**=सस्यशूकम्।
8. 'शॄस्रृ—' (द. उ. 1-95) इति उप्रत्ययः। **शरुः**=क्रोधः।
9. औणादिके (द. उ. 8-72) ईरन्प्रत्यये रूपमेवम्। शीर्यत इति **शरीरम्**=देहः।
10. 'शॄदॄभसोऽदिः' (द. उ. 6-42) इति अदिप्रत्यये रूपमेवम्। शीर्यन्तेऽस्यां गुल्मवनस्पतीनां तेजांसीति **शरत्**=ऋतुः।
11. परशब्द उपपदे धातोः औणादिके (द. उ. 1-118) कुप्रत्यये रूपमेवम्। परान् श्रृणातीति **परशुः**=कुठारः।
12. '**श्रृणातेर्ह्रस्वश्च**' [द. उ. 3-64] इति गन्प्रत्ययः, धातोर्ह्रस्वश्च। **शृङ्गम्** = विषाणम्।
13. तुषारादिषु [द. उ. 8-69] निपातनात् **शृङ्गार**शब्दः साधुः।
14. शीर्यन्तेऽस्मिन् तृणगुल्मवनस्पतीनां तेजांसीति **शिशिरः**=ऋतुविशेषः। 'अजिर-**शिशिर**—' (द. उ. 8-27) इत्यत्र निपातनात् धातोः द्विर्वचनम्, सन्वद्भावः, ऋवर्णलोपः, इत्वं च।
15. औणादिके वन्प्रत्यये **शर्वः**। श्रृणातीति **शर्वः**=शिवः।
16. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति वनिप्प्रत्यये रूपमेवम्। स्त्रियाम् 'वनो र च' (4-1-7) इति ङीब्रेफौ। **शर्वरी**=रात्रिः।
17. 'शॄपॄभ्यां—' (द. उ. 9-10) इति ईषन्प्रत्ययः। प्रत्ययस्य कित्त्वात् इत्वम्। **शिरीषम्**=वृक्षविशेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]शर्म, [2]शिरः, [3]शारिः-शारिका, [4]शरभः, [5]शरण्यः, इतीमानि धातोरस्माद् भवन्ति।

(1752) "शेलृ गतौ" (I-भ्वादिः-543. सक. सेट्. पर.)

'—चलने' इति चन्द्रः। '—चालगत्योः' इति वोपदेवः। अयं धातुः काशकृत्स्नीयधातुपाठे नोपलभ्यते। केचित् 'सेलृ—' इति पठन्ति। 'षेलृ—' इत्येके।

शेलकः-लिका, शेलकः-लिका, शिशेलिषकः-षिका, शेशेलकः-लिका;
शेलिता-त्री, शेलयिता-त्री, शिशेलिषिता-त्री, शेशेलिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककेलतिवत् (262) ज्ञेयानि।

(1753) "शेवृ सेवने" (I-भ्वादिः-506. सक. सेट्. पर.)

क्षीरस्वामिमैत्रेयादयः एवं पठन्ति। 'शेवृ—' इत्यप्येके' इति माधव-बालमनोरमाकारादयः। स्वतन्त्रेण नामुं धातुं पठन्ति माधवप्रभृतयः। 'अयं सोपदेशोऽपि इति न्यासकारादयः (8-3-70)। तत् भाष्यविरुद्धम्' इति बालमनोरमायाम्।

शेवकः-विका, शेवकः-विका, शिशेविषकः-षिका, शेशेवकः-विका;
शेविता-त्री, शेवयिता-त्री, शिशेविषिता-त्री, शेशेविता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि केलतिवत् (262) ऊह्यानि।

(1754) "शै पाके" (I-भ्वादिः-918. सक. अनि. पर.)

पाकः=विक्लित्तिः। धातुममुं क्षीरस्वामि-मैत्रेय-लीलाशुक-शाकटायन-काशकृत्स्न-कातन्त्र-हेमचन्द्रादयः न पठन्ति। अत्र 'स्रै' इति क्षीरतरङ्गिण्यां दृश्यते।

---

1. शृणाति दुःखम् इति शर्म। औणादिके (द. उ. 6-73) मनिन्प्रत्यये रूपमेवम्।
2. शृणातेरौणादिकेऽसुन्प्रत्यये, प्रत्ययस्य कित्त्वे च रूपमेवम्। शिरः मूर्धा।
3. 'शरः शकुनौ' (द. उ. 1-56) इति इन्प्रत्यये, वृद्धौ च रूपम्। शारिः शकुनिविशेषः। शारिरेव शारिका। शकुनिभिन्ने तु शारिः शूलम्।
4. 'कृगॄशॄ—' (द. उ. 7-18) इति अभच्प्रत्यये रूपमेवम्। शरभः हिंस्रः। शरभमूर्तिः इति ख्यातः।
5. औणादिके (द. उ. 8. 8) अन्यप्रत्यये णत्वे च रूपमेवम्। शृणात्यर्थिनो भयमिति शरण्यः=आर्तिहरः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शायकः-यिका, शापकः-पिका, शिशासकः-सिका, शाशायकः-यिका ; शाता-त्री, शापयिता-त्री, शिशासिता-त्री, शाशायिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कायति**वत् (263) ज्ञेयानि । निष्ठायाम् शातम्-तः, क्तिनि-शातिः, क्त्वायाम्-शात्वा इति विशेषः । 'शाच्छोरन्यतरस्याम्' (7-4-41) इत्यत्र नास्य ग्रहणमिति ज्ञेयम् ।

(1755) " **शो तनूकरणे** " (IV-दिवादिः-1145. सक. अनि. पर.)

'—तक्षणे' इति **हेमचन्द्रः** । '—निशाने' इति **वोपदेवः** । **अन्ये सर्वेऽपि** '—तनूकरणे' इत्येव पठन्ति ।

शायकः-यिका, [1]शायकः-यिका, शिशासकः-सिका, शाशायकः-यिका ; शाता-त्री, शाययिता-त्री, शिशासिता-त्री, शाशायिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिकच्छेदनार्थक**छ्यति**(577) वत् ऊह्यानि । शाययन्, निष्ठायाम् [2]निशितम्[A]-निशातम्-[B]तः, संशितो ब्राह्मणः, संशितव्रतः, निशा, क्तिनि-निशितिः-निशातिः, ल्यपि[3]-प्रशाय, क्त्वायाम्-शित्वा-शात्वा, [4]शिशुः, [5]शादः इत्यादीनि रूपाणि अस्य धातोः विशेषः । शतरि-श्यन्[C] इति ।

(1756) " **शोणृ वर्णगत्योः** " (I-भ्वादिः-455. सक. सेट्. पर.)

'—वर्णे' इति **चन्द्रः** । 'गते वर्णे' इति **वोपदेवः** । '—वर्णगत्योः रागे गतौ च' इति **काशकृत्स्नः** ।

---

1. '**शाच्छासाह्वा—**' (7-3-37) इत्यादिना णिजन्ते युगागमः । आदन्तलक्षणपुकोऽपवादः ।
2. '**शाच्छोः—**' (7-4-41) इति प्रकृतेरिकारः । एष व्यवस्थितविभाषया व्रतार्थे नित्यः । तनूकरणार्थे न इति 'मिथस्ते न विभाष्यन्ते गवाक्षः **संशित**व्रतः॥' (भाष्यम् 7-4-41) इति वचनाज्ज्ञेयम् । '**श्यते**रित्वं व्रते नित्यं' (वा. 7-4-41) इति चात्र ज्ञेयम् ।
3. 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते' (परिभाषा-55) इति न्यायेन '**शाच्छोरन्यतरस्याम्**' (7-4-41) इति इत्वं ल्यपि न प्रवर्तते ।
4. औणादिके (द. उ. 1-105) उप्रत्यये रूपमेवम् । श्यति मातुः स्तनं पीत्वेति **शिशुः**=बालः ।
5. '**शाशपिभ्यां ददनौ**' (द. उ. 6-48) इति दप्रत्यये रूपमेवम् । **शादः**=मृदुः ।

A. 'आरक्षमग्रमवतत्य सृणिं **शिता**ग्रमेकः पलायत जवेन कृतार्तनादः ।' शि. व. 5-5.

B. 'पुराणि दुर्गाणि **निशात**मायुधं बलानि शूराणि घनाश्च कन्चुकाः ।' शि.व. 1-45.

C. '......प्रीतिं **श्यतो**ऽस्य स करेण शिरोधिमच्छात् ।' धा. का. 2-59.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शोणकः-णिका, शोणकः-णिका, शुशोणिषकः-षिका, शोशोणकः-णिका ;
शोणिता-त्री, शोणयिता-त्री, शुशोणिषिता-त्री, शोशोणिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**खोरति**वत् (363) ज्ञेयानि ।
शोणो=लोहितः, शोणितम्=रुधिरम्, शोणः-नदः, शोणा-[1]शोणी=नदी, इमानि रूपाण्यधिकान्यत्रेति विशेषः । [A]शोणः-पचाद्यचि एवं रूपम् ।

(1757) " **शौटृ गर्वे** " (I-भ्वादिः-290. अक. सेट्. पर.)

गर्वः=अभिमानः । **काशकृत्स्न-हेमचन्द्रादयः** धातुममुं न पठन्ति । '**शौडृ**—' इति **काशकृत्स्नीये** दृश्यते ।
शौटकः-टिका, शौटकः-टिका, [2]शुशौटिषकः-षिका, शोशौटकः-टिका ;
शौटिता-त्री, शौटयिता-त्री, शुशौटिषिता-त्री, शोशौटिता-त्री ;
इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**क्षेपति**वत् (261) बोध्यानि । शतरि [B]प्रशौटन्, [3]शौटीरः इति विशेषः ।

(1758) " **श्च्युतिर् क्षरणे** " (I-भ्वादिः-41. सक. सेट्. पर.)

क्षरणम्=स्रवणम् । '**द्रमिडाश्चुति**रित्यप्याहुः—चोतति ; **कौशिकस्तु श्चुति**-मयोपधं मन्यते श्चोतति ' इति **क्षीरस्वामी** ।
श्च्योतकः-तिका, श्च्योतकः-तिका, शुश्च्योतिषकः-शुश्च्युतिषकः-षिका, शोश्च्युतकः-तिका ;
श्च्योतिता-त्री, श्च्योतयिता-त्री, शुश्च्योतिषिता-शुश्च्युतिषिता-त्री, शोश्च्युतिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**कोचति**वत् (200) ज्ञेयानि ।
" सकारादिरयम्, श्चुत्वेन निर्देशः । सकारादित्वे प्रयोजनं मधु श्च्योततीति

---

1. '**शोणात्प्राचाम्**' (4-1-43) इति स्त्रियां प्राचामाचार्याणां मते विकल्पेन ङीष् भवति । **शोणी-शोणा**=वडवा इति **काशिकायाम्** ।
2. सन्नन्ते अभ्यासे 'एच इग्घ्रस्वादेशे' (1-1-48) इति ह्रस्वः इकाररूपः । यङन्तेऽप्येवमेव । परं तु गुणस्तस्येति विशेषः ।
3. औणादिके (द. उ. 8-72) ईरन्प्रत्यये रूपमेवम् । **शौटीरः**=गर्वः ।

A. '......**शोणान्** पृथुश्रोणिजनो दुदोह च ।' धा. का. 1-59.
B. '**प्रशौट**द्दुस्तगणयौटितान्तिकान्...... ।' धा. का. 1-39.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मधुश्च्युत्-क्विप्। अस्मात् 'तत्करोति तदाचष्टे' (ग. सू. चुरादौ) इति णिचि 'णाविष्ठवत् प्रातिपदिकस्य' (वा. 6-4-155) इतीष्ठनीव कार्यविधानात् टिलोपे मधुश्च्यायतेः क्विप्। तस्य लोपे प्रत्ययलक्षणेन 'णेरनिटि' (6-4-51) इति णेश्च लोपे, यकारान्ताद् अस्मात् कृदन्तात् प्रातिपदिकात् सौ, तस्य हल्ङ्यादिलोपे प्रत्ययलक्षणेन सुबन्तत्वेन पदत्वे 'संयोगान्तस्य—' (8-2-23) इति यलोपे, श्चुत्वस्य पूर्वत्रासिद्धत्वात् 'स्कोः—' (8-2-29) इति सलोपे 'चोः कुः' (8-2-30) इति चकारस्य पदान्तस्य कुत्वे, तस्य जश्त्वे मधुगिति रूपसिद्धिरिति **वृत्तिन्यासपदमञ्जरीसम्मताकारमैत्रेयादिभिरुक्तम्**" इति **माधवः**। भावे, आदिकर्मणि वा कर्तरि क्तप्रत्यये [A]प्रश्च्युतितः, क्विपि-अम्भश्श्च्युत्[B] इति।

(1759) "**श्मील निमेषणे**" (I-भ्वादिः-518. अक. सेट्. पर.)

'**निमेषणम्**=संकोचनम्। **क्ष्मील** इति **चान्द्राः**' इति **तरङ्गिण्याम्**। '**निमेषणे**=अक्षिनिमेषे' इति **काशकृत्स्नः**।

श्मीलकः-लिका, श्मीलकः-लिका, शिश्मीलिषकः-षिका, शेश्मीलकः-लिका; श्मीलिता-त्री, श्मीलयिता-त्री, शिश्मीलिषिता-त्री, शेश्मीलिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**क्ष्मीलति**वत् (325) ऊह्यानि। ल्युटि [C]श्मीलनम् इति विशेषः।

(1760) "**श्यैङ् गतौ**" (I-भ्वादिः-963. सक. अनि. आत्म.)

श्यायकः-यिका, श्यापकः-पिका, शिश्यासकः-सिका, शाश्यायकः-यिका; श्याता-त्री, श्यापयिता-त्री, शिश्यासिता-त्री, शाश्यायिता-त्री; इत्यादिकानि रूपाणि सर्वाणि वृद्ध्यर्थकभौवादिक'**प्यैङ्**'धातुवत् (1065) ज्ञेयानि। [1]प्रतिश्यायः-

---

1. '**श्याद्व्यध—**'(3-1-141) इत्यादिना कर्तरि णप्रत्ययः। आकारान्तत्वादेव णप्रत्यये सिद्धे सूत्रे पृथक् धातोः ग्रहणं सोपसर्गार्थम्—इति **माधवीयादिषु** स्पष्टम्।

A. 'अतेन्मुरारिर्मम चिन्मयोऽन्तिके च्योतन् दिशः **प्रश्च्युतितैः** स्मितामृतैः॥' धा. का. 1-6.

B. '**अम्भश्श्च्युतः** कोमलरत्नराशीनपांनिधिः फेनपिनद्धभासः।' शि. व. 3-39.

C. 'उन्मीलन**श्मीलन**लीलया दृशोरुत्स्मीलितक्ष्मीलितविश्वविष्टपम्।' धा. का. 1-67.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अवश्यायः, शीतो वायुः, [1]शीनं घृतम्, [2]श्यानम्-नः, [3]प्रतिशीनः, [4]अभिशीनः, अभिश्यानः, अवशीनः, अवश्यानः, अभिसंशीनः, अवसंशीनः, [5]श्यामः-श्यामा, श्यामाकः, शिवः, [6]श्येनः, [7]श्येतः, शितिः, इमानि रूपाणि अस्य धातोः विशेषेण भवन्ति।

(1761) "**श्रकि गत्यर्थः**" (I-भ्वादिः-84. सक. सेट्. आत्म.) '—**सर्पे**' इति **वोपदेवः**। यदुक्तं '**क्षीरस्वामी........शकि—**' इति **पुरुषकारे** (श्लो. 42); तत् तु **क्षीरतरङ्गिण्यां** न दृश्यते।

श्रङ्ककः-ङ्किका, श्रङ्ककः-ङ्किका, शिश्रङ्किषकः-षिका, शाश्रङ्ककः-ङ्किका;
श्रङ्किता-त्री, श्रङ्कयिता-त्री, शिश्रङ्किषिता-त्री, शाश्रङ्किता-त्री;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिककङ्कतिवत् (140) ऊह्यानि। ल्यपि [A]आश्रङ्क्य इति।

(1762) "**श्रगि गत्यर्थः**" (I-भ्वादिः-151. सक. सेट्. पर.)

श्रङ्गकः-ङ्गिका, श्रङ्गकः-ङ्गिका, शिश्रङ्गिषकः-षिका, शाश्रङ्गकः-ङ्गिका;

---

1. '**द्रवमूर्तिस्पर्शयोः श्यः**' (6-1-24) इति द्रवस्य मूर्तौ काठिन्ये च वर्तमानस्य श्यायतेः निष्ठायां परतः सम्प्रसारणम्। '**हलः**' (6-4-2) इति दीर्घः। '**श्योऽस्पर्शे**' (8-2-47) इति निष्ठानत्वम्। '**शीतो वायुः**' इत्यत्र तु स्पर्शार्थकत्वात् न निष्ठानत्वम्।
2. '**श्यानो** वृश्चिकः' इत्यत्र द्रवमूर्तिस्पर्शाभ्यामन्यत्र सम्प्रसारणाभावात् '**संयोगादेरातो धातोर्यण्वतः**' (8-2-43) इति निष्ठानत्वमिति बोध्यम्।
3. '**प्रतेश्च**' (6-1-25) इति प्रतेः परस्य **श्यैङो** निष्ठायां सम्प्रसारणम्। '**श्योऽस्पर्शे**' (8-2-47) इति निष्ठानत्वम्।
4. '**विभाषाऽभ्यवपूर्वस्य**' (6-1-26) इति अभि, अव इत्युपसर्गात् परस्य **श्यैङः** सम्प्रसारणविकल्पः। सम्प्रसारणपक्षे '**श्योऽस्पर्शे**' (8-2-47) इति निष्ठानत्वम्। सम्प्रसारणाभावपक्षे '**संयोगादेरातो धातोः—**' (8-2-43) इति निष्ठानत्वमिति विशेषः। "—'**अभ्यवाभ्याम्**' इति वक्तव्ये सति (सूत्रे) पूर्वग्रहणं व्यवहितेऽपि यथा स्यात्—इति; तेन **अभिसंशीनः, अवसंशीनः** इत्याद्यपि सिद्ध्यति" इति **माधवीयधातुवृत्तिः**।
5. '**इषुयुधि—**' (द. उ. 8-26) इति मक्प्रत्ययः।
6. '**श्यास्त्या—**' (द. उ. 5-12) इत्यादिना इनन्प्रत्ययः। **श्येनः**=गृध्रः।
7. '**श्याभ्याम्—**' (द. उ. 6-12) इतीतन्प्रत्यये **श्येतः**।

A. '**दुःखङ्कमाश्रङ्क्य हरेः पदं जनः प्रश्लङ्कते कुत्र रुजं क्व शङ्कते॥**' धा. का. 1-12.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकश्रङ्कतिवत् (140) ऊह्यानि। कर्तरि क्तप्रत्यये श्रङ्कितः[A] इति।

(1763) "श्रण दाने च" (I-भ्वादिः-798. सक. सेट्. पर.) [अ] घटादिः। चकारात् पूर्वधात्वर्थे गतौ च इति ऊह्यम्।

'मितः श्रणति दानार्थे........' (श्लो. 92) इति देवः।

श्राणकः-णिका, [1]श्रणकः-(श्राणकः)-णिका, शिश्रणिषकः-षिका, शंश्रणकः-णिका; श्रणिता-त्री, श्रणयिता-श्राणयिता-त्री, शिश्रणिषिता-त्री, शंश्रणिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकक्रणतिवत् (157) ज्ञेयानि। शतरि [B]श्रणन् इति।

(1764) "श्रण दाने" (X-चुरादिः-1578. सक. सेट्. उभ.)

'मितः श्रणति दानार्थे श्राणयत्यत्र णौ पदम्॥' (श्लो. 92) इति देवः।

प्रायेणायं विपूर्वः। '—गतौ इत्येके' इति मैत्रेयरक्षितः।

'मित्फलं तु पुनः श्रणयतीति हेतुमण्णिचि ह्रस्वः।' इति पुरुषकारः (श्लो. 192)।

अत्राह क्षीरस्वामी— 'युचि प्राप्ते 'चिन्तिपूजि—' (3-3-105) इति चकारात् अङ् इष्यते [2]कुत्सावत्, श्राणा' इति।

श्राणकः-णिका, शिश्राणयिषकः-षिका, श्राणयिता-त्री, शिश्राणयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिकक्राणयतिवत् (159) ऊह्यानि।

ल्यपि-[C]विश्राण्य, [D]विश्राणितम्, विश्राणनम्[E]-युच्।

[अ] श्रणधातोश्चौरादिकस्य हेतुमण्णिचोऽभावात्, स्वार्थे तु णौ 'नान्ये मितोऽहेतौ' (ग. सू. भ्वादिः) इति मित्त्वनिषेधात् न तस्यानुवादोऽयं धातुरिति माधवोऽभिप्रैति।

1. घटादित्वं सर्वसम्मतम्। तेषां मते णिजन्ते मित्त्वादुपधाह्रस्वो ज्ञेयः।
2. कुत्सावदिति। यथा सूत्रेऽनुपादानेऽपि कुत्सयतेर्णिचि युचं पक्षे प्रतिषिध्य कुत्सा इति अङ् - तद्वदित्यर्थः।

A. 'त्वङ्गत्खगश्रङ्कितपक्ष्मारुतश्लङ्कद्रजोराजिभिरिङ्किताम्बरम्।' धा. का. 1-21.
B. 'चणन् विषादं विशणन् विचिन्तां श्रणन् विमोहं स्न[श्र]थितोऽस्तु सद्यः॥' धा. का. 2-9.
C. 'वेश्मानि रामः परिवर्हवन्ति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः।' रघुवंशे 14-15.
D. 'विमथ्य विश्राणितमेतदीयं दैत्यद्विपा देवि मरुत्वदायाः।' या. अ. 18-101.
E. 'कथं न शक्योऽनुनयो महर्षेः विश्राणनाच्चान्यपयस्विनीनाम्।' रघु. 2-54.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1765) "**श्रथ हिंसार्थः**" (I-भ्वादिः-799. सक. सेट्. पर.) **घटादिः ।**

'**श्नथ**' इति क्वचित् पाठः ।

"दौर्बल्ये श्रथयेत् प्रयत्नविषये स्याच्छ्राथयेन्मोक्षणे
यौ तु **श्राथयति श्रथत्यपि च वा णौ** श्रन्थयेत् श्रन्थति ।
सन्दर्भे श्नि विमोचनार्थविषये श्रथ्नात्यथ श्रन्थते,
शैथिल्ये....॥' (श्लो. 101) इति **देवः** । सर्वाण्यपि रूपाणि भौवादिक**क्रथति**वत् (280) बोध्यानि ।

(1766) "**श्रथ प्रयत्ने**" (X-चुरादिः-1546. सक. सेट्. उभ.)

'........प्रतियत्ने' इति **क्वचित्** पाठः । दैवश्लोकः पूर्वस्मिन् धातौ द्रष्टव्यः । 'प्रतिहर्षे' इति **क्षीरतरङ्गिणी-कातन्त्र-जैनेन्द्र-हेमचन्द्रीयेषु** पाठः । 'प्रस्थाने' इति **मैत्रेय** इति **माधवः** । सर्वाण्यपि रूपाणि चौरादिक**श्लापयति**वत् (282) बोध्यानि ।

(1767) "**श्रथ मोक्षणे**" (X-चुरादिः-1823. सक. सेट्. उभ.) **आधृषीयः** ।

'हिंसायाम्' इति **केचित्** । दैवश्लोकः (1765) धातौ द्रष्टव्यः । सर्वाण्यपि रूपाणि चौरादिक**च्छदयति**वत् (562) बोध्यानि ।

(1768) "**श्रथ दौर्बल्ये**" (X-चुरादिः-1871. अक. सेट्. उभ.) **अदन्तः** ।

सर्वाण्यपि रूपाणि चौरादिक**कथयति**वत् (162) बोध्यानि ।

(1769) "**श्रथि शैथिल्ये**" (I-भ्वादिः-35. अक. सेट्. पर.)

[1]प्रश्रथः, हिमश्रथः, [2]श्रन्था । इतराणि सर्वाण्यपि रूपाणि भौवादिक**क्रन्दति**वत् (163) बोध्यानि ।

(1770) "**श्रन्थ विमोचनप्रतिहर्षयोः**"

(IX-क्र्यादिः-1512. सक. सेट्. पर.)

'...........सन्दर्भे' इति **केचित्** । प्रश्रथः—हिमश्रथः, [3]श्रन्थित्वा-श्रथित्वा,

---

1. '**अवोदैधौद्मप्रश्रथहिमश्रथाः**' (6-4-29) इति घञि निपातनात् नलोपः, वृद्ध्यभावश्च । हिमं श्रथ्यतेऽस्मात् इति **हिमश्रथः**=चन्द्रः ।
2. '**गुरोश्च हलः**' (3-3-103) इत्यकारप्रत्ययः । '**ण्यासश्रन्थः—**' (3-3-107) इति युच् तु क्र्यादिक**श्रन्थ**धातोरिति **माधवादयः** ।
3. '**नोपधात् थफान्ताद्वा**' (1-2-23) इति कित्त्वविकल्पः । कित्त्वपक्षे '**अनिदिताम्—**' (6-4-24) इति नकारलोपः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]श्रेथिवान्, [2]श्रन्थना इति विशेषरूपाणि। इतराणि सर्वाण्यपि क्रैयादिक**ग्रथ्नाति**वत् (437) बोध्यानि।

(1771) "**श्रन्थ सन्दर्भे**" (X-चुरादिः-1838. सक. सेट्. उभ.)

आधृषीयः। आधृषीय**ग्रन्थयति**वत् (438) रूपाणि सर्वाणि ज्ञेयानि।

(1772) "**श्रन्भु प्रमादे**" (I-भ्वादिः-393. सक. सेट्. आत्म.)

धातुरयं तालव्योष्मादिः इति **काश्यपादयः**। दन्त्यादिरिति **चन्द्रादयः**। **काशिकादिषु** प्रकृतधातूपादानप्रकरणेषु शोधकानां इच्छानुसारेण यथेष्टं मुद्रितम्, अतो **भाष्यादिषु** 'स्रम्भु' इति वा, 'श्रम्भु' इति वाऽभीष्टमिति नेदानीं निश्चेतुं सामग्री लभ्यते। **व्याख्यातारस्तु** निर्विचारं परस्परदूषकाः।

[3]विश्रम्भः, [4]विश्रब्धः। इतराणि सर्वाण्यपि रूपाणि भौवादिक**कन्द**तिवत् (948) बोध्यानि।

(1773) "**श्रमु तपसि खेदे च**" (IV-दिवादिः-1204. सक. सेट्. आत्म.)

शमादिः।

सर्वाण्यपि रूपाणि दैवादिक**क्लाम्यति**वत् (283) ज्ञेयानि। '**शमित्यष्टाभ्यः—**' (3-2-141) इति घिनुणि 'शमामष्टानाम्—' (7-3-74) इति दीर्घे च **श्रमी** इति रूपम्। '**नोदात्तोपदेशस्य—**' (7-3-34) इति वृद्धिनिषेधः।

---

1. कसौ, '**श्रन्थि**ग्रन्थि—' (वा. 1-2-6) इत्यादिना लिटः कित्त्वान्नलोपे, 'एत्वाभ्यासलोपावत्र वक्तव्यौ' इति **हरदत्त**वचनात् एत्वाभ्यासलोपौ। 'वस्वेकाजा—' (7-2-67) इतीट्।

2. 'ण्यास**श्रन्थो** युच्' (3-3-107) इति युचि **श्रन्थना**।

3. घञि रूपमेवम्। धातुरयं नोपधः; प्रयोगे परसवर्णवशात् मकारश्रवणं सर्वत्रेति बोध्यम्।

4. निष्ठायाम्, उपधानकारलोपे, निष्ठातकारस्य 'झषस्तथोः—' (8-2-40) इति धत्वे, भकारस्य जश्त्वेन बकारे च रूपमेवम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रान्त्वा, विश्रान्तिः । [1]विश्रामः । [2]श्रमणा ।

(1774) "श्रा पाके" (II-अदादिः-1053. सक. अनिट्. पर.)

'........**श्राति** श्रायति लुक्शपोः ॥' (श्लो. 9) इति **देवः** ।

[3]शृतम् क्षीरं हविर्वा, श्राणा यवागूः, श्रपिता यवागूः । इतराणि समस्तान्यपि रूपाणि आदादिक**श्राति**वत् (1153) बोध्यानि ।

(1775) "श्रा पाके" (I-भ्वादिः-810. सक. अनि. पर.) **घटादिः** ।

'........श्राति **श्रायति** लुक्शपोः ॥' (श्लो. 9) इति **देवः** ।

'श्रै पाके' (919) इति भौवादिकस्य कृतात्वस्य, 'श्रा पाके' (1053) इत्यादादिकस्य च मित्त्वार्थं घटादिषु अनुवादोऽयम्; न तु स्वतन्त्रो धातुः । अत्र सर्वत्र 'पाकः=विक्लित्तिः' इति **कैयटादयः** । 'स्वेदः' इति **बोपदेवः** । '**क्लेशने**' इति **जैनेन्द्रे** । रूपाणि सर्वाणि घाटादिक**घटति**वत् (454) बोध्यानि ।

(1776) "श्रिञ् सेवायाम्" (I-भ्वादिः-897. सक. सेट्. उभ.)

'श्रीणाति पाके श्रीणीते **सेवायां श्रयते श्रयेत्** ।' (श्लो. 16) इति **देवः** ।

श्रायकः-यिका, श्रायकः-यिका, [4]शिश्रयिषकः-शिश्रीषकः-षिका, शेश्रीयकः-यिका;

---

1. घञि रूपमेवम् । 'नोदात्तोपदेशस्य—' (7-3-34) इति वृद्धिनिषेधो नात्र, बाहुलकात् । 'वौ श्रमेः' इति वचनं वृद्ध्यर्थं **केचित्** कल्पयन्ति । **भाष्यवार्तिकवृत्तिकारादयस्तु** '**विश्राम** इति न पाणिनीयम् ।' इत्याहुः ।
"**विश्रामस्या**पशब्दत्वं **वृत्त्युक्तं** नाद्रियामहे ।
मुरारिभवभूत्यादीन् अप्रमाणीकरोति कः ? ॥
'**विश्राम**शाखिनं वाचां' '**विश्रामो** हृदयस्य च ।'
'**विश्राम**हेतोः' इत्यादि महान्तस्ते प्रयुञ्जते ॥"
इति **प्रक्रियासर्वस्वम्** अत्रावधेयम् ।
2. णिजन्तात् नन्द्यादित्वात् कर्तरि ल्युः । 'कुमारः **श्रमणादिभिः**' (2-1-70) इति निर्देशोऽत्र लिङ्गम् ।
3. ण्यन्तस्य अण्यन्तस्य च क्तप्रत्यये, '**शृतं** पाके' (6-1-27) इति निपातनादेवं रूपम् । धातोः शृभावः । अन्यत्र **श्राणा** यवागूः **श्रपिता** वा । 'संयोगादेः—' (8-2-43) इति शुद्धे निष्ठानत्वम् । णत्वं च । ण्यन्ते तु आदन्तलक्षणे पुकि, घटादित्वेन मित्त्वात् ह्रस्वे **श्रपिता** इति ।
4. 'सनीवन्तर्धभ्रस्जदम्भुश्रि—' (7-2-49) इत्यादिना सनि इड्विकल्पः सर्वत्र । इट्पक्षे **शिश्रयिषकः** इति रूपम् । इडभावपक्षे सनः कित्त्वे 'अज्झनगमां सनि' (6-4-16) इति दीर्घे **शिश्रीषकः** इत्यादीनि रूपाणि ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रेता-त्री, श्राययिता-त्री, शिश्रयिषिता-शिश्रीषिता-त्री, शेश्रीयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्षायतिवत् (263) बोध्यानि । [1]उच्छ्रायः, [2]श्रायः [3]शिश्रिवान्, [4]विश्रयी, [5]श्रित्वा, श्रितः-[6]कष्टश्रितः, [7]श्रीः, [8]श्रेणिः-श्रेणी, [9]श्मश्रु ।

(1777) "श्रिषु दाहे" (I-भ्वादिः-701. सक. सेट्. पर.)

सर्वाण्यपि रूपाणि भौवादिकक्षेपतिवत् (261) बोध्यानि । उदित्त्वात् क्त्वायामिड्विकल्पः ।

(1778) "श्रीञ् पाके" (IX-क्र्यादिः-1475. सक. सेट्. उभ.)

'श्रीणाति पाके श्रीणीते सेवायां श्रयते श्रयेत् ।' (श्लो. 16) इति देवः । प्रातिस्विकरूपाणि विना क्रैयादिकक्रीणातिवत् (274) सर्वाणि रूपाणि बोध्यानि ।

(1779) "श्रु श्रवणे" (I-भ्वादिः-942. सक. अनि. पर.)

श्रावकः-विका, श्रावकः-विका, शुश्रूषकः-षिका, शोश्रूयकः-यिका;

---

1. एरचोऽपवादभूतः 'उदि श्रयति—' (3-3-49) इति घञ् । कथं 'पतनान्ताः समुच्छ्रयाः' इति अजन्तत्वम्? 'कृत्यल्युटो बहुलम्' (3-3-113) इति बहुलग्रहणात् 'क्वचिदपवादविषयेऽपि उत्सर्गोऽभिनिविशते' (परि. 60) इति बोध्यम् । वक्ष्यमाणविभाषाग्रहणानुवृत्तेः समुच्छ्रयः इत्यपि साधुरिति प्रक्रियाकौमुदीव्याख्या (3-3-49) ।
2. 'श्रिणीभुवोऽनुपसर्गे' (3-3-24) इति घञ् ।
3. लिटः क्वसौ द्विर्वचनादिकेषु कृतेषु रूपमेवम् । काशिकायाम् (7-2-67) उदाहृतम् ।
4. विपूर्वकादस्मात् 'जिदृक्षिविश्रीण्—' (3-2-157) इत्यादिना इनिप्रत्ययस्ताच्छीलिकः ।
5. 'श्र्युकः क्किति' (7-2-11) इतीण्निषेधः । एवं निष्ठाक्तिन्नादिष्वपि ज्ञेयम् ।
6. कष्टं श्रितः कष्टश्रितः । 'द्वितीया श्रित—' (2-1-24) इत्यादिना समासः ।
7. 'क्विब् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' (वा. 3-2-178) इति ताच्छीलिकः क्विप्प्रत्ययः, तत्सन्नियोगेन धातोर्दीर्घः, सम्प्रसारणाभावश्च । श्रयते भगवन्तं नित्यमिति श्रीः लक्ष्मीः ।
8. 'वह्निश्रि—' (द. उ. 1-21) इत्यादिना निप्रत्ययः । श्रेणिः=आलिः । श्रेणी; अत्र 'कृदिकारात् अक्तिनः' (ग. सू. 4-1-4) इति ङीष् ।
9. 'श्मनि श्रयते डुन्' (द. उ. 1-161) इति डुन्प्रत्यये टिलोपे च रूपमेवम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रोता-त्री, श्रावयिता-त्री, शुश्रूषिता-त्री, शोश्रूयिता-त्री ; इत्यादीनि रूपाणि भौवादिकद्रवतिवत् (883) बोध्यानि ।

[1]शृण्वन्-ती, [2]संशृण्वानः, [3]शुश्रूषमाणः, [4]प्रतिशुश्रूषन्-आशुश्रूषन्, [5]देवदत्तं प्रतिशुश्रूषमाणः-भाष्यात् आशुश्रूषमाणः, [6]शुश्रुवान्, [7]देवदत्ताय गां प्रतिशृण्वन्-आशृण्वन् वा, [8]निश्रावी, [9]विश्रावः, [10]श्रवणम्, [11]प्रतिश्रुत्, [12]श्रुतिः, [13]सुश्रुतः, [14]शिश्रावयिषुः-शुश्रावयिषुः,

---

1. शतरि, 'श्रुवः शृ च' (3-1-74) इति श्नुप्रत्ययः, तत्सन्नियोगेन 'शृ' इति प्रकृतेरादेशश्च। 'सार्वधातुकमपित्' (1-2-4) इति श्नुप्रत्ययस्य ङिद्वद्भावात् 'क्ङिति च' (1-1-5) इति गुणनिषेधः। अत्र वदन्ति—भ्वादिषु पठितत्वादस्य धातोः, श्रवति इत्यनेकत्र ऋग्वेदादिषु प्रयोगश्रवणात् च पूर्वं श्रुधातुः श्रवति इत्याद्याकारेण भौवादिकरूपेणापि युक्त इत्यूह्यते, इति। विद्वांसः प्रमाणमत्र।
2. 'अर्तिश्रुदृशिभ्यश्च' (वा. 1-3-29) इत्यनेन समुपसृष्टादस्मात् आत्मनेपदम्।
3. 'ज्ञाश्रुस्मृदृशां सनः' (1-3-57) इति सन्नन्तात् नित्यमात्मनेपदम्।
4. 'प्रत्याङ्भ्यां श्रुवः—' (1-3-59) इति आत्मनेपदनिषेधात् यथासम्भवं परस्मैपदमत्रेति बोध्यम्।
5. 'प्रत्याङ्भ्यां—' (1-3-59) इत्यत्र उपसर्गयोरेव ग्रहणम्; प्रकरणात्। अतश्च कर्मप्रवचनीययोः प्रत्याङोर्ग्रहणे तु आत्मनेपदमपि भवति।
6. 'भाषायां सदवसश्रुवः' (3-2-108) इति लिटः क्वसुः। द्विर्वचनादिकम्।
7. 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' (1-3-59) इति प्रत्याङ्भ्यामुपसृष्टस्य शृणोतेः प्रयोगे देवदत्तस्य सम्प्रदानत्वात् चतुर्थी इति बोध्यम्।
8. 'रक्षश्रुवसवपशां नौ' (ग. सू. 3-1-134) इति ग्रह्यादिपाठात् णिनिप्रत्ययः। क्षीरस्वामी तु अत्र 'नि' इत्युपसर्गं प्रत्ययस्य णित्त्वं च अप्रयोजकं मत्वा श्रावी श्रवी इति वृद्धिपक्षे वृद्ध्यभावपक्षे चाह।
9. 'वौ क्षुश्रुवः' (3-3-25) इति घञ्। उवर्णान्तत्वलक्षणापोऽपवादः।
10. श्रूयतेऽनेनेति संज्ञायां ल्युटि श्रवणम् =श्रोत्रम्, वेदो वा।
11. प्रतिश्रूयते इति प्रतिश्रुत्=प्रतिध्वनिः। स्त्रियां भावे सम्पदादित्वात् (वा. 3-3-108) क्विप्। तुक्।
12. श्रूयतेऽनया इति श्रुतिः=वेदः, श्रोत्रं वा। 'श्रुयजीषिस्तुभ्यः करणे' (वा. 3-3-94) इति स्त्रियां ल्युडपवादः क्तिन्।
13. 'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां कर्तरि क्तः। सुश्रुतः=वैद्यशास्त्र-प्रवर्तकः ऋषिविशेषः।
14. ण्यन्तात् सनि 'सनाशंसभिक्ष उः' (3-2-168) इति ताच्छीलिके उप्रत्यये, 'स्रवतिशृणोति—' (7-4-81) इत्यादिना अवर्णपरकत्वात् अभ्यासस्येकार-विकल्पः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]श्रवणः, [2]श्रोत्रम्, [3]श्रवः-विश्रवः-वैश्रवणः-रावणः, [4]श्रोणिः इतीमानि धातोरस्य विशेषरूपाणि ।

(1780) "श्रै पाके" (I-भ्वादिः-919. सक. अनि. पर.)

'........श्राति श्रायति लुक्शपोः ॥' (श्लो. 9) इति देवः ।

सर्वाण्यपि रूपाणि भौवादिकक्षायतिवत् (263) बोध्यानि ।

(1781) "श्रोणृ संघाते" (I-भ्वादिः-456. अक. सेट्. पर.)

भौवादिकपैणतिवत् (1063) सर्वाण्यपि रूपाण्यूह्यानि ।

(1782) "श्लकि गत्यर्थः" (I-भ्वादिः-85. सक. सेट्. आत्म.)

भौवादिकक्कङ्कतिवत् (140) सर्वाणि रूपाणि ज्ञेयानि ।

(1783) "श्लगि गत्यर्थः" (I-भ्वादिः-152. सक. सेट्. पर.)

सर्वाण्यपि रूपाणि भौवादिकक्रन्दतिवत् (163) बोध्यानि ।

(1784) "श्लाखृ व्याप्तौ" (I-भ्वादिः-127. अक. सेट्. पर.)

[A]प्रश्लाखितः । इतराणि समस्तान्यपि रूपाणि भौवादिकद्राखतिवत् (879) बोध्यानि ।

(1785) "श्लाघृ कत्थने" (I-भ्वादिः-115. अक. सेट्. आत्म.)

'कत्थनम्=उत्कर्षाख्यानम्' इति स्वामी । शानचि [5]श्लाघमानः । 'श्लाघमानः परस्त्रीभ्यस्तत्रागाद् राक्षसेश्वरः' (भट्टिः 8-73) । इतराणि समस्तान्यपि रूपाणि भौवादिकद्राखतिवत् (879) बोध्यानि ।

---

1. नन्द्यादित्वात् (ग. सू. 3-1-134) कर्तरि ल्युः । श्रवणः=नक्षत्रविशेषः । बहुश्रुतः, अश्वत्थवृक्षो वा ।
2. औणादिके (द. उ. 8-84) ष्ट्रन्प्रत्यये रूपमेवम् । श्रूयतेऽनेनेति श्रोत्रम्=श्रवणम् ।
3. औणादिके (द. उ. 9-49) असुन्प्रत्यये रूपमेवम् । विपूर्वकादस्मात् अपत्यार्थे 'विश्रवसो विश्रवणरवणौ' (ग. सू. 4-1-112) इति शिवादिपाठात् प्रकृतेर्विश्रवण-रवणादेशौ । तौ च यक्षराजे, रक्षोविशेषे च व्यवस्थितौ । तेन वैश्रवणः कुबेरः । रावणः=रक्षोविशेषो लङ्काधिपतिः ।
4. 'वहिश्रियुश्रु....' (द. उ.1-21) इत्यादिना निप्रत्ययः । श्रोणिः कटिपश्चाद्भागः ।
5. अत्र 'श्लाघह्नुङ्—' (1-4-34) इत्यादिना ज्ञीप्स्यमानस्य=ज्ञापयितुमिष्यमाणस्य सम्प्रदानत्वात् चतुर्थी । आत्मानं स्तुतिबोध्यं प्रकाशयन् राक्षसस्तत्र गत इत्यर्थः ।

A. 'प्रश्लाखितं प्रोखितसत्त्वमुङ्खितं खगैर्वखन् मारुतवङ्खिसौरभम् ॥' धा.का.1-18.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1786) " श्लिष आलिङ्गने " (IV-दिवादिः-1186. सक. अनि. पर.)
'**श्लिष्यत्यालिङ्गने,** दाहे श्लेषति श्लेषते, णिचि ॥
श्लेषयेत्—' (श्लो. 175-6) इति **देवः** ।
आश्लेषः—नक्षत्रविशेषः, आलिङ्गनं च । संज्ञायां, करणे वा घञ् अत्र ।
आश्लेषी—णिनिः । [1]श्लेषः—अलंकारविशेषः ।
आश्लिष्टः कन्यां देवदत्तः ; 'गत्यर्थाकर्मक—' (3-4-72) इत्यादिना कर्तरि क्तः ।
श्लेष्मा—औणादिकः (द. उ. 6-73) मनिन्प्रत्ययः । रोगविशेषस्य, तज्जनकशारीरकपदार्थविशेषस्य च नाम । इतराणि सर्वाण्यपि रूपाणि दैवादिक**तुष्यति**वत् (758) बोध्यानि ।

(1787) " श्लिष श्लेषणे " (X-चुरादिः-1574. सक. सेट्. उभ.)
सर्वाण्यपि रूपाणि चौरादिक**कीटयति**वत् (194) बोध्यानि ।

(1788) " श्लिषु दाहे " (I-भ्वादिः-702. सक. सेट्. पर.)
'श्लिष्यत्यालिङ्गने **दाहे श्लेषति** श्लेषणे णिचि ॥' (श्लो. 175) इति **देवः** ।
श्लेषकः-षिका, शिश्लेषिषकः-शिश्लिषिषकः-षिका, शेश्लिषकः-षिका ;
इत्यादीनि रूपाणि सर्वाण्यपि भौवादिक**पोषति**वत् (1026) ऊह्यानि ।

(1789) " श्लोकृ सङ्घाते " (I-भ्वादिः- 77. सक. सेट्. पर.)
'**संघातः**=ग्रन्थः' इति **सायणः** । '—संघाते वर्जने सर्जने' इति **वोपदेवः** ।
'—संघाते—संहनने, संहन्यमाने च' इति **क्षीरस्वामी** । 'संघातो—ग्रन्थः । स चेह ग्रथ्यमानव्यापार इति **स्वाम्यादयः** । **काश्यपाद**यस्तु ग्रन्थितृव्यापारः इति ग्रथ्नातिवत् सकर्मकः इति ' **धातुवृत्ता**वुक्तम् । सर्वाण्यपि रूपाणि **केपति**वत् (261) ज्ञेयानि । 'स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा । आद्येऽकर्मको द्वितीये सकर्मकः' इति **सिद्धान्तकौमुदी** ।

(1790) " शोणृ संघाते " (I-भ्वादिः-457. सक. सेट्. पर.)
तालव्योष्मादिरयम् । सर्वाण्यपि रूपाणि भौवादिक**क्लेवति**वत् (291) ज्ञेयानि ।

(1791) " श्वकि गत्यर्थः " (I-भ्वादिः-96. सक. सेट्. आत्म.)
'श्वगि—' इति **मैत्रेयः** ।

---

1. 'श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिष—' (3-1-141) इति कर्तरि णप्रत्ययः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्वङ्कक:-ङ्किका, श्वङ्कक:-ङ्किका, शिश्वङ्किषक:-षिका, शाश्वङ्कक:-ङ्किका ; इत्यादीनि रूपाणि सर्वाण्यपि **कङ्कति**वत् (140) ऊह्यानि । ल्युटि-[A]श्वङ्कनम् ।

(1792) " **श्वच गतौ** " (I-भ्वादि:-166. सक. सेट्. आत्म.)

श्वाचक:-चिका, श्वाचक:-चिका, शिश्वचिषक:-षिका, शाश्वचक:-चिका ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिक**कचति**वत् (144) ज्ञेयानि ।

(1793) " **श्वचि गतौ** " (I-भ्वादि:-167. सक. सेट्. आत्म.)

सर्वाण्यपि रूपाणि **कञ्चति**वत् (145) ऊह्यानि । कर्तरि क्तप्रत्यये-[B]श्वञ्चित: ।

(1794) " **श्वठ असंस्कारगत्योः** " (X-चुरादि:-1565. सक. सेट्. उभ.)

'**गत्यसंस्कार**धात्वर्थे शाठयेत् **श्वाठये**दिति ॥' (श्लो. 81) इति **देवः** ।
" **इदित्** [श्वठि] इति **दुर्गः** । **मैत्रेयो**ऽपि '**श्वठीत्येके**' " इति **माधवः** ।
'—संस्कारगत्योः' इति **मैत्रेयकाशकृत्स्नकातन्त्रशाकटायनादयः** ।
'—गतिसंस्कारयोः' इति **जैनः** । '—गत्यसंस्कृतसंस्कृते' इति **वोपदेवः** ।
'—संस्कारे च द्रुमे' इति **धा. का. व्या.** (3-16) । श्वाठक:-ठिका, शिश्वाठयिषक:-षिका ; इत्यादिकानि रूपाणि सर्वाण्यपि **कलापयति**वत् (282) ज्ञेयानि ।

(1795) " **श्वठ सम्यगवभाषणे** " (X-चुरादि:-1856. सक सेट्. उभ.)

अदन्तः ।

'शठयेत् **श्वठये**दते द्वे **सम्यगवभाषणे** ।' (श्लो. 81) इति **देवः** ।
" '—सम्यगाभाषणे' इति **दुर्गः** । 'सम्यगाभाषणे' इति **शाकटायनः** ।
सम्यगाभाषणे सम्यक् वचनक्रियायामिति **क्षीरस्वामी**" इति **पुरुषकारः** । प्रकृत-**क्षीरतरङ्गिण्यां** तु 'असम्यगाभाषणे' इत्येव दृश्यते ।

श्वठक:-ठिका, शिश्वठयिषक:-षिका, श्वठयिता-त्री, शिश्वठयिषिता-त्री ; इत्यादीनि रूपाणि सर्वाण्यपि चौरादिक**कलापयति**वत् (282) ज्ञेयानि । ण्यन्ते तत्प्रकृतिकसन्नन्ते च सर्वत्र न उपधावृद्धिः ; अदन्तपाठसामर्थ्यात् ।

A. '**प्रश्वङ्कनो**त्त्रङ्कितत्द्रथस्वनादढौकि भीतेरपि नो शिखावलैः ।' धा. का. 1-14.

B. '.....अशाश्वचुः **श्वञ्चित**सौरभाः कचे ।' धा. का. 1.23.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1796) "श्वठि असंस्कारगत्योः" (X-चुरादिः-1565. सक. सेट्. उभ.)
'श्वठ इत्यस्य पाठान्तरमिदम्' इति सि. कौमुदी। दौर्गसम्मतः पाठः इति सायणस्वामिनौ। 'संस्कारगत्योः' इति मैत्रेयशाकटायनहेमचन्द्रादयः। श्वण्ठकः-ण्ठिका, शिश्वण्ठयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककण्ठयतिवत् (150) ज्ञेयानि।

(1797) "श्वभ्र गतौ" (X-चुरादिः-1624. सक. सेट्. उभ.)
'—गतौ च; चकारात् कृच्छ्रजीवने इति दौर्गाः' इति स्वामी। '—बिले गतौ तङ्के' इति वोपदेवः। 'श्वभ्रिः बिलार्थे च द्रुमे' इति धा. का. व्याख्या (3-24)।
श्वभ्रकः-भ्रिका, शिश्वभ्रयिषकः-षिका; श्वभ्रयिता-त्री, शिश्वभ्रयिषिता-त्री; इत्यादीनि सर्वाण्यपि कर्णयतिवत् (170) ऊह्यानि। कर्मणि क्तप्रत्यये-[A]विश्वभ्रितः।

(1798) "श्वर्त गतौ" (X-चुरादिः-1623. सक. सेट्. उभ.)
'स्वर्त गत्यां च; चकारात् कृच्छ्रजीवने' इति क्षीरस्वामी। सर्वाण्यपि रूपाणि चौरादिककर्णयतिवत् (170) ज्ञेयानि।

(1799) "श्वल आशुगमने" (I-भ्वादिः-549. सक. सेट्. पर.)
'शल—' इति क्षीरस्वामी। 'आशुगतौ' इति काशकृत्स्न-कातन्त्र-शाकटायनादयः। '—वेगे' इति वोपदेवः।
श्वालकः-लिका, श्वालकः-लिका, शिश्वलिषकः-षिका, शाश्वलकः-लिका; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककलथतिवत् (280) ऊह्यानि। औणादिके (द. उ. 8-132) वन्प्रत्यये उपधाया उत्वे च रूपमेवम्—शुल्वम्= स्त्रीपुरुषयोगः। कर्तरि क्तप्रत्यये—[B]प्रश्वलितः। घटादित्वप्रयुक्तकार्याणि न संभवन्ति।

(1800) "श्वल्क परिभाषणे" (X-चुरादिः-1570. सक. सेट्. उभ.)
'—भाषणे' इति शाकटायनचन्द्रकाशकृत्स्नकातन्त्रादयः।

A. 'आश्वर्तितो रणभुवं सबलोऽत्र रेजे विश्वभ्रिताभ्रकुहरे सति तूर्यनादे॥' धा.का.3-24
B. 'दलत्तु प्रश्वलितान् परान् प्रति........॥' धा. का. 1-70.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्वल्कक:-ल्किका, शिश्वल्कयिषक:-षिका ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**गन्धयति**वत् (375) ऊह्यानि । ल्युटि-श्वल्कनम् । '**सुश्वल्कना:** सुमधुरप्रियवल्कनाभि:........ ।।' धा. का. 3-17.

(1801) "**श्वल्ल आशुगमने**" (I-भ्वादि:-550. सक. सेट्. पर.)

सर्वाण्यपि रूपाणि भौवादिक**चिल्लति**वत् (528) बोध्यानि ।

(1802) "**श्वस प्राणने**" (II-अदादि:-1069. अक. सेट्. पर.)

'**प्रत्ययादा[1]श्वसन्त्य:**', [2]श्वास:, [3]श्वसन:, [4]आश्वस्त:-आश्वसित: । इतराणि सर्वाण्यपि रूपाणि आदादिका**स्ति**वत् (52) बोध्यानि ।

(1803) "**[टु ओ] श्वि गतिवृद्ध्यो:**"

(I-भ्वादि:-1010. सक. अक. सेट्. पर.) **यजादि:** ।

श्वायक:-यिका, श्वायक:-यिका, शिश्वयिषक:-षिका, [5]शेश्वीयक:-शोशूयक:-यिका ; श्वयिता-त्री, श्वाययिता-त्री, शिश्वयिषिता-त्री, शेश्वीयिता-शोशूयिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**क्षि**धातुवत् (189) बोध्यानि । [6]शून:-

---

1. अत्र नुम् न शास्त्रसम्मत: । परं तु 'गणकार्यमनित्यम्' (परि. 96) इति साधयन्ति । एवं 'न **विश्वसेदविश्वस्तं विश्वस्ते** नाति**विश्वसेत्**' 'न **विश्वसेत्** पूर्वविरोधितस्य' इत्याद्यपि भौवादिकवत् रूपाणि गणकार्यस्यानित्यत्वेन साधयन्ति । **परे** तु 'प्रत्ययादा**श्वसत्य:**' इत्येव नुम्रहितं पाठमादृत्य, '**विश्वसेत्**' इत्यादि-स्थलेषु आर्षत्वात् समाधानं च वदन्ति ।
2. 'श्याऽऽद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिष**श्वस**श्च' (3-1-141) इति कर्तरि [णप्रत्यय: ।
3. नन्द्यादित्वात् कर्तरि ल्युप्रत्यय: । **श्वसन:**= वायु: ।
4. 'आदितश्च' (7-2-16) इत्यत्र चकारस्यानुक्तसमुच्चयार्थकत्वात् '**आश्वस्त:**' इत्यत्रापि अनिट्त्वम्—इति **काशिका** । "निष्ठायामिटं नेच्छन्ति **काशकृत्स्ना:**' इति **स्वामिकाश्यपौ** । **आत्रेयमैत्रेयौ** तु '**आश्वसित:**' इतीटं चाहतु:" इति **धातुवृत्ति:** । अतश्चोभयथाऽप्यस्माभि: प्रदर्शितं रूपम् ।
5. यङन्ते 'विभाषा श्वे:' (6-1-30) इति सम्प्रसारणविकल्प: । सम्प्रसारणपक्षे पूर्वरूपहलादिशेषादिषु **शोशूयक:** इत्यादीनि रूपाणि । सम्प्रसारणाभावपक्षे **शेश्वीयक:** इत्यादीनि रूपाणीति ज्ञेयम् ।
6. निष्ठायाम् यजादित्वात् (6-1-15) सम्प्रसारणम्, '**श्वीदित:—**' (7-2-14) इतीण्निषेध: । 'ओदितश्च' (8-2-45) इति निष्ठातकारस्य नकार: । अत्र **न्यास:** "'ओदितश्च' (8-2-45) इति ओदितोऽनन्तरस्य निष्ठातकारस्य नत्वविधानादेवेडभा-वस्य सिद्धे: **श्वयति**ग्रहणं (7-2-14 सूत्रे इति शेष:) शक्यमकर्तुम्" इति । 'वैचि-त्र्यार्थम् ग्रहणम्' इति समाहितं च । परं तु 'ओ लडि' इत्यादिषु व्यवहितेऽपि निष्ठानत्वस्य **कैश्चिद**ङ्गीकृतत्वात् तद्वदत्र मा भूदित्येवमर्थं ग्रहणमिति युक्तं समाधानम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उच्छूनः-शूनवान्, [1]उदश्वित्, [2]श्वयथुः, [3]श्वा- मातरिश्वा, [4]शवः, [5]श्वयीचिः, इत्यादीनि विशेषरूपाणि। [A]शेश्वीयमानः।

(1804) "श्विता वर्णे" (I-भ्वादिः-742. अक. सेट्. आत्म.)

'—शौक्ल्ये' इत्येव **वोपदेवः**।

सर्वाण्यपि रूपाणि भौवादिकश्वेदतिवत् (326) बोध्यानि। श्वेतः, [6]श्वित्रम्, श्विवितित्वा-श्वेतित्वा इति विशेषः।

(1805) "श्विदि श्वैत्ये" (I-भ्वादिः-10. अक. सेट्. आत्म.)

'—शैत्ये' इति **जैन-कातन्त्रौ**।

'श्वेतस्य गुणस्यापि धातुना साध्यतया क्रमिकतया चाभिधानात् क्रियात्वम्। यदाह—

'श्वेतते: श्वेत इत्येकं श्वेतत्वेन प्रकाश्यते।
आश्रितक्रमरूपत्वादभिधानं प्रवर्तते॥' (वाक्यपदीयम् 3-3) इति' इति **माधवः**।

श्विन्दकः-न्दिका, शिश्विन्दिषकः-षिका, इत्यादिकानि रूपाणि सर्वाण्यपि क्लिन्दतिवत् (284) ज्ञेयानि।

---

1. उदकेन श्वयतीति **उदश्वित्** तक्रम्। क्विपि, तुकि च रूपमेवम्। 'उदकस्योदः संज्ञायाम्' (6-3-57) इति उदकशब्दस्य उदादेशः। '**उदश्वितोऽन्यतरस्याम्**' (4-2-19) इति निर्देशसामर्थ्यात् यजादित्वेऽपि न सम्प्रसारणं क्विब्विषये इत्यवधेयम्।
2. 'ट्वितोऽथुच्' (3-3-89) इत्यथुच्प्रत्ययो भावे। **श्वयथुः**= कुष्ठरोगविशेषः। 'रोगाख्यायाम्—' (3-3-108) इति ण्वुलोऽपवादोऽप्ययमिति **केचित्**।
3. श्वयति=गच्छति निरन्तरमिति **श्वा**=शुनकः। '**श्वन्उक्षन्—**' [द. उ. 6-55] इति निपातनात् साधुः। मातरि=सर्वस्य परिच्छेत्तरि आकाशे श्वयति=वर्धते इति **मातरिश्वा** वायुः। 'तत्पुरुषे कृति—' (6-3-14) इति सप्तम्या अलुक्।
4. श्वयति सन्त्यक्तः प्राणिभिरिति **शवः** इति **दशपाद्युणाद्याम्** (9-53) उक्तम्। 'शवतिर्गतिकर्मा कम्बोजेषु, विकार एवैनमार्याः प्रभाषन्ते' (पस्पशाह्निके) इति भाष्यविरोधादेतदुपेक्ष्यम्।
5. **श्वयति** वर्धते इति **श्वयीचिः** चन्द्रमाः। औणादिके (द. उ. 1-40) ईचिप्रत्यये साधुः।
6. औणादिके (द. उ. 8-31) रक्प्रत्यये रूपमेवम्। **श्वित्रम्**=व्याधिविशेषः।

A. 'आबद्धभीमभ्रुकुटीविभङ्गः **शेश्वीयमाना**रुणरौद्रनेत्रः।' भ. का. 3,30.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1806) **"षगे संवरणे"** (I-भ्वादिः-789. सक. सेट्. पर.)

घटादिः, षिच्च । 'छगे' इति **क्वचित्** पाठः ।

[1]सागकः-गिका, सगकः-गिका, सिसगिषकः-षिका, सासगकः-गिका ; इत्यादीनि समस्तान्यपि रूपाणि घाटादिक**क्खति** (142)वत् बोध्यानि ।

(1807) **"षघ हिंसायाम्"** (V-स्वादिः-1268. सक. सेट्. पर.)

सघ्नुवन्-शता । इतराणि सर्वाण्यपि रूपाणि सौवादिक**शक्नोति**वत् (1672) बोध्यानि ।

(1808) **"षच सेचने"** (I-भ्वादिः-163. सक. सेट्. आत्म.)

'सेवनेऽपि' इति **केचित्** । '**सेचने सचते,** तच्च समवाये सचत्यपि ।' (श्लो. 46) इति **देवः** । "**केचित्तु** परस्मैपदिभिः सह धातुमेनं पठन्ति.... तदेतत् 'ब्रुविशासिगुणेन च यत् **सचते**' (भाष्यम् 1-4-51) इति **भाष्य-विरोधादयुक्तम्**" इति **हरदत्तः** (1-4-51) । 'षप' इति **मैत्रेयशाकटाय-नादयः** । सर्वाण्यपि रूपाणि भौवादिक**कचति**वत् (144) बोध्यानि । [2]सचिवः, [3]सक्तुः ।

(1809) **"षच समवाये"** (I-भ्वादिः-997. अक. सेट्. उभ.)

'सेचने **समवाये** च **सचते,** सचति क्रमात्' (श्लो. 46) इति **देवः** । सर्वाण्यपि रूपाणि भौवादिक**कचति**वत् (144) बोध्यानि ।

(1810) **"षट अवयवे"** (I-भ्वादिः-313. अक. सेट्. पर.)

सटा-सिंहादीनां शिरसि विद्यमानो रोमसंस्थानविशेषः, जटाद्याकारः । पचाद्य-जन्तात् टापि रूपम् । इतराणि समस्तान्यपि रूपाणि भौवादिक**कठति**वत् (148) बोध्यानि ।

---

1. 'धात्वादेः षः सः' (6-1-64) इति उपदेशे षकारादेरस्य धातोः सर्वत्र प्रयोगे सकारः । एवं षोपदेशधातुषु सर्वत्र ज्ञेयम् ।
2. **सचिवः**=अमात्यः । सचतीति **सचिः**, सहभावः, 'केशाद् वोऽन्यतरस्याम्' (5-2-109) इति मत्वर्थीयो वप्रत्ययो बाहुलकात् इत्याहुः ।
3. औणादिके (द. उ. 1-122) तुन्प्रत्यये रूपमेवम् । 'तितुत्र—' (7-2-9) इतीण्नि-षेधः । **सक्तुः**=पिष्टविशेषः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1811) " षट्ट हिंसायाम् " (X-चुरादिः-1634. सक. सेट्. उभ.)

'सट्ट—' इति क्षीरस्वामी। 'पुट्ट—' इति केचित्।
चौरादिककुट्टयतिवत् (207) सर्वाणि रूपाण्यूह्यानि।

(1812) " षण सम्भक्तौ " (I-भ्वादिः-464. सक. सेट्. पर.)

'दाने सनोति सनुते, सम्भक्तौ तु सनेदिति॥' (श्लो. 128) इति देवः।
सानकः-निका, सानकः-निका, [1]सिसनिषकः-सिषासकः-सिका, [2]सासायकः-संसनकः-निका;
सनिता-त्री, सानयिता-त्री, सिसनिषिता-सिषासिता-त्री, सासायिता-संसनिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि 'जनी प्रादुर्भावे' (583) इतिवत् बोध्यानि।
[3]सातः-सातवान्, [4]सातिः, सन्तिः - सतिः, [5]सेनिवान्-सनिंससनिवांसम्, सायमानः-सन्यमानः, [6]सानुः, इति विशेषरूपाणि।

(1813) " षणु दाने " (VIII-तनादिः-1464. सक. सेट्. उभ.)

'दाने सनोति सनुते, सम्भक्तौ तु सनेदिति॥' (श्लो. 128) इति देवः।

---

1. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (7-2-49) इत्यनेन सन्नन्ते इड्विकल्पः। इट्पक्षे एवं रूपम्। इडभावपक्षे 'जनसनखनां सन्(ञ)झलोः' (6-4-42) इत्यात्वम्। 'आदेशप्रत्यययोः' (8-3-59) इति उत्तरखण्डे षत्वम्।
2. यङन्ते 'ये विभाषा' (6-4-43) इति आकारविकल्पः। इदं च आत्वं यकारादौ क्ङिति प्रत्यय एवेत्यतः ण्यति न भवति। तेनास्माण्ण्यति सान्यम् इत्येव रूपम्।
3. यतः सन्नन्ते इड्विकल्पः; तेन निष्ठायामिण्न। 'जनसनखनां—' (6-4-42) इत्याकारः। एवं क्तिन्प्रभृतिष्वपि प्रक्रिया ज्ञेया।
4. स्त्रियां क्तिनि रूपमेवम्। 'सनः क्तिचि लोपश्चास्यान्यतरस्याम्' (6-4-45) इति आकारादेश-नकारलोपौ तु तानादिकसनोतेरेवेति काशिका। क्षीरस्वामी तु अस्यापि भौवादिकधातोस्तदभिप्रैति। केचित्तु 'ऊतियूतिजूतिसाति—' (3-3-97) इति निपातनात् सातिरित्येकमेव क्तिनि रूपमभ्युपगच्छन्ति। परे तु सनोतेस्तानादिकस्य सातिरिति निपातनमिति वदन्ति। अत्र निष्कर्षे विद्वांसः प्रमाणम्।
5. छन्दसि धातोरस्मात् लिटः क्वसौ सनिड्पूर्वात् इडागमः, एत्वाभ्यासलोपाभावश्च निपात्यते। लोके तु सेनिवांसम् इत्येव; अत्र एत्वाभ्यासलोपादयः। क्वस्वन्तस्य द्वितीयान्तमिदम्। 'अजित्वाऽग्ने! सनिंससनिवांसम्' इति श्रुतिः।
6. औणादिके (द. उ. 1-88) ञुण्प्रत्यये रूपमेवम्। सानुः=शिखरकूटः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]पशुषाः-पशुषौ-पशुषः, गोषाः-नृषाः, [2]सातिः, सन्तिः, सतिः, सनिंससनिवांसम्, सेनिवान्, सन्यम्-सायम्, [3]प्रसत्य, [4]सनिः, [5]सानसिः इति विशेषरूपाणि। इतराणि समस्तान्यपि रूपाणि तानादिकक्षणोतिवत् (296) बोध्यानि।

(1814) "षद्लृ विशरणगत्यवसादनेषु"

(I-भ्वादिः-854-सक. अनिट्. पर.) ज्वलादिः।

'ज्वलादेश्च तुदादेश्च सीदेद् विशरणादिके।
पद्यतेरर्थ आसीदेद् आसादयति चाङि यौ ॥' (श्लो. 108) देवः।

"—'विशमृशणुदप्रवेशामर्शक्षेपेषु षद्लृ विशरणार्थः।' इति च श्लोकधातुपाठः।" इति पुरुषकारः।

सादकः-दिका, सादकः-दिका, सिषत्सकः-त्सिका, [6]सासदकः-दिका;
[7]सत्ता-सत्त्री, सादयिता-त्री, सिषत्सिता-त्री, सासदिता-त्री;
इत्यादीनि समस्तान्यपि रूपाणि भौवादिकखदतिवत् (338) ज्ञेयानि।
[8]निषीदन्-प्रतिसीदन्-न्ती,

---

1. पशुं सनोति इति वृत्तौ 'जनसनखन—' (3-2-67) इति विट्। 'विड्वनोरनुनासिकस्य—' (6-4-41) इत्याकारः। 'सनोतेरनः' (8-3-108) इति षत्वम्। एवं गोषाः, नृषाः इत्यादिष्वपि बोध्यम्।
2. 'ऊतियूतिजूतिसाति—' (3-3-97) इति निपातनात् साधुः। सातिः=दानम्। 'सान्तिः, सतिः' इति तु क्तिचि, 'सनः क्तिचि—' (6-4-45) इति आकारविकल्प-नलोपविकल्पयो रूपम्। 'न क्तिचि दीर्घश्च' (6-4-39) इति दीर्घविकल्पः।
3. 'वा ल्यपि' (6-4-38) इत्यस्य व्यवस्थितविभाषात्वात् नान्तानां नित्यमनुनासिकलोपः। तेनैवं रूपम्।
4. औणादिके (द. उ. 1-68) इप्रत्यये रूपम्। सनिः=भक्तिः, दानं च।
5. औणादिके (द. उ. 10-17) असिप्रत्यये, उपधादीर्घे च रूपम्। सानसिः=स्नेहः।
6. 'लुपसद—' (3-1-24) इति भावगर्हायां यङ्। भावगर्हा=धात्वर्थे कुत्साविशिष्टत्वम्। गर्हितं सीदति सासद्यते। अयं यङ् 'धातोरेकाचः—' (3-1-22) इति औत्सर्गिकयङोऽपवादः इति प्राञ्चः। नेति नव्याः।
7. धातोरनिट्त्वम्। दकारस्य चर्त्वेन तकारः। एवं तव्यदादिष्वपि।
8. शतरि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (7-3-78) इति सीद इति सर्वादेशः। 'सदिरप्रतेः' (8-3-66) इति इणन्तादुपसर्गात् परस्य सदिसकारस्य षत्वे रूपमेवम्। 'अप्रतेः' इत्युक्तत्वात् प्रतिसीदन् इत्यत्र न षत्वम्। उपसर्गप्रकरणात् 'नि' इति कर्मप्रवचनीयस्य न षत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]निषादः, सादः-सदः, [2]प्रासादः, [3]उपनिषत्-परिषत्-शुचिषत्-द्युसत्-दिविषत्, [4]वृसी, [5]विषण्णः-विषण्णवान्, [6]निषिषत्सुः, [7]सेदिवान्, [8]सद्रुः, [9]निषद्या, [10]सादी, [11]सेदिः; [12]सदः, [13]निषद्वरः, [14]सादिः,

---

1. 'ज्वलितिकसन्तेभ्यः—' (3-1-140) इति कर्तरि णः। **निषादः** वन्यजातिविशेषः। पक्षे पचाद्यचि **सदः** इत्यपि साधुः। **माधवस्तु** "निषीदत्यस्मिन् पापमिति **निषादः**। 'हलश्च' (3-3-121) इति अधिकरणे घञ्" इत्याह। संज्ञाऽत्रेति विशेषः।
2. 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इत्यधिकरणे घञ्। प्रसीदन्ति धनिनोऽस्मिन् इति **प्रासादः** धनिनां वासः। 'उपसर्गस्य घञि—' (6-3-122) इति 'प्र' इत्यस्य दीर्घः। संज्ञायामेव मनुष्यभिन्नेऽपि स्थले दीर्घः; अन्यत्र न; ततश्च **'प्रसादः'** इत्यत्र न।
3. उप निषीदन्ति, उप निषादयन्ति वा इति **उपनिषत्**। स्त्रियां सम्पदादित्वात् (वा. 3-3-108) क्विपि षत्वे च रूपमेवम्। एवं **परिषत्** इत्यादयोऽपि। **द्युसत्, दिविषत्, शुचिषत्** इत्यादयस्तु 'सत्सूद्विष—' (3-2-61) इत्यादिना क्विपि सम्पद्यन्ते। **पर्षत्** इति तु पृषोदरादित्वात् (6-3-109) परेरिकारलोपे साधुः। **दिविषत्** इत्यत्र 'तत्पुरुषे कृति—' (6-3-14) इति सप्तम्या अलुक्। सुषामादित्वात् (8-3-98) षत्वम्। ये स्त्रीलिङ्गशब्दाः **संसत्** इत्यादयः, ते सम्पदादिक्विबन्ताः; ये तु पुँल्लिङ्गशब्दाः, ते 'सत्सू—' (3-2-61) इति निष्पन्नाः इति वैयाकरणसम्प्रदायः।
4. ब्रुवन्तः सीदन्त्यस्यामिति **वृसी**=मुनीनामासनम्। पृषोदरादित्वात् ब्रुवच्छब्दस्य 'वृ' इत्यादेशः। सदेरधिकरणे डट्प्रत्ययः। टित्त्वात् स्त्रियां ङीप्।
5. 'रदाभ्यां—' (8-2-42) इति निष्ठातकारस्य धातुदकारस्य च नकारः। षत्वम्, णत्वं च।
6. सन्नन्तादुप्रत्ययः। 'स्थादिष्वभ्यासेन चाभ्यासस्य' (8-3-64) इति पूर्वोत्तरखण्डयोः षत्वम्।
7. लिटः 'भाषायां सदवस—' (3-2-108) इति क्वसुप्रत्ययः; एत्वाभ्यासलोपः। 'वस्वेकाच्—' (7-2-67) इतीडागमः।
8. 'दाधेट्सिशदसदो रुः' (3-2-159) इति तच्छीलादिषु कर्तृषु रुप्रत्ययः।
9. स्त्रियां 'संज्ञायां समजनिषद—' (3-3-99) इत्यादिना अकर्तरि क्यप्प्रत्ययः। **निषद्या**=वासस्थानम्।
10. साधुकारिणि णिनिप्रत्ययः। **सादी**=अश्वस्योपरि स्थित्वा युध्यमानः।
11. **'सदादिभ्यो** दर्शनात्' (वा. 3-2-171) इति वचनात् भाषायां किप्रत्ययः। छन्दस्येवायम्। प्रत्ययस्य लिड्वद्भावात् एत्वाभ्यासलोपौ।
12. औणादिकेऽसुन्प्रत्यये रूपम्। **सदः** सभा।
13. **'नौ सदेः'** (द. उ. 8-48) इति वरच्प्रत्ययः। **निषद्वरः**=कामः, कर्दमश्च।
14. 'इण् अजादिभ्यः' (वा. 3-3-108) इति इण्। **सादिः** अश्वस्थो योद्धा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]सत्त्रम् इतीमानि विशेषरूपाणि ।

(1815) "[आङः] षद पद्यर्थे" (X-चुरादिः-1832. सक. सेट्. उभ.)

आधृषीयः ।

पद्यर्थः='पद गतौ' इति धातोरर्थो गतिः । 'गतौ' इति फलितम् । चौरादिकच्छादयतिवत् (562) रूपाण्यूह्यानि । आधृषीयत्वात् णिज्विकल्प इति विशेषः ।

(1816) "षद्लृ विशरणगत्यवसादनेषु"

(VI-तुदादिः-1427. सक. अनि. पर.)

शतरि नुम्विकल्पे सीदन्ती-सीदती इति द्वे रूपे । तदर्थमेव भौवादिकेषु पठितस्यास्यात्र तुदादौ पुनः पाठः । 'स्वरार्थं पुनः पाठः' इति केचित् । केचिन्नैवामुमत्र पठन्ति । सर्वाण्यपि रूपाणि भौवादिकसीदतिवत् (1815) बोध्यानि ।

(1817) "षन्ज सङ्गे" (I-भ्वादिः-987. सक. अनि. पर.)

[2]सजन्-अभिषजन्-न्ती, [3]अङ्गुलिषङ्गा यवागूः, [4]प्रासङ्गः-उत्सङ्गः - निषङ्गः, [5]अभिषिषङ्क्षुः, [6]सक्तः-सक्तवान्, [7]सक्त्वा-सङ्क्त्वा, [8]सक्थि, इति विशेष-

---

1. औणादिके (द. उ. 8-89) त्रप्रत्यये रूपम् । धातुदकारस्य चर्त्वेन तकारः । सत्त्रम्=यागविशेषः, अन्नशाला च ।
2. शतरि, 'दंशसञ्जस्वञ्जां शपि' (6-4-25) इति अनुनासिकलोपः । धातुरयमुपदेशे नोपधः ; 'नकारजावनुस्वारपञ्चमौ झलि धातुषु' इति अभियुक्तोक्तेः । अभिषजन् इत्यत्र 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्' (8-3-65) इति षत्वम् ।
3. सञ्जेर्घनि कुत्वे च सङ्गः । अङ्गुलौ सङ्गोऽस्या यवाग्वाः अङ्गुलिसङ्गा । 'समासेऽङ्गुलेः सङ्गः' (8-3-80) इति षत्वम् ।
4. प्रपूर्वकाद् धातोर्घञि 'चजोः—' (7-3-52) इति कुत्वे च रूपमेवम् । 'उपसर्गस्य घञि—' (6-3-122) इति दीर्घः । प्रासङ्गः=युगम् । निपूर्वकात् घञि निषङ्गः=तूणीरम् । उत्सङ्गः=अङ्कः ।
5. अभिपूर्वकात् सञ्जतेस्सन्नन्तादुप्रत्यये, 'स्तौतिण्योरेव—' (8-3-61) इति नियमं बाधित्वा 'स्थादिष्वभ्यासेन चाभ्यासस्य' (8-3-64) इति षत्वम् । 'स्थादिषु' इत्यनेन सञ्जेः ग्रहणम् ।
6. 'अनिदिताम्—' (6-4-24) इत्युपधानकारलोपः । जकारस्य चर्त्वेन चकारः ।
7. धातोर्जान्तत्वात्, 'जान्तनशां विभाषा' (6-4-32) इति उपधानकारलोपविकल्पः ; तेन रूपद्वयम् ।
8. 'असिसञ्जिभ्याम्—' (द. उ. 1-10) इति क्थिन्प्रत्ययः, कित्त्वात् नकारलोपः । सक्थि=ऊरुः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रूपाणि। इतराणि सर्वाण्यपि रूपाणि **कत्थति**वत् (160) बोध्यानि।

(1818) "**षप समवाये**" (I-भ्वादिः-400. अक. सेट्. पर.)

समवायः=सम्बन्धः, सम्यगवबोधो वा। सप्तिः—'क्तिच्क्तौ च संज्ञायाम्' (3-3-174) इति संज्ञायां क्तिच्। **सप्तिः**=अश्वः। सप्त—औणादिकः कनिन्प्रत्ययः, तुडागमश्च। सर्वाण्यपि रूपाणि भौवादिक**चयति**वत् (502) बोध्यानि।

(1819) "**षम अवैक्लव्ये**" (I-भ्वादिः-829. अक. सेट्. पर.)

सर्वाण्यपि रूपाणि भौवादिक**द्रमति**वत् (876) बोध्यानि। [1]समः, [2]सुषमः-विषमः-निःषमः-दुःषमः। अमन्तत्वेन मित्त्वात् णिजन्ते ह्रस्वः, समकः-मिका, सिसमिषकः, संसमकः, सम्समकः-मिका; इत्यादीनि रूपाणि।

(1820) "**षम्ब सम्बन्धे**" (X-चुरादिः-1555. अक. सेट्. उभ.)

'शम्ब—' इत्येके। 'साम्ब' इति दीर्घादिं सकारादिं च **केचित्** पठन्ति। रूपाणि तु **कर्णयति**वत् (170) बोध्यानि।

अत्र मध्ये '**षय गतौ**' (भ्वादिः. सक. सेट्. आत्म.) इति **क्वचित्** इति **सायणः**। अन्ये **सर्वे**ऽपि न पठन्ति।

(1821) "**षर्ज अर्जने**" (I-भ्वादिः-225. सक. सेट्. पर.)

'सर्ज—' इति **क्षीरस्वामी**। सर्जूः—औणादिक ऊप्रत्ययः। रूपाणि सर्वाणि **कर्जति**वत् (169) बोध्यानि।

(1822) "**षर्ब गतौ**" (I-भ्वादिः-424. सक. सेट्. पर.)

रूपाणि सर्वाण्यपि भौवादिक**कर्वति**वत् (173-A) ज्ञेयानि।

(1823) "**षर्व हिंसायाम्**" (I-भ्वादिः-586-सक. सेट्. पर.)

भौवादिक**कर्वति**वत् (173-A) रूपाणि बोध्यानि।

(1824) "**षल गतौ**" (I-भ्वादिः-547. सक. सेट्. पर.)

'सल— ' इति **क्षीरस्वामी**। सालः-वप्रः, घञ्। सलिलम् '**सलिकलि**—'

1. पचाद्यचि रूपमेवम्। यदा तु भावार्थकत्वं, तदा संज्ञायां घप्रत्यये रूपमेवम्।
2. '**सुविनिर्दुर्भ्यः** सुपिसूतिसमाः' (8-3-88) इति षत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(पञ्चपाद्युणादिः 1-54) इति औणादिकः इलच् । समस्तान्यपि रूपाणि भौवादिक**गलति**वत् (387) बोध्यानि ।

(1825) "**षस स्वप्ने**" (II-अदादिः-1078. अक. सेट्. पर.)

'—षसने' इति **सुधाकरक्षीरस्वामिनौ** । छान्दसोऽयमिति **भाष्यादौ** 'जक्षित्यादयः षट्' (6-1-6) इत्यत्र स्पष्टम् । **केचित्** छान्दसत्वं नाभ्युपगच्छन्ति । [1]सस्यम्, [2]सास्ना ।

(1826) "**षस्ज गतौ**" (I-भ्वादिः-202. सक. सेट्. पर.)

'यदभिप्रायेषु **सज्जते**' (भाष्यम् 3-1-26) 'प्रकृतेर्गुणसंमूढाः **सज्जन्ते** गुणकर्मसु' (गीता 3-29) '**सज्जमान**मकार्येषु' (कामन्दकनीतिसारः 4-41) इत्यादिषु आत्मनेपदप्रयोगात् उभयपदत्वं न्याय्यम् । **वर्धमानादयः** आत्मनेपदं दूषयन्तीति **माधवाचार्यैः** प्रतिपादितम् । वर्धमानाद्युक्तिर्भाष्यादिविरोधात् उपेक्ष्या ।

[3]सज्जकः-ज्जिका, सज्जकः-ज्जिका, सिसज्जिषकः-षिका, सासज्जकः-ज्जिका ;
सज्जिता-त्री, सज्जयिता-त्री, सिसज्जिषिता-त्री, सासज्जिता-त्री ;
इत्यादीनि रूपाणि सर्वाणि भौवादिक**मज्जति**वत् (1235) बोध्यानि ।

(1827) "**षह मर्षणे**" (I-भ्वादिः-852. सक. सेट्. आत्म.)

ज्वलादिः ।

'**मर्षणे सहते**, यौ तु साहयेत् सहति द्वयम् ।
श्यनि सह्यति शक्यार्थे— ॥' (श्लो. 197) इति **देवः** ।

साहकः-हिका, साहकः-हिका, [4]सिसहिषकः-षिका, सासहकः-हिका ;

---

1. '**माच्छाससि—**' (द. उ. 8-12) इति यप्रत्ययः ।
2. औणादिके (द. उ. 5-47) नप्रत्यये उपधाया दीर्घे च रूपम् । **सास्ना**= गवादीनां गलकम्बलः ।
3. 'स्तोः श्चुना श्चुः' (8-4-41) इति श्चुत्वेन शकारः, तस्य जश्त्वेन जकारः । एवं सर्वत्र बोध्यम् ।
4. अत्र उत्तरखण्डस्य षत्वं **क्षीरतरङ्गिणीटिप्पणकार** अभिप्रैति । तत्र निदानं न पश्यामः । प्रत्युत 'स्तौतिण्योरेव—' (8-3-61) इति नियमात् षत्वनिषेध एव प्रामाणिकः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सोढा-[1]सोढ्री-सहिता-त्री, साहयिता-त्री, सिसहिषिता-त्री, सासहिता-त्री ; इति समस्तान्यपि रूपाणि भौवादिकवहतिवत् (1582) बोध्यानि।
[2]परिषहमाण:-निषहमाण:-विषहमाण:, [3]विसहनेकृत्य, [4]साह्वान्, [5]सह्यम्, [6]पृतनाषाट्-ऋताषाट्-तुराषाट्, [7]सहनः, [8]सहमान:, [9]सहिष्णुः, [10]साहयः, [11]सर्वंसह:-शत्रुंसह:, [12]सर्वंसहा, भोक्तुं [13]सहमानः,

---

1. तादेरार्धधातुकस्य 'तीषसह—' (7-2-48) इतीड्विकल्पः। इट्पक्षे **सहिता**। इडभावपक्षे '**सहिवहोरोद्** अवर्णस्य' (6-3-112) इत्योकारः। '**हो** ढ:' (8-2-31) इति ढत्वम्। तकारस्य धत्वम्, तस्य ष्टुत्वेन ढकारः। 'ढो ढे लोपः' (8-3-13) इति पूर्वढकारस्य लोपः। 'पर्जन्यवल्लक्षणं प्रवर्तते' (परि. 120) इति न्यायेन ओकारस्य 'ढ्रलोपे—' (6-3-111) इति दीर्घः। एवं तव्यदादिष्वपि ज्ञेयम्।
2. 'परिनिविभ्यः सेवसितसयसिवुसह—' (8-3-70) इति षत्वम्।
3. '**विसहने**' इति साक्षात्प्रभृतिषु (1-4-74) पाठात् विपूर्वकत्वेऽपि 'परिनि-विभ्यः—' (8-3-70) इति षत्वं न। विपूर्वकात् **सहतेः** ल्युटि साक्षात्प्रभृतिषु पाठात् कृञो योगे गतिसंज्ञायाम्, 'समासेऽनञ्पूर्वे—' (7-1 37) इति क्त्वाप्रत्ययस्य ल्यबादेशे, गणे निपातनादेव एदन्तत्वम्। **विसहनेकृत्य**=क्षान्त्वा इत्यर्थः।
4. 'दाश्वान् **साह्वान्** मीढ्वांश्च' (6-1-12) इत्यत्र निपातनात् छन्दसि, लोके च **सहतेः** क्वसौ परस्मैपदम्, उपधादीर्घत्वम्, अद्विर्वचनत्वम्, अनिट्त्वं च। '**साह्वान्**=वलाहकः' इति **काशिका** (6-1-12)।
5. 'शकि**सहो**श्च' (3-1-99) इति यत्। ण्यतोऽपवादः।
6. 'छन्दसि **सहः**' (3-2-63) इति ण्विप्रत्ययः। णित्त्वादुपधावृद्धिः। प्रत्ययः सर्वलोपी। 'अन्येषामपि दृश्यते' (6-3-137) इति पूर्वपदस्य दीर्घः। '**सहेः** साढः सः' (8-3-56) इति मूर्धन्यादेशः। द्वितीयादिषु तु '**सहेः** पृतनर्ताभ्यां च' (8-3-109) इति षत्वम्। एवं **जलाषाट्** इत्यादिषु चेति बोध्यम्।
7. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिको युच्।
8. सोढुं शक्नोतीत्यर्थे 'ताच्छील्यवयोवचनशक्तिषु—' (3-2-129) इति चानश्।
9. तच्छीलादिषु कर्तृषु 'अलंकृञ...**सह**चर इष्णुच्' (3-2-136) इतीष्णुच्प्रत्ययः।
10. ण्यन्तात् कर्तरि, 'अनुपसर्गात्...**साहि**भ्यश्च' (3-1-138) इति शप्रत्ययः। प्रत्ययस्य शित्त्वात् 'कर्तरि शप्' (3-1-68) इति शप्। साहयतीति **साहयः**।
11. सर्वं सहते इति **सर्वंसहः**। 'संज्ञायां भृतॄवृजिधारि**सहि**—' (3-2-46) इति खच्प्रत्ययः। 'अरुर्द्विषत्—' (6-3-67) इति पूर्वपदस्य मुमागमः। **सर्वंसहः**=अतीव सूक्ष्मबुद्धिः। एवं **शत्रुंसह** इत्याद्यपि।
12. 'पूःसर्वयोर्दारि**सहोः**' (3-2-41) इति खच्। पूर्ववत् मुम्। **सर्वंसहा**=वसुमती। संज्ञाऽत्र।
13. 'शकधृषज्ञाग्लाघटरभलभक्रम**सह**—' (3-4-65) इति **सह**धातौ उपपदे धातोस्तुमुन्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]सासहिः, [2]साहः-सहः, [3]उत्साही, [4]सहित्रम्, [5]सिसाहयिषुः, [6]षट्, [7]सहसानः, इतीमानि विशेषरूपाणि ।

(1828) " षह चक्यर्थे " (IV-दिवादिः-1128. अक. सेट्. पर.)

चक्यर्थः=तृप्तिः । **प्राचां** मतेऽस्याप्रामाणिकः पाठ इति **माधवः**। **देवश्लोकः** पूर्वधातौ द्रष्टव्यः । रूपाणि समस्तान्यपि पूर्वधातुवत् ज्ञेयानि । अयं सेट्, शतरि—सह्यन् इति भवतीति विशेषः ।

(1829) " षह मर्षणे " (X-चुरादिः-1810. सक. सेट्. उभ.)

आधृषीयः ।

अस्मादेव धातोः **साह्वान्** इति (णिजभावपक्षे) शुद्धात् निपात्यते इति **कैयटः** (6-2-12) । रूपाणि आधृषीय**चर्पयति**वत् (554) बोध्यानि।

(1830) " षान्त्व सामप्रयोगे " (X-चुरादिः-1569. सक. सेट्. उभ.)

'सान्त्व–' इति **क्षीरस्वामि**प्रभृतयः । **सामप्रयोगः**=प्रियवाक्येन उपच्छन्दनम् । चौरादिक**तन्त्रयति**वत् (698) सर्वाणि रूपाणि बोध्यानि ।

(1831) " षिच क्षरणे " (VI-तुदादिः-1434. सक. अनि. पर.)

मुचादिः ।

सेचकः-चिका, सेचकः-चिका, [8]सिसिक्षकः-क्षिका, [9]सेसिचकः-चिका ;

---

1. '**सहि**वहिचलिपतिवदिभ्यो यङन्तेभ्यः—' (वा. 3-2-171) इति किः किन् वा प्रत्ययः। प्रत्ययस्य लिड्वद्भावात् द्विर्वचनादिकम् इति **केचित्**। वस्तुतो यङन्तादेव विधानात् 'सन्यङोः' (6-1-9) इति द्विर्वचनमिति न्याय्यम् ।
2. ज्वलादित्वात (3-1-140) कर्तरि णप्रत्ययः । तस्य वैकल्पिकत्वात् पक्षे पचाद्यच् ।
3. उत्पूर्वकादस्माद् ग्रह्यादि (3-1-134) पाठात् कर्तरि णिनिः ।
4. 'अर्तिलूधूसूखनसह—' (3-2-184) इति करणे इत्रप्रत्ययः ।
5. ण्यन्तात् सनि उप्रत्यये रूपमेवम् । उत्तरखण्डे '**सः स्विदिस्वदिसहीनां** च' (8-3-62) इति सत्वम् ; 'स्तौति—' (8-3-61) इति नियमस्य बाधकोऽयम् ।
6. '**सहेः** षष् लुक् च' (द. उ. 9-7) इति धातोः षषादेशः, कनिन्प्रत्ययस्य लुक् च । **षट्**=संख्याविशेषः ।
7. औणादिके (द. उ. 5-30) असानच्प्रत्यये रूपम् । **सहसानः**=क्षमावान् ।
8. सन्नन्ते 'हलन्ताच्च' (1-2-10) इति झलादेः सनः कित्त्वम् ; तेन गुणो न ।
9. '**सिचो** यङि' (8-3-110) इति षत्वनिषेधः । 'आदेशप्रत्यययोः' (8-3-59) इति प्राप्तस्य षत्वस्य निषेधः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सेक्ता-सेक्त्री, सेचयिता-त्री, सिसिक्षिता-त्री, सेसिचिता-त्री ; इत्यादीनि रूपाणि तौदादिकमुञ्चतिवत् (1275) बोध्यानि । [1]अभिषिञ्चन्-परिषिञ्चन्-न्ती-ती, [2]निषेकः, अभिषेकः, [3]सेक्त्रम्, [4]सिक्थम् इति विशेष-रूपाणि ।

(1832) "षिञ् बन्धने" (V-स्वादिः-1248. सक. अनि. उभ.)

'**सिनोति सिनुते बन्धे** सिनीते च सिनाति च ।' (श्लो. 15) इति **देवः** ।

सर्वाण्यपि रूपाणि सौवादिकचिन्वतिवत् (519) बोध्यानि ।

[5]सिनो ग्रासः स्वयमेव, सितः, केशेषु केशैर्वा [6]प्रसितः, [7]सयः-विषयः, [8]परिषिण्वन् - निषिण्वन् - विषिण्वन्-ती, [9]सेरुः, [10]पुरुषः-पूरुषः, [11]सेत्रम्, [12]सेतुः,

---

1. 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेध**सिच**—' (8-3-65) इति षत्वमत्र । 'शे **मुचादीनाम्**' (7-1-59) इति नुम् । अनुस्वारपरसवर्णौ ।
2. घञि 'चजोः—' (7-3-52) इति कुत्वम् ; षत्वम् । **निषेकः** संस्कारविशेषः ।
3. 'दाम्नीशसयुयुजस्तुतुदसि**सिच**—' (3-2-182) इति करणे ष्ट्रन्प्रत्ययः । सिञ्चन्ति अनेनेति **सेक्त्रम्** सेचनसाधनम् ।
4. औणादिके क्थन्प्रत्यये, प्रत्ययस्य कित्वात् गुणनिषेधे कुत्वे च रूपमेवम् ।
5. '**सिनोते**र्ग्रासकर्मकर्तृकस्य—' (वा. 8-2-44) इति निष्ठानत्वम् । इदमत्र **माधवो**क्तं विवरणम्— 'यदा वध्यमानः पिण्डीक्रियमाणो ग्रासो दध्यादिवशेन तत्रानुकूल्यं प्रतिपद्यते, तदा कर्मणः कर्तृत्वविवक्षायां अयं प्रयोगः' इति ।

    "ग्रासस्य कर्मकर्तृत्वे निष्ठानत्वं भवेत् **षिञः** ।
    स्वयमेव **सिनो** ग्रासः सुखबद्धस्तथोच्यते ॥
    दध्यादियोगात् ग्रासोऽहि सुसंश्लिष्टो भवेन्मिथः ।
    नानार्थत्वात् तु धातूनां सुखभुक्त **इतीतरे** ॥" इति **प्रक्रियासर्वस्वम्** ।

6. '**प्रसितो**त्सुकाभ्यां तृतीया च' (2-3-44) इति तृतीयासप्तम्यौ ।
7. पचाद्यचि **सयः** । विशेषेण बध्नाति इति **विषयः**=शब्दादिः । 'परिनिविभ्यः —' (8-3-70) इति षत्वम् ।
8. 'परिनिविभ्यः सेवसित**सय**—' (8-3-70) इति षत्वम् ।
9. 'दाधेट्सि—' (3-2-159) इति तच्छीलादिषु कर्तृषु रुप्रत्ययः । धातोर्गुणः ।
10. पुरु सिनोतीति **पुरुषः** ; 'अन्येष्वपि—' (3-2-101) इति डप्रत्ययः । पुरुष एव **पूरुषः** । 'अन्येषामपि—' (6-3-137) इति दीर्घः ।
11. 'दाम्नीशसयुयुजस्वि—' (3-2-102) इति करणे ष्ट्रन्प्रत्ययः । **सेत्रम्**=जालम् ।
12. औणादिके (द. उ. 1-122) तुन्प्रत्यये रूपम् । **सेतुः** कूलान्तरप्रापकः पन्थाः । 'तितुत्र—' (7-2-9) इतीण्निषेधः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]सीरम्, इति विशेषरूपाणि ।

(1833) " षिञ् बन्धने " (IX-क्र्यादिः-1477. सक. अनि. उभ.)

'सिनोति सिनुते बन्धे, सिनीते च सिनाति च ।' (श्लो. 15) इति देवः । शतृशानचोः—सिनन्-ती, सिनानः इति रूपे । इतराणि समस्तान्यपि रूपाणि पूर्वधातुवत् (1832) ऊह्यानि ।

(1834) " षिट अनादरे " (I-भ्वादिः-304. सक. सेट्. पर.)

'किट त्रासे' इति भौवादिकधातुवत् (190) रूपाणि ज्ञेयानि ।

(1835) " षिध गत्याम् " (I-भ्वादिः-47. सक. सेट्. पर.)

काश्यपक्षीरस्वामिनौ धातुममुम् उदितं पठन्ति, 'ततः परं सिध्यतिरेव नेतरे ।' (व्याघ्रभूतिकारिका 7-2-10) इति वृत्तिविरोधात् तावुपेक्ष्यौ— इति माधवः । विस्तरश्च तत्रैव धातुवृत्तौ द्रष्टव्यः । देवोऽपि

'सिधेः सिध्यति संराद्धौ सेधतीत्युदितो गतौ ।
शास्त्रमाङ्गल्ययो रूपमूदितस्तदिटा भिदा ॥' (श्लो. 116)

इति उदित्पक्षमेवाङ्गीकृतवान् ।

[2]सिधित्वा-सेधित्वा, सिसेधिषकः-सिसिधिषकः-षिका, [3]अभिषेधन्-परिषेधन्-न्ती, [4]अभिसेधयन् गाः, [5]सुषेधः-दुःषेधः-निःषेधः, [6]सिध्रः, [7]सिध्रकः-सिध्रकावणम्;

---

1. 'शुषिचिमिभ्यो दीर्घश्च' (द.उ. 8-43) इति क्रन्प्रत्ययः, प्रकृतेः दीर्घश्च । सीरम्=हलः ।
2. 'रलो व्युपधात्—' (1-2-26) इति क्त्वासनोः कित्त्वविकल्पः, तेन अत्र, सन्नन्ते च रूपद्वयम् ।
3. 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेध—' (8-3-65) इति षत्वम् ।
4. 'सेधतेर्गतौ' (8-3-113) इति अत्र षत्वनिषेधः ।
5. अत्र सुषामादित्वात् (8-3-98) षत्वम् । सुषेध इत्यत्र 'उपसर्गात्—' (8-3-65) इति, दुःषेधः, निःषेधः इत्यत्र 'नुम्विसर्जनीयशर्व्यवायेऽपि' (8-3-58) इति च यद्यपि षत्वं सिद्धम्; तथापि कर्मप्रवचनीयानां सुदुर्निसां षत्वनिषेधकत्वात् तत्रापि षत्वप्राप्त्यर्थम्, गत्यर्थे 'सेधतेर्गतौ' (8-3-113) इति निषेधबाधनार्थं च सुषामादिषु पाठ इत्यवधेयम् ।
6. औणादिके (द. उ. 8-31) रक्प्रत्यये रूपम् । सिध्रः=साधुः, आसनप्रकारश्च ।
7. सिध्र इव सिध्रकः; इवार्थे संज्ञायां वा कन्प्रत्ययः । सिध्रकः=वृक्षविशेषः । सिध्रकावणम् इत्यत्र 'वनगिर्योः—' (6-3-117) इत्यत्र कोटरादित्वात् दीर्घः । 'वनं पुरगामिश्रकासिध्रका—' (8-4-4) इति णत्वम् । सिध्रकवृक्षप्रचुरो वनविशेषः— सिध्रकावणम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इतीमानि विशेषरूपाणि। इतराणि समस्तान्यपि रूपाणि भौवादिकशर्धतिवत् (1748) बोध्यानि।

(1836) "षिधु संराद्धौ" (IV-दिवादिः-1192. सक. अनि. पर.)

'सिधेः सिध्यति संराद्धौ—' (श्लो. 116) इति **देवः**।

संराद्धिः=निष्पत्तिः। "**केचिदूदितं** पठन्ति; तदसत्। अनुदात्तोपदेशवैयर्थ्यात्" इति **माधवः**।

[1]सिद्ध्यः, [2]सिधित्वा-सेधित्वा-सिद्ध्वा, [3]सिद्धः, [4]साङ्काश्यसिद्धः, [5]अन्नं साधयन्, तपः सेधयन्, इति विशेषरूपाणि। इतराणि सर्वाण्यपि पूर्वधातुवत् ज्ञेयानि।

(1837) "षिधू शास्त्रे माङ्गल्ये च"

(I-भ्वादिः-48. अक. सेट्. पर.)

देवश्लोकः सेधतौ द्रष्टव्यः। ऊदित्त्वादिड्विकल्पः। **शास्त्रम्**=शासनम्, **माङ्गल्यम्**=मङ्गलार्थक्रिया। समस्तान्यपि रूपाणि भौवादिक**सेधति**वत् (1835) बोध्यानि।

(1838) "षिभि हिंसार्थः" (I-भ्वादिः-431. सक. सेट्. पर.)

केषुचित् कोशेषु धातुरयं न दृश्यते। रूपाणि भौवादिक**जिन्वति**वत्(604)बोध्यानि।

---

1. 'पुष्य**सिद्ध्यौ** नक्षत्रे' (3-1-116) इति निपातनात् नक्षत्रविशेषे वाच्ये सति धातोः क्यप्। ण्यतोऽपवादः। सिद्ध्यति अस्मिन्नुपक्रान्तं कार्यमिति **सिद्ध्यः**=पुष्यनक्षत्रः। अन्यत्र **सेध्यम्** इति ण्यदेव।
2. उदित्त्वादिड्विकल्पः, 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः। तेन रूपत्रयम्।
3. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायामिण्निषेधः। संज्ञायां क्तप्रत्ययोऽयम्। **सिद्धा** इति देवयोनिविशेषाः।
4. सांकाश्ये सिद्धः **सांकाश्यसिद्धः**। '**सिद्ध**शुष्कपक्वबन्धैश्च' (2-1-41) इति सप्तमीसमासः। 'नेन्**सिद्ध**बध्नातिषु च' (6-3-19) इति सप्तम्या अलुको निषेधः; अन्यथा, 'साङ्काश्ये—' इति सप्तम्याः 'तत्पुरुषे कृति—' (6-3-14) इति अलुक् श्रूयेत। तत्र सूत्रे बहुलग्रहणादेव क्वचिदलुकोऽप्रवृत्तौ तु नात्र **सिद्ध**ग्रहणं करणमित्यास्तां तावत्।
5. '**सिद्ध्यते**रपारलौकिकेऽर्थे' (6-1-149) इति णावात्वम्। परलोकसाधनभूते तु 'तपः **सेधयन्**' इत्यत्र न आत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1839) " षिभु हिंसार्थः " (I-भ्वादिः-432. (पा.) सक. सेट्. पर.)
उदित्त्वात् क्त्वायामिड्विकल्पः । 'षिन्भु' इति केचित् । रूपाणि भौवादिक-**जेमति**वत् (602) बोध्यानि ।

(1840) " षिवि सेचने " (I-भ्वादिः. (पा.) सक. सेट्. पर.)
भौवादिक**जिन्वति**वत् (604) रूपाणि सर्वाण्यपि ऊह्यानि ।

(1841) " षिवु तन्तुसन्ताने " (IV-दिवादिः-1108. सक. सेट्. पर.)
[1]परिषीव्यन्-निषीव्यन्-विषीव्यन्, [2]परिषिषेविषकः-परिषिस्यूषकः-षिका, [3]स्यूत्वा-सेवित्वा, [4]स्यूतः-अनुस्यूतः, अनुस्यूतिः, [5]सेवनम्-सीवनम्, [6]प्रसेवकः, '[7]स्योनं ते सदनं कृणोमि' [8]सूत्रम्, [9]सूची, [10]स्यूमः इति विशेषरूपाणि । सामान्यरूपाणि दैवादिक**दीव्यति**वत् (838) बोध्यानि ।

---

1. शतरि 'हलि च' (8-2-77) इति उपधादीर्घः। **'परिनिविभ्यः सेव—'** (8-3-70) इति षत्वम् ।
2. इवन्तत्वेन '**सनीवन्तर्ध—**' (7-2-49) इति इड्विकल्पः। अभ्यासे षत्वम्; इडभावपक्षे 'हलन्ताच्च' (1-2-10) इति सनः कित्वात् 'च्छ्वोः शूठ्—' (6-4-19) इति वकारस्य ऊठ् । यण् ।
3. उदित्त्वात् क्त्वायामिड्विकल्पः। इडभावपक्षे ऊठ्, यणादेशः। इट्पक्षे **सेवित्वा** इति रूपम् । 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणः ।
4. क्त्वायाम्, सनि च, इड्विकल्पात् निष्ठायामिण्निषेधः । ऊठ्यणादेशौ ।
5. ल्युटि **सेवनम्** इति रूपम्। '**चान्द्राः भोजीया**श्च ल्युटि बाहुलकादुपधादीर्घमिच्छन्ति छिवुसिवुधात्वोः' इति **माधवः** । तेन **सीवनम्** इत्यपि यथालक्ष्यं साधु ।
6. प्रसीव्यन्ति तमिति **प्रसेवः**। 'अकर्तरि च कारके—' (3-3-19) इति संज्ञायां घञ्। तदन्तात् संज्ञायां कन्प्रत्ययः। '**प्रसेवकः**= वीणाप्रान्ते वक्रकाष्ठम्' इति **माधवः** ।
7. औणादिके (द. उ. 5-41) नप्रत्यये ऊठि यणादेशे च रूपम् । छान्दसोऽयं प्रयोगः । सीव्यन्त्यनेनेति **स्योनः**= रश्मिः ।
8. '**सिविमुच्योः—**' (द. उ. 8-83) इति ष्ट्रन्प्रत्ययः, टेरूकारश्च । **सूत्रम्**=तन्तुः ।
9. औणादिकोऽयं कर्तरि निष्पन्नः । **सूची**=शलाका ।
10. औणादिके (द. उ. 7-40) मन्प्रत्यये रूपमेवम् । **स्यूमः**=सूत्रतन्तुः ।

169

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1842) "षु प्रसवैश्वर्ययोः" (I-भ्वादिः-941. सक. अनि. पर.)

सर्वाण्यपि रूपाणि भौवादिकक्रुवतिवत् (196) बोध्यानि। **अष्टाध्याय्यां** ग्रहणानि सर्वाण्यपि सौवादिकस्यैवेति, तत्र (1844) विशेषरूपाणि द्रष्टव्यानि।

(1843) "षु प्रसवैश्वर्ययोः" (II-अदादिः-1041. सक. अनि. पर.)

'षुञः सुनोति सुनुते, प्रसवैश्वर्ययोरसौत्।

गतौ तयोश्च सवति, द्विरुक्त्या तस्य सो न षः ॥' (श्लो. 21) इति **देवः**। **प्रसवो**ऽभ्यनुज्ञानम्। 'ओमिति ब्रह्मा प्रसौति' (तै. उप. 2-16)। अभ्यनुज्ञां ब्रह्मा ददातीत्यर्थः। [1]सव्यम्-अपसव्यम्-[2]सुत्वा, सुतः, इति विशेषरूपाणि। इतराणि रूपाणि भौवादिकक्रुवतिवत् (196) बोध्यानि।

(1844) "षुञ् अभिषवे" (V-स्वादिः-1247. सक. अनि. उभ.)

देवश्लोकः, सवतौ (1843) द्रष्टव्यः। **अभिषवः**=स्नपनपीडनस्नानसुरासन्धानादिः। [3]सुन्वन्-ती, [4]सुत्वा-सुत्वरी, [5]अभिषुत्य, [6]सवनम्, [7]राजसूयः, [8]सुत्या,

---

1. 'अचो यत्' (3-1-97) इति यत्प्रत्ययः, गुणे 'वान्तो यि—' (6-1-79) इति अवादेशः।
2. धातुरनिट्। क्त्वायां रूपमेवम्। संज्ञायां क्तप्रत्यये **सुतः** तनयः।
3. '**सुञो** यज्ञसंयोगे' (3-2-132) इति शता। लडादेशात् शतुरयं भिन्नः, यजमान उच्यते **सुन्वन्** इति। धातोरुभयपदित्वेन शतरि शानचि च '**अभिषुण्वन्-अभिषुण्वानः** सोमम्' इत्यपि क्रमेण भवति।
4. भूते 'सुयजोः—' (3-2-103) इति ङ्वनिप्। प्रत्ययस्य ङित्त्वात् गुणनिषेधः। पित्त्वात् तुक्। **सुत्वा**-इष्टवान् यः, स एवमुच्यते। स्त्रियाम् 'वनो र च' (4-1-7) इति ङीप्, रेफश्च।
5. ल्यपि तुक्। 'उपसर्गात् **सुनोति**—' (8-3-65) इति षत्वम्।
6. **सवनम्**=यज्ञः, प्रातर्मध्यसायङ्कालरूपकालत्रयं च। ल्युटि रूपमेवम्।
7. राज्ञा सूयतेऽसौ इति, राजा वाऽसौ सूयते इत्यर्थे '**राजसूय**—' (3-1-114) इत्यनेन राजशब्दे उपपदे **सुनोतेः** क्यप्, दीर्घश्च। **राजसूयः**=राज्ञैव साधनीयः क्रतुविशेषः। अर्धर्चादित्वात् **राजसूयम्-राजसूयः** इत्युभयमपि साध्वेव।
8. 'संज्ञायां समजनिषदनिपतमनविदषुञ्—' (3-3-99) इति स्त्रियां क्यपि, तुकि च रूपमेवम्। **सुत्या** क्रतुविशेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]आसाव्यम्-सव्यम्, [2]सोमसुत्, [3]अभिसोष्यन्-न्ती-ती, अभिसुसूषुः, अभिषवः, [4]आसुतीवलः, [5]सुरा, [6]सुरकः, [7]सोमः इति विशेषरूपाणि। सामान्यरूपाणि तु भौवादिकद्रवतिवत् (847) बोध्यानि।

(1845) **" षुट्ट अनादरे "** (X-चुरादिः-1562. सक. सेट्. उभ.)

'**अनादरः**=अल्पीभावः' इति **केचित्**। '—तुच्छता' इति **परे**। चौरादिककुट्टयतिवत् (207) सर्वाणि रूपाण्यूह्यानि।

(1846) **" षुर ऐश्वर्यदीप्त्योः "** (VI-तुदादिः-1340. अक. सेट्. पर.)

सुरन्तीति **सुराः** देवाः। इगुपधलक्षणः कप्रत्ययः। इतराणि समस्तान्यपि रूपाणि तौदादिक**कुरति**वत् (229) बोध्यानि।

(1847) **" षुह चक्यर्थे "** (IV-दिवादिः-1129. अक. सेट्. पर.)

'**चक्यर्थः**=तृप्तिः' इति **स्वामिकाश्यपधनपालशाकटायनाः**। फलानां [8]सुहितः। सर्वाण्यपि रूपाणि दैवादिक**कुथ्यति**वत् (218) बोध्यानि।

(1848) **" षू प्रेरणे "** (VI-तुदादिः-1408. सक. सेट्. पर.)

> '**प्रेरणे सुवति** प्राणिप्रसवे सूयते भवेत्।
> प्राणिगर्भविमोकेऽर्थे सूते शे श्यनि शब्लुकि॥' (श्लो. 25) इति **देवः**।

---

1. 'आसुयु—' (3-1-126) इति ण्यत्प्रत्ययः। अजन्तत्वलक्षणयतोऽपवादः। **आसाव्यम्**=यज्ञियं सवनकर्म। अन्यत्र **सव्य**मित्येव।
2. भूते 'सोमे सुञः' (3-2-90) इति क्विप्। सोमं=सोमयागं सुतवान् इष्टवान् **सोमसुत्**।
3. अत्र 'उपसर्गात् सुनोति—' (8-3-65) इति प्राप्तस्य षत्वस्य '**सुनोतेः स्यसनोः**' (8-3-117) इति निषेधः। एवं सन्नन्तेषु सर्वत्र षत्वं न।
4. आङ्पूर्वकादस्मात् क्तिन्नन्तात् 'रजः कृष्यासुति—' (5-2-112) इति मत्वर्थीये वलप्रत्यये 'वले' (6-3-118) इति दीर्घः।
5. औणादिके (द. उ. 8-42) क्रन्प्रत्यये रूपम्। **सुरा**=मद्यविशेषः।
6. **सुरकः**=अहिविशेषः, येन दष्टा माद्यन्ति। **सुरा**शब्दात् सुरा इव **सुरकः**; इवार्थे कनि, 'केऽणः' (7-4-13) इति ह्रस्वः।
7. औणादिके (द. उ. 6-79) मनिन्प्रत्यये रूपम्। **सोमः**=लताविशेषः।
8. 'पूरणगुणसुहितार्थ—' (2-2-11) इति षष्ठीसमासनिषेधः। **सुहितार्थाः**=तृप्त्यर्थाः इति **वैयाकरणाः**।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]सूर्यः, [2]सविता, [3]सवित्रम्, [4]सूतः, [5]प्रसवी, [6]सूरः, इति विशेषरूपाणि। सामान्यरूपाणि **कौति**वत् (196) बोध्यानि।

(1849) "षूङ् प्राणिगर्भविमोचने"

(II-अदादिः-1031. सक. सेट्. आत्म.)

'प्राणिग्रहणमतन्त्रम्; अप्राणिप्रसवेऽपि वर्तते—**प्रसूनं** धान्यम्' इति **मैत्रेयः**। '**स्वरतिसूति**—' (7-2-44) इत्यादिना इड्विकल्पो वलाद्यार्धधातुकेषु। [7]सुषूतिः,-विषूतिः-निःषूतिः-दुःषूतिः, [8]प्रसूनम्-प्रसूतम्, सुषवी, [9]प्रसवी, [10]प्रसवः, [11]सन्तानसूः, [12]सूनुः, सूतकम्, सूतका-सूतिका, इति विशेषरूपाणि। सामान्यरूपाणि धूञ्धातुवत् (906) बोध्यानि।

(1850) "षूङ् प्राणिप्रसवे" (IV-दिवादिः-1133. सक. वेट्. आत्म.)

सर्वाण्यपि रूपाणि दैवादिककूङ्धातुवत् (238) बोध्यानि।

---

1. सुवति प्राणिनस्तत्तत्कर्मसु इति **सूर्यः**। 'राजसूय**सूर्य**—' (3-1-114) इत्यत्र निपातनात् क्यप्, रुडागमश्च।
2. 'तृन्' (3-2-135) इति ताच्छीलिकस्तृन्प्रत्ययः। **सविता**=सूर्यः। प्रेरणशील इत्यर्थः।
3. '**अर्तिलूधूसू**—' (3-2-184) इति करणे इत्रप्रत्ययः।
4. संज्ञायां क्तप्रत्यये रूपम्। **सूतः**=रथादीनां प्रेरकः सारथिः।
5. 'जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभू**प्रसू**भ्यश्च' (3-2-157) इति इनिप्रत्ययः। **प्रसवी**=आज्ञप्ता।
6. औणादिके क्रन्प्रत्यये रूपमेवम्। **सूरः**=सूर्यः। '**सूर**सूर्यार्यमादित्य—' **इत्यमरः**।
7. पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्र्युकः क्किति' (7-2-11) इतीण्निषेधः। '**सुविनिर्दुर्भ्यः** सुपि**सूति**समाः' (8-3-88) इति षत्वम्।
8. 'स्वादय ओदितः' (ग. सू. 8-2-45) इत्यातिदेशिकमोदित्त्वम्। तेन 'ओदितश्च' (8-2-45) इति निष्ठानत्वम्। एतच्च पाक्षिकमिति **केचित्**। तेषां मते **प्रसूत** इत्यपि।
9. 'जिदृक्षि...**प्रसू**भ्यश्च' (3-2-157) इति इनिप्रत्ययः। **प्रसवी**=प्रसवशीलः।
10. '**ऋदोरप्**' (3-3-57) इत्यप्प्रत्ययः। **प्रसवः** सन्तानः, पुष्पं च।
11. सन्तानं सूते इति **सन्तानसूः**। 'सत्**सू**—' (3-2-61) इत्यादिना क्विप्।
12. औणादिके (द. उ. 1-146) नुप्रत्यये रूपम्। प्रत्ययस्य **कित्वात्** न गुणः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1851) " षूद क्षरणे " (I-भ्वादिः-25. सक. सेट्. आत्म.)

क्षरणम्=निरसनम् । '—निस्सरणम्' इति **केचित्** । [1]मधुसूदनः इत्यादिषु हिंसार्थकत्वमपि दृश्यते । [2]सूदिता, [3]सूदः,। सामान्यरूपाणि भौवादिक**क्रन्दति**वत् (163) बोध्यानि । चुरादावपि **केचित्** 'षूद' इति पठन्ति; रूपेषु न कोऽपि विशेषः ।

(1852) " षृन्भु हिंसार्थः " (I-भ्वादिः-431. सक. सेट्. पर.)

'—भर्त्सनहिंसयोः' इति **काशकृत्स्नः** । उपदेशे नोपधोऽयं धातुः । '**षिम्भु**—' इति **मैत्रेयः** । भौवादिक**क्षोभति**वत् (316) रूपाण्यूह्यानि ।

(1853) " षृभु हिंसायाम् " (I-भ्वादिः-430. सक. सेट्. पर.)

'षिभु—' इति, 'सिभु —' इति च पाठभेदौ । यङन्तेषु अभ्यासे रीङ्, इति विशेषः; 'सरीसृभकः—भिका' इत्यादीनि रूपाणि । सृभ्यम् । इतराणि रूपाणि भौवादिक**तृप**धातुवत् (772) बोध्यानि ।

(1854) " षेलृ गतौ " (I-भ्वादिः-543. सक. सेट्. पर.)

'षेकृ—' इति **केचित्** । [4]सेलुः । भौवादिक**केलति**वत् (262) रूपाणि ऊह्यानि ।

(1855) " षेवृ सेवने " (I-भ्वादिः-501. सक. सेट्. आत्म.)

'—सेचने' इति **केचित्** । '[5]सेवृ—' इति **परे** । [6]सेवा, [7]सयूः, [8]अनिल-

---

1. मधुं=तन्नामकमसुरं सूदयति=हिनस्ति इति **मधुसूदनः** । नन्द्यादिषु (3-1-134) पाठात् ण्यन्तात् कर्तरि ल्युः । 'सात् पदाद्योः' (8-3-111) इति मूर्धन्यनिषेधः ।
2. '**सूद**दीप—' (3-2-153) इति ताच्छीलिकस्य अनुदात्तेत्त्वलक्षणयुचो निषेधात् 'तृन्' (3-2-135) इति तृन् ।
3. पचाद्यच् । **सूदः**=सूपकारः, पङ्कश्च ।
4. औणादिके उप्रत्यये रूपमेवम् । **सेलुः**=श्लेष्मशत्रुरौषधविशेषः ।
5. **मैत्रेयादयः** दन्त्यादिं पठन्ति, तत् षोपदेश-सोपदेशव्यवस्थापक**भाष्य**विरोधादुपेक्ष्यम् । तथा च **भाष्यम्**—(6-1-64) "अज्दन्त्यपराः सादयः षोपदेशाः, स्मिङ्स्वदिस्विदिस्वञ्जिस्वपयश्च ; सृपिसृजिस्तृस्त्यासेकृसवर्जम्" इति ।
6. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः ।
7. क्विपि ऊठि अयादेशे च रूपमेवम् ।
8. 'कर्मणि च ; येन संस्पर्शात् कर्तुः शरीरसुखम्' (3-3-116) इति कर्मण्युपपदे ल्युट् । 'उपपदमतिङ्' (2-2-19) इति समासः ।
   'येन संस्पर्शने कर्तुः शरीरसुखसम्भवः ।
   तत्कर्मोपपदे ल्युट् स्यात् जनैरनिलसेवनम् ॥' इति **प्रक्रियासर्वस्वम्** ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सेवनम्, [1]सेविष्णुः, [2]परिषेवमाणः-निषेवमाणः-विषेवमाणः, [3]सेवका इति विशेषरूपाणि। सामान्यरूपाणि गेपतिवत् (429) ऊह्यानि।

(1856) "षै क्षये" (I-भ्वादिः-915. अक. अनि. पर.)

'षै क्षये सायतीतीष्टं अन्तकर्मणि तु स्यति।' (श्लो. 7) इति देवः। 'सै' इति केचित्। स तु पाठो भाष्यादि (6-1-64) विरोधादुपेक्ष्यः। अष्टाध्यायीसूत्रेषु षाधातुग्रहणानि सर्वाण्यपि दैवादिकस्येति निष्कर्षः। सातम्। सर्वाण्यपि रूपाणि भौवादिकक्षायतिवत् (263) बोध्यानि।

(1857) "षो अन्तकर्मणि" (IV-दिवादिः-1147. सक. अनि. पर.)

दैवश्लोकः पूर्वधातौ द्रष्टव्यः। सामान्यरूपाणि छ्यतिवत् (577) ऊह्यानि। [4]सायकः, [5]अवसितम्-अवसितः-अवसितवान्, सित्वा, [6]अवसायः, [7]साययिता, [8]सातिः, [9]अवसाय, [10]अभिसिषासुः,

---

1. 'भुवश्च' (3-2-138) इत्यत्र चकारस्यानुक्तसमुच्चयार्थकत्वात् तच्छीलादिषु कर्तृषु धातोरस्मादपि इष्णुच्प्रत्ययः।
2. 'परिनिविभ्यः सेव—' (8-3-70) इति षत्वम्।
3. क्षिपकादित्वात् (ग. सू. 7-3-45) संज्ञायां इत्वनिषेधः। अन्यत्र सेविका।
4. 'कृत्यल्युटो बहुलम्' (3-3-113) इत्यत्र बहुलग्रहणात्, योगविभागाद्वा संज्ञायां ण्वुल्। 'आतो युक्—' (7-3-33) इति युगागमः। स्यति=अन्तं करोति इति सायकः=शरः।
5. 'द्यतिस्यति—' (7-4-40) इति निष्ठादिषु कित्प्रत्ययेषु इकारः। एवम् सित्वा, अवसितिः इत्यादिष्वपि बोध्यम्।
6. 'श्याऽऽद्व्यधाश्रुसंस्रवतीणवसावहृ—' (3-1-141) इति कर्तरि णप्रत्ययः। युगागमः। अवस्यतीति अवसायः निश्चयः। सूत्रे आदन्तत्वेनैव णप्रत्यये सिद्धे पुनः 'अवसा' इति ग्रहणं आदन्तलक्षणं कर्तरि कप्रत्ययं बाधितुम्।
7. णिजन्तात् तृचि रूपमेवम्। 'शाच्छासा—' (7-3-37) इति युक्। आदन्तलक्षण-पुकोऽपवादः।
8. 'ऊतियूतिजूतिसाति-' (3-3-97) इति क्तिन्नन्तो निपातः। निपातनादेव 'द्यतिस्यति—' (7-4-40) इतीत्वं न।
9. 'न ल्यपि' (6-1-69) इति इकारनिषेधः।
10. 'स्यादिष्वभ्यासेन-' (8-3-64) इति नियमात् अभ्यासे न षत्वम्। उत्तरखण्डे तु 'इण्कोः' (8-3-57) इति षत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]प्रणिष्यन्-न्ती-ती, [2]प्रतिसितम्, [3]साय:-सायम्, [4]साम, सात्म-सात्म्यम् इति विशेषरूपाणि ।

(1858) "**ष्टक प्रतिघाते**" (I-भ्वादि:-782. सक. सेट्. पर.) **घटादि:** ।

घटादित्वात् मित्त्वम्; तेन णिजन्ताद् ह्रस्व: । णमुलि दीर्घविकल्प: । सर्वाण्यपि रूपाणि **चकति** (482) वत् बोध्यानि ।

(1859) "**ष्टगे संवरणे**" (I-भ्वादि:-790. सक. सेट्. पर.) **घटादि:** ।

'ष्ठगे' इति **क्षीरस्वामी** । '**संवरणम्**=तिरोधानम्' इति **धातुकाव्यव्याख्या** (2-8) । '**ककि** नोच्यते' (143) इति धातुवद्रूपाणि ऊह्यानि ।

(1860) "**ष्टन शब्दे**" (I-भ्वादि:-461. अक. सेट्. पर.)

'**शब्दे च** देवशब्दे च **स्तनति** स्तनयेत् क्रमात् ।' (श्लो. 127) इति **देव:** । 'स्तन—' इति **न्यासकार:** (8-3-86) । तत् भाष्यविरोधादुपेक्ष्यम् । [5]**अभिनिष्टान: अभिनिस्तान:**=विसर्जनीय: । [6]स्तन:, स्तान्यम्, इति विशेषरूपाणि । सामान्यरूपाणि **कगति**वत् (143) बोध्यानि ।

---

1. शतरि 'दिवादिभ्य:—' (3-1-69) इति श्यन् । 'ओत: श्यनि' (7-3-71) इत्योकारलोप: । 'उपसर्गात् सुनोतिसुवति**स्यति**—' (8-3-65) इति षत्वम् । 'नेर्गदनदपतपदघुमा**स्यति**–' (8-4-17) इति णत्वम् ।
2. '**परिनिविभ्य:** सेवसित—' (8-3-70) इत्यत्र निष्ठान्तस्यास्यापि ग्रहणमिति **केचित्** । तेषां मते **परिषितम्, निषितम्, विषितम्** इति षत्वम् । **प्रतिसितम्** इत्यत्र तु न षत्वमिति बोध्यम् ।
3. घञि युगागम: । अवसीयते इति **साय:**=कालविशेष: । अस्यैव '**सायम्**' इति स्वरादिषु (1-1-37) निपातनात् मकारान्तत्वम्, अव्ययत्वं च इति **केचित्** । **अन्ये** तु 'अव्युत्पन्नं प्रातिपदिकम् '**सायम्**' इति' इति वदन्ति ।
4. '**सातिभ्यां**—' (द. उ. 6-81) इति मनिण्प्रत्यये **साम** । तेनैव सूत्रेण त्मन्प्रत्यये **सात्म**=सान्त्वनम् ।
5. 'अकर्तरि च कारके—' (3-3-19) इति संज्ञायां घञ् । '**अभिनिस: स्तन:** शब्दसंज्ञायाम्' (8-3-86) इति षत्वविकल्प: । शाब्दिकसंज्ञायां **अभिनिष्टान:** इति विसर्जनीयस्य नाम । तथा च **आपस्तम्ब:**—' 'द्व्यक्षरं चतुरक्षरं वा नाम पूर्वमाख्यातोत्तरं दीर्घा**भिनिष्टाना**न्तं घोषवदाद्यन्तरान्त:स्थम्' इति । विसर्गस्थानिकजिह्वामूलीयोपध्मानीययो: **अभिनिष्टान:** इति संकेत इति **केचित्** । तत्तु **न्यासपदमञ्जर्यादि**विरोधादुपेक्ष्यम् ।
6. पचाद्यचि **स्तन:** । **स्तान्यम्** इति तु ण्यति बोद्धयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1861) " **ष्टभि प्रतिबन्धे** " (I-भ्वादिः-386. सक. सेट्. आत्म.)

'स्तभ्नाति स्तभ्नुयात् स्तुभ्नात्यपि स्तुभ्नोति सौत्रयोः ।

स्तम्भते प्रतिबन्धार्थे स्तम्भेऽर्थे स्तोभते शपि ॥' (श्लो. 142) इति **देवः** ।

भौवादिक**कन्दति**वत् (163) सर्वाणि रूपाणि ज्ञेयानि ।

[1]उत्तम्भनम्, [2]ष्टम्भमाणः स्तम्भमानः ।

(1862) " **ष्टम अवैक्लव्ये** " (I-भ्वादिः-830. अक. सेट्. पर.)

घटादिः ।

सिद्धान्तकौमुद्यादिषु केषुचिदेवायं पठितः । रूपाणि समस्तान्यपि **कखति**वत् (142) बोध्यानि । अमन्तत्वेन मित्त्वात् णिजन्तात् ह्रस्वः, णमुलि दीर्घविकल्पश्च ।

(1863) " **ष्टिघ आस्कन्दने** " (V-स्वादिः-1265. सक. सेट्. आत्म.)

सौवादिक**तिक्नोति**वत् (716) सर्वाणि रूपाणि बोध्यानि ।

(1864) " **ष्टिपृ क्षरणे** " (I-भ्वादिः-364. सक. सेट्. आत्म.)

'ष्टिप—' इति **केचित्** । रूपाणि समस्तान्यपि दैवादिक**क्षिप्यति**वत् (306) बोध्यानि ।

(1865) " **ष्टिम आर्द्रीभावे** " (IV-दिवादिः-1124. सक. सेट्. पर.)

'स्तिम—' इति **माधवादयः**। 'निश्चलीभावे' इति च **केचित्** ।

'क्लेदे' इति **परे** । स्तिमितम्। भौवादिक**केटति**वत् (190) रूपाणि ज्ञेयानि ।

(1866) " **ष्टीम आर्द्रीभावे** " (IV-दिवादिः-1125. सक. सेट्. पर.)

'तीम—' इति **केचित्** पठन्ति इति **धातुवृत्तिः** । ईदृशेषु धातुषु न कोऽपि विशेषः । सर्वाणि रूपाणि **क्रीडति**वत् (275) बोध्यानि ।

---

1. '**उदः स्थास्तम्भ्वोः पूर्वस्य**' (8-4-61) इति सकारस्य पूर्वसवर्णस्थकारः । उपसर्गदकारस्य तस्य च चर्त्वेन तकारः । ततश्च उपसर्गतकार-पूर्वसवर्णप्राप्तकार-तकाररूपाः त्रयस्तकाराः । प्रयोगे परमुच्चारणक्लेशात् द्वितकारश्रवणम्, 'झरो झरि—' (8-4-65) इति कस्यचित् तकारस्य लोपः । 'उदः स्थास्तम्भ्वोः—' (8-4-61) इत्यत्र 'स्तम्भु—' (3-1-82) इति सौत्र**स्तम्भु**धातोः, अस्य च ग्रहणम्-अविशेषेण ।

2. "'औपदेशिकोऽयं टकारः, न तु ष्टुत्वनिबन्धनः इत्येके' इति **क्षीरस्वामि-मैत्रेयरक्षितौ**—" इति **पुरुषकारः** । तदानीं 'धात्वादेः षः सः' (6-1-64) इति षकारस्य सत्वाभावात् **ष्टम्भमाणः** इति शानचि रूपम् । निदर्शनार्थमिदमेकं प्रदर्शितम् । 'सादेशे सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधः' (वा. 6-1-64) इति **भाष्य**परामर्शे तु औपदेशिकटकारपक्षो न **भाष्य**सम्मत इति ज्ञायते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1867) " ष्टुच प्रसादे " (I-भ्वादि:-175. अक. सेट्. आत्म.)

[1]स्तोक:-स्तोकक:, [2]उदश्वित्स्तोकम्, [3]स्तोकान्मुक्त:, स्तोकेन मुक्त:, [4]संस्तोज:; इति विशेषरूपाणि । सामान्यरूपाणि भौवादिकचयतिवत् (502) बोध्यानि ।

(1868) " ष्टुञ् स्तुतौ " (II-अदादि:-1043. सक. अनि. उभ.)

स्तुवन्-[5]अभिष्टुवन्, [6]तुष्टूषन्-तुष्टूषमाण:, [7]अग्निष्टुत् - पुरुष्टुत्, [8]स्तुत्य:-अवश्य-स्तुत्य:, [9]ग्रावस्तुत्, [10]आयतस्तू:, [11]स्तोत्रम्, [12]प्रस्ताव:, स्तव:, [13]संस्ताव:-संस्तव:,

---

1. घञि रूपमेवम् । धातो: प्रसादार्थत्वेऽपि **स्तोक** इत्यादिषु अल्पार्थत्वम् । निष्ठायां सेट्त्वात् घञि कुत्वस्याप्रसक्तौ 'करणे च **स्तोक**—' (2-3-33) इत्यादिषु निर्देशात् कुत्वमिति **माधव:** । **स्तोक** एव **स्तोकक:** ।
2. 'पोटायुवति**स्तोक**—' (2-1-65) इति तत्पुरुष: । **स्तोकम्**=अल्पं उदश्वित, **उदश्वित्स्तोकम्** ।
3. 'करणे च **स्तोका**ल्प—' (2-3-33) इति तृतीयापञ्चम्यौ । पञ्चमीपक्षे 'पञ्चम्या: **स्तोकादिभ्य:**' (6-3-2) इत्यलुक् ।
4. "वर्णविकाराभ्युपगमात् संपूर्वकात् घञि चकारस्य जकारे **संस्तोज:** इति **मैत्रेय:**" इति **माधवाचार्या:** ।
5. शतरि उवङ् । **अभिष्टुवन्** इत्यत्र 'उपसर्गात् सुनोतिसुवतिस्यति**स्तौति**—' (8-3-65) इत्यादिना षत्वम् ।
6. सन्नन्तादुप्रत्यये रूपम् । अभ्यासे 'शर्पूर्वा: खय:' (7-4-61) इति खय: शेष: । हलादिशेषापवाद: । '**स्तौति**ण्योरेव—' (8-3-61) इति षत्वम् ।
7. अग्निं स्तौतीति **अग्निष्टुत्** । 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप् । तुक् । '**अग्ने: स्तुत्**—' (8-3-82) इति षत्वम् । पुरु स्तौतीति **पुरुष्टुत्**= ऋत्विग्विशेष: । अत्र सुषामादित्वात् (8-3-98), छान्दसत्वाद्वा षत्वम् ।
8. 'एति**स्तु**—' (3-1-109) इति क्यप् । प्रकृतसूत्रे 'क्यप्' इत्यनुवर्तमानेऽपि पुन: क्यब्ग्रहणं 'ओरावश्यके' (3-1-125) इति प्राप्तस्य ण्यतोऽप्यपवादार्थम् । **अवश्यस्तुत्य:** इत्यत्र मयूरव्यंसकादित्वात् समास: ।
9. 'भ्राजभास......**ग्रावस्तुव:** क्विप्' (3-2-177) इति ग्रावशब्द उपपदे **स्तौते:** क्विप् ताच्छीलिक: । तुक् । **ग्रावस्तुत्**=ऋत्विग्विशेष: ।
10. आयतं स्तौति इति **आयस्तू:** । 'क्विब् वचिप्रच्छ्यायत**स्तु**—' (वा. 3-2-76) इति क्विप् । दीर्घश्च । ह्रस्वाभावात् तुक् न ।
11. 'दाम्नीशसयुयुज**स्तु**—' (3-2-182) इति करणे ष्ट्रन्प्रत्यय: ।
12. प्रपूर्वकादस्मात् '**प्रे स्तु**द्रुस्रुव:' (3-3-27) इति घञ् । उवर्णान्तत्वलक्षणापोऽपवाद: । अन्यत्र **स्तव:** इत्येव ।
13. '**यज्ञे समि स्तुव:**' (3-3-31) इति संपूर्वकादस्मात् घञ् । यज्ञकर्मणि यत्र देशे छन्दोगा: समेत्य स्तुवन्ति स देश: **संस्ताव** इत्युच्यते । अन्यत्र **संस्तव:** परिचय: ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]स्तुतिः, [2]प्रस्तोता, [3]परिष्टुवन्-निष्टुवन्-विष्टुवन्, [4]स्तोमः, [5]अग्निष्टोमः [6]ज्योतिष्टोमः-आयुःष्टोमः, परिष्टोमः, [7]स्तोभः, 'मृडा जरित्रे रुद्र [8]स्तवानः' (तै. सं. 4-5-24), [9]त्रिभिःष्टुतः-त्रिभिःस्तुतः, इति विशेषरूपाणि। सामान्यरूपाणि आदादिकक्ष्णौतिवत् (323) बोध्यानि।

(1869) "ष्टुप समुच्छ्राये" (X-चुरादिः-1673. अक. सेट्. उभ.)

'स्तुप' इति **दुर्गः**। चौरादिक**कोपयति**वत् (225) रूपाणि ऊह्यानि। 'ष्टूप—' इति **केचित्**। अचि-स्तूपः।

(1870) "ष्टुभु स्तम्भे" (I-भ्वादिः-394. सक. सेट्. आत्म.)

'—**स्तम्भेऽर्थे स्तोभते शपि**।' (श्लो. 143) इति **देवः**।

[10]स्तुब्धः, [11]नितुस्तोभिषकः-नितुस्तुभिषकः-षिका, [12]अनुष्टुप्-त्रिष्टुप्,

---

1. 'श्रुयजीषि**स्तुभ्यः**—' (वा. 3-3-94) इति करणे क्तिन्प्रत्ययः। स्तूयतेऽनयेति **स्तुतिः** स्तोत्रम्।
2. प्रपूर्वकादस्मात् ताच्छीलिके 'तृन्' (3-2-135) इति तृन्प्रत्यये रूपमेवम्। **प्रस्तोता**=ऋत्विग्विशेषः।
3. अत्र सर्वत्र 'परिनिविभ्यः सेवसितसयसिवुसहसुट्**स्तु**—' (8-3-70) इति षत्वम्।
4. औणादिके (द. उ. 7-26) मन्प्रत्यये रूपमेवम्। **स्तोमः** स्तुतिव्यूहः। उपचारात् **स्तोमः** समूहार्थकः।
5. '**अग्नेः स्तुत्स्तोम**—' (8-3-82) इति षत्वम्।
6. '**ज्योतिरायुषः स्तोमः**' (8-3-83) इति षत्वम्। **परिष्टोम** इत्यत्र तु 'उपसर्गात् सुनोतिसुवतिस्यति**स्तौति**—' (8-3-65) इत्यादिना षत्वम्।
7. औणादिके भप्रत्यये रूपम्। **स्तोभः**=केवलस्तुतिप्रयोजनको वर्णसमूहः।
8. औणादिके (द. उ. 5-32) आनच्प्रत्यये रूपम्। लोकेऽपि प्रयोगार्होऽयं शब्दः।
9. '**स्तुत**स्तोमयोश्छन्दसि' (8-3-105) इति **एकेषां** मतेन षत्वम्। **अन्येषां** मते न। तेन रूपद्वयम्।
10. उदित्त्वेन क्त्वायामिड्विकल्पनात् निष्ठायामिण्निषेधः। 'झषस्तथोर्धोऽधः' (8-2-40) इति धत्वम्, भकारस्य जश्त्वेन बकारः।
11. अत्र अभ्यासेन व्यवधानात्, अस्थादित्वात् च 'स्तौतिण्योरेव—' (8-3-61) इति नियमात् न षत्वम्। शर्पूर्वकत्वात् खयः शेषः।
12. अनु स्तोभते इति **अनुष्टुप्**। क्विपि 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौति**स्तोभति**—' (8-3-65) इति षत्वम्। **त्रिष्टुप्** इत्यत्र सुषामादित्वात् (8-3-98) षत्वम्। उभे छन्दोविशेषवाचिके, भकारान्ते च। पदान्तत्वनिमित्तकः पकारः प्रथमैकवचने। पक्षे **अनुष्टुब्, त्रिष्टुब्** इति बकारान्तत्वमपि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]स्तुभित्वा-स्तोभित्वा-स्तुब्ध्वा, [2]निष्टोभिता-त्री ; इति विशेषरूपाणि । सामान्यरूपाणि जृम्भतिवत् (617) बोध्यानि ।

(1871) " ष्टेपृ क्षरणार्थः " (I-भ्वादिः-365. सक. सेट्. आत्म.)
भौवादिकक्षेपतिवत् (261) सर्वाण्यपि रूपाण्यूह्यानि ।

(1872) " ष्टै वेष्टने " (I-भ्वादिः-922. सक. अनि. पर.)
'ष्णै' इति स्वाम्यादयः । 'अप्राकाश्ये' इति केचित् । '[3]स्तायूनां पतये नमः (तै. सं. 4-5-7)' । इतराणि रूपाणि भौवादिकक्षायतिवत् (263) बोध्यानि ।

(1873) " ष्ट्यै शब्दसंघातयोः " (I-भ्वादिः-911. अक. अनि. पर.)
'शब्दसंघातयोर्धात्वोः स्त्यायत्येकस्य सो न षः ।' (श्लो. 7) इति देवः ।
[4]प्रस्तीमः-प्रस्तीतः, प्रस्तीमवान्-प्रस्तीतवान्, [5]प्रसंस्तीतः, [6]स्त्यातः-संस्त्यानः, [7]स्त्री, इति विशेषरूपाणि । सामान्यरूपाणि भौवादिकक्षायतिवत् (263) बोध्यानि ।

---

1. उदित्त्वादिड्विकल्पः । 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः । तेन रूपत्रयम् ।
2. तृचि 'उपसर्गात्—' (8-3-65) इति षत्वे रूपमेवम् । माधवधातुवृत्तौ अत्र प्रकरणे निष्टोब्धा इति अनिट्कं तृजन्तरूपं पठितं दृश्यते । धातावस्मिन् वलादेरार्धधातुकस्येड्विकल्पप्रतिपादकशास्त्राभावात् चिन्त्यमिदम् । किञ्च "'प्राक् सितादड्व्यवायेऽपि' (8-3-63) इति षत्वम्" इत्युक्तं तत्र ; तदपि न सङ्गच्छते ।
3. बाहुलकात् औणादिके उण्प्रत्यये 'आतो युक्—' (7-3-33) इति युगागमे च रूपम् । "छद्मना ये वस्त्रादीनपहरन्ति ते स्तायवः" इति भट्टभास्करः ।
4. प्रपूर्वकस्यास्य निष्ठायाम्, 'स्त्यः प्रपूर्वस्य' (6-1-23) इति यकारस्य सम्प्रसारणे, पूर्वरूपे, दीर्घे च, 'प्रस्त्योऽन्यतरस्याम्' (8-2-54) इति निष्ठातकारस्य मकारादेशविकल्पः । मकारादेशाभावपक्षे 'संयोगादेरातो धातोर्यण्वतः' (8-2-43) इति निष्ठानत्वं न भवति ; सम्प्रसारणस्य नित्यत्वात्, सम्प्रसारणे कर्तव्ये निष्ठानत्वस्यासिद्धत्वात् ।
5. 'प्रस्त्यः' इत्येव वक्तव्ये 'स्त्यः प्रपूर्वस्य' (6-1-23) इति वचनम्—प्रशब्दो यस्मात् धातूपसर्गसमुदायात् पूर्वः, तस्मादपि प्रसारणं भवतीति ज्ञापनार्थम् । तेन प्रसंस्तीतः इत्यत्रापि सम्प्रसारणादिकम् ।
6. प्रभिन्नोपसर्गोपपदस्य शुद्धस्य च धातोः न सम्प्रसारणादिकम् । अत्र 'संयोगादेरातो धातोर्यण्वतः' (8-2-43) इति निष्ठानत्वम् । अत्र सर्वत्रापि स्त्याधातुग्रहणेषु 'ष्ट्यै' इत्यस्य 'स्त्यै' इत्यस्य च ग्रहणं सर्वसम्मतम् । यदाह वामनः 'सम्प्रसारणविधौ षोपदेशोऽप्ययं स्त्यारूपो गृह्यते' (6-1-23) इति ।
7. 'स्त्यायतेर्ड्रट्' (पञ्च. उ. 4-165) इति ड्रट्प्रत्यये डित्त्वाट्टिलोपे वलि लोपे, टित्वात् ङीपि च स्त्री इति सम्पद्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1874) "ष्ट्रक्ष गतौ" (I-भ्वादिः-661. (पा.) सक. सेट्. पर.)

भौवादिकतक्षतिवत् (691) सर्वाणि रूपाणि ऊह्यानि ।

(1875) "ष्ठल स्थाने" (I-भ्वादिः-836. अक. सेट्. पर.)

ज्वलादिः । 'स्थल—' इति माधवः । [1]स्थालः-स्थलः, [2]स्थलम् , [3]कपिष्ठलः, कपिस्थलम् , [4]स्थली-स्थला, [5]स्थाली, [6]विष्ठलम्-कुष्ठलम्-शमिष्ठलम्-परिष्ठलम् , इति विशेषरूपाणि । इतराणि सामान्यरूपाणि भौवादिकचलतिवत् (510) बोध्यानि ।

(1876) "ष्ठा गतिनिवृत्तौ" (I-भ्वादिः-928. अक. अनि. पर.)

[7]स्थायकः-यिका, [8]स्थापकः-पिका, [9]तिष्ठासकः-सिका, [10]तेष्ठीयकः-यिका ;

---

1. 'ज्वलितिकसन्तेभ्यः—' (3-1-140) इति कर्तरि णप्रत्ययविकल्पः । पक्षे पचाद्यचि **स्थलः** इति साधुः ।

2. अधिकरणे घप्रत्ययो बाहुलकात् । बाहुलकादेव घान्तस्य क्लीबत्वम् ।

3. '**कपिष्ठलो** गोत्रे' (8-3-91) इति निपातनात् षत्वम् । **कपिष्ठलः**=गोत्रप्रवर्तको ऋषिः । अन्यत्र कपीनां स्थलम् **कपिस्थलम्** इत्येव ।

4. 'जानपदकुण्डगोण**स्थल**—' (4-1-42) इत्यादिना अकृत्रिमार्थे (स्वाभाविके स्थले विवक्षिते) ङीष् । **स्थली**=अकृत्रिमा भूमिः । **स्थला**=कृत्रिमा सौधादिषु भूः ।

5. संज्ञायां 'हलश्च' (3-3-121) इति घञ् । घञन्तात् **स्थाल**शब्दात् गौरादिषु (4-1-41) पाठात् ङीष् । **स्थाली**=पात्रविशेषः ।

6. '**विकुशमिपरिभ्यः स्थलम्**' (8-3-96) इति षत्वमत्र ।

7. 'धात्वादेः षः सः' (6-1-64) इति सकारादेशः सर्वत्र । '**आतो** युक् चिण्कृतोः' (7-3-33) इति युगागमः । एवं णिनिप्रत्यये, णमुल्यपि ज्ञेयम् ।

8. 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्या**तां** पुग् णौ' (7-3-36) इत्यनेन पुगागमः । एवं ण्यन्ते सर्वत्र पुगागमो बोध्यः ।

9. धातोरनुदात्तत्वात् सन इण्निषेधे, द्वित्वे, अभ्यासे, 'शर्पूर्वाः खयः' (7-4-61) इति खयः शेषः । अभ्यासस्य, 'सन्यतः' (7-4-79) इतीत्वम् । 'आदेशप्रत्ययोः' (8-3-51) इत्युत्तरखण्डे षत्वम् । ष्टुत्वम् । एवं सन्नन्ते सर्वत्र बोध्यम् ।

10. 'घुमा**स्था**गापाजहातिसां हलि' (6-4-66) इति ईत्वे, द्वित्वे, अभ्यासस्य गुणः । एवं यङन्ते सर्वत्र ज्ञेयम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्थाता-त्री, [1]उत्थाता, [वैकुण्ठस्य] [2]अधिष्ठाता-त्री, स्थापयिता-त्री, तिष्ठासिता-त्री, तेष्ठीयिता-त्री ;

[3]तिष्ठन्-[4]अधितिष्ठन् [वैकुण्ठं]-न्ती, [5][ग्रामात् शतं] उत्तिष्ठत्, [आसनात्] [6]उत्तिष्ठन्, [7][यौवनेन भर्तारं] उपतिष्ठन्ती, [याचकः प्रभुं] [8]उपतिष्ठन्, स्थापयन्-न्ती, तिष्ठासन्-न्ती ; —

स्थास्यन्-[A]अधिष्ठास्यन्-न्ती-ती, स्थापयिष्यन्-न्ती-ती, तिष्ठासिष्यन्-न्ती-ती ;— [9]सन्तिष्ठमानः-अवतिष्ठमानः-प्रतिष्ठमानः-[B]वितिष्ठमानः, [शब्दं नित्यं] [10]आतिष्ठमानः, [गोपी कृष्णाय] [11]तिष्ठमाना, [धर्माध्यक्षे] [12]तिष्ठमानः, [मुक्तौ]

---

1. 'उदः स्थास्तम्भ्वोः पूर्वस्य' (8-4-61) इति सकारस्य पूर्वसवर्णः थकारो भवति। तस्य 'झरो झरि सवर्णे' (8-4-65) इति पाक्षिको लोपः। लोपाभावपक्षे थकारस्यैव श्रवणम्, न तु 'खरि च' (8-4-55) इति चर्त्वम्। पूर्वसवर्णस्यासिद्धत्वात्।
2. अधिपूर्वकस्य **स्था**धातोः प्रयोगे, 'अधिशीङ्**स्था**ऽऽसां कर्म' (1-4-46) इति कर्मसंज्ञायाम्, 'कर्तृकर्मणोः कृति' (2-3-65) इति षष्ठी। 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभति**स्था**—' (8-3-65) इति षत्वम्।
3. 'पाघ्राध्मा**स्था**म्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधम**तिष्ठ**—' (7-3-78) इति **तिष्ठा**देशः शिति प्रत्यये परे।
4. 'अधिशीङ्**स्था**ऽऽसां कर्म' (1-4-46) इति वैकुण्ठस्य कर्मसंज्ञायां द्वितीया।
5. 'ईहायामेव' (वा. 1-3-24) इति, 'उदोऽनूर्ध्वकर्मणि' (1-3-24) इत्यत्रोक्तत्वात् न शानच्। किन्तु शत्रादेशः। शतस्य विशेष्यत्वात् **उत्तिष्ठत्** इत्यत्र क्लीबत्वम्।
6. '—अनूर्ध्वकर्मणि' (1-3-24) इति निषेधात् अत्र न शानच्।
7. 'उपान्मन्त्रकरणे' (1-3-25) इत्यत्र 'मन्त्रकरणे' इति विशेषणात् अत्र न शानच्।
8. 'वा लिप्सायाम्' (वा. 1-3-25) इति आत्मनेपदविकल्पात् पक्षे शता।
9. '**समवप्रविभ्यः स्थः**' (1-3-22) इति समादिपूर्वकेषु क्रमेण शानच्।
10. 'आङः प्रतिज्ञायाम्' (वा. 1-3-22) इति **वार्तिकात्** शानच्।
11. '**प्रकाशन**स्थेयाख्ययोश्च' (1-3-23) इति प्रकाशने शानच्। स्थित्या स्वाभिप्रायं प्रकाशयन्ती इत्यर्थः। 'श्लाघह्नुङ्**स्था**शपां ज्ञीप्स्यमानः' (1-4-34) इति कृष्णशब्दात् चतुर्थी। 'धातूनामनेकार्थत्वात् प्रकाशनमत्रार्थः' इति **केचित्**। 'स्थानेन स्वाभिप्रायाविष्करणं प्रकाशनम्' इति **पदमञ्जरी** (1-4-34)।
12. 'प्रकाशन**स्थेयाख्ययो**श्च' (1-3-23) इत्यनेन स्थेयाख्यायां शानच्। **स्थेयः** = विवादपदनिर्णेता। धर्माध्यक्षं निर्णेतृत्वेनोपसर्पतीत्यर्थः।

A. 'सङ्ग्रामे तान**धिष्ठास्यन्** निषद्य पुरतोरणम्।' भ. का. 9-72.

B. 'सहस्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य **वितिष्ठमानम्**। विलोचन**स्थान**गतोष्णरश्मिनिशाकरं साधु हिरण्यगर्भम्॥' शिशुपालवधे 4-4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]उत्तिष्ठमानः, [ऐन्द्रया गार्हपत्यं] [2]उपतिष्ठमानः, [आदित्यं] [3]उपतिष्ठमानः, [गङ्गा यमुनां] उपतिष्ठमाना, [रथिकान्] उपतिष्ठमानः, [पन्थाः स्रुघ्नं] उपतिष्ठमानः, [याचकः प्रभुं] [4]उपतिष्ठमानः, [यावद्भुक्तं] [5]उपतिष्ठमानः, स्थापयमानः, [6]सन्तिष्ठासमानः-अवतिष्ठासमानः, [इत्यादीनि], तेष्ठीयमानः ;

[7]संस्थास्यमानः-अवस्थास्यमानः-[A]प्रस्थास्यमानः-विष्ठास्यमानः, स्थापयिष्यमाणः, सन्तिष्ठासिष्यमाणः, तेष्ठीयिष्यमाणः, [इत्यादीनि] ;

[8]संस्थाः-संस्थौ-संस्थाः, [9]सव्येष्ठाः ; — —

[10]उपस्थितः-[B]स्थितम्-स्थितवान्, [C]समुत्थितवती, स्थापितः, तिष्ठासितः, तेष्ठीयितः-तवान् ; — — —

---

1. 'उदोऽनूर्ध्वकर्मणि' (1-3-24) इति शानच्।
2. 'उपान्मन्त्रकरणे' (1-3-25) इति शानच्।
3. 'उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिषु' (वा. 1-3-25) इत्यनेन क्रमेण चतुर्ष्वर्थेषु गम्यमानेषु शानच् भवति। आदित्यमु**पतिष्ठमानः**=स्तुवन् इत्यर्थः। गङ्गा यमुनामु**पतिष्ठमाना**=उपश्लिष्यमाणा इत्यर्थः। रथिकान् **उपतिष्ठमानः**= मित्रीकरोति इत्यर्थः। पन्थाः स्रुघ्नमु**पतिष्ठमानः**=प्राप्नोतीत्यर्थः।
4. 'वा लिप्सायाम्' (वा. 1-3-25) इत्यात्मनेपदविकल्पः।
5. 'अकर्मकाच्च' (1-3-26) इति शानच्। भोजने भोजने **उपतिष्ठत** इत्यर्थः।
6. 'पूर्ववत् सनः' (1-3-62) इत्यात्मनेपदम्। एवं आत्मनेपदनिमित्तविषये सर्वत्र सन्नन्ताच्छानच् बोध्यः।
7. आत्मनेपदनिमित्तेषु सत्सु लडादेशः। शानच् सर्वत्र बोध्यः।
8. क्विपि, 'घुमा**स्था**गापा—' (6-4-66) इतीत्वं **भाष्यकार**प्रयोगात् न। नच प्रत्यय-लक्षणाभावः शङ्क्यः; तस्य निषेधस्य वर्णप्राधान्यविषयत्वात्। अत्र च प्रत्यय-प्राधान्यात्।
9. '**स्था**स्थिनस्थृणामिति वक्तव्यम्' (वा. 8-3-97) इति षत्वम्। अत्र **वार्तिके** '**स्था**' इति औणादिकस्य कन्नन्तस्य ग्रहणमिति **न्यासकारः**। तच्च 'स्थृणाम्' इत्यनेन पुनरुक्तत्वात्, **हर्म्येष्ठाः**, **रथेष्ठाः**, इति प्रयोगविरोधाच्च न—इति **प्रदीपाद्यनुसारेण माधवीये** साधितम्।
10. 'गत्यर्थाकर्मकश्लिषशीङ्**स्था**ऽऽसवस—' (3-4-72) इति कर्तरि क्तप्रत्ययः। 'द्यतिस्यतिमा**स्था**मित् ति किति' (7-4-40) इति इत्वम्।

A. '**प्रस्थास्यमाना**वुपसेदुषस्तौ शोशुच्यमानानिदमूचतुस्तान्' भ. का. 3-12

B. 'आशितम्भवमुत्कृष्टं वल्गितं शयितं **स्थितम्**।
बह्वमन्यत **काकुत्स्थः** कपीनां स्वेच्छया कृतम् ॥' भ. का. 6. 107.

C. 'भूयः **समुत्थितवती** धृतपुण्डरीका भोगाय सागरगृहाद् भुवनैकयूनः ॥'
यादवाभ्युदये 19-70.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]स्थायी, [2]दुःस्थः,[A] ककुत्स्थः, [3]तपस्स्थः[B], प्रस्थः- [4]प्रष्ठः,[C] [5]समस्थः-विषमस्थः, [6]अम्बष्ठः-आम्बष्ठः-[7]गोष्ठः-[D]भूमिष्ठः-[8]सव्येष्ठः-[9]अपष्ठः-द्विष्ठः-त्रिष्ठः-कुशेष्ठः-कुष्ठः-शङ्कुष्ठः-अङ्गुष्ठः - मञ्जिष्ठः - पुञ्जिष्ठः - परमेष्ठः - बर्हिःष्ठः-[E]दिविष्ठः - अग्निष्ठः, [10]आखूत्थः-शलभोत्थः, [11]अश्वत्थामा, [12]शंस्थः, शंस्थाः,

---

1. ग्रह्यादिपाठात् (3-1-134) कर्तरि णिनिः। युगागमः।
2. 'आतश्चोपसर्गे' (3-1-136) इति कर्तरि कप्रत्ययः। 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः।
3. '**स्थे च** भाषायाम्' (6-3-20) इति सप्तम्या अलुङ्निषेधः। 'हलदन्तात्—' (6-3-9) इत्यस्यापवादः।
4. कर्तरि कप्रत्यये '**प्रष्ठो**ऽग्रगामिनि' (8-3-92) इति षत्वं निपात्यते।
5. 'सुपि **स्थः**' (3-2-4) इति कर्तरि कप्रत्ययः।
6. 'अम्बाम्बगोभूमिसव्या[व्येऽप]पद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः **स्थः**' (8-3-97) इति षत्वम्। एवं **अग्निष्ठः** इति पर्यन्तं षत्वमनेन सूत्रेण ज्ञेयम्। अम्बेव तिष्ठतीत्य**म्बष्ठः**। 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (6-3-63) इति पूर्वपदस्य ह्रस्वः। रूढशब्दश्चायम्; अतो नावयवार्थेऽभिनिवेशः कर्तव्यः। अम्बायां=[मातृत्वप्रयुक्तजातौ] तिष्ठतीति **न्यासे** व्युदपादि।
7. गावः तिष्ठन्त्यत्रेत्यधिकरणे कप्रत्ययः।
8. सूत्रे (8-3-97) कुशे, सव्ये, परमे, दिवि इति चतुर्षु स्थलेषु निपातनात् सप्तम्या अलुक्।
9. "**अपाष्ठः** इति क्वचिद् दृश्यते। तदानीं 'अन्येषामपि—' (6-3-137) इति पूर्वपदस्य दीर्घः— इति **न्यासे**" इति **माधवधातुवृत्तौ**।
10. आदन्तत्वादेव कप्रत्यये सिद्धे पुनः, 'सुपि **स्थः**' (3-2-4) इति सूत्रारम्भसामर्थ्यात् भावेऽपि कप्रत्ययो भवति। आखूनामुत्थानम्=**आखूत्थः**। पृषोदरादित्वात् सकारस्य थकारः।
11. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति मनिन्प्रत्ययः। पृषोदरादित्वात् आदेः सकारस्य थकारादेशः। अश्वस्येव **स्थाम**=बलं यस्य, सोऽ**श्वत्थामा**। उपपदसमासे स्वभावात् इवार्थो लभ्यते।
12. '**स्थः** क च' (3-2-77) कर्तरि कः। चकारात् क्विपपि। 'शमि धातोः संज्ञायाम्' (3-2-14) इत्यचोऽपवादः।

A. 'अबोधि **दुःस्थं** त्रैलोक्यं दीप्तैरापूरि भानुवत्॥' भ. का. 6-32.
B. 'असिस्तव **तपःस्थस्य** न समर्थयते शमम्॥' किरातार्जुनीयम् 11-17.
C. 'प्रच्छन्नं मारुति**प्रष्ठाः** सीतां द्रष्टुं प्लवङ्गमाः॥' भ. का. 7-53.
D. 'युवजानिर्धनुष्पाणि**र्भूमिष्ठः** खविचारिणः।' भ. का. 5-13.
E. 'सर्वनारीगुणैः **प्रष्ठां विष्टरस्थां गविष्ठिराम्**।
शयानां **कुष्ठले** तारां **दिविष्ठा**मिव निर्मलाम्॥' भ. का. 9-84.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]चिरस्थायी, [2]स्थास्नुः,[A] [3]स्थायुकः,[B] [4]स्थावरः,[C] [5]तस्थिवान्,[D] [6]प्रस्थायी, [चैत्रो गुरोः] [7]उपस्थानीयः, स्थापः, [E]प्रतिष्ठासुः,तिष्ठापयिषुः, [8]तेष्ठियः; स्थातव्यम्, स्थापयितव्यम्, तिष्ठासितव्यम्, तेष्ठीयितव्यम्; [9]स्थानीयम्, स्थापनीयम्, तिष्ठासनीयम्, तेष्ठीयनीयम्; [10]स्थेयः, स्थेयम्, स्थाप्यम्, तिष्ठास्यम्, तेष्ठीय्यम्;

---

1. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः। युगागमः।
2. 'ग्लाजिस्थश्च ग्स्नुः' (3-2-134) इति ग्स्नुप्रत्ययः ताच्छीलिकः।
   'क्स्नोः गित्त्वान्न स्थ ईकारः क्ङितोरीत्वशासनात्।
   गुणाभावस्त्रिषु स्मार्यः, श्र्युकोऽनिट्त्वं गकोरितोः॥' इति **भाष्यम्** (3-3-139)।
3. 'लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्' (3-2-154) इति तच्छीलादिषु कर्तृषु उकञ् प्रत्ययः। युगागमः।
4. '**स्थे**शभासपिसकसो वरच्' (3-2-175) इति ताच्छीलिको वरच्प्रत्ययः।
5. 'छान्दसा अपि क्वचिद्भाषायाम्' इति न्यायेन लिटः क्वसुः। द्वित्वे, आकारलोपे, 'नेड् वशि कृति' (7-2-8) इतीण्निषेधे प्राप्ते, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीट्।
6. 'भविष्यति गम्यादयः' (3-3-3) इति भविष्यदर्थे णिनिः। युगागमः।
   'गमी गामी तथाऽऽगामी प्रयायिप्रतियायिनौ।
   प्रबोधी प्रतिबोधी च भावी **प्रस्था**य्यमी नव॥' इति **प्रक्रियासर्वस्वम्**।
7. 'भव्यगेयप्रवचनीयो**पस्थानीय**जन्याप्लाव्यापात्या वा' (3-4-68) इत्यनीयरन्तो विकल्पेन निपातितः। पक्षे भावकर्मणोरनीयर्। **उपस्थानीयः**=उपस्थानकर्ता, उपस्थानकर्मभूतश्च।
8. 'यङोऽचि च' (2-4-74) इति यङो लुकि, संयोगपूर्वकत्वात् 'अचि श्नुधातु—' (6-4-77) इतीयङादेशः।
9. तिष्ठन्त्यस्मिन् इत्यधिकरणे 'कृत्यल्युटो बहुलम्' (3-3-113) इति बाहुलकात् अनीयर्। **स्थानीयम्**=नगरम्।
10. 'ईद्यति' (7-4-65) इतीत्वे गुणः। **स्थेयः**=विवादपदनिर्णेता। 'प्रकाशन**स्थेया**ख्ययोश्च' (1-3-23) इति सूत्रे निपातनात् बाहुलकात् अधिकरणे यत्।

A. '**स्थास्नुं** रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थम्॥' भ. का. 2-32.
B. 'अतीते वर्षुके काले प्रमत्तः **स्थायुको** गृहे॥' भ. का. 7-18.
C. 'शरीरिणां **स्थावर**जङ्गमानां सुखाय तज्जन्मदिनं बभूव॥' कुमारसम्भवे 1-23.
D. 'तं **तस्थिवांसं** नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः।' (रघुवंशे 5-61
E. 'अभिचैद्यं **प्रतिष्ठासु**रासीत् कार्यद्वयाकुलः॥' शिशुपालवधे 2-1.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]ईषत्स्थानः-दुःस्थानः-[A]दुरुपस्थानः-सुस्थानः ; — —
[2]उपस्थीयमानः, स्थाप्यमानः, तिष्ठास्यमानः, तेष्ठीय्यमानः ;
[3]प्रस्थः, माहिकप्रस्थः-इन्द्रप्रस्थः-मालाप्रस्थः, स्थापः, तिष्ठासः, तेष्ठीयः ;
स्थातुम्-उत्थातुम्, स्थापयितुम्, तिष्ठासितुम्, तेष्ठीयितुम् ;
[4]प्रस्थितिः, [5]संस्था-आस्था-[6]अन्यदास्था-अन्यास्था, व्यवस्था, स्थापना, तिष्ठासा, तिष्ठापयिषा, तेष्ठीया ;
स्थानम्, उत्थानम्, अधिष्ठानम्, [7]भीरुष्ठानम्, स्थापनम्, तिष्ठासनम्, तेष्ठीयनम् ;
स्थित्वा, स्थापयित्वा, तिष्ठासित्वा, तेष्ठीयित्वा ;
[8]प्रस्थाय-उत्थाय, प्रस्थाप्य, उपतिष्ठास्य, प्रतेष्ठीय्य ;
[9]शय्योत्थायं[B] [धावति],

---

1. 'आतो युच्' (3-3-128) इति युच्। अङपवादः।
2. यकि 'घुमास्था—' (6-4-66) इति ईत्वम्।
3. 'घञर्थे कविधानम्—स्थास्नापाव्यधिहनियुध्यर्थम्' (वा. 3-3-58) इति कः। 'आतो लोप इटि च' (6 4-64) इत्याकारलोपः। प्रतिष्ठतेऽस्मिन् इति प्रस्थः= सानुः। माहिकप्रस्थः-इन्द्रप्रस्थः-मालाप्रस्थः—एते देशविशेषाः।
4. 'स्थागापापचो भावे' (3-3-95) इति अङपवादः क्तिन्। 'द्यतिस्यतिमास्था-मित् ति किति' (7-4-40) इति इत्वम्।
5. बाहुलकात्, '—व्यवस्थायामसंज्ञायाम्' (1-1-61) इति निर्देशात् वा अङपि 'एवं यलापवादेषु सङ्करो दृश्यते क्तिनः। [साधुः।] तत् सर्वं बहुलोक्त्यैव साधितं माधवादिभिः॥' इति प्रक्रियासर्वस्वे।
6. अन्या च सा आस्था च अन्यदास्था। 'अषष्ठ्यतृतीयास्थस्यान्यस्य दुग् आशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु' (6-3-99) इति दुगागमः।
7. समासे 'भीरोः स्थानम्' (8-3-81) इति षत्वम्।
8. 'न ल्यपि' (6-4-69) इति ईत्वनिषेधः। माधवीये तु 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते' (परि. 55) इति न्यायसञ्चारेण ईत्वं वारितम्। तत् सम्पातायातम्; यतः 'न ल्यपि' (6-4-69) इति निषेधो जागर्ति।
9. 'अपादाने परीप्सायाम्' (3-4-52) इति णमुल्। परीप्सा=त्वरा। 'एवं नाम त्वरते, यदवश्यं कर्तव्यमपि नापेक्षते, शय्योत्थानमात्रमाद्रियते।' इति काशिका (3-4-52)।

A. 'के यूयं दुरुपस्थाने मनसाऽप्यद्रिमूर्धनि॥' भ. का. 7-85.
B. 'गोत्रे साक्षादजनि भगवानेष यत् पद्मयोनिः शय्योत्थायं यदखिलमहः प्रीणयन्ति द्विरेफान्।' अनर्घराघवे 7-78.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[A]स्थायम् २ } स्थापम् २ } तिष्ठासम् २ } तेष्ठीयम् २ ; }
स्थित्वा २ } स्थापयित्वा २ } तिष्ठासित्वा २ } तेष्ठीयित्वा २ ; }

[1]स्थाणुः, [2]स्थूणा, [3]स्थविरः, [4]स्थिरम्-[5]गविष्ठिरः-[B]युधिष्ठिरः, [6]स्थाली, [7]स्थूरः, [8]परमेष्ठी।

(1877) "ष्ठिवु निरसने" (I-भ्वादिः-560. सक. सेट्. पर.)

'ष्ठीवति ष्ठीव्यतीत्येते स्यातां निरसने ष्ठिवेः।' (श्लो. 162) इति देवः।

[9]ष्ठेवकः-विका, ष्ठेवकः-विका,

---

1. 'स्थो णुः' (द. उ. 1-147) इति णुप्रत्ययः। तिष्ठतीति स्थाणुः=ईश्वरः, अचलद्रव्यं च।

2. 'रास्नासास्नास्थूणावीणाः' (द. उ. 5-47) इति सूत्रेण धातोरूकारादेशः, नप्रत्ययः, णत्वम्, गुणाभावश्च निपात्यते। स्थूणा=स्तम्भः।

3. 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः' (द. उ. 8-27) इत्यनेन स्थाधातोः किरच्प्रत्ययः, ह्रस्वत्वम्, वुगागमश्च निपात्यते। स्थितो विश्रमात्= इति स्थविरः।

4. 'अजिरशिशिरशिथिलस्थिर—' (द. उ. 8-27) इति किरचि, आकारलोपश्च निपात्यते। तिष्ठतीति स्थिरम्=दृढम्।

5. 'गवियुधिभ्यां स्थिरः' (8-3-95) इति षत्वम्।

6. 'स्थाचतिमृजेरालवालजालीयरः' (द. उ. 10-1) इति आलप्रत्ययः। तिष्ठत्योदनादिकमिति स्थालम्=भाजनविशेषः। स्थाली, गौरादिषु (4-1-41) पाठात् स्त्रियां ङीष्।

7. 'स्थश्च' (द. उ. 8-35) इति रक्प्रत्यये, ऊकारश्चान्तादेशः। स्थूरः=उच्चः।

8. 'परमे कित्' (द. उ. 6-61) इति स्थाधातोः इनिप्रत्ययः, स च कित्। कित्वादाकारलोपः। 'तत्पुरुषे कृति बहुलम्' (6-3-14) इत्यलुक्। 'स्थास्थिन्स्थृणामिति वक्तव्यम्' (वा. 8-3-97) इति षत्वम्।

9. 'सुब्धातुष्ठिवु—' (वा. 6-1-64) इति सकारादेशप्रतिषेधः। 'ष्ठिवु' इत्यत्र ठकारः औपदेशिकः, थकारो वा इत्यत्र उभयथा मतभेदः। थकारपक्षे ष्टुत्वेन सकारस्य षकारश्रवणम् इति विशेषः।

A. 'स्थायं स्थायं क्वचिद् यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित्।' भ. का. 5-51.

B. 'त्रिदण्डकाषायकमण्डलूज्ज्वलो जपस्फुरद्दन्तपुटो युधिष्ठिरः।' चम्पूभारते 6-6.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]तिष्ठेविषकः-तुष्ठ्यूषकः-षिका, ठिष्ठेविषकः - टुष्ठ्यूषकः-षिका, [2]तेष्ठेवकः-टेष्ठेवकः-विका ;
ष्ठेविता-त्री, ष्ठेवयिता-त्री, तिष्ठेविषिता-तुष्ठ्यूषिता-टुष्ठ्यूषिता-टिष्ठेविषिता-त्री, तेष्ठेविता-टेष्ठेविता-त्री ; इत्यादीनि रूपाणि **दीव्यतिवत्** (838) बोध्यानि । [3]ष्ठीवन्-निष्ठीवन्, [4]निष्ठीवनम्-ष्ठेवनम्, [5]निष्ठीवः, [6]ष्ठेवित्वा-ष्ठ्यूत्वा, [7]निष्ठ्यूतम्, निष्ठ्यूतिः, इति विशेषरूपाणि ।

(1878) **"ष्ठिवु निरसने"** (IV-दिवादिः-1110. सक. अनि. पर.)

दैवश्लोकः पूर्वधातौ द्रष्टव्यः । **केचिद**मुं धातुं न पठन्ति इति **न्यासकार**-संवादपुरस्सरं **माधवीये** प्रतिपादितम् । ष्ठीव्यन्-न्ती-ती इति शतरि विशेषः । विशेषरूपाणि सर्वाण्यपि पूर्वधातौ द्रष्टव्यानि । दैवादिक**दीव्यति**वत् (838) बोध्यानि ।

---

1. इवन्तत्वात् **'सनीवन्त—'** (7-2-49) इति इडागमविकल्पः । इट्पक्षे द्विर्वचनादिकेषु 'शर्पूर्वाः—' (7-4-61) इति खयः शेषः । हलादिशेषापवादः । इडभावपक्षे 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे, वलि लोपं बाधित्वा 'च्छ्वोः शूठ्—' (6-4-19) इति ऊठि यणादेशे, पश्चात् द्विर्वचनम् । प्रतिपदोक्तविधित्वात्, अन्तरङ्गत्वात् वा प्रथमं ऊठ् । विस्तरस्तु **माधवीये** द्रष्टव्यः । **'ष्ठिवु'** इत्यत्र ठकार औपदेशिकः इति पक्षे **टिष्ठेविषकः—टुष्ठ्यूषकः-षिका** इति रूपम् । अत्र **न्यासकारः**—"केचिद् **आचार्येण** शिष्याः 'ठकारोऽयम्' इत्युपदिष्टाः । अपरे पुनः 'थकारोऽयम् । ष्टुत्वेन ठकारः श्रूयते' इतीममर्थं ग्राहिताः । उभयश्चैतत् प्रयोजनम् । **अन्ये** पुनराहुः—'ष्ठिवुर्दिवादिष्वपि पुनरधीयते, तत्र एकस्य द्वितीयस्थकारः, अपरस्य तु ठकारः' इति" इति (6-1-64) ।
2. यङन्तेऽपि थकारपक्षे **तेष्ठेवकः** इति, ठकारपक्षे **टेष्ठेवकः** इति च रूपम् ।
3. शतरि, **'ष्ठिवुक्लमु—'** (7-3-75) इति दीर्घः ।
4. ल्युटि पृषोदरादित्वात् (6-3-109) पाक्षिक उपधादीर्घः इति **माधवादयः**। **चान्द्रास्तु 'ष्ठिवुसिवोर्दीर्घश्च'** इति ल्युड्विषये सूत्रमेव पठन्ति ।
5. घञ्यपि पृषोदरादित्वात् दीर्घः इति **चान्द्राः** । ल्युटि घञि च पृषोदरादित्वादेव दीर्घ इति **शब्दकल्पद्रुमः** ।
6. उदित्त्वात् इड्विकल्पः । इडभावपक्षे ऊठ् ।
7. निष्ठायामिण्निषेधः । ऊठ् । **निष्ठ्यूतम्**=उद्गीर्णम् । एवं क्तिन्यपि ऊठ् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1879) " ष्णसु निरसने " (IV. दिवादिः-1112. सक. सेट्. पर.)

स्वामिकाश्यपादिमतानुसारेणायं धातुर्माधवीयादिषु पठितः । '[1]जनीजॄष्णसु—' (ग. सू. भ्वादिः) इति पाठमाश्रित्य केचिदस्य मित्त्वमङ्गीकुर्वन्ति । तत्पक्षे स्नसकः-सिका, स्नसयिता-त्री, इत्यादीनि ह्रस्वघटितानि रूपाणि ण्यन्तेषु बोध्यानि । दैवादिकक्रस्यतिवत् (265) रूपाण्यूह्यानि ।

(1880) " ष्णा शौचे " (II. अदादिः-1052. अक.अनि. पर.)

'स्नातीति शौचे स्नः स्नायेदिति चेच्छन्ति केचन ।' (श्लो. 11) देवः ।
[2]स्नायकः-यिका, [3]स्नापकः-प्रस्नापकः - स्नपकः-पिका, [4]सिष्णासकः - सिका, सास्नासकः-सिका ;
स्नाता-त्री, स्नापयिता-स्नपयिता-त्री, सिष्णासिता-त्री, सास्नायिता-त्री ; इत्यादीनि रूपाणि भातिवत् (1153) बोध्यानि । [5]प्रतिष्णातम्, [6]निष्णातः, [7]नदीष्णः-नदीष्णातः, नदीस्नातः, [8]सुस्नातम्, सौस्नातिकः,

---

1. 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादिः) इति सार्वत्रिकः पाठः । 'ष्णसु' इति 'क्नसु' स्थाने कैश्चित् पठ्यत इति माधवीये स्पष्टम् ।
2. ण्वुलि 'आतो युक्—' (7-3-33) इति युगागमः । धात्वादिषकारस्य सकारः ।
3. ण्यन्ते सर्वत्र आदन्तलक्षणः पुगागमो बोध्यः । पुगनन्तरम्, 'ग्लास्नावनुवमां च' (ग. सू. भ्वादिः) इति णिजन्ते मित्त्वविकल्पः । मित्त्वपक्षे स्नपक इत्यादीनि ह्रस्वघटितानि रूपाणि । मित्त्वाभावपक्षे स्नापकः इत्यादीनि । '...अनुपसर्गाद्वा' (ग. सू. भ्वादिः) इत्यनुवृत्तेः सोपसर्गस्थलेषु मित्त्वं नेति बोध्यम् । क्षीरतरङ्गिण्यां 'प्रस्नपयति' इति दृश्यते ; नूनमशुद्धः पाठोऽयम् ।
4. सन्नन्ते 'आदेशप्रत्यययोः' (8-3-59) इत्युत्तरखण्डे षत्वम् । ष्टुत्वेन नकारस्य णकारः ।
5. 'सूत्रं प्रतिष्णातम्' (8-3-90) इति मूर्धन्यविशिष्टो निपातः । प्रतिष्णातम्= शुद्धं सूत्रमित्यर्थः । अन्यत्र प्रतिस्नातमित्येव ।
6. नितरां स्नातः निष्णातः कुशलः । 'निनदीभ्यां स्नातेः कौशले' (8-3-89) इति षत्वम् । निष्णातः कटकरणे, निष्णातो रज्जुवर्तने । अत्र धात्वर्थस्य न विवक्षा ।
7. नद्यां स्नातीति नदीष्णः । 'सुपि स्थः' (3-2-4) इत्यत्र योगविभागात् कप्रत्ययः, 'निनदीभ्यां स्नातेः कौशले' (8-3-89) इति षत्वम् । "नदीष्ण इति । नदीस्नाने कुशल इत्यर्थः । कवयस्तु कुशलमात्रे प्रयुञ्जते ।" इति हरदत्तः । कौशलभिन्नार्थे तु नदीस्नात इत्येव ।
8. अत्र 'सु' इत्यस्य कर्मप्रवचनीयत्वेन न षत्वम् इति केचित् । वस्तुतः षत्वस्य प्राप्त्यभावात् 'सात् पदाद्योः' (8-3-111) इति निषेधाच्च षत्वमेव न । सुस्नातं पृच्छति सौस्नातिकः । 'पृच्छतौ सुस्नातादिभ्यः' (वा. 4-4-1) इति ठक् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]प्रस्नः, [2]स्नानीयम्, [3]स्नात्वाकालकः, [4]ब्राह्मणस्नापकः, [5]स्नावा, [6]स्नात्वी, [7]स्नायुः इतीमानि विशेषरूपाणि ।

(1881) "ष्णिह प्रीतौ" (IV-दिवादिः-1200. अक.वेट्.पर.)

रधादिः ।

'स्नेहने स्नेहयेत्, प्रीतौ स्निह्येत्—।' (श्लो. 198) इति देवः ।

'स्निह—' इति केचित् । तद् भाष्यादिविरोधादुपेक्ष्यम् ।

स्नेहकः-हिका, स्नेहकः-हिका, [8]सिस्निहिषकः-सिस्नेहिषकः-सिस्निक्षकः-क्षिका, [9]सेष्णिहकः-हिका ; [10]स्नेहिता-स्नेग्धा-स्नेढा-ढ्री, स्नेहयिता-त्री, सिस्निहिषिता-सिस्नेहिषिता-सिस्निक्षिता-त्री, सेष्णिहिता-त्री, इत्यादीनि रूपाणि दैवादिक-

---

1. 'घञर्थे कविधानं स्थास्नापा—' (वा. 3-3-58) इति कप्रत्ययः । प्रस्नान्त्यस्मिन् इति **प्रस्नः**= शैलेषु विद्यमानो जलाशयः । 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः ।

2. बाहुलकात् करणेऽनीयर्प्रत्ययः । स्नान्त्यनेनेति **स्नानीयम्**=स्नानसाधनभूतश्चूर्णविशेषः ।

3. अत्र मयूरव्यंसकादित्वात् (2-1-72) समासः । मयूरव्यंसकादिराकृतिगणः । अत्र यद्यपि '**स्नात्वाकालकः**' इति 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (7-1-37) इति ल्यप् न्याय्यः । तथापि गणपाठादेव न समास इति सिद्धान्तः । '—अनञ्' इत्यस्य पर्युदासत्वात् नञ्सदृशेनाव्ययेन क्त्वान्तस्य समास एव ल्यब्विधिः' इति **केचित्** ।

4. ण्यन्तात् ण्वुल् । ब्राह्मणानां **स्नापकः** इति याजकादित्वात् (2-2-19) षष्ठीसमासः ।

5. 'आतो मनिन्क्वनिप्—' (3-2-74) इति क्वनिप् ।

6. '**स्नात्व्यादयश्च**' (7-1-41) इत्यत्र निपातनात् क्त्वाया ईकारश्छन्दसि ।

7. औणादिके उण्प्रत्यये रूपम् । **स्नायुः**=शरीरस्थमजाविशेषः ।

8. 'रधादिभ्यश्च' (7-2-45) इतीड्विकल्पः । 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः । षत्वम् । तेन रूपत्रयम् । इडभावपक्षे 'वा द्रुहमुहष्णुहष्णिहाम्' (8-2-33) इति घकारविकल्पः, तस्य चर्त्वेन ककारः । पक्षे हकारस्य ढकारे, तस्य ककारेऽपि तुल्यं रूपम् ।

9. यङन्तेऽभ्यासे गुणः । उत्तरखण्डे षत्वम् ।

10. रधादित्वात् (7-2-45) इड्विकल्पः । 'वा द्रुहमुहष्णुहष्णिहाम्' (8-2-33) इति घत्वविकल्पः । घत्वपक्षे धत्वे **स्नेग्धा** । ढत्वपक्षे घत्वढत्वष्टुत्वढलोपदीर्घेषु **स्नेढा** इति रूपम् । एवं तव्यदादिष्वपि रूपत्रयं बोध्यम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्रुह्यतिवत् (885) बोध्यानि । [1]स्निहित्वा-स्नेहित्वा-स्निग्ध्वा-स्नीढ्वा, [2]स्निग्धः-स्नीढः, [3]उष्णिक् - उष्णिहा, [4]स्निहितिः, [5]स्नेहुः, इति विशेषरूपाणि ।

(1882) "ष्णिह स्नेहने" (X-चुरादिः-1572. सक. सेट्. उभ.) 'स्निट' इति 'स्मिट' इति च पाठभेदौ । पूर्वधातुवद्रूपाण्यूह्यानि ।

(1883) "ष्णु प्रस्रवणे" (II-अदादिः-1038. अक. सेट्. पर.) प्रस्नविता-त्री, प्रस्नवितुम्, सुस्नूषन्-न्ती, प्रस्नुतः इति विशेषरूपाणि । सामान्यरूपाणि तु आदादिकक्ष्णौतिवत् (323) बोध्यानि । वलादेरार्धधातुकस्य सर्वस्यापि 'स्नुक्रमोरनात्मनेपदनिमित्ते' (7-2-36) इतीडागमः । सन्नन्तेषु, किति प्रत्यये च निष्ठादौ 'सनि ग्रहगुहोश्च' (7-2-12) इति, 'श्र्युकः किति' (7-2-11) इति च इण्निषेधः ।

(1884) "ष्णुसु अदने" (IV-दिवादिः-1111. सक. सेट्. पर.) 'आदाने' इत्येके । 'अदर्शने इति द्रमिडाः' इति धातुवृत्तिः । 'ष्णुस निरसने' इति केचित् पठन्ति । स्नुषा—इगुपधलक्षणे कप्रत्यये टापि, सुषामादित्वात् (8-3-93) षत्वम् । औणादिकोऽयमिति केचित् । सर्वाण्यपि रूपाणि क्नस्यतिवत् (265) बोध्यानि ।

(1885) "ष्णुह उद्गिरणे" (IV-दिवादिः-1199. सक. सेट्. पर.) रधादिः । तेन वलाद्यार्धधातुकेषु इड्विकल्पः । झलि पदान्ते च 'वा द्रुहमुहष्णुह—' (8-2-23) इति घत्वविकल्पः । सर्वाण्यपि रूपाणि दैवादिकद्रुह्यतिवत् (885) बोध्यानि ।

---

1. इड्विकल्प-घत्वविकल्प-कित्त्वविकल्पाः । तेन चातूरूप्यम् ।
2. निष्ठायामिण्निषेधः । घत्वपक्षे ढत्वपक्षे च रूपद्वयम् ।
3. 'ऋत्विग्दधृक्स्रग्दिगुष्णिग्—' (3-2-59) इत्यत्र निपातनात् उत्पूर्वकादस्मात् क्विन्, उपसर्गान्त्यलोपः, षत्वं च । उष्णिक्=छन्दोविशेषः । 'कुद्धा उष्णिहा देवविशा' इति भाष्यकारप्रयोगात् अजादित्वेन स्त्रियां टापि उष्णिहा इत्यपि साधुः । उत्स्निह्यतीति उष्णिक् उष्णिहा वा ।
4. निगृहीतिः निपठितिः इत्यादिष्विव 'तितुत्रेष्वग्रहादीनाम्' (वा. 7-2-9) इति पर्युदासात् इट् इति प्रक्रियासर्वस्वम् । एतच्च पाक्षिकम् ; तेन स्निग्धिः स्नीढिः इत्यपि भवत्येव ।
5. औणादिके (द. उ. 1-95) उप्रत्यये स्नेहुः=चन्द्रमाः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1886) "ष्णै वेष्टने" (I-भ्वादि:-923. सक. अनि. पर.)

'शोभायां च' इत्येके। 'स्नातीति शौचे स्नः स्नायेदिति चेच्छन्ति **केचन**।' (श्लो. 12) इति **देवः**। 'ष्टै' इत्येव प्रायपाठः। '**उष्णीषं स्नायतेः**' (निरुक्तम् 7-12) इत्यत्र **स्कन्दस्वामिना** "उष्णीषं शिरोवेष्टनम्, स्नायतेः शौचार्थस्य वेष्टनार्थस्य वा; उभयस्यापि तत्र सम्भवात्" इति विवृतम्। तेन धातुरयं भ्वादावपीति **पुरुषकारे** (श्लो. 12) सप्रमाणं साधितम्। रूपाणि सर्वाण्यपि **पायतिवत्** (1062) बोध्यानि।

(1887) "ष्मिङ् ईषद्धसने" (I-भ्वादि:-948. अक. अनि. आत्म.)

षोपदेशोऽयम्। 'ईषद्धासे सयेतेति स्माययेदित्यनादरे।' (श्लो. 15) इति **दैवे**, तद्व्याख्याने **पुरुषकारे** च 'स्मिङ्' इति पठितम्।

[1]सिस्मयिषक:-षिका, [2]विस्मापयमानः, [3]स्मयमानो विवक्षति, [4]स्मयः, [5]स्मेरः, स्मितम् इति विशेषरूपाणि। सामान्यरूपाणि भौवादिककवतिवत् (198) बोध्यानि।

(1888) "ष्मिङ् अनादरे"

(X-चुरादि:-1573. (पा.) सक. सेट्. उभ.)

'ईषद्धासे स्मयेतेति **स्माययेदित्यनादरे**' (श्लो. 15) इति **देवः**।
'**मैत्रेयादि**सम्मतः पाठोऽयं चुरादिषु' इति **व्याख्यातारः**। रूपाणि यथासम्भवमूह्यानि।

(1889) "ष्वञ्ज परिष्वङ्गे" (I-भ्वादि:-976. सक. अनि. आत्म.)

---

1. '**स्मि**पूङ्रञ्ज्वशां सनि' (7-2-74) इति सन्नन्ते इडागमः। 'सनि ग्रहगुहोश्च' (7-2-12) इत्यस्यापवादः।
2. '**भीस्म्योर्हेतुभये**' (1-3-68) इति आत्मनेपदम्। 'नित्यं **स्मयतेः**' (6-1-57) इति णिजन्ते सर्वत्र आकारः प्रकृतेः। आत्वे कृते पुगागमोऽपि भवति।
3. 'लक्षणहेत्वोः क्रियायाः' (3-2-126) इति लक्षणे शानच्।
4. 'अज्विधौ भयादीनामुपसंख्यानम्' (वा. 3-3-56) इति अच्। अत्र ल्युडपवादोऽयमिति **केचित्**। **स्मयनम्** इत्यपि लक्ष्येऽस्ति इति **केचित्**।
5. 'नमिकम्पि**स्म्य**जसकमहिंसदीपो रः' (3-2-167) इति ताच्छील्ये रप्रत्ययः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]प्रतिष्वजमाणः, [2]परिष्वजमाणः-निष्वजमाणः-विष्वजमाणः, [3]परिष्वङ्गः, [4]स्वङ्क्त्वा-स्वक्त्वा, परिष्वज्य, [5]परिषिष्वङ्क्षमाणः, [6]सस्वजिवान्, इति विशेषरूपाणि । सामान्यरूपाणि दंशतिवत् (817) बोध्यानि ।

(1890) "ष्वद आस्वादने" (I-भ्वादिः-18. सक. सेट्. आत्म.)

'आस्वादनेऽर्थे स्वदते, स्वादयेदिति शब्णिचोः ।' (श्लो. 193) **देवः** । 'संवरणे' इति **केचित्** । '**आस्वादनम्**=जिह्वया लेहः' इति **क्षीरस्वामी** । 'अनुभवः' इति **माधवः** । '**स्वदन्ति देवा उभया निहव्या**' (ऋक् 7-2-2) इत्यत्र परस्मैपदं छान्दसम् । रसम् [7]आस्वदमानः, दधि [8]स्वदमानं देवदत्ताय, [9]सिस्वादयिषुः, '[10]आस्वादनीं दावशोणितानाम्' (यादवाभ्युदये 20-31) इति विशेषरूपाणि । सामान्यरूपाणि भौवादिककुर्दतिवत् (230) बोध्यानि ।

(1891) "ष्वद आस्वादने" (X-चुरादिः-1805. सक. सेट्. उभ.)

आस्वदीयः ।

---

1. शानचि शपि 'दंशसञ्जस्वञ्जां शपि' (6-4-25) इत्यनुनासिकलोपः । चवर्गपञ्चमत्वेन श्रूयमाणत्वेऽपि नोपधोऽयं धातुः । तदुक्तम्—'नकारजावनुस्वारपञ्चमौ झलि धातुषु' इति । 'उपसर्गात् सुनोति.......**स्वञ्जाम्**' (8-3-65) इति षत्वम् ।
2. अत्र '**परिनिविभ्यः** सेव......**स्वञ्जाम्**' (8-3-70) इति षत्वम् ।
3. निष्ठायामनिट्त्वात् घञि, '**चजोः**—' (7-3-52) इति कुत्वम् ।
4. 'जान्तनशां विभाषा' (6-4-32) इति नकारलोपो विकल्पेन न भवति । तेन रूपद्वयम् ।
5. 'स्थादिष्वभ्यासेन चाभ्यासस्य' (8-3-64) इति षत्वम् ।
6. 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां च' (वा. 1-2-6) इति लिटः कित्वात् लिडादेशे क्वसावपि कित्वम् । तेनोपधानकारलोपे, द्विर्वचनादिके च, 'वस्वेकाजाद्—' (7-2-67) इति इडागमे च रूपमेवम् ।
7. वस्तुतोऽकर्मकोऽयम् । धातोरत्र विवक्षावशेन सकर्मकत्वम् । विस्तरस्तु **माधवीयादौ** द्रष्टव्यः ।
8. 'रुच्यर्थानां प्रीयमाणः' (1-4-33) इति रुच्यर्थस्यास्य धातोर्योगे देवदत्तस्य सम्प्रदानत्वात् चतुर्थी ।
9. ण्यन्तात् सनि उप्रत्यये रूपमेवम् । 'सः स्विदिस्वदिसहीनां च' (8-3-62) इति सकारः । 'स्तौतिण्योरेव—' (8-3-61) इति नियमस्य बाधकः ।
10. 'कृत्यल्युटो बहुलम्' (3-3-113) इति बहुलग्रहणात् ण्यन्तात् कर्तरि ल्युट्; टित्वात् स्त्रियां ङीप् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'आस्वादनेऽर्थे स्वदते स्वादयेदिति शब्णिचोः ।' (श्लो. 103) इति **देवः** । सर्वाण्यपि रूपाणि चौरादिक**कालयति**वत् (185) बोध्यानि ।

(1892) **" ञि ष्वप शये"** (II-अदादिः-1068. अक. अनि. पर.) [अ]

स्वापकः-पिका, स्वापकः-पिका, [1]सुषुप्सकः-प्सिका, [2]सोषुपकः-पिका ;
स्वप्ता-स्वप्त्री, स्वापयिता-त्री, सुषुप्सिता-त्री, सोषुपिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**त्रपति**वत् (1556) बोध्यानि । [3]सुप्तः, सुप्त्वा-सुप्तिः, [4]स्वप्नः, [5]स्वप्नक्, [6]सुषुप्तः-विषुप्तः-निःषुप्तः-दुःषुप्तः, सुषुप्सुः-[7]सुष्वापयिषुः, इति विशेषः ।

(1893) **" ष्वष्क गत्यर्थः "** (I-भ्वादिः-100. सक. सेट्. आत्म.)

'**ष्वक्क**' इति द्विककारकः काचित्कः पाठः । '**सुब्धातुष्ठिवुष्वष्कतीनां**—' (वा. 6-1-64) इति निषेधात् धात्वादिषकारस्य सकारो न । 'विष्वक् परित्रैकि-

---

[अ] '**ञि ष्वप शये**' 'हलन्त्यम्' (1-3-3) इतीत्त्वप्रसङ्गात् 'ञि ष्वप् शये' इत्यपपाठः—इति **धातुकाव्यव्याख्यानम्** (2-51)। युज्यते चैतत्। यतः सर्वेष्वपि धातुपाठेषु "**ञि ष्वप्** शये। **उदात्तेत्**, अनुदात्तः।" इति पठ्यते । 'उदात्तेत्' इत्यस्य उदात्तोपदेशोऽकार इत्संज्ञकोऽत्र धातौ—इति खल्वर्थः । अतश्च प्रामादिकः सार्वत्रिकः 'ष्वप्' इति हलन्तपाठ इत्येत्र न्याय्यम्। अत एवापपाठः शोधितो **धातुकाव्यव्याख्यातमहाशयेन** ।

1. 'रुदविदमुषग्रहि**स्वपि**प्रच्छः संश्च' (1-2-8) इति सनः कित्त्वम् । तेन 'वचि**स्वपि**यजादीनां किति' (6-1-15) इति सम्प्रसारणम्। पूर्वरूपादिकम्। ततो द्विर्वचनम्। उत्तरखण्डे 'आदेशप्रत्ययोः' (8-3-59) इति षत्वम्।
2. '**स्वपि**स्यमिव्येञां यङि' (6-1-19) इति यङन्ते सम्प्रसारणम्। पूर्ववत् अभ्यासकार्याणि।
3. '**ञीतः** क्तः' (3-2-187) इति कर्तरि भावे च वर्तमाने क्तप्रत्ययः। निष्ठायाः कित्त्वात् सम्प्रसारणम्। एवं क्त्वाक्तिन्यक्प्रभृतिष्वपि बोध्यम्।
4. '**स्वपो** नन्' (3-3-91) इति भावे नन्प्रत्ययः।
5. '**स्वपि**तृषोर्नजिङ्' (3-2-172) इति ताच्छीलिको नजिङ्प्रत्ययः। नजिङि 'नज्' इत्येवात्रशिष्यते। जकारस्य पदान्तत्वप्रयुक्तः ककारः।
6. '**सुविनिर्दुर्भ्यः सुपि**सूतिसमाः' (8-3-88) इति षत्वम्। सूत्रे '**सुपि**' इति कृतसम्प्रसारणनिर्देशः। तेन सम्प्रसारणयोग्यस्थलेषु यत्र 'सुप्' इति श्रवणं तत्र सर्वत्रापि षत्वं भवतीति बोध्यम्।
7. ण्यन्तात् सनि उप्रत्यये रूपमेवम्। अभ्यासस्य '**द्युतिस्वाप्योः**—' (7-4-67) इति सम्प्रसारणम्। '**स्तौतिण्योरेव** षणि—' (8-3-61) इत्युत्तरखण्डे षत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तलोचनैः स्थितं **विष्वष्कमाण**ाम्बुदनादशङ्कया ॥' (धा. का. 1-14) इति प्रयोगः। रूपाणि सर्वाण्यपि **कखति**वत् (141) बोध्यानि।

(1894) "ञि ष्विदा गात्रप्रस्रवणे"

(I-भ्वादिः-744. अक. सेट्. आत्म.)

'गात्रप्रक्षरणे स्विद्येत् स्वेदते स्नेहमोकयोः।' (श्लो. 107) इति **देवः**। 'गात्रप्रक्षरणे' इति **माधवादयः**। उभयथाऽपि स्वेदस्य=घर्माम्भसो विवक्षाऽत्र। 'स्नेहनमोचनयोः' इति **हरदत्तादयः** (पदमञ्जरी 1-2-19)। सामान्यरूपाणि भौवादिक**क्ष्वेदति**वत् (326) बोध्यानि। [1]स्विन्नः, [2]प्रस्वेदितः-प्रस्वेदितम्, [3]सिस्वेदयिषुः।

(1895) "ष्विदा गात्रप्रक्षरणे"

(IV-दिवादिः-1188. अक. अनि. पर.)

'गात्रप्रक्षरणे स्विद्येत, स्वेदते स्नेहमोकयोः।' (श्लो. 107) इति **देवः**। सर्वाण्यपि रूपाणि दैवादिक**क्रुध्यति**वत् (277) बोध्यानि। 'निष्ठा शीङ्-स्विदि—' (1-2-19) इत्यत्र ञीतां क्ष्विदादीनां साहचर्यात् ञीतो भौवादिकस्यैव ग्रहणमिति **पदमञ्जरी**। अयमपि ञीत् इति **न्यासकारः**। तत्तु **पुरुषकारे धातुवृत्तौ** च खण्डितम्। भावादिकर्मणोः प्रस्वेदितम्-प्रस्वेदितः इत्यस्यापि रूपे। आदित्त्वमस्य **सर्वसम्मतम्**। अयं परस्मैपदी, भौवादिकस्तु आत्मनेपदीति; अयमनिट्, भौवादिकः सेट् इति च विशेषः।

(1896) "सङ्केत च आमन्त्वणे" (X-चुरादिः-1892. सक. सेट्. उभ.)

आमन्त्रणं=गूढोक्तिः। संकेतकः-तिका, सिसङ्केतयिषकः-षिका; संकेतयिता-त्री, सिसङ्केतयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**केतयति**वत् (260) ऊह्यानि।

---

1. 'ञीतः क्तः' (3-2-187) इति वर्तमाने क्तः। 'आदितश्च' (7-2-16) इति निष्ठायामिण्निषेधः। **'रदाभ्यां—'** (8-2-42) इति निष्ठातकारस्य, धातुदकारस्य च नकारः।
2. 'विभाषा भावादिकर्मणोः' (7-2-17) इति इड्विकल्पः। 'निष्ठा शीङ्**स्विदि**—' (1-2-19) इति सेटो निष्ठायाः कित्त्वनिषेधः।
3. ण्यन्तात् सनि उप्रत्यये रूपमेवम्। 'सः **स्विदि**—' (8-3-62) इति अभ्यासात् परस्य सकारः। 'स्तौतिण्योरेव षणि—' (8-3-61) इत्यस्यापवादः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1897) " सङ्ग्राम युद्धे " (X-चुरादिः-1922. अक. सेट्. आत्म.)

अदन्तः ।

"—'भृशादिभ्यः—' (3-1-12) इत्यत्र **कैयटे**—'**संग्रामयति**रनुदात्तेद् बोद्धव्यः' इति । **पदमञ्जर्यां** च 'अनुदात्तेदयं **संग्रामयति**रिष्यते' इति । तथा च तत्र **भाष्यमपि** '**असंग्रामयत** शूरः' इति। संग्रामशब्दात् 'तत्करोति' (ग. सू. चुरादिः) इति णिचापि सिद्धाविह संग्रामस्य पाठः—सोपसर्गात् संघातात् प्रत्ययार्थः, तेन **असंग्रामयत** इत्युपसर्गात् पूर्वमङ् भवति। तथा **संग्रामयित्वा** इत्यत्राधीत्येत्यादिवल्ल्यब् न भवति। **सिसंग्रामयिषते** इत्यत्र समो द्वित्वं भवति । नन्वयमनुदात्तेत्त्वार्थमवश्यं पठनीयः इति कथं संघातादुत्पत्त्यर्थः ? एवमपि 'ग्राम युद्धे' इत्येतावति पठ्यमानेऽप्यर्थस्वाभाव्यादिङिकोरधिवत् संपूर्वत्वे लब्धे संघातपाठस्योपसर्गादुत्पत्त्यर्थ एव। अत एव संघातादुत्पत्तिवचनादन्यत्र धातूपसर्गसमुदायात् प्रत्यये विधित्सिता उपसर्गाः पृथक् क्रियन्त इति ज्ञाप्यते" इति **माधवः** । सर्वाण्यपि रूपाणि **ग्रामयति**वत् (442) ज्ञेयानि।

(1898) "सत्र सन्तानक्रियायाम्"

(X-चुरादिः-1906-सक. सेट्. आत्म.) अदन्तः। 'सत्र—' इति **क्षीरस्वामी**। सत्रकः-त्रिका, सिसत्रयिषकः-षिका ; सत्रयिता-त्री, सिसत्रयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**कत्रयति**वत् (161) ज्ञेयानि ।

(1899) " सभाज प्रीतिदर्शनयोः "

(X-चुरादिः-1888. सक. सेट्. उभ.) अदन्तः ।

'—प्रीतिदर्शने' इति **क्षीरस्वामी** । '—प्रीतिसेवनयोः' **इत्यन्ये** । सभाजनम्, सभाजना, सभाजकः, सभाजः। सभाजयन् इति शतरि रूपम्। सर्वाण्यपि रूपाणि चौरादिक**क्षालयति**वत् (185) ज्ञेयानि ।

(1900) "सश्च गतौ" (I-भ्वादिः-202. सक. सेट्. पर.)

भ्वादिषु षस्जधातुप्रकरणे **माधवीये**ऽभिहितम्—"अत्र **सश्चि**मपि **केचित्** पठन्ति ;—'तमजिह्वा **असश्चत**' इत्यादि च दृश्यते" इति । "चान्तोऽयं(षस्ज) इति **शिवः—सश्चति**" इति **क्षीरस्वामी** । 'अति नः **सश्चतो**

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नय' (ऋक् 1-42-7) इति चान्तप्रयोगोऽपीति **तट्टीका** । तन्मतेन धातुरयं लिख्यते ।

सश्वकः-श्विका, सश्वकः-श्विका, सिसश्विषकः-षिका, सासश्वकः-श्विका ; सश्विता-त्री, सश्वयिता-त्री, सिसश्विषिता-त्री, सासश्विता-त्री ; इत्यादीनि रूपाणि यथासम्भवमूह्यानि ।

(1900-A) "**समी परिणामे**" (IV-दिवादिः-1221. अक. सेट्. पर.)

परिणामो-विकारः इति **क्षीरस्वामिदीक्षितादयः** । **सर्वे**ऽपि 'मसी—' इति पठित्वा '**समी इत्येके**' इति पठन्ति । सर्वाण्यपि रूपाणि भौवादिक**ग्रसति**वत् (440) ज्ञेयानि ।

(1901) "**सातिः सुखे**" (I-भ्वादिः....सक. सेट्. पर.)

"**सातिः** सौत्रो धातुः' इति **वृत्तौ** (3-1-138) । **बोधिन्यासे**ऽपि '**सातिः** सुखे वर्तते सौत्रः' इति । **जिनेन्द्रहरदत्तौ** '**साति**र्हेतुमण्ण्यन्तः' इति ।" इति **मा-धातुवृत्तिः** । सर्वत्र '**सातिः**' इति इका निर्देशः, न तु इदित् । '**सात**' इत्येव धातुस्वरूपम् । तस्यायं भावः-यदि भ्वादिः स्यात् '**सत**' इति पठितव्यम्, यतः '**सातिः**' इति पठ्यतेऽतोऽयं चुरादिरिति । **सातयः**—'अनुपसर्गाल्लिम्प-विन्दधारिपारिवेद्युदेजिचेति**साति**साहिभ्यश्च' (3-1-138) इति शप्रत्यये, प्रत्ययस्य शित्त्वात् शपि, पररूपे, णेरयादेशे च रूपमेवम् । **सातयः**=सुखी । सर्वाण्यपि रूपाणि **काश्वति**वत् (184) ज्ञेयानि ।

(1902) "**साध संसिद्धौ**" (V-स्वादिः-1261. अक. अनि. पर.)

साधकः-धिका, साधकः-धिका, [1]सिसात्सकः-त्सिका, सासाधकः-धिका ; साद्धा-साद्ध्री, साधयिता-त्री, सिसात्सिता-त्री, सासाधिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि दैवादिक**क्षुध्यति**वत् (315) ज्ञेयानि । ण्यन्तात् नन्द्यादित्वात् ल्युप्रत्यये साधनः, औणादिके [द. उ. 1-86] उण्प्रत्यये साधुः इति रूपम् ।

---

1. अत्र 'आदेशप्रत्यययोः' (8-3-59) इति षत्वे **सिषात्सकः** इति रूपमाह **माधवः** । वस्तुतोऽत्र प्रयोगे आदेशभूतसकारस्य, प्रत्ययावयवसकारस्य वा अभावात् इणः परत्वेऽपि षत्वं नैव प्राप्तमिति चिन्त्यमिदम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]मातरि साधुः। तुमुनि-प्रसाधयितुम्[A]।

(1903) "साम सान्त्वप्रयोगे"

(X-चुरादिः-1880. सक. सेट्. उभ.) **कथादिः अदन्तश्च।**

'—सान्त्वने इति **क्षीरस्वामी**' इति **माधवः**। **तरङ्गिण्यां** तु '—सान्तने। **सान्तनं**=प्रीणनम्' इत्येव दृश्यते। **चान्द्र**मते '—सान्त्वप्रयोगे' इति च **तत्रोक्तम्**। चुरादावेव 'साम सान्त्वने' इति पूर्वत्र (१०२९) पठितस्यापि एवमेव रूपाणि। सर्वाण्यपि रूपाणि **कालयति**वत् (185) ज्ञेयानि। साम।

(1904) "साम्ब सम्बन्धे" (X-चुरादिः-1556. अक. सेट्. उभ.)

धातुवृत्तौ "'षम्ब—' इति पठित्वा 'शम्बेत्येके' इति **स्वामी**। **साम्ब** इति **केचित्** दन्त्यादिं दीर्घवन्तं च पठन्ति।" इत्युक्तम्। **तरङ्गिण्यां** 'साम्ब—' इति पठितम्। 'शम्बेति **चन्द्रः**' इति च **तत्रोक्तम्**। साम्बकः-म्बिका, सिसाम्बयिषकः-षिका; साम्बयिता-त्री, इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिक**पक्षयति**वत् (956) ऊह्यानि। साम्बः।

(1905) "सार दौर्बल्ये" (X-चुरादिः-1869. अक. सेट्. उभ.)

अदन्तः।

दुर्गमाधवदीक्षितादयः एवं पठन्ति। **तरङ्गिण्यां** तु तालव्यादित्वेन पठ्यते। सर्वाण्यपि रूपाणि चौरादिक**कालयति**वत् (185) बोध्यानि। सारः=रसः संसारः। शतरि-[B]सारयन्।

(1906) "सीक् सेचने" (I-भ्वादिः-सक. सेट्. आत्म.)

"धातुरयं दन्त्यादिः इति **धनपालकाश्यपौ**। अत एव षोपदेशलक्षणे 'स्मिपिस्मिजि....सीकृसेकृसृवर्जम्' (6-1-56) इति तौ पेठतुः। **पुरुषकारस्तु**

---

1. "'**साध्वसाधुप्रयोगे** सप्तमी वक्तव्या' (वा. 2-3-43) इति सप्तमी। अनर्चार्थमिदं **वार्त्तिकम्**। अर्चायां तु 'साधुनिपुणाभ्यामर्चायाम्' (2-3-43) इत्येव सिद्धम्। तस्मादत्र अर्चाग्रहणं निपुणार्थं संपद्यते। '**साधुर्भृत्यो राज्ञः**' इत्यत्र भृत्यापेक्षया षष्ठी, न साध्वपेक्षयेति **वाक्यार्थज्ञा** आहुः' इति **कैयटादौ** प्रतिपादितम्" इति **माधवः**।

A. '........धाराः **प्रसाधयितु**मव्यतिकीर्णरूपाः।' शि. व. 5-60.

B. 'चहकमहितं नन्दं बद्ध्वाऽस्य **सारयतो** धनम्—।' धा. का. 3·54.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तन्न मृष्यति, यदाह—"**सीक्रु** इत्यार्याः इति **धनपालः**।" इति **धातुवृत्तिः**। **क्षीरतरङ्गिण्याम्** अयं नोपलभ्यते। सर्वाण्यपि रूपाणि भौवादिक**कीलति**वत् (195) ऊह्यानि।

(1907) "**सुख तत्क्रियायाम्**" (X-चुरादिः-1929. अक. सेट्. उभ.)

अदन्तः।

तत्क्रिया=तदनुभवः। तच्छब्देन सुखदुःखप्रातिपदिकार्थौ निर्दिश्येते। "'प्रातिपदिकाद् धात्वर्थे' (ग. सू. चुरादिः) इति सिद्धे इहानयोः पाठस्सोपसर्गात् प्रत्ययार्थः" इति **मैत्रेयः**। सर्वाण्यपि रूपाणि चौरादिक**दुःखयति**वत् (849) ऊह्यानि।

(1908) "**सुट्ट अनादरे**" (X-चुरादिः-1562-A. सक. सेट्. उभ.)

क्षीरस्वामिसम्मतः पाठोऽयम्। **तत्र** '**चन्द्रदुर्गौ** षोपदेशान् सुट्टादीन् मन्येते—सुषुट्टयिषति' इति दृश्यते।

'षट्ट स्फिट्ट हिंसायाम्' इति पठित्वा "**केचित्** द्वितीयं षुट्टेत्युकारवन्तमनोष्ठ्यं च पठन्ति। **अस्माभिस्तु मैत्रेयादीना**मनुसारेण पूर्वमेव षुट्टिः पठित इतीह न लिखितः, तदनुरोधादेवेह स्फिट्टिश्च पठितः।" इति **माधवीयधातुवृत्तावुक्तम्**। 'षट्ट—' इति **सि. कौमुदी**। सर्वाण्यपि रूपाणि **कुट्टयति**वत् (207) ज्ञेयानि।

(1909) "**सूच पैशुन्ये**" (X-चुरादिः-1874. अक. सेट्. उभ.)

अदन्तः।

सर्वाण्यपि रूपाणि चौरादिक**कूटयति**वत् (240) ऊह्यानि। सूचकः-चिका, सुसूचयिषकः-षिका; '**सूचिसूत्रि**—' (वा. 3-1-22) इत्यादिना अनेकाच्त्वेऽपि यङि [1]सोसूचकः; सूचयिता-त्री, सुसूचयिषिता-त्री, सोसूचिता-त्री; इति रूपाणि **कत्रयति** (161) वत् यथासम्भवमूह्यानि। सूचकः, [2]सूची, सूचिः, विषूचिका, [3]सूक्ष्मम् इमानि अधिकान्यत्रेति विशेषः।

---

1. '**सूचिसूत्रि—**' (वा. 3-1-22) इति यङ्; अनेकाच्त्वादप्राप्ते सति **वार्तिकेन** प्राप्तिः। अजन्तलक्षणस्यैकाज्विषयत्वादषोपदेशत्वात् उत्तरखण्डे न षत्वम्।
2. पचादिगणपाठात् (3-1-134) **सूची** इति भवति।
3. औणादिके (द. उ. 7-41) स्मन्प्रत्यये रूपमेवम्। सूचयति सूच्यते वा **सूक्ष्मम्**=अणुः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1910) "सूत्र वेष्टने (X-चुरादि:-1908. सक. सेट्. आत्म.)

अदन्तः ।

'—विमोचने' इति **केचित्** । **विमोचनम्**=मोचनाभावः। ग्रन्थने इति **परे**। सूत्रकः-त्रिका, सुसूत्रयिषकः-षिका ; [1]सोसूत्रकः-त्रिका ; सूत्रयिता-त्री, सुसूत्रयिषिता-त्री, सोसूत्रिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-**कत्रयति**वत् (161) ज्ञेयानि ।

(1910-A) "सूद क्षरणे" (X-चुरादि:-1668. अक. सेट्. उभ.)

'षूद' इति षोपदेशत्वेन **केचित्** पठन्ति। **केचित्** '—आश्रवणे' इति पठन्ति। [2]मधुसूदनः, [3]सूदः, [4]सूदिता-त्री, इति विशेषरूपाणि। सामान्यरूपाणि सर्वाण्यपि चौरादिक**केतयति**वत् (260) बोध्यानि ।

(1911) "सूर्क्ष आदरे" (I-भ्वादि:-666.सक. सेट्. पर.)

धातुकाव्य-सि.कौमुदी-काशकृत्स्नीयेषु पठितः ।

'ईर्ष्यायामादरे चार्थे क्रमात् सूर्क्ष्यति सूर्क्षति ॥' (श्लो. 170) इति **देवः**। **धातुवृत्तौ** "—षूर्क्ष—" इति पठित्वा 'आदरानादरे' इति **क्वचित्** पठ्यते। तदसत् ; 'सोमेन यक्ष्यमाणो नर्तून् सूर्क्षेन् नक्षत्रम्' इति दर्शनात्। सोमेन यक्ष्यमाणो 'वसन्ते ब्राह्मणोऽग्नीनादधीत। उत्तरयोः फल्गुन्योरग्निमादधीत' इत्यादि[उदित]ऋतुनक्षत्राणि नाद्रियेत इति सूत्रार्थः। तथा–'अवहेडनमसूर्क्षणम्' (अमरः नाट्यवर्गे) इति दृश्यते। **सूर्क्षणम्**=आदरः ततोऽन्यदसूर्क्षणम् अनादरः" इति उक्तमत्र अनुसन्धेयम्। **क्षीरतरङ्गिण्याम्** 'सूर्क्ष्य अनादरे' षान्तोऽयमिति **चन्द्रः**' इति च दृश्यते। **सायणेन** 'अनादरे' इति पाठो दूषितः। सर्वाण्यपि

---

1. अनेकाच्त्वात् यङोऽप्राप्तिः। अतः 'सूचिसूत्रि—' (वा. 3-1-22) इति यङ्। अषोपदेशत्वात् उत्तरखण्डे न षत्वम्।
2. मधुं सूदयतीति **मधुसूदनः**=विष्णुः । कर्मण्युपपदेऽणं बाधित्वा नन्द्यादिषु (3-1-134) पाठात् कर्तरि ल्युः ।
3. सूदयतीति **सूदः**=पाचकः ।
4. अनित्यण्यन्तत्वात् चुरादीनां णिजभावपक्षे अनुदात्तेत्त्वपक्षे '**सूददीपदीक्षश्च**' (3-2-153) इति निषेधात् न युच्प्रत्ययः। 'तृन्' (3-2-135) इति तृन्नेत्र इति **केचित्**। वस्तुतो णिजभावपक्षे 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदस्यैवानुशासनात् न युचः प्रसक्तिः, न वा युचो निषेधस्येति बोध्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रूपाणि भौवादिकचूषतिवत् (552) बोध्यानि। ण्यति[A]सूक्ष्र्यम्।

(1912) "सूक्ष्र्य ईर्ष्यार्थः" (I-भ्वादिः-509. अक. सेट्. पर.)

'ईर्ष्या=कामजमसहनम्' इति क्षीरस्वामी।

'ईर्ष्यायामादरे चार्थे क्रमात् सूक्ष्र्यति सूर्क्षति॥' (श्लो. 170) इति देवः।

सूक्ष्र्यकः-सूक्ष्र्यकः-सूर्क्ष्यिका, सुसूर्क्ष्यिषकः-षिका, सोसूक्ष्र्यकः-र्क्ष्यिका; सूर्क्ष्यिता-त्री, सूक्ष्र्ययिता-त्री, सुसूर्क्ष्यिषिता-त्री, सोसूर्क्ष्यिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि दक्षति (692) वत् ज्ञेयानि।

(1913) "सृ गतौ" (I-भ्वादिः-935. सक. अनि. पर.)

अयं धातुः अर्थभेदेन अकर्मकः सकर्मकोऽपि दृश्यते।

'गतौ ससर्ति सरति स्थिरापोर्धावति क्वचित्।' (श्लो. 30) इति देवः।

सारकः-रिका, सारकः-रिका, [1]सिसीर्षकः-र्षिका, [2]सेस्रीयकः-यिका; सर्त्ता-त्री, सारयिता-त्री, सिसीर्षिता-त्री, सेस्रीयिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि जौहोत्यादिकपिपर्त्तिवत् (1044) ज्ञेयानि। [3]धावन्-सरन्-न्ती, [4]सरकः, अति(ती)सारकी, [5]सूर्यः, [6]पुरःसरः-अग्रतःसरः-[B]अग्रेसरः,

---

1. सन्नन्ते 'अज्झनगमां सनि' (6-4-16) इति दीर्घे 'सन्यतः' (7-4-79) इतीत्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घे, द्विर्वचने च रूपमेवम्।
2. यङन्ते 'रीङ् ऋतः' (7-4-27) इति रीङादेशे रूपमेवम्।
3. शतरि 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्ति—' (7-3-78) इत्यादिना प्रकृतेः धावादेशे धावन् इति भवति। 'सर्त्तेः वेगितायां गतौ धावादेशमिच्छन्ति। अन्यत्र सरति अनुसरतीत्येव भवति' इति काशिका (7-3-78)। तेन अनुसरन्-सरन् इत्यप्यर्थविशेषे साधुरेव।
4. 'सृल्वः समभिहारे वुन्' (3-1-149) इति वुन्प्रत्यये रूपमेवम्। साधु सरतीति सरकः। सरकः पानपात्रमिति केचित्।
5. 'राजसूयसूर्य—' (3-1-114) इति क्यपि उत्वे च रूपम्। अथवा सुवते रुडागमे रूपमेवम्।
6. पुरः सरतीति 'पुरोऽग्रतोऽग्रेषु सर्त्तेः' (3-2-18) इति टप्रत्यये रूपम्। एवं अग्रतःसरः, अग्रेसरः इत्यादौ। 'तत्पुरुषे कृति—' (6-3-14) इति सप्तम्या अलुक्। अत्र न्यासकारात्रेयाभ्याम् 'अग्रे इत्येकारान्तत्वं निपातनात्' इत्युक्तम्। 'अग्रस्सरति, अग्रेण सरतीत्यादावपि एकारान्तत्वं फलम्' इति च। एवं हि 'सवरुणावरुणाग्रसरं रुचा' 'आयोधनाग्रसरतां त्वयि वीर जाते' इत्यादयः प्रयोगाश्चिन्त्याः स्युः।

A. 'सूक्ष्र्य त्वदीक्षा चिरकाङ्क्षिता नः ......।' धा. का. 1-85.
B. 'अग्रेसरो जघन्यानां मा भूः पूर्वसरो मम॥' भ. का. 5-97.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]पूर्वसरः, [2]परिसारी, [3]विसारी,[A] अनुसारी, [4]प्रसारी, [5]उदासारी, प्रत्यासारी, [6]सरणः, [7]सृमरः[B], सारणा, सारणी, [8]सृत्वरः-[C]सृत्वरी, [9]चन्दनसारः, अतीसारः, विसारः, [10]उपसरो गवाम्, [11]उपसर्या[D] गौः, [12]आसारः, [13]सारः, प्रसारः,

---

1. पूर्वः सरतीति कर्तृवाचिनि पूर्वशब्दे उपपदे 'पूर्वे कर्तरि' (3-2-19) इति टप्रत्ययो भवति। पूर्वं देशं सरतीति **पूर्वसारः**। अत्र कर्तृभिन्नार्थे अण्।
2. 'संपृचानुरुध...सृ—' (3-2-142) इत्यादिना तच्छीलादिषु कर्तृषु घिनुण्प्रत्ययो भवति। तेन रूपमेवम्।
3. विसरतीति=**विसारी**। णिनिप्रत्ययः। '**विसारिणो** मत्स्ये' (5-4-16) इति स्वार्थेऽण्प्रत्यये रूपम्। अणन्तस्यैव प्रयोगः।
4. प्रशब्द उपपदे 'प्रे लपसृ—' (3-2-145) इति घिनुण्प्रत्ययः।
5. 'उत्प्रतिभ्यामाङि **सर्त्तेः**—' (वा. 3-2-78) इति णिनिप्रत्यये रूपमेवम्। एवं **प्रत्यासारी** इत्यादावपि।
6. 'जुचङ्क्रम्यदन्द्रम्यसृ—' (3-2-150) इति तच्छीलादिषु कर्तृषु युच्प्रत्ययः।
7. '**सृ**घस्यदः क्मरच्' (3-2-160) इति तच्छीलादिषु कर्तृषु क्मरच्प्रत्यये रूपमेवम्।
8. 'इण्नशिजि**सर्त्ति**भ्यः—' (3-2-163) इति तच्छीलादिषु कर्तृषु क्वरप्प्रत्ययः। 'टिड्ढाणञ्—' (4-1-15) इति ङीपि **सृत्वरी** इति रूपम्।
9. '**सृ** स्थिरे' (3-3-17) इति स्थिरे कर्तरि घञ्प्रत्ययः। '**स्थिर** इति कालान्तरस्थायी पदार्थ उच्यते। स चिरं तिष्ठन् कालान्तरं सरतीति धात्वर्थस्य कर्ता' इति **काशिकायाम्** (3-3-17)। **अतीसारः** इत्यत्र 'व्याधिमत्स्य-बलेष्विति वक्तव्यम्' (वा. 3-3-17) इति घञ्। 'उपसर्गस्य घञि—' (6-3-122) इति दीर्घश्च। **अतीसारः**=व्याधिः। विविधं सरतीति **विसारो**=मत्स्यः। **सारो** बलम्। खदिरं सारयतीति **खदिरसारः**; अन्तर्भावितण्यर्थोऽत्रायम् धातुः इति **भाष्ये** (3-3-17) स्पष्टम्।
10. 'प्रजने **सर्त्तेः**' (3-3-71) इत्यप्प्रत्ययः। **उपसरो** गवाम्=प्रथमं स्त्रीगवीषु पुंगवानां गर्भाधानाय नियोजनम् **उपसरण**मुच्यते।
11. '**उपसर्या** काल्या प्रजने' (3-1-104) इत्युपपूर्वात् यत्प्रत्ययान्तो निपात्यते।
12. 'पुंसि संज्ञायां घः प्रायेण' (3-3-118) इति करणाधिकरणयोर्घप्रत्ययः।
13. 'भावे' (3-3-18); 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति भावे वाच्ये, कर्मवर्जिते कारके संज्ञायां विषये च घञ्प्रत्यये रूपमेवम्। एवं **प्रसारः**, **संसारः** इत्यादिषु च ज्ञेयम्।

A. 'पतत्यधो धाम **विसारि** सर्वतः किमेतदित्याकुलमीक्षितं जनैः॥' शि. व. 7-2.
B. '**सृमरो**ऽभङ्गुरप्रज्ञो गृहीत्वा भासुरं धनुः।' भ. का. 7-22.
C. 'कीर्तिं मनस्तापहृतं **विसृत्वरीं**......।' वा. वि. 1-47.
D. 'वृषो यथो**पसर्याया** गोष्ठे गोदण्डताडितः॥' भ. का. 6-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संसारः, [1]परिसर्या, [2]सस्त्रिः ; [3]सारथिः, [4]सृकः, [5]सरण्डः, [6]सृणीकः, [7]सृमाकुः, [8]सरीमा, [9]अप्सरसः, [10]सरित्, [11]सरणिः, [12]सरट्, सरटः, [13]सरयुः-सरयूः, इत्यादिकानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम् ।

(1914) " सृ गतौ " (III-जुहोत्यादिः-1434. सक. अनि. पर.)

सर्वाण्यपि रूपाणि **पिपर्ति**वत् (1044) ऊह्यानि ।

(1915) " सृज विसर्गे " (IV-दिवादिः-1178. सक. अनि. आत्म.)

'—**सर्गे सृज्यते** सृजतीति च ।' (श्लो. 62) इति **देवः** ।

सर्वाण्यपि रूपाणि भौवादिकमृजूधातुवत् (1302) ज्ञेयानि । [14]स्रष्टा,

---

1. परितः सरणं **परिसर्या** । 'इच्छा' (3-3-101) इत्यत्र 'परिचर्यापरिसर्या—' (वा. 3-3-101) इति स्त्रियां भावे शे यकि टापि च रूपमेवम् । गुणोऽपि निपात्यते ।
2. 'भाषायां धाञ्कृसृ—' (3-2-171) इति तच्छीलादिषु कर्तृषु किकिनौ, लिड्वद्भावात् द्विर्वचनं च ।
3. औणादिके [द. उ. 1-43) णथिन्प्रत्यये रूपमेवम् । णित्वात् उपधावृद्धिः ।
4. 'सृवृ—' [द. उ. 3-19] इति कप्रत्ययः । क्विच्च भवति । **सृकः**=वायुः ।
5. औणादिके (द. उ. 5-9) अण्डन्प्रत्यये रूपमेवम् । **सरण्डः**=वायुः, भूतसंघातश्च ।
6. औणादिके (द. उ. 3-42) ईकन्प्रत्यये नुगागमे च रूपमेवम् । किच्च भवति । **सृणीकः**=वायुः ।
7. औणादिके (द. उ. 1-151) काकुप्रत्यये मुगागमे च रूपम् । **सृमाकुः**=मृगजातिः ।
8. 'हृसृधृसृ—' (द. उ. 6-76) इति ईमनिन्प्रत्ययः च्छन्दसि विषये । **सरीमा**=कालः ।
9. अप्छब्द उपपदे धातोः असुन्प्रत्यये (द. उ. 9-101) रूपमेवम् । अद्भ्यः सृता इत्यप्**सरसः**=देवयोषितः ।
10. 'हृसृ—' (द. उ. 6-3) इति इतिप्रत्यये रूपम् ।
11. 'अर्तिसृ—' (द. उ.1-2) इत्यनिप्रत्यये णत्वे च रूपमेवम् । **सरणिः**=ईषद्गतिः पन्थाः ।
12. औणादिके (द. उ. 5-10) अडिप्रत्यये रूपम् ।
13. औणादिके (द. उ. 1-136) अयुप्रत्यये रूपम् , सरति सिस्रर्ति वा **सरयुः**=नदी वायुर्वा । **सरयूः**=इति दीर्घान्तोऽपि ।
14. '**सृजि**दृशोः—' (6-1-58) इति अमागमो भवति । लघूपधगुणापवादोऽयमागमः । 'व्रश्चभ्रस्जसृज—' (8-2-36) इत्यादिना जकारस्य षकारः ; तृचस्तकारस्य ष्टुत्वेन टकारः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]पाणिसर्ग्या रज्जुः, [2]समवसर्ग्या, [3]स्रक्, [4]स्रज्वा इमानि रूपाणि इति विशेषः। सनि [5]सिसृक्षकः-क्षिका इति रूपम्। यङि [6]सरीसृजकः-जिका इति रूपम्।

(1916) "सृज विसर्गे" (VI-तुदादिः-1414. सक. अनि. पर.)

'....सर्गे सृज्यते सृजतीति च।' (श्लो. 62) इति देवः।

मुण्डकोपनिषदि (1-1-7) सृजते इति प्रयोगात् आत्मनेपदमपि इति ज्ञेयम्। सर्जकः-र्जिका, सर्जकः-र्जिका, [7]सिसृक्षकः-क्षिका, सरीसृजकः-जिका; इत्यादीनि रूपाणि सर्वाण्यपि आदादिकशुद्ध्यर्थकमृजू (1302) धातुवत् ऊह्यानि। [8]सृज्यम्, [9]संसर्गी[A], [10]पाणिसर्ग्या रज्जुः, अवसर्गः-विसर्गः, उपसर्गः,

---

1. 'पाणौ सृजेर्ण्यत्—' (वा. 3-1-110) इति ण्यत्प्रत्ययः, ऋदुपधलक्षणस्य क्यपोऽपवादः। 'चजोः—' (7-3-52) इति कुत्वम्। पाणिभ्यां सृज्यते इति पाणिसर्ग्या रज्जुः।
2. 'समवपूर्वाच्च' (वा. 3-1-110) इति सम्, अव इत्युपसर्गयोरुपपदयोः सृजेः ण्यत् भवति।
3. 'ऋत्विक्दधृक्स्रक्—' (3-2-59) इति धातोः कर्मणि क्विन्प्रत्ययः अमागमश्च निपात्यते। तेन रूपमेवम्। सृजन्ति तामिति स्रक् माला।
4. 'सृजेरम् च' (द. उ. 6-67) इति क्वनिप्प्रत्ययः, अमागमश्च। सृजति सृज्यते वा स्रज्वा=तन्तुस्रक्। प्रत्ययस्य कित्वात् अमागमेऽप्राप्ते विधानार्थम् सूत्रे 'अम् च' इत्युक्तम्।
5. 'हलन्ताच्च' (1-2-10) इति सनः कित्वात् अमागमो न, नापि गुणः। 'व्रश्चभ्रस्ज-सृज—' (8-2-36) इति जकारस्य षत्वे, 'षढोः कः सि' (8-2-41) इति तस्य ककारे, 'इण्कोः—आदेशप्रत्यययोः' (8-3-58; 59) इति सनः सकारस्य षकारे च रूपमेवम्।
6. यङन्ते सर्वत्र 'रीग् ऋदुपधस्य च' (7-4-90) इति रीगागमः।
7. 'हलन्ताच्च' (1-2-10) इति सनः कित्वान्नामागमः, नापि गुणः।
8. 'ऋदुपधात्—' (3-1-110) इति क्यपि रूपमेवम्।
9. 'संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृज—' (3-2-142) इति तच्छीलादिषु कर्तृषु घिनुण्प्रत्यये 'चजोः—' (7-3-52) इति कुत्वे च रूपमेवम्।
10. पाणिभ्यां सृज्यते इति पाणिसर्ग्या रज्जुः। 'पाणौ सृजेः—' (वा. 3-1-110) इति ण्यति, 'चजोः—' (7-3-52) इति कुत्वे च रूपमेवम्।

A. 'संसर्गी परिदाहीव शीतोऽप्याभाति शीकरः।' भ. का. 7-8.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्रष्टा, सृष्टिः[A], [1]स्रक्, [2]रज्जुः, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1917) "सृन्भु हिंसार्थः" (I-भ्वादिः-757. सक. सेट्. पर.)
'षृन्भु—' इति मैत्रेयशायणौ। '—भर्त्सनहिंसयोः' इति काशकृत्स्नः। 'सृन्भ—' इति क्षीरस्वामिचन्द्रजैनकातन्त्रशाकटायनहेमचन्द्रादयः पठन्ति। सर्वाण्यपि रूपाणि भौवादिकतृम्फतिवत् (768) ज्ञेयानि। 'एतावपि अषोपदेशौ; 'सृवर्जम्' (भाष्ये 6-1-64) इत्यनेनानर्थकस्यापि ग्रहणात्' इति तरङ्गिण्यामुक्तम्।

(1918) "सृप्लृ गतौ" (I-भ्वादिः-183. सक. अनि. पर.)

सर्पकः-र्पिका, सर्पकः-र्पिका, सिसृप्सकः-प्सिका, सरीसृपकः-पिका;
[3]सर्प्ता-त्री-स्रप्ता-प्त्री, सर्पयिता-त्री, सिसृप्सिता-त्री, सरीसृपिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि आदादिकशुद्ध्यर्थकमृजू(1302) धातुवज्ज्ञेयानि।
यङन्तात् पचाद्यचि-[4]सरीसृपः; [5]सृप्यः, [6]सर्पः, [7]पीठसर्पी, [8]सर्पिः, प्रियसर्पिष्कः, [9]सृप्रः, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

---

1. सृजति तामिति 'ऋत्विक् दधृक्स्रक्—' (3-2-59) इति क्विन्प्रत्ययः अमागमश्च निपात्यते।
2. 'सृजेरसुं च' (द. उ-1-100) इति धातोरुप्रत्ययः, असुं इति प्रकृतेः आगमः, आदिलोपश्च।
3. 'अनुदात्तस्य च ऋदुपधस्यान्यतरस्याम्' (6-1-59) इत्यनेन पाक्षिकोऽमागमः। अमो मित्त्वादन्त्यादचः परो भवति। अयं च अमागमः किद्भिन्नेषु प्रत्ययेष्वेव बोध्यः। अम्पक्षे स्रप्ता-स्रप्त्री इति रूपम्। अमभावपक्षे सर्प्ता-सर्प्त्री इति रूपम्। एवं तव्यदादिष्वपि रूपद्वयं बोध्यम्।
4. 'यङोऽचि च' (2-4-74) इति यङो लुकि 'न धातुलोपः—' (1-1-4) इति निषेधात् लघूपधगुणाभावः।
5. 'ऋदुपधाच्च—' (3-1-110) इति क्यपि रूपमेवम्।
6. सर्पतीति सर्पः। पचाद्यचि रूपमेवम्।
7. पीठेन स्रप्तुं शीलमस्येति 'सुप्यजातौ णिनिः—' (3-2-78) इति ताच्छील्ये णिनिप्रत्यये रूपमेवम्।
8. औणादिके (द. उ. 9-37) इसिप्रत्यये रूपमेवम्। सर्पिः=घृतम्।
9. 'ऋज्रेन्द्र—' (द. उ. 8-31) इत्यादिना रक्प्रत्यये रूपमेवम्। सृप्रम्=मधु, सृप्रा=नदी।

A. 'इयं दानवराज्यस्य पूः सृष्टिर्विश्वकर्मणः॥' भ. का. 7-67.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1919) "**सृभु हिंसार्थः**" (I-भ्वादिः- .... सक. सेट्. पर.)

[1]**क्षीरस्वामि**सम्मतः पाठोऽयम्। सर्भति। 'षृभृ—' इति **सायणः**। सर्वाण्यपि रूपाणि **तर्णोति**वत् (766) ज्ञेयानि।

(1920) "**सेकृ गतौ**" (I-भ्वादिः-81. सक. सेट्. आत्म.)

दन्त्यादिरयम् इति प्रायेण **सर्वे** पठन्ति। '**अन्ये** 'षेकृ' इति विकल्पेन षोपदेशकार्यार्थं पेठुः' इति **तरङ्गिण्याम्**। सर्वाण्यपि रूपाणि भौवादिक-**केपति**वत् (261) ज्ञेयानि।

(1921) "**सेलृ गतौ**" (I-भ्वादिः- .... सक. सेट्. पर.)

"अत्र **क्वचित्** 'सेल' इत्यपि पठ्यते। **सेलते**स्तु दन्त्यादेः पाठः षोपदेशपर्युदासवाक्येऽनुपादानादनार्षः। मूर्द्धन्यादिस्तु 'सेलुः=श्लेष्मातकः' इत्यादिदर्शनाद् ग्राह्यः।" इति **माधवाचार्याः**। **तरङ्गिण्यां** 'शेलृ' इति पठित्वा '**केचित्** सेलृ....' इति दृश्यते। सर्वाण्यपि रूपाणि भौवादिक-**केलति**वत् (262) ज्ञेयानि।

(1922) "**स्कन्दिर् गतिशोषणयोः**" (I-भ्वादिः-979. सक. अनि. पर.)

'—शोषणे' इति **स्वामी**। **अन्ये सर्वे** '—गतिशोषणयोः' इत्येव पठन्ति। स्कन्दकः-न्दिका, स्कन्दकः-न्दिका, [2]चिस्कन्त्सकः-त्सिका, [3]चनीस्कन्दकः-न्दिका; इत्यादीनि रूपाणि सर्वाण्यपि '**णिजिर्**' (673) धातुवत् बोध्यानि।
निष्ठायाम् [4]विस्कन्नः, [5]स्कन्दः,

---

1. '...**स्रु**वर्जम्' (भाष्यम् 6-1-64) इत्यत्र '**सृ**' इत्यनेनालाक्षणिकस्यानर्थकस्यापि ग्रहणम्-इति **क्षीरस्वाम्या**शयः।
2. सन्नन्ते 'शर्पूर्वाः खयः' (7-4-61) इति खयः शेषः। ककारस्य 'अभ्यासे चर्च' (8-4-54) इति चर्त्वेन चकारः। धातुरयमनिट्। धातुदकारस्य सनि परे 'खरि च' (8-4-55) इति चर्त्वेन तकारः। एवं सर्वत्र सन्नन्तेषु प्रक्रिया ज्ञेया।
3. यङन्ते, 'नीग् वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपद**स्कन्दाम्**' (7-4-84) इति अभ्यासे नीगागमः सर्वत्र बोध्यः।
4. निष्ठायाम्, 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठातकार-धातुदकारयोर्नत्वम्। '**वेः स्कन्देरनिष्ठायाम्**' (8-3-73) इति पर्युदासात् न षत्वम्।
5. स्कन्दयति=शोषयति भक्तानां पापमिति, पचाद्यचि **स्कन्दः**=कार्तिकेयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]उत्कन्दः, [2]विष्कन्ता-विस्कन्ता, [3]परिष्कन्ता-परिस्कन्ता, [4]परिष्कण्णः, परिस्कन्नः, [5]परिस्कन्दः, [6]स्कन्त्वा, प्रस्कन्द्य, [7]गेहावस्कन्दमास्ते। गेहं गेहमवस्कन्दम्, गेहमवस्कन्दमवस्कन्दम्, गेहंगेहमवस्कन्द्य,

1. उत्कन्दति=शोषयति इति **उत्कन्दः** रोगविशेषः। उत्पूर्वकात् **स्कन्देः** पचाद्यच्। 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108) इति ण्वुलोऽपवादः। 'रोगे चेति वक्तव्यम्' (वा. 8-4-61) इति वचनात् **स्कन्देः** सकारस्य पूर्वसवर्णस्तकारः। 'सवर्णग्रहणसामर्थ्यात् इह (8-4-65) संख्यातानुदेशो न भवति; (तेन) सवर्णमात्रे लोपो विज्ञायते।' इति **काशिकादिषू**क्तत्वात् एकस्य तकारस्य प्रयोगे न श्रवणम् इत्याहुः। वस्तुतस्तकारद्वयस्यैव **'उत्त्कन्दः'** इति श्रवणं न्याय्यं इति **भाष्यादिषु** स्पष्टमित्यलमत्र।
2. विपूर्वकात् तृचि, धातुदकारस्य चर्त्वेन तकारे, 'झरो झरि सवर्णे' (8-4-65) इति तस्य लोपे, **'वेः स्कन्देरनिष्ठायाम्'** (8-3-73) इति षत्वविकल्पे च रूपद्वयम्। 'झरो झरि—' (8-4-65) इत्यत्र 'अन्यतरस्याम्' इत्यनुवृत्तेर्लोपस्य पाक्षिकत्वं **विस्कन्त्ता—विष्कन्त्ता** इति च रूपद्वयमिष्टमिति ज्ञेयम्। एवं तव्यदादिष्वपि **विष्कन्तव्यम्—विस्कन्तव्यम्** इत्यादीनि रूपाण्यूह्यानि यथासम्भवम्।
3. 'परेश्च' (8-3-66) इति षत्वविकल्पः। एवं तव्यदादिष्वपि बोध्यम्।
4. 'निपरिभ्यां स्कन्देरनिष्ठायाम्' इत्यनुक्त्वा पृथग् 'परेश्च' (8-3-66) इति योगकरणात् **परिस्कन्नः—परिष्कण्णः** इत्यत्र परिपूर्वकात् स्कन्दतेर्निष्ठायां षत्वविकल्पो भवत्येवेति **काशिकादिषु** स्पष्टम्। तेनैवं रूपमिति बोध्यम्। निष्ठानत्वमुभयत्र समानम्। षत्वपक्षे णत्वमपि भवतीति विशेषः।
5. परिपूर्वकात **स्कन्दतेः** पचाद्यचि, प्राच्यभरतविषयत्वे वाच्ये **'परिस्कन्दः** प्राच्यभरतेषु' (8-3-75) इति निपातनात् षत्वाभावः। अन्यत्र **परिष्कन्दः। केचित्** परिपूर्वकात् **स्कन्दतेः** निष्ठायां निष्ठातकारलोपनिपातनमनेन सूत्रेण क्रियत इति व्याचख्युः।
6. क्त्वायाम्, धातुदकारस्य चर्त्वे, 'झरो झरि—' (8-4-65) इति तकारस्य पाक्षिके लोपे च रूपमेवम्।
7. 'विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः' (3-4-56) इति णमुल्। क्रियया पदार्थानां अनवयवेन सम्बन्धः=**व्याप्यमानत्वम्**। तात्पर्यम्= **आसेवा**। द्रव्ये व्याप्तिः, क्रियायाम् आसेवा। 'तृतीयाप्रभृतीनि च' (2-2-21) इति समासविकल्पः। **'गेहावस्कन्दमास्ते'** इति समासेन व्याप्त्यासेवयोरुक्तत्वात् 'नित्यवीप्सयोः' (8-1-4) इति द्विर्वचनं न। असमासपक्षे व्याप्यमानतायां द्रव्यवचनस्य 'गेहंगेह**मवस्कन्द**मास्ते' इति द्विर्वचनम्। आसेव्यमानतायां तु 'गेह**मवस्कन्दमवस्कन्द**मास्ते' इति क्रियाया द्विर्वचनम्। "क्रियाभेदे क्त्वाऽपीष्यते इत्युक्तत्वात् 'गेहंगेह**मवस्कन्द्य**' इत्याद्यपि भवति" इति **माधवः**।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]स्कन्धः, [2]कन्दुः, इमानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम् ।

(1923) "**स्कन्भुः**" (V-स्वादिः; IX-क्र्यादिः-सक. सेट्. पर.)

सौत्रोऽयं धातुः । 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भ्यः श्नुश्च' (3-1-82) इति '**वेः स्कभ्नातेर्नित्यम्**' (8-3-77), '**ग्रसितस्कभित**—' (7-2-34) इत्यत्र च उपात्तः । स्तम्भुधातुसहपाठात् प्रयोगे भौवादिकस्कभिधातुवत् (1924) रूपाणां सत्त्वाच्च प्रतिष्टम्भार्थकत्वमस्याहुः । स्कुन्धातोराप्रवणार्थकत्वमस्यापि वक्तुं शक्यम् । 'स्कन्भु रोधनार्थः' इति **पदमञ्जरी** (7-2-34) । धातोरुदित्करणात्, तस्य च 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्प उपयोगात् श्नुश्नाप्रत्ययमात्रविषयकत्वमस्य—इति न । नोपधोऽयं धातुः । भौवादिकः **स्कभि**धातुस्तु इदित् आत्मनेपदी, अस्मात् भिन्नः । अषोपदेशोऽयम् । प्रतिबन्धार्थकत्वात् सकर्मकः, श्नुश्नाप्रत्यययोर्विधानात् [3]स्कभ्नुवन्-विस्कभ्नुवन्-ती, स्कभ्नन्-विष्कभ्नन्-ती इति शतरि रूपाणि । '**शेषात् कर्तरि**—' (1-3-78) इति नियमितत्वात् - आत्मनेपदप्रवृत्तिनिमित्ताभावात् परस्मैपदमेव । '**वेः स्कभ्नातेर्नित्यम्**' (8-3-77) इत्यत्र **काशिकादिषु** '[4]**विष्कम्भिता**, [A]**विष्कम्भितुम्, विष्कम्भितव्यम्**' इत्युदाहृतत्वात् इण्निषेधवचनाभावाच्च सेडयं धातुः । अत एव च उदित्करणमित्यप्यवधेयम् । '[5]विष्कभिते अजरे' । विष्कब्धः ।

---

1. '**स्कन्देश्च स्वाङ्गे**' (द.उ.9-67) इत्यसुन्प्रत्यये धातुदकारस्य धकारादेशे च रूपम् ।
2. '**स्कन्देर्लोपश्च**' (द. उ. 1-99) इत्युप्रत्यये, धात्वादिसकारस्य लोपे च रूपमेवम् ।
3. '**स्तन्भुस्तुन्भुस्कन्भु**—' (3-1-82) इत्यादिना शतरि श्नुः श्ना च पाक्षिकत्वेन । यदा श्नुः—तदा 'अनिदितां—' (6-4-24) इत्युपधानकारलोपः, उवङ् । विपूर्वकात् षत्वप्रसक्त्यभावात् सकारस्यैव श्रवणम् ; यतः '**वेः स्कभ्नातेः**' (8-3-77) इति श्नाविकरणान्तस्यैव षत्वविधायके सूत्रोपादानम् - ततः यदा श्ना— तदा उपाधानकारलोपे, '**श्नाऽभ्यस्तयोरातः**' (6-4-112) इत्याकारलोपे षत्वे च **विष्कभ्नन्** इति रूपम् ।
4. '**वेः स्कभ्नातेः**—' (8-3-77) इत्यत्र क्रैयादिकस्यैव सूत्र उपादानात् तदन्तादेवेमानि षत्वघटितानि रूपाणि । यदा तु सौवादिकात् **स्कभ्नोतेः** तृजादयो भवन्ति तदानीं **विस्कम्भिता-त्री**, इत्यादीनि षत्वरहितानि रूपाणि यथासम्भवमूह्यानि ।
5. उदित्त्वेन क्त्वायामिड्विकल्पनात् 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्निषेधे प्राप्ते '**ग्रसितस्कभित**—' (7-2-34) इत्यत्र निपातनात् इडागमश्छन्दसि । लोके तु इट् न ; **विष्कब्ध** इत्येव । अत्र उपधानकारलोपषत्वजश्त्वेषु रूपम् ।

A. '**विष्कम्भितुं** समर्थोऽपि नाचलद् ब्रह्मगौरवात् ॥' भ. का. 9. 76.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1924) "स्कभि प्रति(ष्टम्भे)बन्धे" (I-भ्वादिः-387. सक. सेट्. आत्म.)
सर्वाण्यपि रूपाणि णिजन्तात् सन्नन्तं विना **चम्पयति**वत् (499) ज्ञेयानि ।

(1925) "स्कुञ् आप्रवणे" (IX-क्र्यादिः-1478. सक. अनि. उभ.)
'—आवरणे' इत्येके । 'सौत्रोऽयमित्याचार्याः' इति **स्वामी** । **आप्रवणम्**= उद्धरणम् । '–आप्लवने' इति **मैत्रेयः** । '–आच्छादने' इति **काशकृत्स्नः** । स्कावकः-विका, स्कावकः-विका, चुस्कूषकः-षिका, चोस्कूयकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**कुङ्**धातुवत् (198) ऊह्यानि । '**स्तन्भु-स्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च**' (3-1-82) इति वचनात् स्कुन्वन्-स्कुन्वती-स्कुन्वानः इति श्नुविकरणविशिष्टोऽपि शतरि, शानचि च प्रयोगोऽधिकोऽस्य । क्रमप्राप्तः श्नाप्रत्ययोऽपि भवत्येव, स्कुनन्-ती-स्कुनानः इति । कर्तरि क्तः-[A]स्कुतः ।

(1926) "स्कुदि आप्रवणे" (I-भ्वादिः-9. सक. सेट्. आत्म.)
'**आप्रवणम्** उत्प्लवनमुत्प्लुत्य गमनं वा' इति **क्षीरतरङ्गिणी** ।
'उद्धरणम् इति **भोजः** ।' इति **धातुवृत्तौ** ।
सर्वाण्यपि रूपाणि भौवादिक**कुन्थति**वत् (220) ज्ञेयानि । [1]स्कुन्दनः, [2]स्कुन्दा, इति विशेषः । [3]कुन्दम् ।

(1927) "स्खद स्खदने" (I-भ्वादिः-768. सक. सेट्. आत्म.) [अ]
घटादिः ।

---

1 'अनुदात्तेतश्च—' (3-2-149) इति युच्प्रत्ययः ।

2. 'धातोरिदित्त्वेन उपदेशावस्थायां नुमो विधानाद् धातोर्गुरुत्वात्, '**गुरोश्च हलः**' (3-3-103) इति स्त्रियामकारो लघूपधगुणाभावश्च ।

3. पचाद्यचि सकारस्य बाहुलकात् लोपे रूपमिति **क्षीरस्वामी** ।

[अ.] घटादिष्वेव द्विः **स्खदेः** पाठात् पूर्वपाठ आत्मनेपदार्थः-आत्मनेपदप्रकरणात् ; उत्तरपाठस्तु 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदार्थ इति स्यात् । वस्तुतः पूर्वं पठितस्यैव **स्खदेः** उपसर्गविशेषवशात् मित्त्वामित्त्वव्यवस्थार्थं पुनः पाठः इति न्याय्यम् । **काशकृत्स्नधातुपाठे** तु '**स्खदिर्** अवत्यां च' इति घटादिषु पठ्यते । तस्यायमर्थः-**अवत्याम्**=अवधात्वर्थभूते रक्षणे **स्खदिर्**धातुर्मित्संज्ञकः । चकारात् पूर्वस्मिन् गणसूत्र उपात्तस्य 'परिवेषणे' इत्यर्थेऽपि मिदयमिति ।

A. 'मोद**स्कुतो**ऽथ कबरीं प्रयुनन् सरामः' धा. का. 3-5.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'स्खदिर्—' इति धातुकाव्यव्याख्यायां (2-19) पाठः ।

'स्खदनम्=विद्रावणम्' इति स्वामी 'विदारणम्' इति क्षीरस्वामी ।
स्खादकः-दिका, [1]स्खदकः-[2]अवस्खादकः-परिस्खादकः-[3]अपस्खादकः-[4]प्रस्खादकः-दिका, चिस्खदिषकः-षिका, चास्खदकः-दिका ; इत्यादीनि रूपाणि यथासम्भवं भौवादिकध्वनतिवत् (940) ऊह्यानि । [A]अवस्खादितम् ।

(1928) "**स्खल संचलने**" (I-भ्वादिः-544. (816) अक. सेट्. पर.)

घटादिः ।

'प्रतिघातेऽप्यस्ति' इति धा. का. व्याख्या (1-70) । घटादिषु पठितोऽयं भोजेन । तेन मित्त्वात् णिजन्ते सर्वत्र ह्रस्वघटितरूपाणि ऊह्यानि । मित्त्वाभावे दीर्घघटितानि इति ज्ञेयानि । सर्वाण्यपि रूपाणि भौवादिककलतिवत् (171) ज्ञेयानि । शतरि-स्खलन्[B] ।

(1929) "**स्तक प्रतिघाते**" (I-भ्वादिः-782. सक. सेट्. पर.)

क्षीरस्वामिसम्मतः पाठोऽयम् । सकारादिपाठो दूषितः **सायणेन** ; षोपदेशलक्षणविरुद्धत्वात् इति । सर्वाण्यपि रूपाणि **चकतिवत्** (483) ज्ञेयानि ।

(1930) "**स्तन शब्दे**" (I-भ्वादिः-827-A. अक. सेट्. पर.)

'स्यमुध्वन.......' इत्यत्र '**स्तन**' इति क्षीरस्वामिना पठितम् । **सायणदीक्षितादिभिः** स्वतन्त्रेण न पठ्यते ।

---

1. धातोरस्य घटादिषु पाठात् मित्त्वे उपधाह्रस्वो णिजन्तेषु निरुपसृष्टेषु बोध्यः ।
2. '**स्खदिर**वपरिभ्यां च' (ग. सू. भ्वादिः) इति निषेधप्रकरणे घटादिषु वचनात् अवपूर्वकात् परिपूर्वकाच्च **स्खदतेः** न मित्त्वम् ।
3. 'अपावपरिभ्यः **स्खदेः**' (**बोधिन्यासे** एवं घटादिषु वचनमिति **धातुवृत्तिः**) इति पक्षे अत्रापि अपपूर्वकस्य **स्खदेः** मित्त्वनिषेधात् उपधाह्रस्वो नेति बोध्यम् ।
4. "**स्खदेः** पूर्वं (=घटादिष्वेव इतः पूर्वं) पाठात् सामान्येन प्राप्तं मित्त्वं उपसृष्टात् यदि भवति तर्हि—अवाद्युपसृष्टादेव" इति मन्वानाः **क्षीरस्वाम्यादयः** प्रपूर्वकादपि मित्त्वाभावेन रूपमिच्छन्ति । तत्तु **काशिकादिषु** 'न' इत्यनुवर्त्य अवाद्युपसृष्टात् **स्खदे**रेव मित्त्वं न—अन्यत्र मित्त्वमस्त्येव—इति व्याख्यातत्वात् अनाकरमिति बोध्यम् ।

A. 'इत्याद्यव**स्खादित**मानसास्ता बालाः **परिस्खादित**धैर्यबन्धाः ।
दुष्टान् **अपस्खादयितुं** प्रयाते कृष्णे विलेपुः फणिता विमोहम् ॥' धा. का. 2-19.

B. 'क्रोधिनां विग्रहभेददक्षा मूर्त्तेव शक्तिः क्वचि**दस्खलन्ती** ।' शि. व. 3-18.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्वाण्यपि रूपाणि प्रातिस्विकरूपाणि विना भौवादिकध्वनतिवत् (940) ज्ञेयानि।

(1931) "स्तन देवशब्दे" (X-चुरादि:-1860. अक. सेट्. उभ.)

अदन्तः। '—गर्जे' इति हेमचन्द्रः। '—अभ्रशब्दे' इति वोपदेवः। 'शब्दे च देवशब्दे च स्तनति स्तनयेत् क्रमात्।' (श्लो. 127) इति देवः। स्तनकः-निका, तिस्तनयिषकः-षिका ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककथयतिवत् (162) ज्ञेयानि। [1]स्तनयित्नुः[A]।

(1932) "स्तन्भु प्रतिघाते" (V-स्वादि:,IX-क्र्यादि:-सक. सेट्. पर.)

'स्तम्भुस्तुम्भु—' (3-1-82) इति सूत्रे 'स्तन्भेः' (8-3-67), 'स्तम्भुसिवु—' (8-3-114) इत्यत्र च उपात्तः सौत्रोऽयं धातुः। 'ष्टभि प्रतिघाते' इति धातोः समानार्थकः। केचित् सहपठितस्य 'स्कुन्' धातोरर्थे आप्रवणे पठन्ति। धातोरुदित्करणात् क्त्वादिषु प्रत्ययेषु प्रयोगोऽस्यास्तीति ज्ञायते। एवम्, 'अवाचालम्बनाविदूर्ययोः' (8-3-68) इत्यादिषु कार्यविधानात्, 'स्तम्भुसिवु—' (8-3-114) इत्यत्र चङि षत्वनिषेधाच्च समस्तान्यपि तिङन्तकृदन्तरूपाण्यस्माद् भवन्तीति ज्ञायते।

'स्तभ्नाति स्तम्नुयात् स्तुभ्नात्यपि स्तुभ्नोति सौत्रयोः॥
स्तम्भते प्रतिबन्धार्थे स्तम्भेऽर्थे स्तोभते शपि।'

इति देवः (श्लो. 142-3)। भौवादिकष्टभिधातुरात्मनेपदी। अयं तु 'शेषात् कर्तरि—' (1-3-78) इति शास्त्रात् परस्मैपदी। [2]स्तभ्नुवन्-ती, स्तभ्नन्-ती, अवष्टभ्य, [3]अवष्टब्धा सेना, अवष्टब्धा शरत्,

1. बाहुलकात्, ण्यन्ते औणादिके (द. उ. 1-140) इत्नुच्प्रत्यये 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशे रूपमेवम्। स्तनयित्नुः=मेघः।
2. शतरि, 'स्तम्भुस्तुम्भु—' (3-1-82) इति श्नुप्रत्ययः श्ना च। यदा श्नः-तदानीम् 'अनिदिताम्—' (6-4-24) इत्युपधानकारलोपे, उवङि च स्तभ्नुवन् इति रूपम्। यदा श्ना, तदा उपधानकारलोपे, 'श्नाऽभ्यस्तयोः—' (6-4-112) इत्याकारलोपे च स्तभ्नन् इति।
3. 'अवाचालम्बनाविदूर्ययोः' (8-3-68) इति अवपूर्वकादस्मात् षत्वम्। आलम्बनम्=आश्रयणम्। अवष्टभ्य इत्यत्र आलम्बने षत्वम्। अविदूरस्य भाव आविदूर्यम्=सामीप्यमित्यर्थः। 'अवष्टब्धा सेना' इत्यस्य समीपमागता सेनेत्यर्थः।

A. 'के मूढाः स्तनयित्नुनिर्गदनवत्तूर्यध्वनिं कुर्वते........॥' धा. का. 3-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]प्रतिस्तब्धः-निस्तब्धः, स्तम्भनम्-[2]उत्तम्भनम्, [3]विष्टम्भः इति विशेषरूपाणि। सामान्यरूपाणि सर्वाण्यपि **दम्भ**तिवत् (816) ज्ञेयानि।

(1933) " **स्तिम आर्द्रीभावे** " (IV-दिवादिः-922. अक. अनि. पर.)

सायणसम्मतः पाठोऽयम्। **तरङ्गिण्यां** '**ष्टिम**' इत्येव दृश्यते। **सि. कौमुद्यां** न दृश्यते। सर्वाण्यपि रूपाणि भौवादिक**किट**तिवत् (190) ज्ञेयानि।

(1934) " **स्तूप समुच्छ्राये** " (IV-दिवादिः-1233. अक. सेट्. पर.)

धातुरयं **क्षीरतरङ्गिण्यां** पठितः। 'स्तूप इति **कातन्त्राः**; अन्ये च केचन वैयाकरणाः' इति **काशकृत्स्नीये**। **धातुवृत्तौ** 'डिप क्षेपे' इत्यत्र "इह क्वचित् 'स्तूप—' इति पठ्यते। तदनार्षम्; 'स्त्यः प्रसारणमुच्च' इति स्त्यायतेः पप्रत्यये यकारस्य उकारे संप्रसारणे दीर्घे च स्तूपशब्दव्युत्पादनात्। अत एव **आत्रेयमैत्रेयादयो**ऽपि न पठन्ति।" इत्युक्तमिहानुसन्धेयम्। 'स्तुप—' इति **दुर्गः** इति **तरङ्गिण्याम्**। सर्वाण्यपि रूपाणि **कूज**तिवत् (239) ऊह्यानि।

(1934-A) " **स्तूप समुच्छ्राये** " (X-चुरादिः-अक. सेट्. उभ.)

क्षीरस्वामिसम्मतः पाठोऽयम्। **अन्ये** न पठन्ति। सर्वाण्यपि रूपाणि चौरादिक**कूलय**तिवत् (244) ज्ञेयानि।

(1935) " **स्तृक्ष गतौ** " (I-भ्वादिः-661. सक. सेट्. पर.)

'ष्टृक्ष' इति **मैत्रेयादयः**। सर्वाण्यपि रूपाणि भौवादिक**तृक्ष**तिवत् (765) बोध्यानि। षोपदेशपाठे यङन्तेषु 'तरीष्टृक्षकः-क्षिका' इत्यादीनि रूपाणि। दन्त्यादिपाठे तु 'तरीस्तृक्षकः-क्षिका' इत्यादीनि इति विशेषः।

---

1. प्रतिनिपूर्वकात् **स्तम्भेः** निष्ठायाम्, धत्वजश्त्वयोः, '**प्रतिस्तब्धनिस्तब्धौ** च' (8-3-112) इति निपातनात् षत्वं न। इतरोपसर्गेषु इगन्तेषु तु '**स्तन्भेः**' (8-3-67) इति षत्वे **अनुष्टब्धः** इति षत्वमेव।
2. उत्पूर्वकात् ल्युटि 'उदः स्थास्तम्भोः पूर्वस्य' (8-4-61) इति **स्तन्भु**सकारस्य पूर्वसवर्णस्तकारः। उपसर्गतकार-पूर्वसवर्णप्राप्ततकार-धातुतकाररूपात्रयस्तकाराः। 'झरो झरि—' (8-4-65) इति मध्यतकारस्य पाक्षिको लोपः।
3. घञि '**स्तन्भेः**' (8-3-67) इति षत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1936) **" स्तृञ् आच्छादने "** (V-स्वादिः-1252. सक. अनि. उभ.)

'लक्षणया विक्षेपे' इति **धा. का. व्याख्या**—(2-68)।

'तृञः श्नि च्छादने प्वादेः स्तृणीते च स्तृणाति च।
श्नावृदन्तस्य तत्रैव स्तृणोति स्तृणुते स्तृञः॥' (श्लो. 35) इति **देवः**।

'स्तृ प्रीतिरक्षापालने' इति **वोपदेवः** इति **पा. धा. समीक्षा**। सनि— तिस्तीर्षकः-र्षिका, [1]तिस्तीर्षिता-त्री; यङि—तास्तरकः-रिका; विस्तृतः, [2]स्तीर्विः, [3]स्तरीः, [4]स्तरीमा इत्यादिकानि रूपाणि सर्वाण्यपि कृण्वतिवत् (245) बोध्यानि। अष्टाध्याय्यां ग्रहणानि सर्वाण्यपि दीर्घान्तस्य क्रैयादिकस्येति बोध्यम्।

(1937) **" स्तृहू हिंसायाम् "** (VI-तुदादिः-1349. सक. वेट्. पर.)

'षोपदेश इति **दुर्गः**' इति **तरङ्गिण्याम्**।

सर्वाण्यपि रूपाणि तौदादिकहिंसार्थक 'तृहू' (777) धातुवज्ज्ञेयानि।

(1938) **" स्तॄञ् आच्छादने "** (IX-क्र्यादिः-1484. सक. सेट्. उभ.)
प्वादिः, ल्वादिश्च।

'स्तॄञः श्नि च्छादने प्वादेः स्तृणीते च स्तृणाति च।
श्नावृदन्तस्य............॥' (श्लो. 35) इति **देवः**।

'स्तृञ् आप्रवणे' इति **काशकृत्स्नः**। **पा. धा. समीक्षायां** 'स्तृञ्' इति ह्रस्वोपधेन **मैत्रेय-क्षीरस्वामि-सायणादयः** पठन्ति इत्युक्तम्। तन्न समीचीनम्।

स्तारकः-रिका, स्तारकः-रिका, तिस्तरीषकः-तिस्तरिषकः-षिका, तिस्तीर्षकः-र्षिका, तेस्तिरकः-रिका; स्तरीता-स्तरिता-त्री, स्तारयिता-त्री, तिस्तरीषिता-तिस्तरिषिता-तिस्तीर्षिता-त्री, तेस्तिरिता-त्री;
इत्यादिकानि रूपाणि सर्वाण्यपि क्रैयादिककॄ (258) धातुवत् ऊह्यानि।

---

1. सन्नन्ते 'इको झल्' (1-2-9) इति सनः कित्त्वे 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, इत्वे रपरत्वे 'हलि च' (8-2-77) इति उपधायाः दीर्घे च रूपमेवम्।
2. औणादिके (द. उ. 1-24) क्विन्प्रत्यये रूपमेवम्। **स्तीर्विः**=अध्वर्युः, तृणजातिर्वा।
3. औणादिके (द. उ. 1-82) ईप्रत्यये रूपमेवम्। **स्तरीः**=मेघः, शय्या च।
4. औणादिके (द. उ. 6-76) ईमनिन्प्रत्यये रूपमेवम्। **स्तरीमा**=आच्छादनम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]मणिप्रस्तारः, [हविषाम्] प्रस्तरः, [2]पटस्य विस्तारः, शब्दविषये तु विस्तरः। [3]विष्टारः, [4]विष्टरः[A], [5]अवस्तारः, आस्तीर्णः, [6]स्तीर्णिः, स्तरी-मेघः शय्या च, स्तरीमास्तीर्य, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1939) "स्तेन चौर्ये" (X-चुरादिः-1897. सक. सेट्. उभ.)

अदन्तः।

सर्वाण्यपि रूपाणि चौरादिककेतयतिवत् (260) ज्ञेयानि। [7]स्तेयम्—स्तैन्यम्, स्तेनः, इति विशेषः। शतरि-स्तेनयन्[B] इति।

(1940) "स्तोम श्लाघायाम्" (X-चुरादिः-1923. सक. सेट्. उभ.)

अदन्तः।

समूहार्थकत्वमपि प्रयोगादस्य बोध्यम्। सर्वाण्यपि रूपाणि चौरादिकगोमयतिवत् (433) ऊह्यानि।

(1941) "स्त्यै शब्दसंघातयोः" (I-भ्वादिः-910. अक. अनि. पर.)

'शब्दसंघातयोर्धात्वोः स्त्यायत्येकस्य सो न षः।' (श्लो. 7) इति देवः। सर्वाण्यपि रूपाणि कायतिवत् (263) ज्ञेयानि। प्रस्तीतम्-तः-तवान्, प्रस्तीमः,

---

1. 'प्रे स्त्रोऽयज्ञे' (3-3-32) इति प्रशब्द उपपदे यज्ञभिन्नविषये घञ्। यज्ञविषये हविषाम् **प्रस्तरः** इति अप्प्रत्यय एव।
2. 'प्रथने वावशब्दे' (3-3-33) इति वि इत्युपसर्गे उपपदे प्रथने गम्यमाने घञ्प्रत्ययः। शब्दविषये **विस्तरः**।
3. 'छन्दोनाम्नि च' (3-3-34) इति छन्दोविषये नाम्नि घञ्प्रत्यये, 'छन्दोनाम्नि च' (8-3-94) इति षत्वे च रूपमेवम्।
4. विस्तीर्यते इति **विष्टरः**। विपूर्वात् **स्तॄ**धातोः 'ॠदोरप्' (3-3-57) इत्यप्प्रत्यये 'वृक्षासनयोर्विष्टरः' (8-3-93) इति षत्वे च रूपमेवम्। **विष्टरः**= आसनम्, अश्वत्थवृक्षश्च।
5. 'अवेतॄस्त्रोर्घञ्' (3-3-120) इति करणाधिकरणयोर्घञ्।
6. 'ॠल्वादिभ्यः क्तिन्—' (3-3-94) इति क्तिनस्तकारस्य नकारः। णत्वम् च।
7. 'स्तेनाद्यन्नलोपश्च' (5-1-125) इति भावकर्मणोः यत् प्रत्ययस्तद्धितः; नशब्दस्य लोपश्च। स्तेनस्य भावः कर्म वा **स्तेयम्**। 'स्तेनात्' इति **केचिद्** योगविभागं कुर्वन्ति। तेन पक्षे ष्यङ् भवति।

A. 'अपूपुजन् **विष्टर**पाद्यमाल्यैः आतिथ्यनिष्णा वनवासिमुख्याः।' भ. का. 2-26.
B. '...स्वामात्यान् कुणयन् भटांश्च गुणयन् नृणां मुदं **स्तेनयन्** ॥' धा. का. 3-57.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रस्तीमवान्। [1]स्त्येनः [A]स्त्यानम्, स्त्री, प्रसंस्तीतः, विशेषरूपाणि सर्वाणि भौवादिक-स्त्यायतिवत् (1872) ज्ञेयानि।

(1942) "**स्थुड संवरणे**" (VI-तुदादिः-1388. सक. सेट्. पर.)

कुटादिः। 'स्थुड' इति **क्षीरस्वामिभट्टोजिदीक्षितौ**। **सायणस्तु** स्फुड इत्युक्तवान्। एवं **धा. का. व्याख्यानेऽपि** (2. 81)। सर्वाण्यपि रूपाणि तौदादिक**कुटति**वत् (204) ज्ञेयानि। शतरि-स्थुडन्।

(1943) "**स्थूल परिबृंहणे**" (X-चुरादिः-1904. अक. सेट्. आत्म.)

आगर्वीयः, अदन्तश्च।

परिबृंहणम्=पीनत्वमिति **स्वामी**। सर्वाण्यपि सामान्यरूपाणि चौरादिक**कूटयति**वत् (240) ज्ञेयानि। अचि स्थूलः, [2]स्थविष्ठः, स्थवीयान् इति विशेषः।

(1944) "**स्निट स्नेहने**" (X-चुरादिः-अक. सेट्. उभ.)

क्षीरस्वामिसम्मतः पाठोऽयम्। **अन्ये** न पठन्ति। 'स्मिट' इत्ये**के** इति च **तरङ्गिण्यामुक्तम्**। 'स्मिट' इत्यस्य पाठभेदः इति **सर्वे**। सर्वाण्यपि रूपाणि चौरादिक**कीटयति**वत् (194) ज्ञेयानि।

(1945) "**स्पदि किञ्चिच्चलने**" (I-भ्वादिः-14. अक. सेट्. आत्म.)

सर्वाण्यपि रूपाणि भौवादिक**कन्दति**वत् (163) ज्ञेयानि। [B]स्पन्दितुम्, स्पन्दिता, [3]स्पन्दनः, स्पन्दः, [4]स्पन्दयन् इति विशेषः।

(1946) "**स्पर्ध सङ्घर्षे**" (I-भ्वादिः-3. अक. सेट्. आत्म.)

'—संहर्षे' इति **बोपदेवः**। '**संघर्षः**=पराभिभवेच्छा। पराभिभवस्य धात्वर्थेनोपसंग्रहादकर्मकत्वम्। उक्तं च—

'धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' (वाक्यपदीयम् 3-88) इति ॥

---

1. औणादिके (द. उ. 5-12) इनच्प्रत्यये रूपमेवम्।
2. '**स्थूलदूर—**' (6-4-156) इति यणादिपरं लुप्यते इष्ठेमेयस्सु परतः, पूर्वस्य च गुणो भवति। इष्ठन्प्रत्यये **स्थविष्ठः**, ईयसुन्प्रत्यये **स्थवीयान्** इति विवेकः।
3. 'अनुदात्तेतश्च—' (3-2-149) इति युच्प्रत्ययः।
4. '**निगरणचलनार्थेभ्यः**' (1-3-87) इति ण्यन्तात् परस्मैपदमेव।

A. 'रायद्वय**स्त्यान**रुचौ रथेऽपि.........।' धा. का. 2-31.
B. 'स्वमन्दिरात् **स्पन्दितु**मेव नाशकत्......॥' धा. का. 1-3.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्वाण्यपि रूपाणि भौवादिककुर्दतिवत् (230) ज्ञेयानि । स्पर्धः, [1]स्पर्धितमनेन, [2]स्पर्धनः, [3]स्पर्धालुः[A], [4]स्पर्धा, [5]प्रस्पर्धी इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1947) "स्पश बाधनस्पर्शनयोः"

(I-भ्वादिः-887. सक. सेट्. उभ.)

'**बाधने स्पर्शने** चार्थे हिक्कादौ **स्पशते स्पशेत्** ॥' (श्लो. 166) इति **देवः**। '—बाधनस्पाशनयोः' **स्पाशनं**—ग्रन्थनम्' इति **स्वामी**। '—ग्रन्थ-बाधयोः' इति **बोपदेवः**। "'—बाधनस्पशनयोः' **पशेत्येके**। **पषेत्यन्ये**। हिंसार्थं दोषसूचनं स्पश [र्श]नम्" इति धा. का. व्याख्या (2-27)।

"अत्र **स्वामी** '**पष** इत्येके इति, तेन पाषण्डः पाषाणः (इति सिद्धौ)" इत्याह। **दुर्गशाकटायनयोरप्ययमेव** पक्षः। अनयोः पाठे '**प्रतिस्पशो** विसृजस्तूर्णितमः' (ऋक् 4-4-3) 'यतो व्रतानि **पस्पशे**' (ऋक्. 3-22-19) 'अपसर्पश्चरः **स्पशः**' (नामलिङ्गानुशासने क्षत्रवर्गे) 'शब्दविद्येव नो भाति राजनीतिर**पस्पशा**' (शिशुपालवधे 2-112), इत्यादिप्रयोगोऽनुगुणः। **पाषण्डपाषाण**-प्रयोगस्तु '(पष) अनुपसर्गात्' (ग. सू. चुरादिः) इति कथादेर्भविष्यति। यद्वा—'पष बन्धने' इति युजादेः। अस्ति चायं युजादौ। यद्वक्ष्यति चुरादौ '**पश** बन्धने' इत्यत्र **मैत्रेयः**—'**पष** बन्धने इति युजादावेके पठन्ति' इति। अत्र **स्वामिकाश्यपादयः**—**पाशादि** (4-2-49) दर्शनात् **पशेति** पठन्ति। **पाशादयोऽपि** चौरादिकेन बन्धनार्थेनापि सिद्धाः। **पशुशब्दस्तु पशेर्व्युत्पादयिष्यते**। पसेति दन्त्यान्तस्सौत्रो धातुः" इति **माधवेनोक्तम्** अत्र अनुसन्धेयम्। सर्वाण्यपि रूपाणि भौवादिक**काशतिवत्** (178) ज्ञेयानि।

---

1. 'क्तोऽधिकरणे च—' (3-4-76) इति कर्तृभावाधिकरणेषु क्तप्रत्ययः।
2. 'अनुदात्तेतश्च—' (3-2-149) इति तच्छीलादौ युच्प्रत्ययः।
3. 'अत्र स्पर्धां लात्यादत्ते मितद्र्वादित्वाद् (वा. 3-2-180) डुः' इति **धा. का. व्याख्यायाम्** (1-2)।
4. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः।
5. णिनिप्रत्यये रूपमेवम्।

A. '......**स्पर्धालु**धीगाधितकार्यबाधिनम्।' धा. का. 1-2.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]पस्पशा, पस्पशः=उपोद्घातः । 'सेयमुभयतःस्पाशा रज्जुः' (भाष्ये 6-1-68) [2]स्पष्टः[A]-स्पाशितः, इति विशेषरूपाणि ।

(1948) "स्पश ग्रहणसंश्लेषणयोः"

(X-चुरादिः-1681. सक. सेट्. आत्म.) आकुस्मीयः ।

'स्पृश—' इति जैन-शाकटायन-हेमचन्द्रादयः ।
'ग्रहणे श्लेषणे चार्थे चुरादौ स्पाशयेत णौ' (श्लो. 167) देवः ।
सर्वाण्यपि रूपाणि चौरादिकग्रामयतिवत् (442) ऊह्यानि । निष्ठायाम्, 'वा दान्तशान्तपूर्णदस्तस्पष्ट—' (7-2-27) इति निपातनात् स्पष्टः-स्पाशितः इति रूपद्वयम् । ल्यपि—[B]प्रस्पाश्य ।

(1949) "स्पृ प्रीतिपालनयोः"

(V-स्वादिः-1259. अक. अनि. पर.) छान्दसः ।

'प्रीतिर्बलम्, पालनं=जीवनम् इति स्वामी' इति माधवः । "'स्मृ प्रीतिबलनयोः' बलनं जीवनम् । 'स्पृ इत्येके' " इति क्षीरतरङ्गिण्याम् । सर्वाण्यपि रूपाणि चिनोतिवत् (1044) ज्ञेयानि ।

(1950) "स्पृश संस्पर्शने" (VI-तुदादिः-1422. सक. अनि. पर.)

सर्वाण्यपि रूपाणि तौदादिकमृशतिवत् (254) ज्ञेयानि ।
[3]व्योमस्पृक्, जलस्पृक्, दिविस्पृक्-हृदिस्पृक्, मन्त्रस्पृक्, [4]स्पर्शः,

---

1. यङ्लुगन्तादचि टाप् । 'संज्ञापूर्वको विधिरनित्यः' (परि-94) इति नाभ्यासस्य दीर्घः ।
2. 'वा दान्तशान्तपूर्णदस्तस्पष्ट—' (7-2-27) इति निष्ठायां ण्यन्तात् इडभावो निपातितः विकल्पेन । तेन रूपद्वयम् ।
3. 'स्पृशोऽनुदके क्विन्' (3-2-58) इति सुबन्त उपपदे क्विन्प्रत्यये रूपमेवम् । घृतं स्पृशति घृतस्पृक्, मन्त्रेण स्पृशति मन्त्रस्पृक्, जलेन स्पृशति जलस्पृक् । दिविस्पृक् हृदिस्पृक् इत्यत्र 'हृद्द्युभ्यां उपसंख्यानम्' (वा. 6-3-9) इति वचनात् सप्तम्या अलुक् ।
4. 'पदरुजविशस्पृशो घञ्' (3-3-16) इति कर्तरि घञ् । 'स्पृश उपताप इति वक्तव्यम्' (वा. 3-3-16) इति वचनात् स्पृशतीति स्पर्शः उपतापः । ततोऽन्यत्र पचाद्यच्—स्पर्शः । 'अनुदके' इत्युक्तत्वात् उदके उपपदे कर्तरि 'कर्मण्यण्' (3-2-1) इत्यणि उदकस्पर्शः इति भवति ।

A. 'स्पष्टं बहिः स्थितवतेऽपि निवेदयन्तः......।' शि. व. 5-67
B. 'प्रस्पाश्य मुष्टिमभितर्जयते प्रमत्स्यों मल्लो बिवस्तयिषुरेनमगन्धनीयम् ।' धा. का. 3-34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[A]शीतस्पर्शः, [1]पृष्ठम्, [2]पार्श्वम् इति विशेषः।

(1951) "स्पृह ईप्सायाम्" (X-चुरादिः-1872. सक. सेट्. उभ.)

अदन्तः।

सर्वाण्यपि रूपाणि 'गृह ग्रहणे' (425) इति धातुवत् ज्ञेयानि। [3]स्पृहयालुः,[B] [4]पुष्पेभ्यः स्पृहयन्-न्ती, [5]स्पृहयाय्यः इति विशेषः।

(1952) "स्फर चलने" (VI-तुदादिः-1389. (पा.) अक. सेट्. पर.)

क्षीरस्वामी एवं पठति। अन्ये सर्वे न पठन्ति। 'स्फुरणे संचलने दीप्तौ' इति **वोपदेवः**। स्फरः, स्फारः। सर्वाण्यपि रूपाणि तौदादिककुरतिवत् (229) बोध्यानि।

(1953) "स्फल चलने" (VI-तुदादिः-1389. (पा.) अक. सेट्. पर.)

जैनशाकटायनः 'स्फल चपले' इति पठति। **क्षीरस्वामिप्रभृतयः** केचिदेव धातुममुं पठन्ति। रूपाणि सर्वाण्यपि तौदादिककुरतिवत् (229) बोध्यानि।

(1954) "स्फायी वृद्धौ" (I-भ्वादिः-487. अक. सेट्. आत्म.)

स्फायकः-यिका, [6]स्फावकः-विका, पिस्फायिषकः-षिका, पास्फायकः-यिका;

---

1. औणादिके (द. उ. 6-37) थक्प्रत्यये निपातनात् सकारलोपः। 'व्रश्च—' (8-2-36) इत्यादिना शकारस्य षत्वम्। ष्टुत्वम्। **पृष्ठम्**=शरीरैकदेशः।
2. औणादिके (द. उ. 10-13) श्वण्प्रत्यये सकारलोपे च रूपमेवम्।
3. '**स्पृहिगृहि—**' (3-2-158) इत्यादिना तच्छीलादिषु कर्तृषु आलुच्प्रत्यये 'अयामन्ताल्वा—' (6-4-55) इति णेरयादेशे च रूपमेवम्।
4. अत्र '**स्पृहेरीप्सितः**' (1-4-36) इति ईप्सितस्य संप्रदानत्वम्। तेन 'पुष्पेभ्यः' इत्यत्र चतुर्थी।
5. औणादिके (द. उ. 8-1.) आय्यप्रत्यये आयादेशे च रूपमेवम्। **स्पृहयाय्यः**= स्पृहणशीलः।
6. '**स्फायो वः**' (7-3-41) इति णौ परतः यकारस्य वकारे रूपमेवम्।

A. 'काकुत्स्थपादपच्छायां **शीतस्पर्शा**मुपागमत्॥' भ. का. 7-32.

B. '**स्पृहयालुं** कपिं स्त्रीभ्यो निद्रालुमदयालुवत्।' भ. का. 7-21.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]स्फीतम्-[A]तः, स्फातः, स्फातिः, [2]स्फिरम् [3]स्फारम् इत्यादिकानि रूपाणि सर्वाण्यपि **क्मरति**वत् (258) ज्ञेयानि ।

(1955) " **स्फिट अनादरे** " (X-चुरादिः-1572. सक. सेट्. उभ.)

' **स्फिट स्नेहने** ' इति ' **क्वचित् कोशे** दृश्यते ' इत्युक्त्वा ' तद् **धनपाल-शाकटायनमैत्रेयदेवादिभिश्चिरन्तनैः** व्याख्यातृभिर्न लिख्यते ' इति च **माधवीये** प्रोक्तम् । ' स्मिट ' इत्यस्य पाठान्तरमिदमिति **केचित्** ।
सर्वाण्यपि रूपाणि चौरादिक**कीटयति**वत् (194) ज्ञेयानि । संस्फोटकस्तुमुलयुद्धम् ।

(1956) " **स्फिट्ट हिंसायाम्** " (X-चुरादिः-1635. सक. सेट्. उभ.)

अयं धातुः **क्षीरतङ्गिण्यां** न दृश्यते । सर्वाण्यपि रूपाणि चलनार्थक**कुड्डयति**वत् (156) ज्ञेयानि ।

(1957) " **स्फुट विकसने** " (I-भ्वादिः-260. अक. सेट्. आत्म.)

'—विशरणे ' इति **वोपदेवः** ।

' क्रमाद् **विकासे** शशपोः, स्फुटति **स्फोटने** पदे । ' (श्लो. 70) इति **देवः** । **क्षीरतरङ्गिण्यां** धातुरयं न दृश्यते । सन्नन्ते सर्वत्र ' रलो व्युपधात्— ' (1-2-26) इति कित्त्वविकल्पनात् रूपद्वयं ज्ञेयम्—पुस्फोटिषकः-पुस्फुटिषकः-षिका । एवं शुद्धे क्त्वायामपि । सर्वाण्यपि रूपाणि **कुक्कति**वत् (197) ज्ञेयानि ।

---

1. ' **स्फायः स्फी—** ' (6-1-22) इति निष्ठायां **स्फी**भावः । ' ईदित्त्वं **स्फाये**रादेशानित्यत्वे लिङ्गम्—**स्फातः**' इति **क्षीरस्वामी** । अयं भावः—"यदि निष्ठायां नित्यं ' **स्फी** ' भावः स्यात्तर्हि ईदित्त्वमनर्थकं स्यात् । ईदित्त्वस्य तु '**श्वीदितो निष्ठायाम्**' (7-2-14) इति निष्ठायामिट्प्रतिषेध एव फलम् , नान्यत् । तस्माद् व्यर्थं सत् ज्ञापयति ' **स्फी** ' भावोऽनित्यः इति । तथा सति ' **स्फाती**भवति ' इति प्रयोगोऽप्युपपद्यते । एवं च सति ' **स्फाती**भवति इत्येतदपि क्तिन्नन्तस्यैव रूपं न निष्ठान्तस्य ' इति **काशिकावचनं** (6-1-22) क्लिष्टकल्पनामात्रम् । **धातुवृत्तिकारस्तु** अनुदात्तेत्त्वार्थमीदित्करणमाह—तदप्यसत् , अनुदात्तेत्त्वार्थं तु अन्यत्रेवेहाप्यकारस्यानुबद्धुं शक्यत्वात्" इति **युधिष्ठिरमीमांसकः क्षीरतरङ्गिणीटिप्पणे**ऽवोचत् । अत एव ' **स्फी**भावो वेति **केचित्-स्फातः** ' इति **प्रक्रियाकौमुद्युक्त**मपि संगच्छते ।
2. औणादिके (द. उ. 8-27) किरच्प्रत्यये, टिलोपे च रूपमेवम् ।
3. ' **स्फायि—** ' (द. उ. 8-31) इत्यादिना रक्प्रत्यये रूपम् ।

A, ' प्रक्नोपयन्तं मुरलीं महीभरक्ष्मायं बल**स्फीत**सुपीनदोर्युगम् । ' धा. का. 1-63.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1958) " **स्फुट विकसने** " (VI-तुदादिः-1373. अक. सेट्. पर.)

कुटादिः ।

'क्रमाद् **विकासे** शशपोः **स्फुटति** स्फोटते पदे ।' (श्लो. 70) इति **देवः** । सर्वाण्यपि रूपाणि कौटिल्यार्थक**कुटति**वत् (204) बोध्यानि। अस्य धातोः कुटादित्वात्, 'रलो व्युपधात्—' (1-2-26) इति सन्नन्ते कित्त्वविकल्पो न । णमुलि-[A]अङ्गुलिस्फोटम् । **स्फोटः**=शाब्दिकसंमतं शब्दस्वरूपम्, रोगविशेषश्च ।

(1959) " **स्फुट भेदने** " (X-चुरादिः-1723. सक. सेट्. उभ.)

'**स्फोटयेत्** स्फोटतीति द्वे **भेदे** विशरणे क्रमात् ।' (श्लो. 71) इति **देवः** । सर्वाण्यपि रूपाणि चौरादिक**कुहयति**वत् (237) ज्ञेयानि ।

(1960) " **स्फुटिर् विशरणे** " (I-भ्वादिः-329. अक. सेट्. पर.)

'स्फोटयेत् **स्फोटती**ति द्वे भेदे **विशरणे** क्रमात् ।' (श्लो. 71) इति **देवः** । 'अयं पाठो **मैत्रेयादीनाम्**' इति **माधवः** । '—स्फुट' इति **चन्द्रः** । '—विशरणे विकासे च' इति **काशकृत्स्नः** । सर्वाण्यपि रूपाणि **कुण्ठति**वत् (209) ज्ञेयानि ।

(1961) " **स्फुड संवरणे** " (VI-तुदादिः-1391. सक. सेट्. पर.)

कुटादिः ।

'**मैत्रेयेण** न पठ्यते । **आत्रेयादय**स्तु पठन्ति' इति **माधवः** । **पा. धा. समीक्षायाम्** तु '**स्फुड** संवरणे, **मैत्रेयसायणचन्द्रादयः** पठन्ति' इत्युक्तम्। अनयोः परस्परविरोधो दृश्यते । **तरङ्गिण्यां** धातुरयं न दृश्यते । अपि तु '**स्थुड**' इति दृश्यते । सर्वाण्यपि रूपाणि तौदादिक**कुटति**वत् (240) ज्ञेयानि ।

(1962) " **स्फुडि परिहासे** " (X-चुरादिः-1537. सक. सेट्. उभ.)

'**स्फुडि**—' इति पठित्वा '**स्फुटि** इति प्रथमान्तं **केचित्** पठन्ति । तस्यार्थः परिहासः—इति **दुर्गः**' इति **सायणः** । 'पुडि' इति पठित्वा 'स्फुटि इति **दुर्गः** । 'स्पुडि परिघाते इति **एके**' इति **क्षीरतरङ्गिण्याम्** । शतरि [B]प्रस्फुण्डयन् । सर्वाण्यपि रूपाणि **कुण्ठयति**वत् (210) ज्ञेयानि ।

A. 'वदन् बह्वङ्**गुलिस्फोटं** भ्रूविक्षेपं विलोकयन् ॥' भ. का. 5.63.

B. '**प्रस्फुण्डयन्** अपि तमप्युपलक्ष्य कंसः— ॥' धा. का. 3-13.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1963) " स्फुर स्फुरणे " (VI-तुदादिः-1389. अक. सेट्. पर.)

कुटादिः ।

'चलने' इति न्यासे (6-1-47)। एवं क्षीरस्वाम्यपि। 'स्फर इत्येके' इति माधवः। '—स्फुरणे संचलने दीप्तौ च' इति मैत्रेयः। 'स्फूर्तौ चले' इति बोपदेवः।

स्फोरकः-रिका, स्फोरकः-रिका, पुस्फुरिषकः-षिका, पोस्फुरकः-रिका; विस्फूः, विष्फूः, [A]विस्फुरन्, [1]विस्फारः, इत्यादिकानि सर्वाण्यपि रूपाणि तौदादिककुरतिवत् (229) ज्ञेयानि। अस्य धातोः कुटादित्वात् सन्नन्ते 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पो न। तेन एकमेव रूपमिति ज्ञेयम्। [2]निःष्फारः-निःस्फारः-निष्फारः-निस्फारः-विष्फारः-विस्फारः।

(1964) " स्फुर्छा विस्तृतौ " (I-भ्वादिः-213. अक. सेट्. पर.)

'—विस्मृतौ' इति धा. का. व्याख्या (1-29)। 'स्मुर्च्छा' इति स्वामी। सर्वाण्यपि रूपाणि मूर्छतिवत् (1288) कूजतिवच्च (239) ज्ञेयानि।

(1965) " स्फुल संचलने " (VI-तुदादिः-1390. अक. सेट्. पर.)

कुटादिः।

'—संचये च' इति जैनशाकटायनौ। '—स्फुरणे संचये च' इति काशकृत्स्नकातन्त्रहेमचन्द्रादयः। स्फुलिङ्गः=अग्निकणः। [B]विस्फुलन्-विष्फुलन्-न्ती, इत्यत्र 'स्फुरतिस्फुलत्योः—' (8-3-76) इति वा षत्वम्। तेन रूपद्वयम्। [3]स्फालः, [4]निःष्फालः-निःस्फालः-निष्फालः-निस्फालः-विष्फालः-विस्फालः।

(1966) " टु ओ स्फूर्जा वज्रनिर्घोषे "

(I-भ्वादिः-235. अक. सेट् पर.)

---

1. घञि 'स्फुरतिस्फुलत्योर्घञि' (6-1-47) इत्यात्वमत्रेति ज्ञेयम्।
2. 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (8-3-76) इति षत्वं विकल्पेन भवति। तेन प्रत्येकं रूपद्वयम्।
3. 'स्फुरतिस्फुलत्योर्घञि' (6-1-47) इति घञि आत्वम्।
4. 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (8-3-76) इति षत्वविकल्पः। तेन प्रत्येकं रूपद्वयम्।

A. 'अवघ्नादपरिस्कन्दं ब्रह्मपाशेन विस्फुरन्॥' भ. का. 9-75.
B. 'धाम स्वं स्फुरितो जगाम धनुषः पार्श्वं क्षणादस्फुलन्॥' धा. का. 2-81

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'—वज्रनिष्पेषे'। वज्रनिष्पेषोऽशनिनिर्घोषः' इति **स्वामी**। स्फूर्जः, 'ओदितश्च' (8-2-45) इति निष्ठानत्वे णत्वे च [1]स्फूर्णः। [2]स्फूर्जितमनेन, स्फूर्णम्, प्रस्फूर्जितः, प्रस्फूर्णः इत्यत्र 'विभाषा भावादि—' (7-2-17) इति विकल्पितेट्। 'ट्वितोऽथुच्' (3-3-89) इत्यथुचि [A]स्फूर्जथुः इति। इतराणि सर्वाण्यपि रूपाणि भौवादिक**कुर्दति** (230) वत् ज्ञेयानि। [3]स्फूर्जन्-स्फुर्जन्।

(1967) "स्मिट अनादरे" (X-चुरादिः-1573. सक. सेट्. उभ.)

'—स्नेहे च' इति **बोपदेवः**।

'**स्निट** स्नेहने। स्नेटयति। **स्मिट इत्येके**' इति **क्षीरस्वामी**। 'स्मिट अनादरे' इति पठित्वा "—स्मिङ् इत्येके' इति **मैत्रेयः**। **शाकटायनस्तु**—'**स्मिट गतौ**' इति टान्तप्रकरणे पपाठ" इति **माधवः**। "'स्मिङ् ईषद्धसने', '**स्मिट** अनादरे', 'स्मिङ् इत्येके' इति **मैत्रेयरक्षितः**" इति पुरुषकारः (दैवश्लोके 15)। सर्वाण्यपि रूपाणि **चेतयतिवत्** (522) ज्ञेयानि। 'ईषद्धासे स्मयेतेति स्माययेतेत्यनादरे ॥' (देवश्लो. 15)। '**स्मिङ्**' इति इति पक्षे 'ष्मिङ्' धातुवत् (1888) रूपाणि बोध्यानि।

(1968) "स्मील निमेषणे" (I-भ्वादिः-519. सक. सेट्. पर.)

निमेषणं=संकोचः। "श्मील निमेषणे। श्मीलस्थाने 'क्ष्मील' इति **चान्द्राः**॥" इति **क्षीरस्वामी**। सर्वाण्यपि रूपाणि भौवादिक**कीलति**वत् (195) ऊह्यानि।

---

1. 'आदितश्च' (7-2-16) इति अनिट्त्वम्। निष्ठानत्वे, 'चोः कुः' (8-2-30) इति धातुजकारस्य कुत्वे णत्वे च रूपमेवम्। **माधवीयधातुवृत्तौ 'स्फूर्णवान् स्फूर्णमनेन'** इति गकाररहितः प्रयोगो लक्ष्यते; अत्र कवर्गस्य लोपप्रसक्त्यभावात् नूनं सोऽपपाठ इति बोध्यम्।

2. ओदित्त्वेन निष्ठानत्वप्रसक्तेः धातोर्निष्ठायामनिट्त्वे सिद्धे पुनरादित्करणात् ज्ञापकात् 'विभाषा भावादिकर्मणोः' (7-2-17) इति भावे आदिकर्मणि च विकल्पितेट्कत्वं ज्ञाप्यते। तेन रूपद्वयमत्र।

3. शतरि **स्फूर्जन्** इति रूपम्। अस्य दीर्घोपदेशेन 'उपधायां च' (8-2-78) इति दीर्घस्य अनित्यत्वं ज्ञाप्यते, तेन पक्षे **स्फुर्जन्** इति दीर्घरहितप्रयोगोऽपि भवतीति **केचित्**—इति **मैत्रेयरक्षितेन** प्रतिपादितमिति **माधवः**।

A. 'श्रुत्वा **विस्फूर्जथु**प्रख्यं निनादं परिदेविनी।' भ. का. 5-53.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1969) " **स्मृ आध्याने** " (I-भ्वादिः-807. सक. अनि. पर.)

घटादिः ।

चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवादो घटादिषु। **आध्यानम्** = उत्कण्ठापूर्वकं स्मरणम् । सर्वाण्यपि रूपाणि **कृण्वति**वत् (245) ऊह्यानि । अस्य धातोः घटादिपाठात् , 'घटादयो मितः' (ग. सू. भ्वादिः) इति मित्त्वात् ह्रस्वे, ण्यन्ते सर्वत्र ह्रस्वघटितरूपाणि इति विशेषः । स्मरिष्यन् इत्यत्र 'ऋद्धनोः स्ये' (7-2-70) इतीट् ।

[1]मातुः [A]सुस्मूर्षमाणः इत्यत्र तु 'ज्ञाश्रुस्मृदृशां सनः' (1-3-57) इति सन्नन्तादात्मनेपदं भवति। सनः कित्त्वे, 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युत्वे रपरत्वे च रूपमेवम् । अप्राप्तस्य तङ एव विधानमत्र ।

(1970) " **स्मृ चिन्तायाम्** " (I-भ्वादिः-933. सक. अनि. पर.)

सर्वाण्यपि रूपाणि **कृण्वति**वत् (245) ऊह्यानि । संज्ञायां घप्रत्यये स्मरः; स्मरणम्, विस्मृतिः, इति विशेषः । सुस्मूर्षमाणः । स्मारः, 'हलश्च' (3-3-121) इति संज्ञायां घञि अपस्मारः-रोगविशेषः ; 'रोगाख्यायां—' (3-3-108) इत्यस्य बाधकोऽयम् । क्वसौ सस्मरिवान् इत्यत्र 'ऋतश्च संयोगादेः—' (7-4-10) इति गुणः ।

(1971) " **स्मृ प्रीतिपालनयोः** " (V-स्वादिः-1259. अक. अनि. पर.)

'स्पृ' इत्यस्य पाठान्तरमिदम् इति **केचित्** । 'अयं छान्दसः' इति **स्वामिकाश्यपौ** इति **माधवः** । 'स्मृ प्रीतिबलनयोः' इति **क्षीरस्वामी** । सर्वाण्यपि रूपाणि **पिपर्ति**वत् (1044) ज्ञेयानि ।

(1972) " **स्यन्दू प्रस्रवणे** " (I-भ्वादिः-761. अक. वेट्. आत्म.)

अर्थभेदेन सकर्मकोऽकर्मकोऽपि कविभिः प्रयुज्यते । स्यन्दकः-न्दिका, स्यन्दकः-न्दिका, सिस्यन्त्सकः-न्त्सिका, सिस्यन्दिषकः-षिका, सास्यन्दकः-न्दिका ; इत्यादिकानि रूपाणि सर्वाण्यपि **कृपूधातुवत्** (252) ज्ञेयानि ; प्रातिस्विकरूपाणि विना । ऊदित्त्वात् 'स्वरतिसूति—' (7-2-44) इत्यादिना वलादेरार्ध-

---

1. 'अधीगर्थदयेशां कर्मणि' (2-3-52) इति कर्मणि शेषे षष्ठी ।

A. 'रामं **सुस्मूर्षमाणो**ऽसौ कपिर्विरहदुःखितम् ॥' भ. का. 8.34.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धातुकस्य इड्विकल्पः। स्यन्दिता-[1]स्यन्ता इति। [2]स्यन्दित्वा-स्यन्त्वा, [3]स्यन्नः, [4]स्यन्दनः, [5]अनुष्यन्दमानः, [A]विष्यन्दमानः, परिष्यन्दमानः, अभिष्यन्दमानः, निष्यन्दमानः, अनुस्यन्दमानः, विस्यन्दमानः, परिस्यन्दमानः, अभिस्यन्दमानः, निस्यन्दमानः, णिनिप्रत्यये [B]निष्यन्दी, [6]स्यदः, अश्वस्यदः, गोस्यदः, [7]स्यन्त्स्यन्, [8]सिन्धुः, स्यन्दम् २-[C]स्यन्त्वा २, इत्यादिकानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

(1973) "स्यम वितर्के" (X-चुरादिः-1694. अक. सेट्. आत्म.)

आकुस्मीयः। 'स्यल—' इति **न्यासकारः** (6-2-133)।

'स्यमेः स्यमति शब्दार्थे **वितर्के स्यामयेत णौ** ॥' (श्लो. 148) इति **देवः**।

स्यामकः-मिका, सिस्यामयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि **कलयति**वत् (176) ज्ञेयानि। युचि [D]स्यामनः।

---

1. ऊदित्वात् इड्विकल्पः। इडभावपक्षे धातुदकारस्य चर्त्वेन तकारः। तस्य 'झरो झरि—' (8-4-65) इति पाक्षिको लोपः। एवं तव्यदादिष्वपि बोध्यम्।
2. ऊदित्वात् इड्विकल्पः। इडभावपक्षे 'क्त्वि स्कन्दि**स्यन्दोः**' (6-4-31) इति नलोपो निषिध्यते। 'न क्त्वा सेट्' (1-2-18) इति सेटः क्त्वायाः कित्त्वनिषेधात् उपधानकारलोपो न।
3. निष्ठायाः 'यस्य विभाषा' (7-2-15) इत्यनिट्त्वम्। निष्ठातकारधातुदकारयोः नत्वम्।
4. 'अनुदात्तेतश्च—' (3-2-149) इति युच्प्रत्ययः।
5. 'अनुविपर्यभिनिभ्यः **स्यन्दते**रप्राणिषु' (8-3-72) इति सकारस्य विकल्पेन मूर्द्धन्यादेशः। **अनुस्यन्दमानः** मत्स्यः, जलं वा। अत्र न षत्वम्। 'अप्राणिषु' (8-3-72) इत्युक्तेः।
6. '**स्यदो** जवे' (6-4-28) इति जवेऽभिधेये घञ् नलोपो वृद्ध्यभावश्च निपात्यते। अन्यत्र **घृतस्यन्दः** इत्येव; न नलोपादिकम्।
7. 'वृद्भ्यः स्यसनोः' (1-3-92) इति परस्मैपदं वा। 'न वृद्भ्यः चतुर्भ्यः' (7-2-59) इतीण्निषेधः।
8. औणादिके (द. उ. 1-96) उप्रत्यये संप्रसारणे च रूपमेवम्। स्यन्दतेऽस्त्यर्थमिति **सिन्धुः**=समुद्रः, नदविशेषश्च।

A. '**विष्यन्दमान**रुधिरो रक्त**विस्यन्द**पाटलान्।' भ. का. 9-74.

B. 'सायं शशाङ्ककिरणाहतचन्द्रकान्त-
निष्यन्दिनीरनिकरेण कृताभिषेकाः।' शि. व. 4-58.

C. '**स्यन्त्वा स्यन्त्वा** दिवश्शम्भोः मूर्ध्नि स्कन्त्वा भुवं गतम्।' भ. का. 22-11.

D. '**अस्यामनः** क इव गूरयतेऽत्र मुष्टिम्...... ॥' धा. का. 3-35.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1974) "**स्यमु शब्दे**" (I-भ्वादिः-826. अक. सेट्. पर.)[अ]
'स्यमेः **स्यमति शब्दार्थे** वितर्के स्यामयेत णौ ॥' (श्लो. 148) इति **देवः**।
स्यामकः-मिका, स्यामकः-मिका, सिस्यमिषकः-षिका, [1]सेसिमकः-मिका ;
इत्यादीनि रूपाणि सर्वाण्यपि **ध्वनति**वत् (940) ज्ञेयानि। स्यमित्वा-स्यान्त्वा, स्यान्तः, स्यमन्तको मणिः-बाहुलकात् औणादिके झच्प्रत्यये 'झोऽन्तः' (7-1-3) इत्यन्तादेशे संज्ञायां कनि च रूपमिति विशेषः।
औणादिके (द. उ. 3-15) किकन्प्रत्यये **सिमीका**-सूक्ष्मा कृमिजातिः।
स्मीका-क्रिमिः इति **स्वामी**। क्वसौ-[2]स्येमिवान्-सस्यमिवान् इति।

(1975) "**स्रकि गत्यर्थः**" (I-भ्वादिः-84. सक. सेट्. आत्म.)
सर्वाण्यपि रूपाणि **कङ्कति**वत् (140) ज्ञेयानि। खल्प्रत्यये [A]दुःस्रङ्कः।

(1976) "**स्यल वितर्के**" (X-चुरादिः, अक. सेट्. आत्म.)
न्यासकारः 'नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः' (6-2-133) इत्यत्र "**स्यल** वितर्के'—अस्माच्चुरादिणिजन्तात् पचाद्यचि **स्याल**शब्दोऽन्तोदात्तः।' इति व्युत्पादितवान्। तदिहानुसन्धेयम्।

(1977) "**स्रन्भु विश्वासे**" (I-भ्वादिः-757, (393). सक. सेट्. आत्म.)
तालव्यादिः दन्त्यादिश्चायं इति **सि. कौमुद्याम्**। 'स्रन्भु प्रमादे (भ्वादिः 393) प्रमादोऽवलेपः' इति **तरङ्गिण्यां** दृश्यते। **पुरुषकारेणा**पि (श्लो. 185) उद्धृतोऽयं पाठः। विस्रम्भमाणः। विपूर्व एव विश्वास इति ज्ञापनार्थो विपूर्वस्य प्रयोगः। [B]विस्रम्भी 'वौ कषलसकत्थ**स्रम्भः**' (3-2-143) इत्यादिना घिनुण्प्रत्ययः। 'स्रन्हु इति **कौशिकः**' इति **स्वामी**।

[अ] **पुरुषकारे** (देवश्लो. 148) 'स्यमयेत् इति हेतुमण्णिचि—' इत्युक्तम्। घटाद्यन्तर्गतत्वाभावात् कथं मित्त्वं इति न ज्ञायते।

1. 'स्वपि**स्यमि**व्येञां यङि' (6-1-19) इति संप्रसारणे द्विर्वचने अभ्यासस्य गुणे च रूपमेवम्। एवं यङन्ते सर्वत्र बोध्यम्।
2. अत्र 'फणां च सप्तानाम्' (6-4-125) इति एत्वाभ्यासलोपौ वा।

A. '**दुःस्रङ्क**माश्रङ्क्य हरेः पदं जनः प्रश्लङ्कते कुत्र रुजं क्व शङ्कते।' धा. का. 1-12.
B. 'विकत्थी याचते प्रत्तम**विस्रम्भी** मुहुर्जलम्।' भ. का. 7-11.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1978) "स्रंसु अवस्रंसने" (I-भ्वादिः-754. सक. सेट्. आत्म.)

'अस्रंसिष्ट स्रंसते चाद्युतादेः ते च द्वे स्तां अस्रसच्च द्युतादेः।' (श्लो. 185) इति देवः। 'अधःपतने' इति मैत्रेयः।

यङि [1]सनीस्रंसकः, क्विपि-[2]उखास्रत्, [3]स्रस्त्वा-स्रंसित्वा, [4]स्रस्तिः-[5]विस्रसा, इमानि रूपाण्यधिकान्यत्रेति विशेषः।

(1979) "स्रिवु गतिशोषणयोः" (IV-दिवादिः-1109. सक. सेट्. पर.)

सर्वाण्यपि रूपाणि दीव्यतिवत् (838) ज्ञेयानि। [6]स्रूतम्-[A]स्रूतः-स्रूतवान्, स्रूः-स्रुवौ-स्रुवः, [7]स्रीव्यन्-न्ती, [8]स्रूतिः, सनि-[9]सिस्रिविषकः-सुस्रूषकः; सेस्रिवकः इति विशेषरूपाणि।

(1980) "स्रु गतौ" (I-भ्वादिः-940. सक. अनि. पर.)

'—स्रुतौ च द्रुमे। शु स्रु गताविस्येके' इति धा. का. व्या. (2-34)। स्रावकः-विका, स्रावकः-विका, [10]सुस्रूषकः-षिका, सोस्रूयकः-यिका; स्रोता-त्री, स्रावयिता-त्री, सुस्रूषिता-त्री, सोस्रूयिता-त्री;

---

1. यङन्ते सर्वत्र 'नीग्वञ्चुस्रंसु—' (7-4-84) इत्यादिना अभ्यासे नीगागमो बोध्यः।
2. उखायाः स्रंसते इति 'क्विप् च' (3-2-76) इति क्विप्। उपधानकारलोपः। 'वसुस्रंसु—' (8-2-72) इति पदान्तसकारस्य दकारः।
3. उदित्त्वादिड्विकल्पः। इट्पक्षे कित्त्वाभावात् नलोपाभावः।
4. 'क्तिन् आबादिभ्यः' (वा. 3-3-94) इति क्तिन्।
5. 'विपूर्वकादस्मात् भिदादेः (3-3-104) आकृतिगणत्वात् अङि नलोपे **विस्रसा**-जरा' इति **प्रक्रियासर्वस्वम्**।
6. निष्ठायाम्, 'ज्वरत्वरस्रिवि—' (6-4-20) इत्यूठि रूपमेवम्। **काशिकायां स्रिविस्थाने** 'श्रिवि' इति पठितम्। 'यस्य विभाषा' (7-2-15) इत्यनिट्त्वम्।
7. शतरि 'हलि च' (8-2-77) इति उपधाया दीर्घः।
8. क्तिनि, ऊठि, 'तितुत्र—' (7-2-9) इतीण्निषेधः।
9. इवन्तत्वेन 'सनीवन्तर्ध—' (7-2-49) इतीड्विकल्पः। इडभावे 'हलन्ताच्च' (1-2-10) इति सनः कित्वे 'ज्वरत्वरस्रिवि—' (6-4-20) इत्यादिनोपधावकारयोरूठि द्विर्वचने च रूपमेवम्।
10. सनि 'इको झल्' (1-2-9) इति सनः कित्वान्न गुणः। 'अज्झनगमां सनि' (6-4-16) इति दीर्घः।

A. 'दीव्यन् देवो विचित्रस्रुवमथ रजकं प्रैक्षतास्रूतमग्रे।' धा. का. 2-56.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिकानि रूपाणि सर्वाणि **द्रवति**वत् (883) ज्ञेयानि। [1]स्रावयन्, स्रावयिष्यन्, [2]स्रूः, स्रवः, [3]आस्रावः[A], संस्रावः, [4]प्रस्रावः, [5]प्रस्रावी, [6]स्रुत्, स्रुतिः, परिस्रुत्, [7]सुस्रावयिषुः-सिस्रावयिषुः, [8]स्रुक्-स्रुवः, [9]स्रोतः, इमानि रूपाणि अस्य धातोः विशेषेण भवन्तीति ज्ञेयम्।

(1981) "**स्रेकृ गत्यर्थः**" (I-भ्वादिः-82. सक. सेट्. आत्म.)

सर्वाण्यपि रूपाणि भौवादिक**चेलति**वत् (555) ज्ञेयानि। "अन्ये 'षेकृ' इति विकल्पेन षोपदेशकार्यार्थं पेठुः" इति **क्षीरतरङ्गिण्याम्**।

(1982) "**स्वन शब्दे**" (I-भ्वादिः-827. सक. सेट्. पर.)

फणादिः।

सर्वाण्यपि रूपाणि **ध्वनति**वत् (940) ज्ञेयानि। स्वनः, [10]स्वानः, प्रस्वनी,

---

1. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (1-3-86) इति ण्यन्तादपि परस्मैपदमेव भवति। 'णिचश्च' (1-3-74) इत्यस्यापवादोऽयम्।
2. स्रवतीति **स्रूः**। 'क्विपि **स्रु**द्रुप्रिव्रिजां दीर्घश्च इति **केचित्**' इति **प्रक्रिया-कौमुदी**।
3. 'श्याद्व्यधास्रुसंस्रु—' (3-1-141) इत्यादिना आङ्समुपसृष्टाद् अस्माण्णः कर्तरि। **संस्रावः** इत्यत्रापि एवमेव। अत्र '**आश्रुसंश्रु**' इति पठित्वा श्रुधातोरेव णप्रत्यय इति **केचित्**।
4. '**प्र** द्रुस्तुस्रुवः' (3-3-27) इति प्रशब्द उपपदे घञ्प्रत्ययः।
5. प्र उपपदे 'प्रे लपसृ—' (3-2-145) इति घिनुण्प्रत्यये रूपमेवम्।
6. संपदादित्वात् स्त्रियां भावे क्विप्। ततः तुकि रूपमेवम् इति **प्रक्रियासर्वस्वम्**।
7. ण्यन्तात् सनि '**स्रवति**शृणोति—' (7-4-81) इत्यभ्यासोकारस्य इकारादेशो विकल्पेन भवति। तेन रूपद्वयमिति ज्ञेयम्।
8. स्रवति अस्मादिति '**स्रुवः** कः' 'चिक् च' (प. उ. 2-63,64) इति क-चिकौ प्रत्ययौ भवतः। 'एतौ भीमादित्वात् (3-4-74) अपादाने।' इति **धातुवृत्तिः**।
9. औणादिके (द. उ. 9-62) असुन्प्रत्यये तुडागमे च रूपमेवम्। शोभनं स्रवतीति **स्रोतः**।
10. '**स्वन**हसोर्वा' (3-3-62) इति अप्प्रत्ययो भवति विकल्पेन। अबभावे घञ्। घञ्पक्षे **स्वानः** इति। उपसृष्टात्तु **प्रस्वानः** इत्येव।

A. 'अवश्यायकणास्रावाश्रारुमुक्ताफलत्विषः।
कुर्वन्ति **चित्तसंस्रावं** चलत्पर्णाग्रसंभृताः॥' भ. का. 6-81.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रस्वान:, [1]निस्वन:-निस्वान:, [2]स्वान्तम्, [A]स्वनितो-मृदङ्गः, [3]आस्वानितम्-आस्वनित: इति विशेषरूपाणि। ण्यन्तात् शतरि-[B]स्वनयन्।

(1983) "स्वन अवतंसने" (I-भ्वादि:-817. सक. सेट्. पर.)

घटादि:।

'दुर्गः एवं पठति' इति स्वामी। [C]विष्वण:, 'वेश्च स्वनो भोजने' (8-3-69) इति भोजनार्थे स्वनतेः सकारस्य मूर्द्धन्यादेशे रूपमेवम्। अवतंसनार्थे घटादौ मित्त्वार्थं पुन: पाठ:। तेन ण्यन्ते सर्वत्र ह्रस्व: इति विशेष:। सर्वाण्यपि रूपाणि ध्वनतिवत् (940) ज्ञेयानि।

(1984) "स्वर आक्षेपे" (X-चुरादि:-1864. सक. सेट्. उभ.)

कथादि:, अदन्तश्च।

स्वरक:-रिका, सिस्वरयिषक:-षिका; स्वरयिता-त्री, सिस्वरयिषिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि चहयतिवत् (515) ज्ञेयानि। स्वर:-सुस्वर:, सुस्वरी इति विशेष:। औणादिके (द. उ. 1-95) उप्रत्यये स्वरुः=वज्रमित्यर्थ:।

(1985) "स्वर्त गत्यां च" (X-चुरादि:-सेट्. उभ.)

'चकारात् कृच्छ्रजीवने। स्वर्तयति इति। षोपदेश: इति नन्दी। श्वभ्र गतौ च इति दौर्गाः।' इति क्षीरतरङ्गिण्याम्। 'श्वर्त' इति तालव्यान्तत्वेन माधवेन पठित:। सर्वाण्यपि रूपाणि गन्धयतिवत् (375) ज्ञेयानि।

(1986) "स्वद[र्द] आस्वादने" (I-भ्वादि:-19. सक. सेट्. आत्म.)

'आस्वादनं-जिह्वया लेह:' इति स्वामी। 'ष्वर्द—' इति पुरुषकारः।

---

1. 'नौ गदनदपठस्वनः' (3-3-64) इति निशब्द उपपदे वा अप्प्रत्यय:। तेन रूपद्वयम्।
2. 'क्षुब्धस्वान्त—' (7-2-18) इत्यादिना निष्ठायामनिट्त्वं निपात्यते, मनोऽभिधीयते चेत्। अन्यत्र स्वनितो मृदङ्गः। इदं च ण्यन्तात् निष्ठायामिति केचित्।
3. आङ्पूर्वादस्मात् 'रुष्यमत्वरसंघुषास्वनाम्' (7-2-28) इति निष्ठायामिड्विकल्प:। आङ्पूर्वस्य स्वनेर्मनोऽभिधानेऽपि परत्वादयं विकल्प:; 'क्षुब्धस्वान्त–' (7-2-18) इति निपातनं बाधते।

A. 'रामस्वनितसङ्काशः स्वान इत्यवदत् स ताम्॥' भ: का. 5-55.

B. '......स नन्दसूनुः स्वनयन् कलापम्॥' धा. का. 2-13.

C. 'अविषीदन्नवष्टब्धान् व्यष्टम्भान्नरविष्वणान्॥' भ. का. 9-72.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'आस्वादनेऽर्थे स्वदते स्वादयेदिति शबूणिचोः।' (श्लो. 103) इति देवः। '—संवरणे' इति क्षीरस्वामी। आस्वादनमनुभवः। अत्रायं सकर्मकः। 'स्वदन्ति देवा उभया निहव्या' (ऋक्-7-2-2) इति दर्शनात् छन्दसि सकर्मकः परस्मैपद्यपि। सर्वाण्यपि रूपाणि कर्जतिवत् (169) ऊह्यानि। निष्ठायाम् [A]स्वर्दितः।

(1987) "स्वाद आस्वादने" (I-स्वादिः-28. सक. सेट्. आत्म.)

'आस्वादनेऽर्थे स्वदते स्वादयेदिति शबूणिचोः।' (श्लो. 103) इति देवः। स्वादकः-दिका, स्वादकः-दिका, सिस्वादिषकः-षिका, सास्वादकः-दिका; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिककासतिवत् (188) ज्ञेयानि। 'अनुदात्तेतश्च—' (3-2-149) इति युच्प्रत्यये स्वादनः इति। आस्वादः, आस्वादितः, आस्वादनम्, आस्वादित्वा, आस्वाद्य इति विशेषः।

(1988) "स्वृ शब्दोपतापयोः (I-स्वादिः-932. अक. वेट्. पर.)

स्वारकः-रिका, स्वारकः-रिका, सिस्वारिषकः-सुस्वूर्षकः-र्षिका, सेस्त्रीयकः-यिका; [1]स्वरिता-स्वर्ता-त्री, स्वारयिता-त्री; सिस्वरिषिता-त्री, सुस्वूर्षिता-त्री, सेस्त्रीयिता-त्री; इत्यादिकानि रूपाणि सर्वाण्यपि जौहोत्यादिकपिपर्त्तिवत् (1044) ज्ञेयानि। [2]स्वृतः-स्वृतम्, निस्वृत्, स्वरितव्यम्-स्वर्तव्यम्, निस्वारी, [3]स्वरः, [4]अनुस्वारः, स्वरितुम् - स्वर्तुम्, [5]स्वरणः, [6]स्वरमाणः, [7]सिस्वरिषुः-सुस्वूर्षुः, [8]स्वरिष्यन्, [9]संस्वरमाणः, [10]स्वरुः इत्यादिकानि रूपाण्यधिकान्यत्रेति विशेषः।

---

1. 'स्वरतिसूतिसूयति—' (7-2-44) इतीड्विकल्पे रूपद्वयम्।
2. निष्ठायाम्, 'श्र्युकः क्किति' (7-2-11) इतीण्निषेधः।
3. 'क्षुब्धस्वान्त—' (7-2-18) इति सूत्रे 'स्वर' इति निर्देशात् अचि रूपमेवम्। इति धा. का. व्याख्या (2-23)।
4. अनुपूर्वकात् अस्मात् घञ्प्रत्यये रूपमेवम्।
5. 'चलनशब्दार्थात्—' (3-2-148) इति युचि रूपमेवम्।
6. 'ताच्छील्यवयोवचनशक्तिषु—' (3-2-178) इति यथासम्भवं चानश्प्रत्ययः।
7. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृ—' (7-2-49) इतीड्विकल्पे रूपमेवम्।
8. 'स्वरतिसूति—' (7-2-44) इति वैकल्पिकमिटं बाधित्वा, 'ऋद्धनोः स्ये' (7-2-70) इति नित्यमिडागमोऽत्र। एवं संपूर्वकादात्मनेपदेऽपि संस्वरिष्यमाणः इति नित्यमिडागमो बोध्यः।
9. 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' (वा. 1-3-29) इति सम्पूर्वकादस्मात् आत्मनेपदम्।
10. औणादिके (द. उ. 1-95) उप्रत्यये रूपमेवम्। स्वरुः=यूपे छिद्यमाने प्रथमं पतितः शकलः।

A, 'मुदा स चेतो ददे चिरं हरौ स्वादात्सुरैः स्वर्दितमज्ञलोर्दने।' धा. का. 1-4.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1989) " हट दीप्तौ " (I-भ्वादिः-312. अक. सेट्. पर.)

हाटकः-टिका, हाटकः-टिका, जिहटिषकः-षिका, जाहटकः-टिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रखतिवत् (141) बोध्यानि । अत्र 'कुहोश्चुः' (7-4-62) इति सन्नन्ते यङन्ते च अभ्यासे झकारः । तस्य 'अभ्यासे चर्च' (8-4-54) इति जकारः । एवं हकारादिषु सर्वेष्वपि धातुषु सन्नन्तयङन्तयोर्बोध्यम् । [1]हाटकम् ।

(1990) " हठ प्लुतिशठत्वयोः " (I-भ्वादिः-335. अक. सेट्. पर.)

'बलात्कारे इत्येके' इति धातुकाव्यव्याख्या (1-44) । पचाद्यचि हठः । रूपाणि सर्वाणि भौवादिकक्रठतिवत् (148) ज्ञेयानि ।

(1991) " हद पुरीषोत्सर्गे " (I-भ्वादिः-977. अक. अनिट्. आत्म.)

हादकः-दिका, हादकः-दिका, [2]जिहत्सकः-त्सिका, जाहदकः-दिका ; हन्नः-निष्ठातकारधातुदकारयोर्नकारः । इत्यादीनि रूपाणि सर्वाण्यपि आदादिकद्विष्टिवत् (889) बोध्यानि ।

(1992) " हन हिंसागत्योः " (II-अदादिः-1012. सक. अनि. पर.)

[3]घातकः-तिका, [4]घातकः-तिका, [5]जिघांसकः-सिका, [6]जेघ्नीयकः-यिका,

---

1. 'संज्ञायाम्' (3-3-109) इति ण्वुल् । बाहुलकात् क्लीबत्वम् । हाटकं सुवर्णम् ।
2. 'खरि च' (8-4-55) इति चर्त्वेन धातुदकारस्य तकारः ।
3. 'ण्वुल्तृचौ' (3-1-133) इति ण्वुल् । 'हो हन्तेर्ञ्णिन्नेषु' (7-3-54) इति हन्तेर्हकारस्य कुत्वम् । सोष्मणो घोषवतो नादवतो महाप्राणस्य हकारस्य तादृश एव घकार आदेशो भवति । इदमुत्तरत्रापि ञित्-णित्-प्रत्ययेषु नकारे च परत्र भवति । 'हनस्तोऽचिण्णलोः' (7-3-32) इति धातुनकारस्य तकारः ।
4. णिजन्तेऽपि सर्वत्र हन्तेर्हकारस्य कुत्वं घकारः, नकारस्य तकारश्च पूर्ववत् बोध्यः ।
5. सन्नन्ते 'अज्झनगमां सनि' (6-4-16) इति दीर्घः, द्विर्वचनादिकम्, अभ्यासे 'कुहोश्चुः' (7-4-62) इति चुत्वेन जकारः, 'अभ्यासाच्च' (7-3-55) इति उत्तरखण्डे कुत्वम् । नकारस्यानुस्वारः । एवं सन्नन्ते सर्वत्र प्रक्रिया बोध्या ।
6. 'हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः' (वा. 7-1-30) इति वचनात् यङि विवक्षिते सति हिंसार्थेऽस्य घ्नीभावः, द्विर्वचनादिकम् । हलादिशेषः । 'अभ्यासे चर्च' (8-4-54) इति अभ्यासे जकारः । 'गुणो यङ्लुकोः' (7-4-82) इति गुणः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]जङ्घनकः-निका ;

हन्ता-त्री, घातयिता-त्री, जिघांसिता-त्री, जेघ्नीयिता-जङ्घनिता-त्री ;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिक**गच्छति**वत् (376) बोध्यानि। [2]हनिष्यन्-न्ती-ती, [3]आहनिष्यमाणः, [4]प्रणिघ्नन्-[5]व्यतिघ्नन्-आघ्नन्-चौरस्य [6]निप्रघ्नन्-न्ती, [7]हत्वा-हतः-हतवान्-हतिः, [8]पद्धतिः, पदोपहतः, [9]पुत्त्रहतः-पुत्रहतः, [10]कुमारिहता,

---

1. गत्यर्थत्वे तु धातोः 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुगागमः। नुकः 'पदान्तवत्' इत्यतिदेशात् अनुस्वारः उपलक्ष्यते। 'अभ्यासाच्च' (7-3-55) इत्युत्तरखण्डेऽपि हकारस्य कुत्वेन घकारः। एवं सन्नन्ते सर्वत्र बोध्यम्।

2. '**ऋद्धनोः स्ये**' (7-2-70) इतीडागमः स्यप्रत्यये परतः।

3. 'आङो यम**हनः**' (1-3-28) इति अकर्मकादस्मात् आत्मनेपदम्। 'अकर्मकात्' (1-3-26) इत्युक्तेः 'चोरमाघ्नन्' इत्यत्र परस्मैपदमेव। '**आजघ्ने** विषमविलोचनस्य वक्षः' (किरातार्जुनीये 17-63) '**आहध्वं** रघूत्तमम्' (भट्टिकाव्ये) इत्यादिषु सकर्मकस्थलेषु आत्मनेपदं चिन्त्यमेवेति **माधवाचार्याः**। **परे** तु पाठान्तरं तत्र-तत्राश्रित्य समाहितवन्तः। 'एत्य' इति अध्याहृत्य वक्षः, रघूत्तमं वा एत्य—इति **हरदत्तो** व्याचख्यौ।

4. शतरि, शपो लुकि, शतुः सार्वधातुकत्वेन ङिद्वद्भावात् 'गम**हन**जनखनघसां लोपः क्ङिति अनङि' (6-4-98) इति **हन्ते**रुपधाकारस्य लोपः। '**हो हन्तेः**—' (7-3-54) इति कुत्वेन घकारः। 'नेर्गदनदपतपदघुमास्यति**हन्ति**—' (8-4-17) इति उपसर्गस्थान्निमित्तादुत्तरस्य नेः णत्वम्।

5. '**न गतिहिंसार्थेभ्यः**' (1-3-15) इति कर्मव्यतीहारात्मनेपदनिषेधः, धातोः हिंसार्थकत्वात् गत्यर्थत्वात् च।

6. 'जासि**निप्रहण**—' (2-3-56) इति चोरस्य षष्ठी।

7. 'अनुदात्तोपदेश—'(6-4-37) इत्यादिना झलादिषु क्ङित्प्रत्ययेषु क्त्वा-क्तिन्-क्त-क्तवतुप्रभृतिषु अनुनासिकलोपः।

8. पादाभ्यां हन्यते=गम्यते इति **पद्धतिः**। अत्र धातोर्गत्यर्थकम्। क्तिन्। 'हिमकाषि-**हतिषु** च' (6-3-54) इति पादशब्दस्य पद्भावः। बाह्वादित्वात् (4-1-96) ङीषि **पद्धती** इत्यपीति **माधवः**। '**पदोपहतः**' इत्यत्र तु 'पादस्य पद् आज्यातिगो-**पहतेषु**' (6-3-52) इति पदादेशः।

9. 'वा **हत**जग्धपरेषु' (वा. 8-4-48) इति पुत्रतकारस्य हतशब्दे परे वा द्वित्वम्।

10. कुमारी चासौ हता चेति कर्मधारये 'घरूपकल्पचेलड्ब्रुवगोत्र**हतेषु**—' (6-3-43) इति कुमारीशब्दस्य ह्रस्वः। कुमार्या हता इति समासे तु न ह्रस्वः—**कुमारीहता** इत्येव।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]स्त्रीहता-स्त्रिहता-ब्रह्मबन्धूहता-ब्रह्मबन्धुहता, [2]लक्ष्मीहता, [3]विदुषिहता-विदुषीहता-श्रेयसीहता-श्रेयसिहता, विद्वद्धता-श्रेयोहता, [4]महद्धता, [5]अन्तर्हत्य, [6]कणेहत्य-मनोहत्य, [7]घात्यः-वध्यः, [8]ब्रह्महत्या-असिहत्या, [9]अश्वहत्या, '[10]हत्याशतं पानसहस्रम्' (श्रुतिः) [11]घनाघनः, [12]शत्रुहः, [13]दार्वाघाटः,

---

1. 'नद्याः शेषस्यान्यतरस्याम्' (6-3-44) इति ह्रस्वविकल्पः ।
2. 'कृन्नद्याः प्रतिषेधः' (वा. 6-3-44) इति प्रतिषेधान्न ह्रस्वः ।
3. 'उगितश्च' (6-3-45) इति पूर्वपदस्य ह्रस्वविकल्पः । विद्वच्छ्रेयसोः पुंवद्भावोऽपि **वृत्तिकार**वचनादत्रेति बोध्यम् ।
4. महच्छब्दस्यापि पुंवद्भावोऽत्र **आत्रेयेणोक्त** इति **माधवः** ।
5. '**अन्तर**परिग्रहे' (1-4-65) इति 'अन्तर्' इत्यस्य गतित्वम् । 'कुगतिप्रादयः' (2-2-18) इति समासे ल्यपि 'वा ल्यपि' (6-4-38) इति व्यवस्थितविभाषा-विज्ञानात् नान्तानिटोऽस्य धातोर्नकारलोपो नित्यः । **अन्तर्हत्य** मध्ये हत्वा इत्यर्थः । परिग्रहार्थे तु '**अन्तर्हत्वा** मूषिकां गतः श्येनः' इत्यत्र न गतित्वम् । तेन न ल्यप् । स्वभावादयं योगः **हन्ति**विषयकः ।
6. 'कणेमनसी श्रद्धाप्रतीघाते' (1-4-66) इति कणे, मनसि इत्यनयोः गतित्वम् । सप्तम्यन्तप्रतिरूपके इमे । पूर्ववत् समासे ल्यप् । कणेशब्दोऽभिलाषार्थकः, मन-सिशब्दोऽपीति **न्यासपदमञ्जर्यौ** । '**कणेहत्य मनसिहत्य** वा पयः पिबति ।' अभिलाषनिवृत्तिपर्यन्तं पयः पिबतीत्यर्थः । निरुक्तभिन्नार्थत्वे तु **कणे हत्वा, मनसि हत्वा** इत्येव । इदमपि सूत्रं स्वभावात् **हन्ति**विषय एव प्रवृत्तम् ।
7. '**हनो वा वध च**' (वा. 3-1-97) इति कर्मणि यत्, प्रकृतेर्वधादेशश्च । **वध्यः** वधकर्मीभूतः । पक्षे ण्यति, कुत्वे तकारे च **घात्यः** । दिगादित्वात् (4-3-54) यतैव सिद्धमिति **भगवान् कात्यायनः** ।
8. '**हनस्त च**' (3-1-108) इति भावार्थे सुप्यनुपसर्गे उपपदे **हन्तेः** क्यप् । नकारस्य तकारश्च । एवं **भ्रूणहत्या** इत्यादिकमपि । स्त्रीत्वं स्वभावात् ।
9. **अश्वहत्या**शब्दोऽपि पूर्ववत् **हन्तेः** क्यपि नकारस्य तकारादेशे सिद्धः । **केचिन्नेदं** पठन्तीति **माधवः** ।
10. अत्र श्रुतिवाक्ये छान्दसत्वात् निरुपपदादपि **हन्तेः** क्यप् इति **माधवीये** स्पष्टम् ।
11. '**हन्ते**र्घत्वं च' (वा. 6-1-12) इति वचनात् हन्तेः पचाद्यचि द्वित्वम्, पूर्वोत्तर-खण्डयोर्घकारो हकारस्य, पूर्वखण्डे आक् आगमश्च । '**घनाघनः**=वर्षुकमेघः, हन्ता च' इति **प्रक्रियासर्वस्वम्** । '**घनाघनः** क्षोभणश्चर्षणीनाम्' (तै. सं.4-6-4-1) ।
12. शत्रुं वध्यात् इत्याशीरर्थे गम्ये 'आशिषि **हनः**' (3-2-49) इति कर्मण्युपपदे डप्रत्ययः । डित्त्वात् टिलोपः । एवं **तिमिरहः, अरातिहः** इत्याद्यपि ।
13. 'दारावाहनोऽण् अन्तस्य च टः संज्ञायाम्' (वा. 3-2-49) इति दारुशब्द उपपदे आङ्पूर्वात् **हन्तेः** कर्तरि अण्, नकारस्य टकारः—संज्ञायाम् । अन्त्यस्य प्रत्ययस्य णित्वात् धातोर्घः । **दार्वाघाटः** पक्षिविशेषः, यस्य चञ्चूरुभयत्र प्रतिरूढा कुद्दालवत् । अन्यत्र तु **दार्वाघातः** इत्येव ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दार्वाघातः, [1]चार्वाघाटः-चार्वाघातः, [2]वर्णसङ्घाटः-वर्णसङ्घातः, [3]क्लेशापहः-तमोऽपहः, 'स्रगियं यदि [4]जीवितापहा' ज्वरापहा, निश्शेषजाड्यापहा, [5]जघ्निवान्-जघन्वान्, [6]तिमिहः-अरातिहः, वराहः-पटहः-कलहः, [7]अभ्याघाती, [8]कुमारघाती-शीर्षघाती, [9]ज्यायाघ्नः, पतिघ्नी,

---

1. चारु आहन्तीति **चार्वाघाटः—चार्वाघातो** वा। 'चारौ वा' (वा. 3-2-49) इति पूर्ववत् कर्तरि अण्, अन्त्यस्य टकारविकल्पः। प्रत्ययस्य णित्त्वात् धातोर्घकारः।
2. वर्णान् संहन्तीति **वर्णसंघाटः वर्णसंघातो** वा। 'कर्मणि समि च' (वा. 3-2-49) इति पूर्ववत् अणादिकम्।
3. 'अपे क्लेशतमसोः' (3-2-50) इति क्लेशतमसोरुपपदयोः अपपूर्वकात् **हन्तेः** डः। डित्वात् टिलोपः।
4. अत्र 'क्विप् च' (3-2-76) इति क्विप्। सुपि 'सौ च' (6-4-13) इति दीर्घे, नलोपः। स्त्रियाम्, 'ऋन्नेभ्यः—' (4-1-5) इति नान्तत्वलक्षणङीब् न भवति, 'बह्वादिषु (ग.सू. 4-1-45) ङीष्विकल्पार्थं **'हन्'** इति पाठात्' इति **माधवः**। इयमेव गतिः **ज्वरापहा, निश्शेषजाड्यापहा** इत्यादिष्वपि। **क्षीरस्वामी** तु 'अन्येभ्योऽपि' इति डप्रत्यये परिखेत्यादिवत् साधितवान्।
5. लिटः क्वसौ, 'विभाषा गमहनविदविशाम्' (7-2-68) इति वा इडागमः। इट्पक्षे **जघ्निवान्** इति, इडभावपक्षे **जघन्वान्** इति च रूपम्। घत्वोपधाकारलोपादिकं पूर्ववत् बोध्यम्।
6. 'अन्येभ्योऽपि—' इति डप्रत्यये **क्षीरस्वामी** एतान् साधयति। तादृशं वचनं न दृश्यते। गमेर्डप्रत्ययविधायकं वचनमस्य विवक्षितमिति भाति। वरं आहन्तीति **वराहः**। पटे हन्यते इति **पटहः**। कलं=माधुर्यं हन्तीति **कलहः**।
7. **'सम्पृच............मुषाभ्याहनश्च'** (3-2-142) इति ताच्छीलिको घिनुण्। घत्वतत्वे च।
8. 'कुमारशीर्षयोर्णिनिः' (3-2-51) इति णिनिप्रत्ययः। घत्वतत्वे च। अत्रैव निपातनात् शिरसः शीर्षादेशः। 'कुत्सित इति वक्तव्यम्' (वा. 3-2-93) इति वचनादत्र कुत्सा द्योत्या।
9. 'लक्षणे जायापत्योष्टक्' (3-2-52) इति टक्प्रत्ययो लक्षणवति कर्तरि। सूत्रे 'लक्षणे' इति लक्षणवतो निर्देशः। 'गमहन—' (6-4-98) इति उपधाकारलोपः। घत्वम्। **जायाघ्नः** तिलकालकविशेषवान्। यस्य हस्तादिषु जायामरणलक्षयितृ तिलाकारं कालकं विद्यते स एवमुच्यते। एवं यस्याः स्त्रियाः पाणौ पतिहननसूचिका रेखा विद्यते सोच्यते **पतिघ्नी** पाणिरेखा इति। **जायाघ्नः पतिघ्नी** इत्यत्र विशेष्यवशात् नियतलिङ्गता।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]श्लेष्मघ्नम्-मधु, [2]आखुघातः, [3]कृतघ्नः, [4]गोघ्नः, [5]हस्तिघ्नः-कपाटघ्नः-कवाटघ्नः, [6]पाणिघः-ताडघः, [7]पितृव्यघाती, [8]ब्रह्महा-भ्रूणहा-वृत्रहा, [9]वृत्रघ्नः-वृत्रघ्णः, [10]घातुकः-घातुकी, [11]वधकः,

---

1. 'अमनुष्यकर्तृके च' (3-2-53) इति टक्। पूर्ववत् प्रक्रिया। **श्लेष्मघ्नम्** मधु, **पित्तघ्नं** जम्बीरफलम्, **वातघ्नः** शाकविशेषः।
2. आखुं हन्तीत्यर्थे 'कर्मण्यण्' (3-2-1) इत्यण्। घत्वतत्वे च।
3. अत्र 'कप्रकरणे मूलविभुजादिभ्यः—' (वा. 3-2-5) इति कप्रत्यये, उपधाकारलोपे, घत्वे च रूपमिति **केचित्। माधवस्तु** कृतं हन्तीत्यर्थे 'कृत्यल्युटो बहुलम्' (3-3-113) इति बहुलग्रहणात् टक्प्रत्ययमवादीत्। एवमेव **क्रियमाणघ्नः, करिष्यमाणघ्नः, शत्रुघ्नः** इत्यादिष्वपि गतिः। टकि **कृतघ्नी** इति; के **कृतघ्ना** इति च स्त्रियां भवेत्।
4. गौर्हन्यतेऽस्मै इति **गोघ्नः**=अतिथिः। 'दाशगोघ्नौ सम्प्रदाने' (3-4-73) इति सूत्रे निपातनादेव सम्प्रदाने टक्प्रत्ययः। अजन्तोऽयमिति **प्रक्रियासर्वस्वम्।**
5. हस्तिहनने शक्त एवमुच्यते। 'शक्तौ हस्तिकपाटयोः' (3-2-54) इति **हन्तेष्टक्।** **हस्तिघ्नो** भटः। **कपाटघ्नः** चोरः। अशक्तौ यो विषादिभिर्हस्तिं हन्ति सः **हस्तिघातः।** एवम्—यः कुठारादिभिर्बहुभिः साधनैः कपाटं हन्ति स उच्यते **कपाटघात** इति। उभयत्र 'कर्मण्यण्' (3-2-1) इत्यण्। '**—कवाटयोः**' इति सूत्रे पाठभेदः।
6. '**पाणिघताडघौ** शिल्पिनि' (3-2-55) इति निपातनात् **हन्तेष्टकि** टिलोपे, घत्वे च रूपम्। पाणिं हन्तीति **पाणिघः** हस्तेनैव तालवाद्यप्रावीण्यप्रदर्शयिता। **ताडं**=ढक्कां हन्तीति **ताडघः** मुखेनैव वाद्यविशेषवादयिता।
7. पितृव्यं हतवान् **पितृव्यघाती।** 'कर्मणि **हनः**' (3-2-86) इति **हन्ते-**र्भूते णिनिः।
8. **हन्तेः** 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (3-2-87) इति क्विप्। **हन्तेरेव,** ब्रह्मादिष्वेव, क्विबेव, भूते एव इति चतुर्विधोऽत्र सूत्रे नियमः। ब्रह्म हतवान् **ब्रह्महा।** भ्रूणं=गर्भं हतवान् **भ्रूणहा।** वृत्रं हतवान् **वृत्रहा** इन्द्रः। 'सौ च' (6-4-13) इति दीर्घः। एवं नियमाङ्गीकारात् **हिमहा, केशिहा, कालनेमिनिहा** इत्यादिषु 'क्विप् च' (3-2-76) इति सार्वत्रिकः क्विप्।
9. द्वितीयाबहुवचनान्तमिदम्। अत्र 'प्रातिपदिकान्तनुम्विभक्तिषु च' (8-2-154) इति णत्वविकल्पः।
10. 'लषपतपदस्थाभूवृषहन—' (3-2-154) इति उकञ् ताच्छीलिकः। घत्वतत्वे। स्त्रियां **घातुकी।**
11. 'बहुलं तण्यक्षु **वधक—**' (वा. 2-4-54) इति वचनात् ण्वुलि प्रकृतेः **वधादेशः।** सोऽयमकारान्तादेशः। यद्वा हलन्तत्वेऽपि 'जनिवध्योश्च' (7-3-15) इति वृद्धिनिषेधः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]वधः, [2]विघ्नः, [3]अभ्रघनः, [4]अन्तर्घनः-अन्तर्घणः, [5]प्रघणः-प्रघाणः, [6]उद्घनः, [7]अपघनः, [8]अयोघनः, विघनः, द्रुघनः-द्रुघणः, [9]स्तम्बघ्नः-स्तम्बघनः, [10]परिघः-पलिघः, [11]प्रतिघः,

---

1. '**हनश्च वधः**' (3-3-76) इति भावेऽप्प्रत्यये प्रकृतेर्वधादेशः।
2. 'घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्' (वा. 3-3-58) इति कप्रत्ययः। विशेषेण हन्तीति **विघ्नः**।
3. 'मूर्तौ **घनः**' (3-3-77) इति हन्तेरप्प्रत्यये प्रकृतेर्घनादेशः; काठिन्ये गम्ये। **मूर्तिः**=काठिन्यम्। **अभ्रघनः**=अभ्रस्य काठिन्यमित्यर्थः। **घनं** दधि। विशेषणविशिष्टवस्तुनोऽपि मूर्तिशब्देन ग्रहणमिति **प्रक्रियासर्वस्वम्**।
4. '**अन्तर्घनो** देशे' (3-3-78) इति निपातनात् देशे वाच्ये अन्तःपूर्वकादस्मात् अप्प्रत्यये प्रकृतेर्घनादेशः। **अन्तर्घनः**=वाहीकग्रामविशेषः। अन्तः मध्ये हन्यतेऽत्रेति वृत्तिः। '**अन्तर्घणः**' इति कृतणत्वं **केचित्** सूत्र एव पठन्ति। तेषां, '**अन्तश्शब्दस्य** अङ्किविधिणत्वेषु उपसर्गत्वं वक्तव्यम्' (वा. 1-4-65) इत्युक्त्यैव सिद्धं णत्वम्-इति भावः।
5. 'अगारैकदेशे **प्रघणः प्रघाणश्च**' (3-3-79) इति निपातनात् साधुः। वाह्यप्रकोष्ठकेऽलिन्दे वा वाच्ये प्रपूर्वकाद्धन्तेः अप्प्रत्यये प्रकृतेः घनादेशः '**प्रघाणः**' इत्यत्र दीर्घः, णत्वं च निपातनलभ्यानि। '**प्रघणः**' इत्यत्र तु 'हन्तेरत्पूर्वस्य' (8-4-22) इति णत्वं सिद्धमेव।
6. उत् उपरि यस्य निधाय अन्यत् काष्ठादिकं तक्ष्यते तस्मिन्=अत्याधाने विवक्षिते '**उद्घनोऽत्याधानम्**' (3-3-80) इति निपातनात् पूर्ववत् घनादेशादिकम्।
7. अप हन्यते इति '**अपघनोऽङ्गम्**' (3-3-81) इति निपातनात् साधुः।
8. अयः हन्यते येन सः **अयोघनः** कूटः। विहन्यते येन सः **विघनः**=समीकरणसाधनम्। द्रुः हन्यते येन सः **द्रुघनः**=कुठारादिः। 'करणेऽयोविद्रुषु' (3-3-82) इति हनोऽप्प्रत्यये घनादेशः। '**द्रुघणः**' इति **केचित्**। तदानीम्, 'पूर्वपदात् संज्ञायामगः' (8-4-3) इति, अरीहणादिषु (4-2-80) '**द्रुघणः**' इति पाठाद्वा णत्वमत्रेति ज्ञेयम्।
9. स्तम्बशब्द उपपदे करणे **हनः** कप्रत्ययः; अप् च। 'स्तम्बे क च' (3-3-83) इति कप्रत्यये **स्तम्बघ्नः**। अप्प्रत्यये तु **स्तम्बघनः** इति। दात्रादिकमेवमुच्यते—येन स्तम्बः तृणविशेषो हन्यते। विस्तरस्तु **माधवीये** द्रष्टव्यः।
10. '**परौ घः**' (3-3-84) इति परावुपपदे करणे **हन्तेरप्प्रत्ययः**, घश्च प्रकृतेः सर्वादेशः। परि हन्यते इति **परिघः**=अर्गलम्। '**परेश्च घाङ्कयोः**' (8-2-22) इति लत्वविकल्पः। तेन **पलिघः** इत्यपि।
11. '**प्रतिघः**' इति बाहुलकात्-इत्यात्रेयः—इति **माधवः**। **प्रतिघः** कोपः। ''अन्येभ्योऽपि—' (3-2-101) इति डप्रत्यये न्यङ्क्वादित्वात् कुत्वमिति' **भानुदीक्षितः**।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]पर्वतोपघ्नः, उपघ्नः, [2]सङ्घः-उद्घः, [3]सङ्घातः, [4]हेतिः, [5]निघः, [6]निघ्नः, [7]समूलघातं हन्ति, [8]पाणिघातं वेदिं हन्ति, [9]दण्डोपघातं गाः शातयति, [10]प्रहणनम्, इतीमानि विशेषरूपाणि। जङ्घा, जघनम्, परिघातनः, हनुः, हनु[नू]मान्, हनूः, हिमम्, हेमन्तः, अंहतिः, घातिः, अहिः, अनेहा, घोरः, हंसः, इमे औणादिकाः।

(1993) " हम्म गतौ " (I-भ्वादिः-467. सक. सेट्. पर.)

हम्मतिः-धात्वर्थनिर्देशे इक्प्रत्ययः। गत्यर्थानां ज्ञानार्थत्वात् **अहम्मतिः**=अज्ञानम्। सर्वाण्यपि रूपाणि भौवादिक**स्मरति**वत् (268) बोध्यानि।

---

1. **उपघ्नः**=प्रत्यासन्नः 'उपघ्न आश्रये' (3-3-85) इति निपातनात् **हन्तेर**प्प्रत्यये उपधालोपः। पर्वतेनोपहन्यते=गम्यते इति **पर्वतोपघ्नः**। अत्र धातोः गत्यर्थकत्वम्।
2. समुद्धयां परस्य **हन्तेः** अप्प्रत्यये संघे प्रशंसायां च गम्यमाने सति '**संघोद्घौ** गण-प्रशंसयोः' (3-3-86) इति निपातनात् घत्वम्। संहननं **संघः**=प्राणिसमुदायः। भावेऽप्। अन्यत्र **संघातः**। उद्धन्यते=उत्कृष्टतया ज्ञायत इति गत्यर्थानां ज्ञानार्थत्वात् **उद्घः**=प्रशस्तः, कर्मण्यण्। अन्यत्र **उद्घातः**।
3. संपूर्वकात् अस्मात् घञि घत्वतत्वयोः **संघात**शब्दः साधुः। घ-घञोः प्रत्यययोरपवादोऽत्रेति मन्वान **आत्रेयः** 'हन्त्यर्थाश्च' (ग. सू. चुरादिः) इति चुरादिपाठात्, णिजन्तात् **संघात**शब्दनिष्पत्तिमाहेति **माधवः**।
4. हन्तीति **हेतिः**। हन्यतेऽनेनेति वा 'ऊतियूतिजूतिसातिहेति—' (3-3-97) इति निपातनात् नलोपे, प्रकृत्यकारस्येकारे च **हेतिः** इति **माधवः**।
5. '**निघो** निमितम्' (3-3-87) इति निपातनात् निपूर्वकादस्मात् अप्प्रत्यये साधुः। निमितम्=समन्तात् मितम्, समारोहपरिणाहमित्यर्थः। निर्विशेषं हन्यन्ते इति **निघाः** वृक्षाः, शालयश्च।
6. **निघ्नः** आयत्तः, अधीनः। निपूर्वकादस्मात्, बाहुलकात्, 'घञर्थे कविधानम्—' (वा. 3-3-58) इति वा कप्रत्ययः।
7. '**समूला**कृतजीवेषु **हन्**—' (3-4-36) इति यथासंख्यं समूले उपपदे णमुल्। 'कषादिषु यथाविधि—' (3-4-46) इति वचनात् णमुल्प्रयोजकस्येव **हन्तेर**नुप्रयोगः। 'कृन्मेजन्तः' (1-1-39) णमुलन्तमव्ययम् इति।
8. 'करणे **हनः**' (3-4-37) इति णमुल्। पाणिना हन्तीत्यर्थः। कषादित्वात् (3-4-46) पूर्वप्रयुक्तस्यैवानुप्रयोगः।
9. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति णमुल्।
10. '**हन्तेर**त्पूर्वस्य' (8-4-22) इति णत्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1994) " हय गतौ " (I-भ्वादिः.....सक. सेट्. पर.)

'भक्तिशब्दयोः इत्येके ' इति धातुकाव्यव्याख्या (1-66)। हयति=विशेषेण त्वरया गच्छतीति हयः=अश्वः। पचाद्यच्। गौरादित्वात् (4-1-4) ङीषि हयी बडवा। क्विपि-वलिलोपे तुकि हत्। सर्वाण्यपि रूपाणि भौवादिकक्षायतिवत् (263) बोध्यानि।

(1995) " हर्य गतिकान्त्योः " (I-भ्वादिः-514. सक. सेट्. पर.)

हर्या-स्त्रियामकारप्रत्ययः। हर्यतः-यज्ञः। औणादिके (द. उ. 6-14) ऽतच्प्रत्यये सिद्धम्। सर्वाण्यपि रूपाणि भौवादिकगर्हतिवत् (385) बोध्यानि।

(1996) " हल विलेखने " (I-भ्वादिः-837.सक. सेट्. पर.) ज्वलादिः। विलेखनम्=कर्षणम्। हालः-ज्वलित्यादित्वात् कर्तरि णप्रत्ययः। सम्यक् लिखन् यस्स उच्यते। संज्ञायां घप्रत्यये हलः=सीरः। हालिकः- हलं वहति यः सः। हलिः-औणादिक इन्प्रत्यये सिद्धम्। हलानां समूहः-हल्या। सर्वाणीतराणि रूपाणि भौवादिकचलतिवत् (510) बोध्यानि।

(1997) " हसे हसने " (I-भ्वादिः-721. अक. सेट्. पर.)

[1]व्यतिहसन्-न्ती, [2]हसः-हासः, प्रहासः, [3]व्यावहासी, [4]हस्तः, हस्रः, इति विशेष-रूपाणि। सामान्यरूपाणि सर्वाणि कख (141) धातुवत् बोध्यानि।

(1998) " ओ हाक् त्यागे " (III. जुहोत्यादिः-1090. सक. अनि. पर.)

'गतौ त्यागे यथासंख्यं जिहीते च जहाति च।' (श्लो. 11.) इति देवः।

---

1. 'प्रतिषेधे हसादीनामुपसंख्यानम्' (वा. 1-3-15) इति कर्मव्यतीहारत्वप्रयुक्तात्मनेपदनिषेधात् परस्मैपदं शता।

2. अनुपसृष्टादस्मात् पक्षे 'स्वनहसोर्वा' (3-3-62) इति अप्। पक्षे हासः। सोपसृष्टात् तु 'प्रहासः' इति।

3. 'कर्मव्यतिहारे णच् स्त्रियाम्' (3-3-43) इति णच् स्त्रियाम्। 'णचस्त्रियामञ्' (5-4-14) इति अञ्। ङीप्। व्यावहासी=परस्परं हास इत्यर्थः। स्त्रीत्वं स्वाभाव्यात्।

4. 'हसिमृ—' (द. उ. 6-7) इत्यादिना तन्प्रत्ययः। 'तितुत्र—' (7-2-9) इति इण्निषेधः। हस्तः= करः, एतन्नामको नक्षत्रविशेषो वा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]हित्वा, [2]हीनः-सार्थात् हीनः, हीनवान्, [3]विहाय, [4]जहत्, [5]हायनाः-व्रीहयः, [6]हानिः, [7]शर्ध-जहाः-माषाः [8]पूर्वापहाणा-अपरापहाणा, सम्प्रहाणा, [9]जहकः, [10]अहः, [11]कलहः, [12]निहाका इति विशेषः। सामान्यरूपाणि, जौहोत्यादिक-ददातिवत् (830) बोध्यानि।

---

1. 'जहातेश्च क्त्वि' (7-4-43) इति 'हि' इति प्रकृतेरादेशः।
2. 'घुमास्थागापाजहातिसां हलि' (6-4-66) इति धात्वाकारस्य ईकारः। ओदित्त्वात् निष्ठानत्वम्। 'सार्थात् हीनः' इत्यत्र 'अपादाने चाहीयरुहोः' (5-4-55) इति पञ्चम्यास्तसिल्निषेधः। 'मन्त्रो हीनः स्वरतो वर्णतो वा' (पाणिनीयशिक्षा) इत्यत्र तु आद्यादित्वात् (वा. 5-4-44) तसिप्रत्यय इति कैयटः (पस्पशायाम्)। विस्तरस्तु माधवीयादिषु द्रष्टव्यः।
3. 'न ल्यपि' (6-4-69) इति ईकारनिषेधः।
4. शतरि, 'श्लौ' (6-1-10) इति द्विर्वचनम्। धातोः कित्त्वात् अभ्यासे 'दीर्घोऽकितः' (7-4-83) इति दीर्घनिषेध इति केचित्—इति क्षीरतरङ्गिणी; तन्न। तत्र सूत्रे 'अकितः' इति न धातुककारो विवक्षितः; किंतु प्रत्ययस्य कित्त्वमेवेत्यास्तां तावत्। 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः।
5. 'हश्च व्रीहिकालयोः' (3-2-148) इति ण्युट्। जहाति उदकमिति हायनः संवत्सरसाध्यो व्रीहिविशेषः। जहाति जीर्णमिति हायनो=वत्सरः।
6. 'ग्लाज्याहाभ्यो निः' (वा. 3-3-95) इति निप्रत्ययः। ईत्वं न। केचित्तु 'हीनिः' इत्येव वदन्ति।
7. शर्धं जहाति हापयतीति वा शर्धंजहाः= माषाः। शर्धोऽपानशब्दः। 'वातशुनी-तिलशर्धेषु अजधेट्जहातीनाम्—' (वा. 3-2-28) इत्युपसंख्यानात् खश्। शित्त्वात् शप्। तस्य श्लुः। 'श्लौ' (6-1-10) इति द्विर्वचनम्। 'श्नाभ्यस्तयोः—' (6-4-112) इत्याकारलोपः। पूर्वपदस्य 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुम्।
8. पूर्वान् अपरांश्च जहातीत्यर्थः। बाहुलकात् कर्तरि ल्युट्। अजादि (4-1-4) पाठात् टाप्। णत्वम्। 'सम्प्रहाणा' इत्यपि अजादिषु पठन्तीत्यात्रेयादिमतमिति माधवः।
9. जहातीति जहकः त्यागी, कालपुरुषश्च। 'जहातेर्द्वे च' (द. उ. 3-6) इति क्वुन्, द्वित्वं च।
10. 'नञि जहातेः' (द. उ. 6-52) इति कनिन्प्रत्यये आकारलोपः। अहः=दिनम्।
11. 'कलं जहातीति कलहः। 'सुपि—' (3-2-5) इति कप्रत्ययः। आकारलोपः।' इति क्षीरस्वामी।
12. 'नौ ह्वः' (द. उ. 3-22) इति कन्। निहाका गोधा।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(1999) "ओ हाङ् गतौ" (III-जुहोत्यादि:-1089. सक. अनिट्. आत्म.)

'गतौ त्यागे यथासंख्यं जिहीते च जहाति च ।' (श्लो. 11) इति देवः । हायकः-यिका, हापकः-पिका, जिहासकः-सिका, जाहायकः यिका ; हानः-हानवान्, हायनः, हानिः इत्यादीनि रूपाणि जौहोत्यादिकददातिवत् (830) बोध्यानि ।

(2000) "हि गतौ वृद्धौ च" (V-स्वादि:-1257. सक-अक. अनि. पर.)

हायकः-यिका, हायकः-यिका, [1]जिघीषकः-षिका, [2]जेघीयकः-यिका ; इत्यादीनि रूपाणि सर्वाणि पिधातुवत् (991) बोध्यानि । [3]प्रहिण्वन्-ती, [4]प्रजिघाययिषन्-न्ती, [5]सहितम्-संहितम्, संहिता, [6]हयः-हयी, [7]हेतिः, [8]हेतुः, इति विशेषरूपाणि ।

(2001) "हिक्क अव्यक्ते शब्दे" (I-भ्वादि:-861. अक. सेट्. उभ.)

भौवादिककुडतिवत् (156) सर्वाणि रूपाणि बोध्यानि । [9]हिक्का ।

---

1. सनि 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । 'हेरचङि' (7-3-56) इति अभ्यासादुत्तरस्य कुत्वेन घकारः । एवं सन्नन्तेऽत्र धातौ सर्वत्र बोध्यम् ।
2. यङन्तेऽपि 'हेरचङि' (7-3-56) इति कुत्वं बोध्यम् ।
3. शतरि, स्वादित्वात् श्नुप्रत्ययः, गुणनिषेधः । 'हिनुमीना' (8-4-15) इति णत्वम् ।
4. ण्यधिकस्यापि 'हेरचङि' (7-3-56) इति कुत्वम् । अत्र णिजन्तात् सन् । तदन्तात् शता ।
5. सम्पूर्वकात् अस्मात् निष्ठायाम् 'समो वा हिततयोः' (वा. 6-1-144) इति समो मकारस्य लोपविकल्पः । 'संहिता' इति तु 'क्तिच्क्तौ च संज्ञायाम्' (3-3-74) इति क्तान्तः वेदसंहितावाचिका ।
6. पचाद्यचि हयः=अश्वः । अतिशयेन गच्छतीत्यर्थः । हयी इति तु गौरादिङीषन्तः ।
7. 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (3-3-97) इति निपातनात् क्तिनि प्रकृतेर्गुणः । हेतिः=आयुधम् ।
8. औणादिके (द. उ. 1-125) तुन्प्रत्यये रूपम् । हेतुः=कारणम् ।
9. 'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः स्त्रियाम् । हिक्का=वायोः बलात्कारेण मुखात् निस्सारणम्, यस्याः भाषायाम् 'विक्कल्' इति नाम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(2002) "**हिट आक्रोशे**" (I-भ्वादिः-317. (पा) सक. सेट्. पर.)

'हिठ' इति केचित् । भौवादिक**केटति**वत् (190) सर्वाणि रूपाण्यूह्यानि ।

(2003) "**हिडि गत्यनादरयोः**" (I-भ्वादिः-268. सक. सेट्. आत्म.)

भौवादिक**कुण्ठति**वत् (209) रूपाणि बोध्यानि । **हिडिम्भः**=असुरविशेषः ; औणादिकोऽयम् ।

(2004) "**हिल भावकरणे**" (VI-तुदादिः-1361. अक. सेट्. पर.)

भावकरणम्=अभिप्रायसूचनम् । **हेला**=परविषयकानादररूपभावसूचनम् । भिदादिपाठात् अङ् । गुणो बाहुलकात् । इतराणि सर्वाण्यपि रूपाणि तौदादिक**किलति**वत् (193) बोध्यानि ।

(2005) "**हिवि प्रीणनार्थः**" (I-भ्वादिः-591. सक. सेट्. पर.)

भौवादिक**जिन्वति**वत् (604) सर्वाणि रूपाण्यूह्यानि ।

(2006) "**हिष्क हिंसायाम्**" (X-चुरादिः-1686. सक. सेट्. उभ.)

आकुस्मीयः ।

क्वाचित्कोऽयं पाठो धातुकोशेषु । सर्वाण्यपि रूपाणि चौरादिक**चित्रयति**वत् (525) ऊह्यानि ।

(2007) "**हिसि हिंसायाम्**" (VII-रुधादिः-1456. सक. सेट्. पर.)

[1]हिंसकः, [2]हिंस्रः, [3]हिंसा, [4]हिंसन्-ती, [5]सिंहः इति विशेषरूपाणि । सामान्यरूपाणि **कुंशयति**वत् (232) बोध्यानि ।

---

1. 'निन्द**हिंस**—' (3-2-146) इति ताच्छीलिको वुञ् । **हिंसकः**=क्रूरः ।
2. 'नमिकम्पिस्म्यजसकम**हिंस**दीपो रः' (3-2-167) इति ताच्छीलिको रप्रत्ययः । 'नेड् वशि कृति' (7-2-8) इतीण्निषेधः ।
3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः ।
4. शतरि 'रुधादिभ्यः—' (3-1-78) इति श्नम् विकरणप्रत्ययः । 'श्नसोरल्लोपः' (6-4-111) इति अकारलोपः । 'श्नान्नलोपः' (6-4-23) इति प्रत्ययनकारलोपः । इदित्वात् नुम् तु सर्वत्र श्रूयत एव । सर्वत्र प्रयोगेषु इदित्त्वप्रयुक्तनुमः 'नश्चापदान्तस्य झलि' (8-3-24) इत्यनुस्वारः ।
5. पचाद्यचि हिनस्तीति **सिंहः** । '**सिंहो** वर्णविपर्ययात्' इत्युक्तेः पृषोदरादित्वात् (6-3-109) वर्णयोर्विपर्ययः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(2008) " हिसि हिंसायाम् " (X-चुरादि:-1830. सक. सेट्. उभ.)

आधृषीयः ।

इदित्त्वादेवास्य णिज्विकल्पे सिद्धे युजादिषु (चुरादौ) पाठः चिन्त्यप्रयोजन इति **माधवादयः** । रूपाणि सर्वाण्यपि **कुंशयतिवत्** (232) ऊह्यानि ।

(2009) " हु दानादनयोः "

(III-जुहोत्यादि:-1083. सक. अनिट्. पर.)

'दानादानयोः' इत्येके । दानमत्र 'चोदित आधारे हविःप्रक्षेपः' इति **माधवः** । 'जीव' धातौ प्राणस्येव अत्रापि दाने हविषो अन्तर्भावात् अकर्मकत्वं **केचिदङ्गीचक्रुः** । 'तृतीया च होश्छन्दसि' (2-3-3) इत्यत्र **भाष्ये** तु 'जुहोतिः प्रक्षेपे वर्तते' इत्युक्तम् । 'अग्निषु हूयमानेषु' इत्यादिषु प्रीणनार्थकत्वमपि **भाष्यसम्मतम्** । [1]होता, क्षीरहोता, [2]जुह्वद् ब्राह्मणः, [3]जुहूः, [4]हाव्यम्, [5]होमः, [6]होत्रम् - अग्निहोत्रम्, होत्रा, [7]हविः इति विशेषरूपाणि । सामान्यरूपाणि जौहोत्यादिकक्रिधातुवत् (189) बोध्यानि ।

(2010) " हुडि वरणे " (I-भ्वादि:-269. सक. सेट्. आत्म.)

वरणम्-स्वीकारः । 'हरणम्' इति **मैत्रेयः** । हुण्डी=धनप्रक्षेपस्थानम् ।

---

1. 'ऋत्विक्षु चानुपसर्गस्य' (वा. 3-2-135) इति ताच्छीलिकस्तृन् । 'अप्तृन्—' (6-4-11) इत्यादिना सर्वनामस्थाने दीर्घः । **होता**=ऋत्विग्विशेषः । **क्षीरहोता** इति तु याजकादित्वात् (2-2-9) समासे साधुः ।
2. शतरि, '**जुहोत्यादिभ्यः**—' (2-4-75) इति शपः श्लुः । 'श्लौ' (6-1-10) इति द्विर्वचनम् । 'हुश्नुवोः सार्वधातुके' (6-4-87) इत्यजादिक्ङित्प्रत्ययत्वे शतुः अत्रापि यण् । 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः ।
3. 'द्युतिगमिजुहोतीनां द्वे च' (वा. 3-2-168) इति करणे क्विप्, द्वित्वं च । जुह्वत्यनयेति **जुहूः**-स्रुक् ।
4. 'ओरावश्यके' (3-1-125) इति ण्यत् । अवश्यं होतव्यं यत् देवार्हमेव हविः, तदुच्यते **हाव्यमिति** । अजन्तत्वलक्षणयतोऽपवादः ।
5. औणादिके (द. उ. 7-26) मन्प्रत्यये **होमः**=अग्नौ पूजितस्य द्रव्यस्य प्रक्षेपः ।
6. 'हुयामा—' (द. उ. 8-84) इति त्रन्प्रत्ययः । ऋत्विग्वाचको **होत्राशब्दस्तु** स्वभावात् स्त्रीलिङ्गः इति '**होत्राभ्यश्छः**' (5-1-135) इत्यत्र **पदमञ्जरी** ।
7. औणादिके इसिप्रत्यये रूपम् । हूयते इति **हविः**=देवतोद्देशेन मन्त्रसंस्कृतं दधिपय-आज्यादिकं द्रव्यम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हुण्डिका=मुद्रा। भौवादिक**कुण्ठति**वत् (209) रूपाण्यूह्यानि। '**भ्वादावेव द्रमिडाः** ' हुडि सङ्घाते ' इति पठन्ति, **आर्यास्तु** न पठन्ति; ' इति **काश्यप**मतप्रदर्शनपूर्वकं **माधवीये** प्रतिपादितम्।

(2011) " **हुड़ गतौ** " (I-भ्वादि:-352. सक. सेट्. पर.)

'**हौडतीति गतौ** होडेर्होडतेऽनादरे पुनः।' (श्लो. 86) इति **देवः**। भौवादिक**तोडति**वत् (738) सर्वाण्यपि रूपाण्यूह्यानि।

(2012) " **हुर्छा कौटिल्ये** " (I-भ्वादि:-211. सक. सेट्. पर.)

'**कौटिल्यम्**=अपसारणम् ' इति **मैत्रेयः**। हूर्छा, [1]हूः-हुरौ-हुरः, [2]हूर्णः-हूर्णवान्, हूर्णमनेन-हूर्छितमनेन, इति विशेषः। सामान्यरूपाणि **कूजति**वत् (239) बोध्यानि।

(2013) " **हुल गतौ** " (I-भ्वादि:-844. सक. सेट्. पर.)

ज्वलादिः।

'हिंसासंवरणयोश्च ' इति **मैत्रेयः**। होलः। ज्वलित्यादित्वात् (3-1-140) कर्तरि णप्रत्ययः। गौरादिपाठात्, संज्ञायां घञन्तात् स्त्रियां ङीषि-**होली**=औत्तर-क्रीडाविशेषः। भौवादिक**कोलति**वत् (231) इतररूपाण्यूह्यानि।

(2014) " **हूड़ गतौ** " (I-भ्वादि:-353. सक. सेट्. पर.)

भौवादिक**तोडति**वत् (738) सर्वाणि रूपाण्यूह्यानि।

(2015) " **हृ प्रसह्यहरणे** "

(III-जुहोत्यादि:-1097. सक. अनि. पर.)

'**प्रसह्यहत्यां हरणे जिहर्ति** हरते हरेत्॥' (श्लो. 27) इति **देवः**। अयं **छान्दसः** इति 'अर्तिपिपर्त्योश्च ' (7-4-77) इत्यत्र **भाष्ये** स्पष्टम्। ' अयं स्रुवो **अभिजिहर्ति** होमान् ' (आपस्तम्बश्रौतसूत्रे 4-7-2)। **कातन्त्रीयास्तु** भाषायामपि धातुममुं पठन्ति। सर्वाण्यपि रूपाणि जौहोत्यादिक**गरति** (420) वत् बोध्यानि।

---

1. क्विपि ' राल्लोपः ' (6-4-21) इति छकारस्य लोपः। ' र्वोरुपधायाः— ' (8-2-70) इति दीर्घः। सर्वत्र प्रयोगे पदान्तत्वनिबन्धनः, उपधादीर्घोऽस्य द्रष्टव्यः।
2. निष्ठायाम्, ' आदितश्च ' (7-2-16) इतीण्निषेधे, राल्लोपे, ' रदाभ्यां— ' (8-2-42) इति निष्ठानत्वम्। णत्वम्। भावे, आदिकर्मणि च धातोरिण्निषेधविकल्पः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(2016) " हृञ् हरणे " (I-भ्वादि:-899. सक. अनि. उभ.)

'प्रसह्यहृत्यां हरणे जिहर्ति हरते हरेत् ॥' (श्लो. 27) इति देवः ।

हरणम्=प्रापणम्, स्वीकारः, स्तैन्यम्, नाशनं च ।

[1]हारयन् भारं देवदत्तं यज्ञदत्तो गच्छति, [2]संप्रहरमाणा राजानः, 'ततः [3]सम्प्रहरिष्यन्तौ दृष्ट्वा कर्णधनञ्जयौ', पैतृकमश्वाः [4]अनुहरमाणाः, मातृकं गावोऽनुहरमाणाः, शतस्य [5]व्यवहरन्-न्ती, [6]प्रतिहर्ता, [7]हरिष्यन्-न्ती, हरिष्यमाणः, [8]अवहारः, [9]अंशहरः, [10]भारहारः, [11]कवचहरः, [12]पुष्पाहरः,

---

1. 'हृक्रोरन्यतरस्याम्' (1-4-53) इति अणौ कर्तुः णौ कर्मसंज्ञा ; तेन देवदत्तशब्दात् द्वितीया ।
2. हरतेर्हिंसार्थत्वेऽपि 'न गतिहिंसार्थेभ्यः' (1-3-15) इति आत्मनेपदनिषेधो न भवति । 'हृवह्योरप्रतिषेधः' (वा. 1-3-15) इति वचनात् ।
3. अत्र युद्धाभिमुख्यमात्रमर्थः, न तु कर्मव्यतीहारः-तेन परस्मैपदम् । विस्तरस्त्वत्र **माधवीये** द्रष्टव्यः ।
4. 'हरतेर्गतताच्छील्ये' (वा.1-3-21) इति आत्मनेपदम् । **गतं**=प्रकारः, तस्य स्वभावः ताच्छील्यम् । पितृगुणमश्वाः, मातृगुणं गावश्च लभन्ते इति वाक्यार्थः । 'गतिताच्छील्ये' इति **न्यासकारक्षीरस्वामिनौ** । **गतिः**=गमनम् । अर्थात् वेगादिकं गृह्यते ।
5. कर्मणः '**व्यवहृ**पणोः समर्थयोः' (2-3-57) इति शेषे षष्ठी 'शतस्य' इति ।
6. 'तृन्विधौ ऋत्विक्षु चानुपसर्गस्य' (वा. 3-2-135) इति वचनात् अत्र च सोपसर्गत्वात् 'ण्वुल्तृचौ' (3-1-133) इति तृच् । प्रति**हर्ता**=ऋत्विग्विशेषः ।
7. धातोरनिट्त्वेऽपि स्ये '**ऋद्धनोः** स्ये' (7-2-70) इतीडागमः ।
8. अवहरतीति **अवहारः**=ग्राहः, ग्रहो वा । 'श्याद्व्यधास्रुसंस्रु**व**तीणवसावहृ—' (3-1-141) इति कर्तरि णप्रत्ययः ।
9. अंशं हरतीति **अंशहरः** । '**हरतेरनुद्यमनेऽच्**' (3-2-9) इति अच्प्रत्ययः । **अनुद्यमनम्**=अनुपेक्षणम्, यस्य हरणेन शारीरक उद्यमः=प्रयत्नो न भवति तदुच्यते ।
10. शारीरक उद्यमे विवक्षिते तु 'कर्मण्यण्' (3-2-1) इति अत्र अण्प्रत्ययः । उपपदसमासः । वृद्धिः ।
11. 'वयसि च' (3-2-10) इति कर्मोपपदादस्मात् वयसि गम्ये **हरतेरच्**प्रत्ययः । **कवचहरः**=कवचधारणयोग्यवयोविशिष्ट इत्यर्थः ।
12. आङुपसृष्टात्, कर्मोपपदात् अस्मात् ताच्छील्ये गम्ये 'आङि ताच्छील्ये' (3-2-11) इति अच् । **पुष्पाहरः**=यः पुष्पविक्रयादिभिः, मालाग्रथनादिभिश्च पुष्पैकजीवी, स उच्यते । एवं **तृणाहरः**, **दर्भाहरः**, **शाकाहरः** इत्याद्यप्युदाहार्यम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]दृतिहरिः-नाथहरिर्वा पशुः, [2]संहारः, अवहारः, [3]हारः, [4]हारा, [5]आहारः, [6]हरः-पश्यतोहरः, [7]हरिः-हरिणी, हरितः, हृदयम्, हरिमाणः, हरीमा, प्रहिः, हरेणुः, इति विशेषरूपाणि। सामान्यरूपाणि भौवादिकभरतिवत् (1170) बोध्यानि।

(2017) "हृष तुष्टौ" (IV-दिवादिः-1229. अक. सेट्. पर.)

'........क्रमतोऽलीके तुष्टौ हर्षति हृष्यति।' (श्लो. 176) इति **देवः**। "'हृषु' इति **नन्दी, स्वामी** च"-इति **माधवः**। **क्षीरस्वामी** 'हृष' इत्येव पपाठ। [8]हृष्टः, हृषितः, [9]संहृष्टानि-संहर्षितानि लोमानि। हृष्टश्चैत्रः, हृष्टाः

---

1. दृतिशब्दे नाथशब्दे च कर्मभूते उपपदे सति पशौ विशेष्ये, '**हरतेर्दृतिनाथयोः** पशौ' (3-2-25) इतीन्प्रत्ययः। **दृतिं**=चर्मभस्त्रिकां हरतीति **दृतिहरिः**=श्वा। **नाथं**=नासारज्जुं हरतीति **नाथहरिः**=पशुः।
2. संह्रियन्तेऽनेन, अत्र इति वा **संहारः**=युद्धम्, प्रलयश्च। '**अध्यायन्यायोद्याव-संहाराश्च**' (3-3-122) इति निपातनात् घञ्। सूत्रे चकारस्यानुक्तसमुच्चायार्थ-कत्वात् **अवहारः** इत्यपीति **काशिका**। **अवहारः**=चोरः। घापवादो घञ्। उपसर्गेण धातोरर्थाः भिद्यन्ते; तथाचोक्तं **पूर्वैः**—
   "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
   विहाराहारसंहारप्रहारपरिहारवत्॥" इति।
3. 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति घञ्। ह्रियते पश्यतां मनोऽनेनेति **हारः**=मुक्तादिसरः।
4. भिदादि (3-3-104) पाठात् स्त्रियामङि, 'ऋदृशोऽङि—' (7-4-16) इति गुणे, गणपाठादेव दीर्घे च रूपम्। हरणं **हारा**।
5. आह्रियन्तेऽस्मात् रसाः इति **आहारः** भोजनम्। एवम् **अभ्यवहारः** इत्यपि। अत्र 'अकर्तरि च—' (3-3-19) इति घञ्।
6. हरति पापादिकमिति **हरः**=शिवः। पचाद्यच्। प्रणतार्तिं हरतीति **प्रणतार्तिहरः**। अत्र '**हरतेरनुद्यमने**—' (3-2-9) इति अच्। पश्यन्तं अनादृत्य हरतीति **पश्यतोहरः**-कस्यचित्संज्ञा। 'षष्ठी चानादरे' (2-3-38) इति षष्ठी। 'षष्ठ्या आक्रोशे' (6-3-21) इति षष्ठ्या अलुक्।
7. हरति नतानां क्लेशादीन् इति **हरिः**=विष्णुः। अत्र '**हरतेर्दृतिनाथयोः** पशौ' (3-2-25) इत्यत्र योगविभागेन इन्प्रत्ययः। **केचित्** तु योगविभागे **भाष्यादि-**प्रमाणाभावात् औणादिके इन्प्रत्यये साधयन्ति।
8. धातोः सेट्त्वेऽपि 'विस्मितप्रतिघातयोश्च' (वा. 7-2-29) इति वचनात् इड्विकल्पो निष्ठायाम्। अनिट्पक्षे तकारस्य ष्टुत्वेन टकारः। विस्मितत्वं विषण्णत्वं च दन्ताः सूचयन्तीति भावः।
9. '**हृषेर्लोमसु**' (7-2-29) इति लोमसु वाच्येषु निष्ठाया इड्विकल्पः। प्राप्तविभाषे-यम्। 'लोमानि अङ्गजानि, केशाश्च' इति **वृत्तिः**। तुष्टिं लोमानि सूचयन्तीत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दन्ताः, हृषिता वा। [1]हर्षयित्नुः। [2]हर्षुलः। हर्षः-श्रीहर्षः, प्रहर्षी। सामान्यरूपाणि भौवादिकरेषतिवत् (1408) बोध्यानि।

(2018) "हृषु अलीके" (I-भ्वादिः-709. अक. सेट्. पर.)

'....क्रमतोऽलीके तुष्टौ हर्षति हृष्यति।' (श्लो. 176) इति **देवः**। '**अलीकम्=आनन्दः**' इति **काशकृत्स्नधातुपाठकन्नडव्याख्या**। [3]हृष्टः, [4]हृष्टो लोम हृषितं वा, 'भयसंहृष्टरोमाणः' (भट्टिः-9.22), [5]हृष्टो दन्तः, हृषितो वा, [6]हृष्यम्। सामान्यरूपाणि सर्वाणि **पोषति**वत् (1026) बोध्यानि।

(2019) "हेठ विबाधायाम्" (I-भ्वादिः-266. अक. सेट्. आत्म.)

विबाधनम्=शाठ्यम्। 'अमुं परस्मैपदिष्वपि **केचित्** पठन्ति' इति **माधवः**। भौवादिकतेकृधातुवत् (716) रूपाणि ऊह्यानि। 'हेठ' इति क्र्यादिष्वपि गृह्णातेः पूर्वं **केचित्** पठन्ति। तेषां [7]हेठ्नन् इति शतरि रूपमिति विशेषः।

(2020) "हेड वेष्टने" (I-भ्वादिः-778. सक. सेट्. पर.) **घटादिः**।

'हेडतेऽनादरे हेडेर्वेष्टने **हिडयेन्मिथः**॥' (श्लो. 85) इति **देवः**।

हेडकः-डिका, हेडकः-डिका, हिहेडिषकः-षिका, हेहेडकः-डिका; इत्यादीनि रूपाणि भौवादिक**केलति**वत् (262) यथासम्भवमूह्यानि। अनादरार्थकस्य भौवादिकस्यैव मित्त्वार्थं परस्मैपदार्थं च घटादिषु पाठ इति **केचित्**।

(2021) "हेडृ अनादरे" (I-भ्वादिः-284. सक. सेट्. आत्म.)

'**हेडतेऽनादरे हेडेर्वेष्टने** हिडयेन्मिथः॥' (श्लो. 85) इति **देवः**। सर्वाणि रूपाणि भौवादिक**केलति** (262) वत् यथासम्भवमूह्यानि।

---

1. णिजन्तात् औणादिके इत्नुच्प्रत्यये रूपमेवम्।
2. '**हृषेरुलच्**' (द. उ. 8-106) इत्युलच्प्रत्ययः। **हर्षुलः**=सन्तुष्टः।
3. धातोरुदित्त्वात् क्त्वायामिड्विकल्पः। तेन निष्ठायामिण्निषेधः।
4. निष्ठायामस्य धातोः इटः प्राप्त्यभावात् '**हृषेर्लोमसु**' (7-2-29) इति लोमसु वाच्येषु इड्विकल्पो विधीयते। अत्राप्राप्तविभाषा।
5. '**हृष्टो** दन्तः' इत्यत्र भग्न इत्यर्थः। '**विस्मितप्रतिघातयोश्च**' (वा. 7-2-29) इति इड्विकल्पः।
6. '**ऋदुपधात्—**' (3-1-110) इति क्यप्।
7. शतरि '**क्र्यादिभ्यः—**'(3-1-81) इति श्ना विकरणप्रत्ययः। '**श्नाऽभ्यस्तयोः—**' (6-4-112) इत्याकारलोपः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(2022) **"हेषृ अव्यक्ते शब्दे"** (I-भ्वादि:-621. अक. सेट्. आत्म.)

स्वभावादयं अश्वशब्दे वर्तते। हेषा-स्त्रियामकारप्रत्ययः। 'अव्यक्ते शब्दे' इति धातुपाठे बहुत्र पठितम्। लोकप्रयोगानुसारेण तेषां प्रतिनियतविषयत्वं बोध्यम्। तथाहि—"कौक्षे कर्दति, पर्दते गुदरवे, रेषेति वार्के रवे[हसे], बुक्केति श्वरवे भषेति, हयजे हेषेति **हेषेति** च॥' इति **केशवस्वामी**—" इति **माधवीये** प्रतिपादितम्। यथासम्भवं **केपति**वत् (261) रूपाण्यूह्यानि।

(2023) **"होडृ अनादरे"** (I-भ्वादि:-285. सक. सेट्. आत्म.)

'होडतीति गतौ होडेर्होडतेऽनादरे पुनः।' (श्लो. 86) इति **देवः**। भौवादिक**द्राखति**वत् (879) सर्वाणि रूपाण्यूह्यानि। अनीयर्प्रत्यये-अहोडनीयः। '**अहोडनीयान्** पशुपाल्यानसौ—' (धा. का. 1-38)।

(2024) **"होडृ गतौ"** (I-भ्वादि:-354. सक. सेट्. पर.)

होडन्-न्ती, इति शतरि रूपम्। '....प्रहूडितान् **होडद**रोडद्यभिक्षुकैः।' (धा. का. 1-46)। भौवादिक**खोरति**वत् (363) रूपाण्यूह्यानि। 'हौडृ—' इति **क्षीरतरङ्गिणी**।

(2025) **"हुङ् अपनयने"**

(II-अदादि:-1082. सक. अनिट्. आत्म.)

प्रायेणायं निपूर्वकः, अपपूर्वकोऽपि। देवदत्ताय [1]निह्नुवानः। ह्नावकः-विका, ह्नावकः-विका, जुह्नूषकः-षिका, जोह्नूयकः-यिका; होता-त्री, ह्नावयिता-त्री, जुह्नूषिता-त्री, जोह्नूयिता-त्री; इत्यादिकानि रूपाणि **क्नूञ्** (266) धातुवत् यथासम्भवमूह्यानि।

(2026) **"ह्मल चलने"** (I-भ्वादि:-806. सक. सेट्. पर.)

ह्मालकः-लिका, [2]ह्मलकः-प्रह्मलकः-ह्मालकः-लिका, जिह्मलिषकः-षिका, जाह्मलकः-लिका; इत्यादीनि रूपाणि भौवादिक**क्मरति**वत् (268) यथासम्भवमूह्यानि।

---

1. 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' (1-4-34) इति देवदत्तस्य सम्प्रदानत्वात् चतुर्थी। ज्ञीप्स्यमानः=बोधयितुमभिप्रेतः। देवदत्तविषयकं अपह्नवं बोधयितुमिच्छतीत्यर्थः।
2. 'ज्वलह्वलह्मलनमाम् अनुपसर्गाद् वा' (ग. सू. भ्वादि:) इति णौ मित्त्वविकल्पः। सोपसृष्टे तु नित्यं मित्त्वम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

(2027) "ह्वगे संवरणे" (I-भ्वादिः-787. सक. सेट्. पर.) **घटादिः।** **संवरणम्**=तिरोधानम् इति **धा. का.** व्याख्या (2-8)। रूपाणि सर्वाणि भौवादिक**स्खदि**वत् (142) बोध्यानि। घटादित्वेन मित्त्वात् णिजन्ते ह्रस्वः।

(2028) "ह्रस शब्दे" (I-भ्वादिः-731. अक. सेट्. पर.) धातूनामनेकार्थकत्वात् **ह्रासः** इत्यत्र अपक्षयोऽर्थः। [1]ह्रस्वम्। रूपाणि सर्वाणि भौवादिक**क्रश**तिवत् (1384) बोध्यानि।

(2029) "ह्राद अव्यक्ते शब्दे"

(I-भ्वादिः-26. अक. सेट्. आत्म.)

अव्यक्तशब्दः=वाद्यादिघोषः। [2]नूपुरह्रादः, [3]ह्रदः, माहिकिह्रदः, [4]ह्रादिनी, [5]निर्ह्रादः। सामान्यरूपाणि भौवादिक**गाध**तिवत् (394) यथासम्भवमूह्यानि।

(2030) "ह्री लज्जायाम्"

(III-जुहोत्यादिः-1085. अक. अनिट्. पर.)

'**ह्रीष्—**' इति **केचित्**। [6]ह्रीः, [7]ह्रीणः-ह्रीतः-ह्रीणवान्-ह्रीतवान्, [8]ह्रेपकः-

---

1. 'ह्रस्वं लघु' (1-4-10) इति निर्देशात् वप्रत्यये, 'नेड् वशि कृति' (7-2-8) इतीण्निषेधे च साधुः। अत्र अल्पत्वं धात्वर्थः।
2. घञन्तोऽयम्। नूपुरस्याव्यक्तशब्द इत्यर्थः।
3. पचाद्यचि पृषोदरादित्वात् (6-3-109) ह्रस्वे रूपमेवमिति **केचित्**। 'कन्थापलदनगरग्रामह्रदोत्तरपदात्—' (4-2-142) इत्यत्र निर्देशात् ह्रस्व इति **परे**। **माहिकिह्रदः** वाहीकदेशेषु ग्रामविशेषः।
4. ग्रह्यादित्वात् (3-1-134) णिनिप्रत्यये, स्त्रियां ङीपि च रूपमेवम्। **ह्रादिनी**=वज्रम्।
5. **निर्ह्रादः** वज्रघोषः। संज्ञायां घञ्।
6. क्विपि रूपमेवम्।
7. 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' (8-2-56) इति निष्ठानत्वविकल्पः। नत्वपक्षे णत्वम्।
8. णिजन्तात् ण्वुलि रूपमेवम्। 'अर्तिह्री—', (7-3-36) इत्यादिना पुगागमः। 'पुगन्तलघूपधस्य च' (7-3-86) इति गुणः। एवं ण्यन्तरूपेषु सर्वत्राप्यस्य धातोः प्रक्रिया ज्ञेया।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पिका, [1]जिह्रियत्-ती [2]ह्रीकः-ह्लीकः, इति विशेषः। सामान्यरूपाणि 'डु क्रीञ्' धातुवत् (274) बोध्यानि।

(2031) "ह्रीच्छ लज्जायाम्" (I-भ्वादिः-210. अक. सेट्. पर.)

दैवादिकक्लिश्यतिवत् (287) सर्वाण्यपि रूपाण्यूह्यानि।

(2032) "ह्रेषृ अव्यक्ते शब्दे" (I-भ्वादिः-622. अक. सेट्. आत्म.)

स्वभावादयमश्वशब्दे वर्तते। ह्रेषा=अश्वध्वनिः। 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः स्त्रियाम्। भौवादिकजेषतिवत् (429) सर्वाणि रूपाण्यूह्यानि।

(2033) "ह्लगे संवरणे" (I-भ्वादिः-788. सक. सेट्. पर.) घटादिः।

सर्वाणि रूपाणि भौवादिकक्रखतिवत् (142) बोध्यानि।

(2034) "ह्लप व्यक्तायां वाचि" (X-चुरादिः-1659. अक. सेट्. उभ.)

चौरादिकक्लापयतिवत् (282) रूपाणि सर्वाणि बोध्यानि।

(2035) "ह्लस शब्दे" (I-भ्वादिः-712. अक. सेट्. पर.)

भौवादिकरसतिवत् रूपाण्यूह्यानि। घञि ह्लासः। 'तोसह्लासविहीनशङ्खजनितह्लासात् रसद्दिक्तटम्॥' (धा. का. 1-88)।

(2036) "ह्लादी सुखे च" (I-भ्वादिः-27. अक. सेट्. आत्म.)

चकारात् पूर्वधात्वर्थः 'अव्यक्तशब्दे' इति अनुषज्यते। [3]आह्लन्नः-आह्लन्नवान्, [4]आह्लत्तिः। रूपाणि गाधतिवत् (394) यथासम्भवमूह्यानि।

(2037) "ह्वल चलने"

(I-भ्वादिः-931. अक. सेट् पर.) घटादिः।

---

1. शतरि श्लौ, द्विर्वचने, 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधे इयङादेशे च रूपम्।
2. 'ह्रियः कन्, [कुग्] रश्च लो वा' (द. उ. 1-153) इति कन्प्रत्ययः। बाहुलकात् कनः ककारस्य न इत्संज्ञा। पक्षे धातुरेफस्य लकारोऽपि। ह्लीकः—लज्जाविशिष्टः।
3. 'श्वीदितः—' (7-2-14) इति निष्ठायामिण्निषेधः। 'ह्लादो निष्ठायाम्' (6-4-95) इति निष्ठायां ह्रस्वे निष्ठातकारधातुदकारयोर्नत्वे च रूपमेवम्।
4. क्तिनि रूपमेवम्। 'ह्लादः—' (6-4-95) इत्यत्र योगविभागात् क्तिन्यपि ह्रस्व इति काशिकादिषु स्पष्टम्। भाष्ये योगविभागो न दृश्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ह्वालकः-लिका, ह्वलकः-प्रह्वलकः-ह्वालकः-लिका, जिह्वलिषकः-षिका, जाह्वलकः-लिका ; इत्यादीनि रूपाणि भौवादिकस्खलथतिवत् (280) यथासम्भवमूह्यानि ।

(2038) "**ह्वृ कौटिल्ये**" (I-भ्वादिः-931. अक. अनि. पर.)

ह्वारकः-रिका, ह्वारकः-रिका, [2]जुह्वर्षकः-र्षिका, जाह्वरकः-रिका; इत्यादीनि रूपाणि यथासम्भवमूह्यानि। [3]उपह्वरः। [4]ह्वरिष्यन्-न्ती ।

(2039) "**ह्वेञ् स्पर्धायां शब्दे च**"

(I-भ्वादिः-1008. अक. अनि. उभ.)

ह्वायकः-यिका, [5]ह्वायकः-यिका, [6]जुहूषकः-षिका, [7]जोहूयकः-यिका ;
ह्वाता-ह्वात्री, ह्वाययिता-त्री, जुहूषिता-त्री, जोहूयिता-त्री ;
इत्यादीनि रूपाणि सर्वाण्यपि **वयति**वत् (1640) बोध्यानि ।
[8]जुहावयिषुः, [9]निह्वयमानः, संह्वयमानः-उपह्वयमानः-विह्वयमानः, [10]आह्वयमानो

---

1. 'ज्वलह्वल—' (ग. सू. भ्वादिः) इत्यादिना णिजन्ते मित्त्वविकल्पः । सोपसृष्टात् तु नित्यं मित्त्वम् ।
2. सन्नन्ते 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'उद् ओष्ठ्यपूर्वस्य' (7-1-102) इति दीर्घे च रूपमेवम् ।
3. पचाद्यचि रूपमेवम् । **उपह्वरः**=एकान्तवार्ता ।
4. 'ऋद्धनोः स्ये' (7-2-70) इतीडागमः ।
5. 'आदेचः—' (6-1-45) इत्यात्वे, 'शाच्छासाह्वा—' (7-3-37) इति णिजन्ते सर्वत्र युगागमः । आदन्तलक्षणपुकोऽपवादः ।
6. 'अभ्यस्तस्य च' (6-3-33) इति सम्प्रसारणम्, पूर्वरूपम्, 'हलः' (6-4-2) इति दीर्घः । धातोरधुना उकारान्तत्वात् 'इको झल्'(1-2-9) इति सनः कित्त्वम् । तेन गुणो न । एवमेव सन्नन्ते सर्वत्र प्रक्रिया ।
7. यङन्तेऽपि 'अभ्यस्तस्य च' (6-3-33) इति सम्प्रसारणादिकं बोध्यम् । उत्तरखण्डे 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः ।
8. ण्यन्तात् सनि उप्रत्यये 'ह्वः सम्प्रसारणम्' (6-1-32) इति सम्प्रसारणे च रूपमेवम् ।
9. '**निसमुपविभ्यो ह्वः**' (1-3-30) इति आत्मनेपदम् ।
10. 'स्पर्धायामाङः' (1-3-31) इति आत्मनेपदम् । स्पर्धमान आह्वानं करोतीत्यर्थः । "अत्र स्पर्धा धात्वर्थस्य शब्दनस्य हेतुतया विषयः" इति काशिकादिषु स्पष्टम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मल्लो मल्लम्, [1]आह्वः-प्रह्वः, [2]आहूयमानः, आहूतः-आहूतवान्, हूत्वा-आहूय, [3]स्वर्गाह्वायः, [4]आह्वयः, [5]निहवः-अभिहवः-विहवः [6]आहवः, [7]हवः, [8]आहावः, [9]आह्वाः, [10]आहूतिः-संहूतिः, इति विशेषरूपाणि ।

---

1. 'सर्वत्र प्रसारणिभ्यो डः' (वा. 3-2-48) इति वचनात् कर्तरि आदन्तत्वल-क्षणकप्रत्ययस्यापवादो डप्रत्ययः। डित्वात् टिलोपः। **भाष्ये** तु 'आतोऽनुपसर्गे कः' (3-2-3) इत्यत्र कप्रत्यये सम्प्रसारणे, यणि **आह्वः** इत्यपीति साधितम्।

2. यगन्ताच्छानचि 'वचिस्वपियजादीनां किति' (6-1-15) इति सम्प्रसारणे 'हलः' (6-4-2) इति दीर्घे च रूपम्। एवं क्त्वा-ल्यप्-क्तादिष्वपि प्रक्रियोह्या।

3. 'ह्वावामश्च' (3-2-2) इति कर्मण्युपपदेऽण्प्रत्ययः। आदन्तलक्षणकप्रत्ययापवादः।

4. बाहुलकात् **आह्वयः** इति **क्षीरस्वामी**। अत्र 'इच्छा' (3-3-101) इति सूत्रे **प्रक्रियासर्वस्वम्**।
'बाहुलकाद् **आह्वयतेः** शः पुंस्त्वं चेति भाषते **स्वामी**।
शित्वादात्वाभावः, शपि सति पररूपम्—**आह्वयो** नाम ॥' इति।
नामेति। '**आह्वयः**' इत्यनेन **नाम**=अभिधानमुच्यत इत्यर्थः।

5. '**ह्वः सम्प्रसारणं च न्यभ्युपविषु**' (3-3-72) इति भावेऽप्प्रत्यये सम्प्रसारणादिकम्।

6. अप्प्रत्यये, 'आङि युद्धे' (3-3-73) इति सम्प्रसारणम्। **आहवः**=युद्धः।

7. 'भावेऽनुपसर्गस्य' (3-3-75) इति सम्प्रसारणम्। अप्।

8. '**निपानमाहावः**' (3-3-74) इति निपातनात् साधुः। उपकूपं जलाशये विवक्षिते भावेऽप्प्रत्यये सम्प्रसारणवृद्धी निपातनात्। **आहावः**=यत्र गावो जलाशये पानार्थमाहूयन्ते स प्रदेशः।

9. 'आतश्चोपसर्गे' (3-3-106) इत्यङि 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः। **आह्वा** नाम।

10. अत्र बाहुलकात् स्त्रियां क्तिन्। 'आतश्चोपसर्गे' (3-3-106) इत्यङोऽपवादः।

॥ शुभं भूयात् ॥

SRI AUROBINDO LIBRARY PONDICHERRY (India)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रीरामसुब्बशास्त्रिभिरेतच्छिष्यैश्च विरचिताऽस्माभिः ।
राघवनिर्दिष्टदिशा संस्कृतविद्यासमित्युपक्रान्ता ॥

श्रीविश्वनाथदत्तप्रोत्साहप्रेरिता सेयम् ।
सुमनःकण्ठे नित्यं विलसतु माला कृदन्तरूपाणाम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry